कनिष्ठ, वि. (सं.) अल्पिष्ठ, लघिष्ठ, यविष्ठ २. निकृष्ट, तुच्छ, क्षुद्र ।

कनिष्ठा, सं. स्त्री. (सं.) कनिष्ठिका, कनीनी, दुर्वलांगुलिः (स्त्री.) २. यविष्ठा पत्नी ।

कनी, सं. स्त्री. (सं. कणी) हीरकतंडुलादीनां सूक्ष्मखंडः-डम् २. विंदुः, द्रप्सः ।

कनीनिका, सं. स्त्री. (सं.) तारा, तारका २. कनिष्ठा ।

कनेठी, सं. स्त्री. (हिं. कान + ऐंठना) कर्ण,-कर्षणं-मोटनम् ।

कनेर, सं. पुं. (सं. कणेरः) करवीरः, अश्वमारकः, वीरः, कुंदः, प्रचंडः ।

कनौज, सं. पुं. (सं. कान्यकुब्जम्) कन्याकुब्जं, गाधिपुरं, कौशम् ।

कनौड़ा, वि. (हिं. काना) काण, एकाक्ष २. हीनांग ३. अपमानित ४. क्षुद्र ५. उपकृत ।

कन्ना, सं. पुं. (सं. कर्णः >) उड्डीनक्रीडनकस्य वेधकसूत्रम् २. अग्रं, कोटिः (स्त्री.) ।

कन्नी, सं. स्त्री. (हिं. कन्ना) उड्डीनक्रीडनकपार्श्वाग्रे (द्वि. व.) २. अग्रं, कोटिः (स्त्री.) ३. शाटिकादीनामंचलः ।

—काटना, मु., दर्शनं परिहृ (भ्वा. प. अ.) ।

कन्या, सं. स्त्री. (सं.) कन्यका, कुमारी, बाला, बालिका, दारिका २. दुहितृ, पुत्री, सुता, तनया, तनुजा, आत्मजा ३. राशिविशेषः ।

—राशी, वि. (सं.-राशिः >) कन्याराशिज २. निर्बल ३. दुष्ट ।

कन्याट, वि. (सं.) कन्या,-बाधक-पीडक-सन्तापक ।

कन्सरवेटिव, वि. (अं.) प्राचीनतासमर्थक, नवीनता-विरोधिन् ।

कन्हाई, कन्हैया, सं. पुं. (सं. कृष्णः) श्रीकृष्णः २. सुंदरबालकः ३. प्रियपुरुषः ।

कप, सं. पुं. (सं.) वरुणः २. दैत्यजातिप्रकारः ।

कप, सं. पुं. (अं.) चषकः-कं, शरावः २. पुरस्कारचषकः-कम् ।

कपट, सं. पुं. (सं. न.) छलं, कैतवं, वंचना, प्रतारणा, छद्मन् (न.), दंभः, पाषंडः, व्याजः, शाठ्यम् ।

कपटी, वि. (सं.-टिन्) छलिन्, पाषंडिन्, शठ, कितव, दंभिन्, प्रतारक, वंचक ।

कपड़छन, सं. पुं. (हिं. कपड़ा + छानना) पटपवनम् २. वसनपूतम् ।

कपड़ा, सं. पुं. (सं. कर्पटः) वसनं, वस्त्रं, अंवरं, अंशुकं, पटः, वासस् (न.) २. परिधानं, वेशः,-षः, नेपथ्यम् ।

—पहिनना, क्रि. स., वस्त्राणि परिधा (जु. उ. अ.) -धृ (चु.)-वस् (अ. आ. से.) ।

—ऊनी, लोमज-ऊर्णामय,-वस्त्रम् ।

—पुराना, कर्पटः, चीरं, जीर्णवस्त्रम् ।

—महीन बढ़िया, दुकूलम् ।

—रेशमी, कौशेयं, कौशांवरं, क्षौमं, कौशम् ।

—सूती, तूलांवरं, फालं, कार्पासं, बादरम् ।

कपर्द, सं. पुं. (सं.) शिवजटाजूटः २. वराटकः ।

कपर्दिका, सं. स्त्री. (सं.) दे. 'कौड़ी' ।

कपाट, सं. पुं. (सं. पुं. न.) दे. 'किवाड़' ।

कपाल, सं. पुं. (सं. पुं. न.) दे. 'खोपड़ी' ।

—क्रिया, सं. स्त्री. (सं.) ज्वलच्छवस्य वेणुना कपालभेदनम् ।

कपाली, सं. पुं. (सं. कपालिन्) भैरवः, उमापतिः ।

कपास, सं. स्त्री. (सं. कार्पासः) तूलः-लं, धरः, पिचुः, पिचुलः । (पौदा) कर्पासवृक्षः, कार्पासी, सूत्रपुष्पा, वदरी-रा पटदः, छादनः ।

कपि, सं. पुं. (सं.) वानरः, मर्कटः २. गजः ३. सूर्यः ।

—ध्वजः, सं. पुं. (सं.) अर्जुनः ।

कपिल, सं. पुं. (सं.) मुनिविशेषः २. अग्निः । वि., कपिश, पिंगल ३. श्वेत ।

कपिला, सं. स्त्री. (सं.,)शुक्ला-विनेया,-गौः(स्त्री.)

कपिश, वि. (सं.) पाण्डुवर्ण, पिशंग, पिंगल, कपिल ।

कपीश, सं. पुं. (सं.) सुग्रीवः (२) हनुमत् ।

कपूत, सं. पुं. (सं. कुपुत्रः) कुतनयः, कुसूनुः ।

कपूर, सं. पुं. (सं. कर्पूरः-रम्) घनसारः, सितांगः, हिमवालुका, चंद्रः, सोमः, सिताभ्रः ।

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

कपूरी, वि. (सं. कर्पूर) घनसार-कर्पूर,-वर्ण-रंग ।

कपोत, सं. पुं. (सं.) दे. 'कबूतर' ।

कपोल, सं. पुं. (सं.) दे. 'गाल' ।

—कल्पना, सं. स्त्री. (सं.) मिथ्या कथा, कल्पित-वृत्तान्तः ।

कप्तान, सं. पुं. (अं. कैप्टेन) दलनायकः, अग्रगः २. सैन्याधिपतिः, सेनानीः ३. नौकाधिपतिः, पोताध्यक्षः ।

कफ[1], सं. पुं. (सं.) श्लेष्मन् (पुं.), खेटकः, बलासः २. शिं (सिं) घाणं, सिहाणं-नं । ३. हृदयकंठादिस्थो धातुभेदः (वैद्यक) ।

कफ़[2], सं. पुं. (फ़ा.) फेनः, डिंडीरः २. लाला, मुखस्रावः, द्राविका ।

कफ़[3], सं. स्त्री. (अ.) कर-हस्त,-तलः-तलम् ।

कफ़[4], सं. पुं. (अं.) पिप्पलाग्र,-अंशः-भागः ।

कफ़न, सं. पुं. (अ.) शववसनं, मृतकवस्त्रं, प्रेतपरिधानम् २. शव,-भाजनं-पेटकः ।

कफनी, सं. स्त्री. (अ. कफन >) शवग्रीवा-वस्त्रम् २. साधूनां ग्रीवावसनम् ।

कबंध, सं. पुं. (सं.) असुण्डं शरीरं, रुण्डः-डं, छिन्नमस्तको देहः २. राहुः ३. मेघः ४. राक्षसविशेषः ।

कब, क्रि. वि. (सं. कदा) कस्मिन् काले ।

—तक, क्रि. वि., कियत्,-कालं-चिरं, कदा-पर्यन्तम् ।

—से, क्रि. वि. कदारभ्य, कदाप्रभृति ।

कबड्डी, सं. स्त्री. (देश.) बालक्रीडाभेदः ।

कबर, सं. स्त्री. (अ. कब्र) प्रेतावटः, शवगर्तः, समाधिः ।

कबर (रि) स्तान, सं. पुं. (फ़ा. कब्रिस्तान) प्रेतभूमिः (स्त्री.), समाधिक्षेत्रम् ।

कबरा, वि. (सं. कर्बुर) चित्र, कल्माष, शार ।

कबाड़, सं. पुं. (सं. कर्पटः >) अवस्करः, तुच्छ-वस्तुसमूहः २. व्यर्थकार्यम् ।

कबाड़िया, कबाड़ी, सं. पुं. (हिं. कबाड़) अवस्करविक्रयिन् , व्यर्थवस्तुवणिज् (पुं.) ।

कबाब, सं. पुं. (अ.) भृष्टमांसं, शूलिकं, शूल्य-मांसम् ।

कबाबी, वि. (अ. कबाब >) मांसभक्षक २. मांसविक्रेतृ ।

कबाहत, सं. स्त्री. (अ.) अशुभं, कष्टं, विघ्नः, अनिष्टम् ।

कबित-त्त, सं. पुं. (सं. कविता >) हिन्दी-काव्यस्य छन्दोभेदः २. काव्यं, कविता ।

कबीला, सं. पुं. (अ.) पल्ली २. परिवारः ३. वंशः, गोत्रम् ।

कबूतर, सं. पुं. (फ़ा.) कपोतः, कलरवः, पारावतः, छेद्यः, रक्तलोचनः ।

—खाना, सं. पुं., कपोतविलम् २. (छत्री) कपोतपालिका, विटंकः ।

कब्ज, सं. स्त्री. (अ.) मलावरोधः, विड्ग्रहः, वद्धकोष्ठः ।

—कुशा, वि., वि-,रेचक, सारक । सं. पुं., रेचकं, सारकम् ।

कब्ज़ा, सं. पुं. (अ.) स्वामित्वं, अधिकारः २. मुष्टिः (स्त्री.), वारंगः ३. द्वारसंधिः ।

कभी, क्रि. वि. (हिं. कब + ही) कदाचित् , कदापि, कस्मिंश्चित् काले, कहिंचित् २. पुरा, प्राक् , एकदा ।

—का, क्रि. वि., चिरात्, चिरम् ।

—न कभी, क्रि. वि., कदाचित्तु, अद्य श्वो वा ।

कमंडल, सं. पुं. (सं. कमंडलुः) करंकः, करकः-कं, कुंडी ।

कमंद, सं. स्त्री. (फ़ा.) गुण-रज्जु,-पाशः-बंधनम् २. गुण-रज्जु,-अधिरोहणी-निश्रयणी ।

कम, वि. (फ़ा.) अल्प, दहर, दभ्र, स्तोक, लघु, ह्रस्व २. ऊन, न्यून, अल्पतर, अल्पीयस् , लघीयस् , क्षोदीयस् । क्रि. वि. अल्पं, स्तोकं, ईषत् , किंचित् , मनाक् ।

—उम्र, वि., अल्पवयस्क, बाल ।

—कीमत, वि. अल्पमूल्य, सुखक्रेय ।

—खर्च, वि., अल्प-मित,-व्ययिन् २. कृपण ।

—ज़ोर, वि., अल्प,-बल-शक्ति, दुर्बल ।

—बख़्त, वि., हत-मन्द,-भाग्य, दुर्दैव ।

—खर्च बाला नशीन, मु., अल्पव्ययेन गौरव-लाभः ।

—सुनना, मु., उच्चैः श्रु (भ्वा. प. अ.) ।

कमची, सं. स्त्री. (तु.) कंचिका, वेणुशाखा, कुंचिका २. नम्यतनुयष्टिः (स्त्री.) ।

कमठ, सं. पुं. (सं.) कूर्मः, कच्छपः ।

कमनीय, वि. (सं.) सुन्दर, मनोहर, रम्य ।

कमनैत, सं. पुं. (फ़ा. कमान >) धनुर्धारिन् ।

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

कमनैती, सं. स्त्री. (हिं. कमनैत) धनुर्विद्या ।
कमर, सं. स्त्री. (फ़ा.) कटी-टिः (स्त्री.), कांचीपदं, मध्यः मध्यं, मध्यांगं, वलग्नः-नं ।
—कस, सं. पुं. पलाशनिर्यासः ।
—बंद, सं. पुं., मेखला, रशना ।
—कसना वा बाँधना, मु., परिकरं बंध् (क्र. प. अ.) ।
—टूटना, मु., हतोत्साह (वि.) भू ।
—सीधी करना, मु., विश्राम् (दि. प. से.), संविश् (तु. प. अ.) ।
कमरख, सं. पुं. (सं. कर्मरंगः) (वृक्ष) कर्म्मारः, कर्म्मरः, मुद्गरः । (फल) कर्मरंगं इ. ।
कमरा, सं. पुं. (लै. कैमेरा) प्र-, कोष्ठः, शाला, कक्षा २. छायाचित्रारोपकयंत्रं, आलोकलेख्ययंत्रम् ।
अंदर का—, गर्भागारं, अन्तःकोष्ठः ।
ऊपर का—, शिरोगृहं, चन्द्रशाला ।
कमरी-री, सं. स्त्री. (सं. कंवलं >) लघु,-कंवलं-रल्लकः-आविकः, कंबलकम् ।
कमर्शल, वि. (अं.) वाणिज, वाणिज्य,-सम्बधिन्-विषयक, वाणिजिक ।
कमल, सं. पुं. (सं. न.) अब्जं, अंबुजं, अंभोजं, अरविंदं, कंजं, नलं, नलिनं, पंकजं, पंकेरुहं, पद्मं, शत-सहस्र,-पत्रम्, सरसिजं सरोजं, सरोरुहं, सारसम् ।
—का पौदा, सं. पुं., मृणालिनी, पद्मिनी, कमलिनी, नलिनी ।
—गट्टा, सं. पुं., कमलाक्षः, पद्मबीजम् ।
—दंड, सं. पुं., कमलनालः ।
—नयन, वि., पद्माक्ष, कंजाक्ष (-क्षी स्त्री.) । सं. पुं., विष्णुः २. रामः ३. कृष्णः ।
—नाभ, सं. पुं. विष्णुः ।
—नाल, सं. पुं., दे. 'कमलदंड' ।
—नैनी, वि. स्त्री., कमलाक्षी, कंजनयनी ।
—योनि, सं. पुं., ब्रह्मन् (पुं.) ।
कमला, सं. स्त्री. (सं.) पद्मा, लक्ष्मीः-श्रीः (स्त्री.), इन्दिरा, मा, रमा, हरिप्रिया २. धनम् ३. नारंगः ४. वरनारी ।
—पति, सं. पुं., विष्णुः ।
कमलासन, सं. पुं. (सं. न.) पद्मासनम् २. (सं. पुं.) ब्रह्मन् (पुं.) ।
कमलाकर, सं. पुं. (सं.) तटाकः, दे. 'सरोवर' ।
कमलाकार, वि. (सं.) पद्म-जलज,-आकार-सदृश-रूप ।
कमलाक्ष, वि. (सं.) पद्म,-नयन-नेत्र ।
कमलिनी, सं. स्त्री. (सं.) पद्माकरः, पद्मिनी, सकमलो जलाशयः २. लघुकमलम् ।
कमाई, सं. स्त्री. (हिं. कमाना) उपजीविका, वृत्तिः (स्त्री.) २. उपार्जितं, अर्जितधनम् ।
कमाऊ, वि. (हिं. कमाना) उप-,अर्जक, धनसंग्राहक २. उद्योगिन्, उद्यमिन् ।
कमान, सं. स्त्री. (फ़ा.) धनुस् (न.), शरासनम्, चापः ।
कमानिया, सं. पुं. (फ़ा. कमान >) धन्विन् (पुं.), धानुष्कः, धनुर्धरः ।
कमाना, क्रि. स. (हिं. काम) उप-,अर्ज् (चु.; भ्वा. प. से.), परिश्रमेण प्राप् (स्वा. उ. अ.) २. (चमड़ा इ.) उपयोगार्हं विधा (जु. उ. अ.) ।
कमानी, सं. स्त्री. (फ़ा. कमान >) स्थिति-स्थापकत्वविशिष्टो यंत्रावयवः ।
कमाल, सं. पुं. (अ.) नैपुण्यं, दक्षता २. विलक्षणकृत्यम् । वि., श्रेष्ठ ।
कमिशनर, सं. पुं. (अं.) आयुक्त ।
कमिशनरी, सं. स्त्री. (अं. कमिशनर >) मंडलगणः ।
कमी, सं. स्त्री. (फ़ा. कम >) ऊनता, न्यूनता, अल्पता, अपूर्णता, अपर्याप्तता ।
कमीज़, सं. स्त्री. (अ. कमीज़) चोलः, चोलकः, उरोवस्त्रम् ।
कमीना, वि. (फ़ा.-नः) अधम, अवम, क्षुद्र, तुच्छ २. दुष्कुलीन, हीन,-वर्ण-जाति ।
कमीशन, सं. पुं. (अं.) परार्थं विक्रयः २.आयोगः ३. उद्धृतभागः ।
कम्युनिज़्म, सं. पुं.(अं.) साम्यवादः समष्टिवादः ।
कम्युनिस्ट, सं. पुं. (अं.) साम्यवादिन्, समष्टिवादिन् ।
कयाम, सं. पुं. (अ.) निवेशः अवस्थितिः (स्त्री.), विश्रामः २. निवेशस्थानम् ।
कयामत, सं. स्त्री. (अ.) प्रलयः २. विपत्तिः (स्त्री.) ।
करंज, सं. पुं. (सं.) षड्ग्रंथः, रोचनः ।
करंड, सं. पुं. (सं.) मधुकोषः २. खड्गः ३. कारंडवः (पक्षी) ।

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

कर, सं. पुं. (सं.) हस्तः, शयः, पंचशाखः, पाणिः २. शुंडः–डा, शुंडारः ३. किरणः, अंशुः ४. राजस्वं, शुल्कः–कं ।

करक, सं. स्त्री. (हिं. कड़क) पीडा, वेदना २. मूत्रकृच्छ्रम् ३. क्षतांकः, क्षतचिह्नम् ।

करकट, सं. पुं. (हिं. खर + सं. कटः >) अवस्करः, अवकरः, अपस्करः, मलं, उच्छिष्टम् ।

करकरा, सं. पुं. (सं. कर्करेटुः) सारसभेदः । २. दे. 'खुरदरा' ।

करका, सं. पुं. (सं. स्त्री.) दे. 'ओला' ।

करघा, सं. पुं., दे. 'कर्घा' ।

करछा, सं. पुं. (सं. कररक्षकः >) 'करछी' के वाचक शब्दों के पूर्व 'बृहत्' लगाएँ ।

करछी, सं. स्त्री. (हिं. करछा) कंवी–विः (स्त्री.), खजि (जा) का, खजाजिका, दर्वी, दर्विका, तर्दुः–दूः (स्त्री.), पाणिका, दारुहस्तकः ।

करज, सं. पुं. (सं.) १ नखः २. अंगुली ३. करंजः ।

करट, सं. पुं. (सं.) काकः, वायसः २. गजगण्डः ३ नास्तिकः ४. निन्द्यजीवनम् ।

करटक, सं. पुं. (सं.) वायसः, काकः २. चौर्यविज्ञानप्रवर्तकः आचार्यविशेषः ।

करटी, सं. पुं. (सं.–टिन्) द्विपः, गजः, हस्तिन् (पुं.) ।

करण, सं. पुं. (सं. न.) यंत्रं, उपस्करः, साधनम् २. कारकभेदः (व्या.) ३. अस्त्रं, शस्त्रं ४. इन्द्रियम् ५. देहः ६. क्रिया, कार्यम् ७. स्थानम् ।

करणीय, वि. (सं.) कर्तव्य, अनुष्ठेय, निष्पाद्य, विधेय, संपादनीय ।

करतब, सं. पुं. (सं. कर्तव्यम्) कर्मन् (न.), कार्यं कृत्यम् २. कला, कौशलं, शिल्पम् ।

करतबी, वि, (हिं. करतब) कुशल, दक्ष, युक्तिमत् २. कर्मठ ३. ऐन्द्रजालिक ।

करतल, सं. पुं. (सं. पुं. न.) दे. 'हथेली' ।

करताल, सं. पुं. (सं. न.) वाद्यभेदः, करताली २. करतलध्वनिः (पुं.) ३. दे. 'झाँझ' ।

करती, सं. स्त्री. (सं. कृत्तिः >) तृणपूर्णकृत्रिमवत्सः, तृणतर्णकः ।

करतूत, सं. स्त्री. (सं. कर्तृत्वम्) कृत्यं, कर्मन् (न.) २. गुणः ३. कर्मान्त

करद, वि. (सं.) कर–बलि–राजस्व–शुल्क,–द–प्रद–दायक–दातृ २. अधीन, परवश ३. शरणदायक ।

करधनी, सं. स्त्री. (सं. कटिधानी >) मेखला, रशना, कांची, सारसनम् ।

करनफूल, सं. पुं. (सं. कर्णफुल्लम् >) कर्णिका, तालपत्रं, उत्तंसः, कर्णावतंसः ।

करना[१], सं. पुं. (सं. कर्णः) सुदर्शनः, श्वेतपुष्को वृक्षभेदः ।

करना[२], सं. पुं. (सं. करुणः) बृहज्जंबीरभेदः, पर्वतजंबीरः । (फल) पर्वतजंबीरम् ।

करना[३], क्रि. सं. (सं. करणम्) कृ (त. उ. अ.), निष्पद्–निर्वह्–निर्वृत्–साध् (प्रे.), विधा (जु. उ. अ.), अनुष्ठा–प्रणी (भ्वा. प. अ.), आचर् (भ्वा. प. से.) ।

सं. पुं. तथा भाव, करणं, निष्पादनं, संपादनं, निर्वर्तनं, साधनं, विधानं, अनुष्ठानं, आचरणम् ।

—योग्य, वि. निष्पाद्य, विधेय, संपाद्य, कार्य, कर्तव्य, आचरणीय ।

—वाला, सं. पुं. कर्तृ, कारक, विधातृ, संपादक, निष्पादक, अनुष्ठातृ ।

किया हुआ, वि., कृत, अनुष्ठित, निष्पादित, विहित ।

करनाटकी, सं. पुं. (हिं. करनाटक) कर्णाटप्रान्तवास्तव्यः २. ऐन्द्रजालिक ।

करनी, सं. स्त्री. (हिं. करना) कृतिः (स्त्री.), कर्मन् (न.), कार्यं, कृत्यम् २ अन्त्येष्टिक्रिया ।

करनैल, सं. पुं. (अं. कालोनल) व्यूह-गुल्म, पति–अध्यक्षः ।

करभ, सं. पुं. (सं.) मणिबन्धात् कनिष्ठापर्यन्तं करस्य बहिर्भागः २. गजशावकः ३. उष्ट्रशावकः ४. कटी–टिः (स्त्री.) ।

करभोरु, सं. पुं. (सं.) गजशुण्डोरुः । वि., वामोरुः (पुं.), वामोरू (स्त्री.) ।

करम, सं. पुं. (सं. कर्मन् न.) कार्यं, चेष्टा २. भाग्यं, दैवम् ।

करमकल्ला, सं. पुं. (अ. करम + हिं. कल्ला) दे. 'बंद गोभी' ।

करमाली, सं. पुं. (सं.–लिन्) सूर्यः, भानुः ।

करवट[१], सं. स्त्री. (सं. करवर्तः) पार्श्वः, पार्श्वं, भागः, पक्षः २. वामपार्श्वतो दक्षिणपार्श्वतो वा शयनम् ।

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

करवट[२], सं. पुं. (सं. करपत्रम्) क्रकचः, पत्रदारकः ।
—लेना, मु., मोक्षलाभाय क्रकचेन स्वशीर्षच्छेदनम् ।
करवाल, सं. स्त्री. (सं. पुं.) खड्गः, असिः ।
करश्मा, सं. पुं. (फ़ा.) चमत्कारः, कौतुकं, आश्चर्यं ।
करहाट-टक, सं. पुं. (सं.) कमलमूलम् २. कमलातःस्थं छत्रम् ३. मदनवृक्षः ।
कराना, क्रि. प्रे. (हिं. करना) 'करना' के धातुओं के प्रे. रूप ।
करामात, सं. स्त्री. (अ. 'करामत' का बहु.) दे. करश्मा ।
करामाती, वि. (अ. करामात >) लोकोत्तर, चमत्कारिन्, अद्भुत ।
करार[१], सं. पुं. (अ.) शान्तिः (स्त्री.), शमः २. धैर्यं, स्थैर्यम् ।
करार[२], सं. पुं., (अ. इकरार) दे. 'प्रतिज्ञा' ।
करारा[१], सं. पुं. (सं. कराल >) नद्याः उच्चं पातुकं वा तटम् २. उच्छ्रिततीरम् ३. क्षुद्रपर्वतः ।
करारा[२], वि. (सं. कराल) दृढ़, घन, संहत २. क्रूर, दारुण ३. सुपक्व, सुभृष्ट ४. तीक्ष्ण, उग्र ५ दृढांग, वज्रदेह ६, भंगुर, भिदुर ।
कराल, वि. (सं.) भीषण, भयंकर, घोर, दारुण ।
कराला, सं. स्त्री. (सं.) भीषणाकारा दुर्गा ।
कराह, सं. स्त्री. (दे. कराहना) आर्त्ति-पीड़ा, ध्वनिः (पुं.)-शब्दः-स्वरः ।
कराहत, सं. स्त्री. (अ.) घृणा, जुगुप्सा ।
कराहना, क्रि. अ. (हिं. करना + आह) आर्तस्वं कृ, दुःखेन स्वन् (भ्वा. प. से.) ।
करिणी, सं. स्त्री. (सं.) हस्तिनी ।
करी, सं. पुं. (सं. करिन्) गजः, हस्तिन् ।
करीना, सं. पुं. (अ.) सुव्यवस्था, पद्धतिः (स्त्री.), सौष्ठवम् ।
करीब, क्रि. वि. (अ.) समीपे, निकटे २. प्रायः, प्रायेण ।
करीर, सं. पुं. (सं.-रः) तीक्ष्णकंटकः, क्रकरः, गूढपत्रः, क्रकचः ।
करुण, वि. (सं.) दयार्द्र, कृपालु २. दुःखजनक ।
सं. पुं. रसविशेषः (सा.) २. परमेश्वरः ३. करुणा, अनुकंपा ।
करुणा, सं. स्त्री. (सं.) अनुकंपा, दया, कृपा, २. प्रियवियोगजं दुःखम् ।
—निधान, वि. (सं.) करुणामय, दयामय, कृपा-करुणा-दया,-निधिः-सागरः ।
करेणु, सं. पुं. स्त्री. (सं. पुं. स्त्री.) हस्तिन् २. हस्तिनी ।
करेला, सं. पुं. (सं. कारवेल्लः) कंडुरः, कांडकटुकः, कठिल्लकः ।
करैत, सं. पुं. (हि. काला) मालुधानः, मातुलाहिः, कृष्णसर्पभेदः ।
करोड़, वि. (सं. कोटी-टिः स्त्री.) शतलक्ष । सं. पुं., उक्ता संख्या तदंकाश्च (१०००००००) ।
करौली, सं. स्त्री. (सं. करवाली) छुरी, छुरिका, असिपुत्रिका ।
कर्क, सं. पुं. (सं.) कर्कटः, कुलीरः २ राशिविशेषः ३. अग्निः ४. मुकुरः ।
कर्कश, वि. (सं.) कठोर, रूक्ष । २, तीव्र, प्रचंड ३. सकंटक ।
कर्कशा, वि. सं. (सं.) कलह-विवाद,-प्रिया (नारी) ।
कर्घा, सं. पुं. (फ़ा कारगाह = कार्यस्थान >) तन्तुवायानां गर्तः २. पटकाराणां वेमः-वापदंडः-तंत्रवापः ३. पटनिर्माणगृहम् ।
कर्ज़, सं. पुं. (अ.) दे. 'ऋण' ।
कर्ण, सं. पुं. (सं.) श्रवणः-णं, श्रवः, श्रोत्रं, श्रवस् (न.) श्रुतिः (स्त्री.), शब्दग्रहः । २. अंगराजः, वासुसेनः, कानीनः ३. दे. 'पतवार' ।
—कटु, वि. (सं.) विस्वर, कर्कश, दुःश्राव्य ।
—धार, सं. पुं. (सं.) नाविकः, पोतवाहः २. कर्णिन्, मुख्यनाविकः ।
—परंपरा, सं. स्त्री. (सं.) श्रुतिपरंपरा ।
—पुट, सं. पुं. (सं. न.) श्रुतिमंडलम् ।
—पुर, सं. पुं. (सं. न.) चम्पानगरी (=भागलपुर) ।
—पूर, सं. पुं. (सं.) अवतंसः २. नीलोत्पलम् ।
—फूल, सं. पुं. (सं.-फुल्लम् >) कर्णिका, उत्तसः, तालपत्रं, कर्णभूषणम् ।
—वेध, सं. पुं. (सं.) संस्कारभेदः ।
कर्णाट, सं. पुं. (सं.) दक्षिणभारते प्रान्तविशेषः ।

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

कर्णाटी, सं. स्त्री. (सं.) रागिणीभेदः २. कर्णाट-देशस्य भाषा नारी वा।

कर्णिका, सं. स्त्री. (सं.) ताटंकः, दंतपत्रं, कर्णा-भूषणभेदः २. करमध्यांगुली ३. लेखनी।

कर्त्तन, सं. पुं. (सं. न.) (कर्तन्या) छेदनं, लवनं, कृन्तनम् २. तन्तुसर्जनम्।

कर्त्तनी, सं. स्त्री. (सं.) दे. 'कतरनी'।

कर्त्तरी, सं. स्त्री. (सं.) दे. 'कतरनी' २. दे. 'छुरा'।

कर्त्तव्य, सं. पुं. (सं. न.) धर्मः, विधेयं, अनुष्ठे-यम् २. दे. 'करणीय'।

—विमूढ़, वि. (सं.) कर्तव्यसंभ्रान्त।

कर्त्ता, सं. पुं. (सं. कर्तृ) विधातृ, स्रष्टृ, अनुष्ठातृ २. प्रभुः, ईश्वरः।

कर्त्तार, सं. पुं. (सं. कर्त्तारः >) परमेश्वरः, विधातृ, विश्वसृज्।

कर्तृत्व, सं. पुं. (सं. न.) कारकत्वम् २. कर्तृधर्मः।

कर्दम, सं. पुं. (सं.) चिकिलः, पंकः २. पापं ३. छाया।

कर्पट, सं. पुं. (सं. पुं. न.) चीरं, पटखण्डः, पट्चरं जीर्णवस्त्रम्।

कर्पूर, सं. पुं. (सं.) दे. 'कपूर'।

कर्बुर, सं. पुं. (सं. न.) स्वर्णम् २. धुस्तूरवृक्षः ३. जलम्। (सं. पुं.) राक्षसः २. पापं ३. कर्चूरः। वि. नानावर्ण, चित्र, कल्माष, शबल।

कर्म, सं. पुं. (सं. कर्मन् न.) कार्यं, कर्तव्यं, क्रिया, कृतिः (स्त्री.), प्रवृत्तिः (स्त्री.) २. दैवं, भाग्यम् ३. द्वितीयं कारकम् (व्या.)।

—कांड, सं. पुं. (सं. न.) धर्मकृत्यं, यज्ञादि कार्यम् २. कर्मविधायकं शास्त्रम्।

—कार, सं. पुं. (सं.) लोहकारः २. स्वर्णकारः ३. सेवकः।

—चारी, सं. पुं. (सं.-रिन्) राज,-भृत्यः-पुरुषः, अधिकारिन् २. कार्यकर्तृ।

—भोग, सं. पुं. (सं.) कर्मफलम् २. पूर्वकर्मणां परिणामः।

—योग, सं. पुं. (सं.) चित्तशुद्धिकरं वैदिक-कर्मन् (न.) २. निष्कामकर्मणाऽऽत्मज्ञानम्।

—रेख, सं. स्त्री. (सं.-रेखा) भाग्यांकाः २. भाग्यं, दैवम्।

—विपाक, सं. पुं. (सं.) पूर्वकर्मणां फलं, कर्म-परिणामः।

—शील, वि. (सं.) कर्मवत् २. उद्योगिन्, उद्यमिन्।

—संन्यास, सं. पुं. (सं.) कर्मत्यागः २. कर्म-फलत्यागः।

—हीन, वि. (सं.) मंद-हत,-भाग्य, दुर्दैव २. शास्त्रोक्तकर्मणाम् अकर्तृ।

—जागना, मु., भाग्य-पुण्य,-उदयः।

—फूटना, मु. कर्मदुर्विपाकः, भाग्यविपर्ययः।

कर्मठ, वि. (सं.) कर्मण्य, कर्मशील, उद्यमिन्।

कर्मण्य, वि. (सं.) दे. 'कर्मठ'।

कर्मधारय, सं. पुं. (सं.) समानाधिकरणः तत्पुरुषसमासः।

कर्मिष्ठ, वि. (सं.) कार्यकुशल २. क्रियावत्।

कर्मी, वि. (सं. कर्मिन्) कार्यकर्तृ २. फलेच्छया कर्मसंपादक।

कर्मेन्द्रिय, सं. स्त्री. (सं. न.) क्रियासाधकं करणम्। (हाथ, पाँव आदि)।

कर्षक, सं. पुं. (सं.) कर्षणकरः २. क्षेत्रिन्, क्षेत्राजीवः।

कर्षण, सं. पुं. (सं. न.) आकर्षः, आकर्षणम् २. भूमिदारणम् ३. कृषिः (स्त्री.)।

कर्षणी, दे. 'खिरनी'

कर्षी, वि. (सं.) आ,-कर्षक-कार्षिन्। सं. पुं., हालिकः, हल,-वाहः,-हकः, लांगलिन् (पुं.)।

कलंक, सं. पुं. (सं.) दोषः, दूषणं, छिद्रम् २. लांछनं, अपवादः ३. लक्षणं, चिह्नम्।

कलंकित, वि. (सं.) दूषित, निंदित, आक्षिप्त, लांछित।

कलंकी[1], वि. (सं.-किन्) दे. 'कलंकित'।

कलंकी[2], सं. पुं. (सं. कल्किः) विष्णोर्दश-मावतारः।

कलंडर, सं. पुं. (अं. केलेंडर) पचांगं, तिथिपत्रम्।

कलंदर, सं. पुं. (अ.) यवनभिक्षुभेदः २. वान-रादिनर्तयितृ।

कल[1], सं. पुं. (सं.) मधुरास्फुटध्वनिः। वि., मनोज्ञ, अभिराम २. मधुर, कोमल।

कल[2], सं. स्त्री. (सं. कल्य >) स्वास्थ्यम् २. सुखम् ३. संतोषः।

कल[3], सं. स्त्री. (सं. कला) उपायः, युक्तिः (स्त्री.) २. यंत्रं, उपकरणम् ३. यंत्रावयवः।

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

कल[8], क्रि. वि. (सं. कल्यम्) श्वः (अव्य.), आगामिदिनम् । २. आगामिकाले ३. ह्यः (अव्य.), गतदिनम् ।
—का, वि., श्वस्तन (-नी स्त्री.), श्वस्त्य (-त्या स्त्री.) २. ह्यस्तन, ह्यस्त्य ।
कलई, सं. स्त्री. (अ.) रंगं, वंगं, कस्तीरम् २. रंग-वंग,-लेपः ३. स्वर्णादिधातुभिर्लेपः ४. कान्तिकरो लेपः ५. सुधालेपः ६. आडंबरः ।
—गर, सं. पुं. (फ़ा,) धातु-सुधा,-लेपकः ।
—खुलना, मु., गोप्यं रहस्यं वा आविर्भू ।
कलकंठ, वि. (सं.) प्रियंवद, सुस्वर, मधुरभाषिन् सं. पुं. कोकिलः २. कपोतः ३. हंसः ।
क़लक़, सं. पुं. (अ.) दुःखं, शोकः ।
कलकल, सं. पुं. (सं.) निर्झरादीनां शब्दः २. कोलाहलः ३. विवादः ।
कलग़ी, सं. स्त्री. (तु.) पक्षः, पिच्छम् २. चूडालंकारभेदः ३. मुकुटस्थाः सुपक्षाः ४. भवनशृंगम् ।
कलत्र, सं. पुं. (सं. न.) पत्नी, भार्या ।
कलदार, सं. पुं. (हिं. कल) यंत्ररचितं रूप्यकम् २. यंत्रयुक्त ।
कलधौत, सं. पुं. (सं. न.) सुवर्णम् २. रजतम् ।
कलन, सं. पुं. (सं. न.) उत्पादनं, रचनं, जननम् २. ग्रहणम् ३. धारणं, परिधानम् ४. आचरणम् ५. संबंधः ६. ग्रासः, कवलः ७. गणितक्रिया ८. वेतसः, वेत्रः ।
कलप, सं. पुं. (सं. कल्पः >) मंडः, मंडम् २. केश,-रागः-रंगः ३. दे. 'कल्प' ।
कलपना, क्रि. अ. (सं. कल्पनम् >) शुच् (भ्वा. प. से.), पीड्-खिद-तप्-दु-छिश् (कर्म.) व्यथ्-उत्कंठ् (भ्वा. आ. से.), दुर्मनायते (ना. धा.) उत्सुक (वि.) + भू ।
कलपाना, क्रि. प्रे., 'कलपना' के धातुओं के प्रे. रूप ।
कलफ़, सं. पुं. (सं. कल्पः >) मंडः, मंडम् ।
—लगाना, क्रि. सं., मंडेन लिप् (तु. प. अ.) ।
कलबल[1], सं. पुं. (सं. कलाबलम्) उपायः, युक्तिः (स्त्री.) ।
कलबल[2], सं. पुं. (अनु.) कोलाहलः, कलकलः ।
कलबूत, सं. पुं. (फ़ा. कालबुद) आकारसाधनम् २. आधारः, उपष्टम्भः ।
कलभ, सं. पुं. (सं.) गजशावकः, उष्ट्रशावकः ।
कलम, सं. पुं. स्त्री. (सं. पुं.) लेखनी, अक्षरतूलिका, वर्णिका, वर्णमातृ (स्त्री.) २. अन्यत्रारोपणाय कृत्ता शाखा ३. अन्यवृक्षे निवेशिता शाखा ४. गंडरोमाणि (न. बहु.) ५. तूलिका, वर्तिका ६. तक्षणसाधनम् ।
—दान, सं. पुं., कलम-लेखनी,-धानम् ।
—लगाना, मु., वृक्षान्तरे देहान्तरे वा निविश् (प्रे.) ।
कलमलाना, क्रि. अ., दे० 'कुलबुलाना' ।
कलमा, सं. पुं. (अ.) यवनधर्ममूलमंत्रः २. वाक्यम् ३. शब्दः ।
—पढ़ना, मु., यवनी भू ।
कलमी, वि. (फ़ा.) हस्त-,लिखित २. वृक्षान्तरे आरोपित ३. स्फटिकरूपेण घनीभूत ।
—आम, सं. पुं. (पेड़) राजाम्रः, नृपवल्लभः । (फल) राजाम्रम् ।
—शोरा, सं. पुं., घनीकृतो यवक्षारः ।
कलमुहाँ, वि. (सं. कालमुख >) कृष्ण,-वदन-आस्य २. लांछित, कलुषित ।
कलरव, सं. पुं. (सं.) मधुरमंदध्वनिः, कल,-स्वनः-रुतम् । २. कपोतः ३. कोकिलः ।
कलल, सं. पुं. (सं. पुं. न.) भ्रूणः, गर्भः, पुखनः, गर्भस्थशिशोः प्रथमावयवः । २. गर्भाशयः ।
कलवरिया, सं. स्त्री. (हिं. कलवार) सुरालयः, मदिरालयः, गंजा ।
कलवार, सं. पुं. (सं. कल्यपालः) शौंडिकः, सुराजीविन्, सुराकारः २. सुराविक्रत्री उपजातिः (स्त्री.) ।
कलविंक, सं. पुं. (सं.) गृहनीडः, चित्रपृष्ठः, चटकः २. चिह्नम् ।
कलश, सं. पुं. (सं.) कलशं-शी, कलसः-सी-सम्, घटः, कुटः, निपः २. शिखा, शृंगम् ।
कलसा, सं. पुं., दे. 'कलश' ।
कलहंस, सं. पुं. (सं.) राजहंसः, कादंबः, कलनादः, मरालः २. नृपोत्तमः ३. परमेश्वरः ।
कलह, सं. पुं. (सं.) कलिः, विवादः, द्वन्द्वं, वाग्युद्धम्, विसंवादः ।
—प्रिय, वि. (सं.) विवादप्रिय, कलहकारिन्, कलहिन् ।
कला, सं. स्त्री. (सं.) अंशः, भागः २. चन्द्रस्य षोडशांशः ३. सूर्यस्य द्वादशांशः ४. अग्निमंडलस्य दशमांशः ५. त्रिंशत्काष्ठात्मकः समय-

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

विभागः ६. शिल्पं, शिल्पविद्या ७. कौशलं, निपुणता ८. शरीरस्य षोडशाध्यात्मविभागः (=५ ज्ञानेन्द्रियाँ, ६ कर्मेन्द्रिय, ५ प्राण, मन) ९. नृत्यभेदः १०. मात्रा (छन्द.) ११. विभूतिः (स्त्री.) १२. शोभा, प्रभा १३. कौतुकं, लीला १४. छल, कपटम् १५. मिष, व्याजः १६. युक्तिः (स्त्री.), उपायः १७. नटलीलाभेदः १८. यंत्रम् १९. प्रकृतिः (स्त्री., जैन.), २०. वर्णवृत्तभेदः।

—कंद, सं. पुं. (फ़ा.) मिष्टान्नभेदः।

—कौशल, सं. पुं. (सं. न.) कला, शिल्पम् २. कलापाटवम्।

—निधि, सं. पुं. (सं.) कलाधरः, चन्द्रः।

—बाजी, सं. स्त्री. (सं.+फ़ा.) विपर्यस्तप्लुतिः (स्त्री.)।

—वंत, सं. पुं. (सं. कलावत्) संगीतकुशलः, गायकः २. रज्जुनर्तकः। वि., कलाकुशल।

कलाई, सं. स्त्री. (सं. कलाची) कलाचिका, प्रकोष्ठः, मणिबंधः।

कलाप, सं. पुं. (सं.) समूहः, गणः, निकरः २. जनसंघः, लोकनिवहः ३. इषुधिः ४. चन्द्रः ५. कटिबंधः, मेखला ६. गुच्छः ७. मयूरपिच्छम् ८. आभूषणम्।

कलापिनी, सं. स्त्री. (सं.) मयूरी २. रात्रिः (स्त्री.)।

कलापी, सं. पुं. (सं.-पिन्) मयूरः, बर्हिन् २. कोकिलः। वि., तूणपृष्ठ।

कलाबत्तू, सं. पुं. (तु. कलाबतून) कौशेयतंतौ व्यावर्तितः सुवर्ण-रजत,-तारः।

कलाम, सं. पुं. (अ.) वचनं, उक्तिः (स्त्री.) २. वार्तालापः ३. प्रतिज्ञा ४. आक्षेपः।

कलार-ल, सं. पुं., दे. 'कलवार'।

कलारिन, सं. स्त्री. (हि. कलार) शौण्डिकी, मद्यविक्रेत्री।

कलावती, वि. (सं.) कला-शिल्प,-ज्ञा-वेत्री, शिल्पिनी २. सुन्दरी।

कलिंग, सं. पुं. (सं.-गाः) प्रान्तविशेषः (=उड़ीसा) २. इन्द्रयव-कुटज,-वृक्षः ३. दे. 'तरबूज'। वि. चतुर, धूर्त।

कलिंगड़ा, सं. पुं. रागभेदः।

कलिंद, सं. पुं. (सं.) पर्वतविशेषः २. सूर्यः।

कलिंदजा, सं. स्त्री. (सं.) यमुना, कालिंदी।

कलि, सं. पुं. (सं.) चतुर्थ-तुरीय-अन्त्य,-युगम् (यह ४३२००० वर्षों का होता है) २. कलहः, विवादः ३. युद्धम् ४. शूरः ५ क्लेशः ६. पापम् ७. शिवः ८. इषुधिः।

—कर्म, सं. पुं. (सं.-कर्मन् न.) संग्रामः।

—काल, सं. पुं. (सं.) कलियुगम्।

कलिका, सं. स्त्री. (सं.) दे. 'कली'।

कलित, वि. (सं.) ज्ञात, विदित २. प्रसिद्ध ३. प्राप्त ४. शोभित ५. सुन्दर।

कलियाना, क्रि. अ. (सं. कली >) स्फुट् (तु.प.से.) विकस्-फुल्ल् (भ्वा. प. से.)।

कली, सं. स्त्री. (सं.) कलिका, कोरकः-कं, मुकुलः-लं, कुड्मलः, कोशः-षः २. त्रिकोणो वस्त्रखंडः ३. धूमपानयंत्राधोभागः।

दिल की कली खिलना, मु., मुद् (भ्वा.आ.से.)।

कली, सं. स्त्री. (अ. कलई) चूर्णजलम् २. तप्तचूर्णम्।

कलील, वि. (अ.) न्यून, स्तोक २. लघु, ह्रस्व।

कलुष, सं. पुं. (सं. न.) मलं, मालिन्यम् २. पापं, दोषः ३. क्रोधः ४. महिषः। वि., मलिन, पंकिल २. निंदित ३. पापिन्।

कलुषित, वि. (सं.) पंकिल, मलीमस २. अपवित्र, अमेध्य ३. आतुर ४. कृष्ण, काल।

कलूटा, वि. (हिं. काला) काल, कृष्ण, श्याम।

काला—, वि. अति,-कृष्ण-काल।

कलेजा, सं. पुं. (सं. कालेयम्) यकृत् (न.), कालखण्डं, कालकम् २. हृदयं, हृद् (न.), ३. उरस्, वक्षस्, क्रोडं (सब न.) ४. साहसं, उत्साहः, वीर्यम्।

—काँपना, मु., भी (जु. प. अ.), उद्विज् (तु. आ. से.) सं-वि,-त्रस् (दि. प. से)।

—चलनी होना, मु., हृदयं व्यध् (कर्म.)।

—टूक टूक होना, मु., हृदय स्फुट् (तु.प.से.)।

—थाम कर रह जाना, मु., संतापं सं-नि,-यम् (भ्वा. प. अ.)।

—धड़कना, मु., (भयादिभिः) हृदयं कंप् (भ्वा. आ. से.)।

—फटना, मु., (शोकमात्सर्यादिभिः) हृदयं विद् (कर्म.)।

—से लगाना, मु., आलिंग् (भ्वा. प. से.)।

कलेवर, सं. पुं. (सं. न.) शरीरं, देहः।

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

—बदलना, क्रि. अ., पुनः जन् (दि. आ. से.) २. नववस्त्राणि परिधा (जु. उ. अ.)।

कलेवा, सं. पुं. (सं. कल्यवर्तः) प्रातराशः, प्रातर्भोजन, कल्यजग्धिः (स्त्री.), जलपानम्।

कलोल, सं. स्त्री. (सं. कल्लोलः >) क्रीडा, खेला, केलिः (पुं. स्त्री.), लीला, विलासः।

कलौंजी, सं. स्त्री. (सं. कालाजाजी) पृथुका, दित्या, काला।

कल्क, सं. पुं. (सं. पुं. न.) घृततैलादिशेषः २. दंभः ३. विष्ठा ४. किट्टम् ५. पापम् ६. वस्तुनः चूर्णम् ७. अवलेहः।

कल्कि, सं. पुं. (सं.) विष्णोर्दशमावतारः।

कल्प, सं. पुं. (सं.) धर्मकृत्यविधायको वेदांग-भेदः २. ब्रह्मदिनम्, दैवसहस्रयुगम् (= ४३२०००००० वर्ष) ३. महाप्रलयः, सृष्टि-संहारः ४. विधानं, कृत्यम् ५. प्रातःकालः ६. रोगनिवृत्तियुक्तिः (स्त्री.) ७. प्रकरणं, विभागः ८. विकल्पः, पक्षः ९. संदेशः १०. निश्चयः ११. उद्देशः। वि., तुल्य, सदृश।

—तरु, सं. पुं. (सं.) कल्प,-वृक्षः-पादपः-द्रुमः।

कल्पना, सं. स्त्री. (सं.) उद्भावना-नं, कल्पनं, मनः कल्पना २. रचना, विधानम् ३. प्रसाधनं, मंडनम् ४. तर्कः, ऊहा ५. अध्यारोपः ६. गज-सज्जीकरणं।

—करना, क्रि. अ., उत्प्रेक्ष्-ऊह् (भ्वा. आ. से.), तर्क् (चु.), मनसा क्लृप् (प्रे.), संभू (प्रे.)।

कल्पित, वि, (सं.) रचित, विहित २. सुव्यव-स्थित ३. वि-सं,-भावित ४. उद्भावित, वासना,-भावना,-सृष्ट, मानस, काल्पनिक ५. असत्य, निर्मूल ६. कृत्रिम, कृतक।

कल्मष, सं. पुं. (सं. न.) अघं, पापम् २. मलं मालिन्यम्।

कल्य, सं. पुं. (सं. न.) प्रत्यूषः, प्रभातम् २. मधु (न.) ३. सुरा ४. श्वः (अव्य.), आगामिदिनम्। वि., स्वस्थ, निरामय २. मूक-बधिर।

कल्या, सं. स्त्री. (सं.) मद्यम्, सुरा २. कल्याण-स्वस्ति,-वचनं-वचः (न.), अभिनन्दनम्।

कल्याण, सं. पुं. (सं. न.) सुखं, मंगलं, हितं, शिवं, कुशलं, क्षेमं, भद्रं, सुस्थितिः (स्त्री.) २. सुवर्णम् ३. रागभेदः। वि. शिव, मंगल, शंकर।

—कारी, वि. (सं.-रिन्) सुख-मंगल-हित-, कारक।

कल्याणी, वि. स्त्री. (सं.) मंगलकारिणी, सुन्दरी। सं. स्त्री. (सं.) गौः (स्त्री.) २. माषपर्णी।

कल्याश, सं. पुं. (सं.) प्रातराशः, कल्यवर्तः, जलपानम्।

कल्ल, वि. (सं.) बधिर, अकर्ण।

कल्लर, सं. पुं. (देश.) ऊषरः-रं, वंध्या भूमिः (स्त्री.)।

कल्लाँच, वि. दुर्वृत्त, दुराचारिन् २. दरिद्र, निर्धन।

कल्ला, सं. पुं. (सं. करीरः-रं >) प्ररोहः, किसलयः, उद्भिद्।

कल्लोल, सं. पुं. (सं.) महातरंगः, उल्लोलः, महोर्मिः २. दे. 'कलोल'।

कल्लोलिनी, सं. स्त्री. (सं.) नदी, तटिनी।

कवच, सं. पुं. (सं. पुं. न.) सन्नाहः, कंचुकः, वर्मन् (न.), तनु,-त्रारं-त्राणं-त्रम् २. भेरी, दुंदुभिः ३. रक्षाकरंडः।

—पत्र, सं. पुं. (सं. न.) भूर्जपत्रम्।

कवर, सं. पुं. (सं. पुं. स्त्री. न.) केश,-बंधः-पाशः २. ग्रासः, कवलः, पिण्डः।

कवरी, सं. स्त्री. (सं.) केशविन्यासः, वेणी-णिः (स्त्री.), धमिल्लः २. वनतुलसी।

कवर्ग, सं. पुं. (सं.) ककारादिवर्णपंचकम्।

कवल, सं. पुं. (सं.) ग्रासः, पिंडः-डम्।

कवलगट्टा, सं. पुं. (सं. कमलग्रंथिः >) कमलाक्षः, पद्मबीजम्।

कवलित, वि. (सं.) भक्षित, निगीर्ण, भुक्त २. गृहीत, आदत्त।

कवायद, सं. पुं. (अ. 'क़ायदा' का बहु.) नियमाः-विधयः (बहु.) २. व्यायामः ३. सेना-व्यायामः ४. व्याकरणनियमाः।

कवि, सं. पुं. (सं.) काव्यकरः, सूरिः, सत्सारः २. ऋषिः ३. सूर्यः ४. ब्रह्मन् (पुं.)।

—राज, सं. पुं. (सं.) कवीन्द्रः, महाकविः २. वैतालिकः ३. वैद्योपाधिः।

कविता, सं. स्त्री. (सं.) काव्यं, काव्यप्रबन्धः,

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

काव्यबंधः २. काव्यरचना, कवित्वं, कविता-कला।

कवित्त, सं. पुं. (सं. कवित्वम् >) काव्यं, कविता २. हिन्दीछन्दोभेदः।

कवित्व, सं. पुं. (सं. न.) काव्यरचनाशक्तिः (स्त्री.) २. काव्यगुणः।

कवींदु, सं. पुं. (सं.) वाल्मीकिः, प्राचेतसः, कविज्येष्ठः।

कवींद्र, वि. (सं.) कविश्रेष्ठः, श्रेष्ठकविः, कविराजः।

कश, सं. पुं., दे. 'कशा'।

कशमकश, सं. स्त्री. (फ़ा) संघर्षः, प्रतिस्पर्द्धा २. जनौघः ३. संशयः।

कशा, सं. स्त्री. (सं.) कषा, प्रतोदः, प्रतिष्कशः-षः।

कशिश, सं. स्त्री. (फ़ा) दे. 'आकर्षण'।

कशीदा, सं. पुं. (फ़ा.) सूची, शिल्पं-कर्मन् (न.)।

—काढ़ना, क्रि. स., सूच्या पुष्पादिकं चित्र् (चु.)।

कश्ती, सं. स्त्री. (फ़ा.) दे. 'नौका'।

कश्मल, सं. पुं. (सं. न.) मोहः, मूर्च्छा २. पापं, अघम्। वि. मलिन, आविल।

कश्मीर, सं. पुं. (सं.) काश्मीरदेशः, शास्त्र-शिल्पिन्।

कष, सं. पुं. (सं.) कषपट्टिका, निकषः, निकष,-उपलः-पाषाणः २. शाणः-णी ३. परीक्षणं, परीक्षा।

कषण, सं. पुं. (सं. न.) निकषेण स्वर्णादिकस्य परीक्षणम्।

कषाय, वि. (सं.) तुवर, कुवर २. सुवास, सुगंधि ३. रंजित, रंगवत् ४. गैरिकवर्ण, रक्तश्याम। सं. पुं. क्रोधः २. क्वाथः ३. कुवरः, रसभेदः।

कष्ट, सं. पुं. (सं. न.) दुःखं, क्लेशः, पीडा, व्यथा २. आपद्, विपद्, आपत्तिः, विपत्तिः (सब स्त्री.)।

—साध्य, वि. (सं.) दुस्साध्य, दुष्कर, कष्ट।

कस[१], सं. पुं. (सं. कषः) निकषः, कषपट्टिका २. परीक्षणम् २. खड्गवुंचनीयता।

कस[२], सं. पुं. (हिं. कसना) बलं, शक्तिः (स्त्री.) २. निग्रहः, निरोधः ३. विघ्नः।

कस[३], सं. पुं. (फ़ा.) नरः, जनः, व्यक्तिः (स्त्री.)।

फ़ी—, क्रि. वि., प्रतिपुरुषं, प्रतिजनम्।

बे—, वि., असहाय, अनाथ।

कसक, सं. स्त्री. (सं. कष् = हिंसा >) वेदना, पीडा, व्यथा २. चिर,-वैरं-विरोधः ३. अभिलाषः ४. सहानुभूतिः (स्त्री.)।

—निकालना, क्रि. स., चिरवैरं शुध् (प्रे.)।

कसकना, क्रि. अ. (हिं. कसक) व्यथ् (भ्वा. आ. से.), पीड् (कर्म.)।

कसकुट, सं. पुं. दे. 'काँसा'।

कसना, क्रि. स. (सं. कर्षणम्) दृढीकृ, नियम् (भ्वा. प. अ.), द्रढयति (न. धा.), २. बंध् (क्र्. प. अ.) ३. पीड् (चु.) ४. परीक्ष् (भ्वा. आ. से.) ५. सज्जीकृ ६. मूल्यं वृध् (प्रे.)।

क्रि. अ. दृढीभू, नियम् (कर्म) २. बंध्, नियंत्र् (कर्म.) ३. पिंडीभू।

सं. पुं., दृढीकरणं, नियमनम् २. बंधनम् ३. पीडनम् ४. परीक्षणम् ५. सज्जीकरणम्।

कसनी, सं. स्त्री. (हिं. कसना) दृढ़ीकरण-नियमन,-रज्जुः (स्त्री.) २. अंगिका ३. निकषः ४. परीक्षा ५. दे. 'हथौड़ी'।

कसब, सं. पुं. (अ.) व्यवसायः, वृत्तिः (स्त्री.) २. गणिकावृत्तिः (स्त्री.)।

कसबी, सं. स्त्री. (अ. कसब >) वेश्या, गणिका २. कुलटा, पुंश्चली।

कसम, सं. स्त्री. (अ.) शपथः, प्रतिज्ञा, समयः।

—खाना, क्रि. अ., शप् (भ्वा. दि. उ. अ.)।

कसमसाना, क्रि. अ., (अनु०) दे. 'कुलबुलाना'।

कसमसाहट, सं. स्त्री., शनैः सर्पणम् २. व्याकुलता।

कसमि (मी) या, अ. (अ०) सशपथं, सस-मयं, शपथपूर्वम्।

कसर, सं. स्त्री. (अ.) न्यूनता, अल्पता २. अभावः, हीनता ३. दोषः ४. वैरम् ५. हानिः (स्त्री.)।

—निकालना, मु., क्षतिं पूर् (चु.), प्रतिफलं दा (जु. उ. अ.)।

कसरत, सं. स्त्री. (अ.) बाहुल्यं, प्रचुरता, आधिक्यम् २. बहुता, अधिकसंख्या।

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

—राय, सं. स्त्री., बहुमतं, मताधिक्यम्।
कसरत, सं. स्त्री. (अ.) व्यायामः, परिश्रमः २. अभ्यासः, आवृत्तिः (स्त्री.)।
कसरती, वि. (अ. कसरत >) व्यायामिन्, दृढांग।
कसा, वि. (हिं. कसना) गाढ, दृढ, सुसंहत २. दृढवद्ध।
क़साई, सं. पुं. (अ. क़स्साव) सौ (शौ) निकः २. मांसिकः, घातकः, विशसितृ। वि., क्रूर, निर्दय।
कसाना, क्रि. अ. (हिं. काँसा) कषाय-विकृत-स्वाद (वि.) भू।
कसाला, सं. पुं. (सं. कषः=पीड़ा >) दुःखं, कष्टम् २. आयासः, परि-,श्रमः।
कसाव, सं. पुं. (सं. कषायः >) कषायता, रूक्षता।
कसी, सं. स्त्री. (सं. कषणम् >) खनित्रं, टंगः-गम्।
कसीदा, सं. पुं., दे. 'क़शीदा'।
कसीस, सं. पुं. (सं. कासीसम्) शोधनं, शुभ्रं, धातुशेखरम्, खेचरम्।
क़सूर, सं. पुं. (अ.) अपराधः, दोषः, स्खलितम्।
—वार, वि., अपराधिन्, दोषिन्।
कसेरा, सं. पुं. (हिं. काँसा) कांस्यकारः, पीतलोहकारः।
कसैला, वि. (हिं. कसाव) कषाय, तुवर, कुवर।
कसैली, सं. स्त्री. (हिं. कसैला) दे. 'सुपारी'। वि. स्त्री. कषाया, रूक्षा।
कसोरा, सं. पुं. (हिं. काँसा) (कांस्य-) चषकः शरावः-भाजनं-पात्रम्। २. मृण्मय-मात्तिक,-चषकः।
कसौटी, सं. स्त्री. (सं. कषपट्टी) नि-, कषः, कषपट्टिका, निकषोपलः २. परीक्षा, प्रमाणम्।
—पर कसना, मु., परीक्ष् (भ्वा. आ. से.)।
कस्टम, सं. पुं. (अं.) रीतिः (स्त्री.), व्यवहारः, अभ्यासः, नियमः।
कस्टमर, सं. पुं. (अं.) ग्राहकः, क्रेतृ (पुं.)।
कस्टम्स, सं. पुं. (अं.) शुल्कः-कं, करः, राजस्वम्।
कस्तूरी, सं. स्त्री. (सं.) कस्तूरिका, मृग,-नाभिः-मदः, अंडजा, वातामोदा, गंधधूलिः (स्त्री.)।
—मृग, सं. पुं. (सं.) गंधमृगः।
क़स्बा, सं. पुं. (अ.-बः) बृहत्-महा,-ग्रामः, लघु,-नगरं-पुरम्।
क़हक़हा सं. पुं. (अ. अनु.) अट्टहासः, उच्चै-र्हासः, अति-प्र-,हासः।
क़हत, सं. पुं. (अ.) दुर्भिक्षं, नीवाकः, आहारा-भावः, अकालः।
कहना, क्रि. स. (सं. कथनम्) गद्-वद्-भण् (भ्वा. प. से.), ब्रू (अ. उ.), वच् (अ. प. अ.) उच्चर्-उदीर् (प्रे.), उदा-व्या,-हृ (भ्वा. प. अ.) २. कथ् (चु.), शंस् (भ्वा. प. से.), आचक्ष् (अ. आ.), नि-आ,-विद् (प्रे.), आ-, ख्या (अ. प. अ.), वर्ण-निरूप (चु.), अभिधा (जु. उ. अ.) ३. आज्ञा (प्रे. आज्ञा-पयति) ४. श्लाघ् (भ्वा. आ. से.) ५. प्रकाश् (प्रे.) ६. उपदिश् (तु. प. अ.)। सं. पुं., वचनं, भाषणं, कथनं, व्याहरणं, उदीरणम् २. आज्ञा, आदेशः ३. उपदेशः, अनुशासनम् ४. दे. 'कहावत'।
—योग्य, वि. गदनीय, वदनीय, कथनीय, भणितव्य, वक्तव्य।
—वाला, सं. पुं., वाचकः, वक्तृ, वादिन्, व्याहर्तृ, अभिधातृ।
—हुआ, वि., गदित, उदित, भणित, उक्त, कथित, उच्चारित, उदीरित।
कहने को, मु., नाममात्रम्।
कहर, सं. पुं. (अ.) विपत्तिः (स्त्री.)।
कहरवा, सं. पुं. (हिं. कहार) (१-३) ताल-गीत-नृत्य,-भेदः।
कहरी, वि. (अ० क़हर >) क्रूर, निर्दय, अत्याचारिन्।
कहलाना, क्रि. प्रे., 'कहना' के धातुओं के प्रे. रूप।
कहवा, सं. पुं. (अ.) वृक्षभेदः २. तस्य बीजानि (बहु.) ३. तेषां पेयम्।
कहाँ, क्रि. वि. (सं. कुह) क, कुत्र, कस्मिन् स्थाने।
—का, वि., कुत्य, कुत्रत्य, किंदेशीय।
—तक, क्रि. वि., कियद्दूरं-रे, कियतांऽशेन, किंपर्यन्तम्।
कहा, सं. पुं. (हिं. कहना) कथनं, वचनं, उक्तिः (स्त्री.), आज्ञा, उपदेशः।

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

कहानी, सं. स्त्री. (सं. कथानिका) कथा, आ-उपा,-ख्यानम् , आख्यायिका, वृत्तान्तः ।

कहार, सं. पुं. [सं. कं (= जल) + हारः] कहारः, जल-उद,-वाहः, वृतिहारः । २. शिविका-नरयान,-वाहः ३. पात्र,-क्षालकः-मार्जकः ।

कहावत, सं. स्त्री. (हिं. कहना) आभाणकः, लोकवादः, जनप्रवादः, जनोक्तिः-लोकोक्तिः (स्त्री.) ।

कहासुनी, सं. स्त्री. (हिं. कहना + सुनना) कलहः, विवादः, वाग्युद्धम् ।

कहीं, क्रि. वि. (हिं. कहाँ) क्वापि, क्वचित् , कुत्रापि, कुत्रचित् , यत्रकुत्रचित् । २. न, न कदापि ३. यदि, चेत् ४. अत्यन्तम् ।

—कहीं, क्रि. वि., क्वचित् क्वचित् , यत्र कुत्र-चिदेव ।

—न कहीं, क्रि. वि., अत्र अन्यत्र वा ।

काँइयाँ, वि. (अनु. काँव) धूर्त्त, कितव ।

काँ काँ, सं. स्त्री. (अनु.) काका,-शब्दः-ध्वनिः, २. काकरुतम् ।

काँक्षा, सं. स्त्री. (सं.) अभिलाषः, कामना ।

काँख, सं. स्त्री. (सं. कक्षः) कक्षा, बाहुमूलं, भुजकोटरः-रं, दोर्मूलम् ।

काँखना, क्रि. अ., (अनु.) भारवहनमलत्या-गणादिकाले आर्तनादं कृ ।

काँगड़ी, सं. स्त्री., * गल,-हसनी-हसन्ती, अंगार-धानिका प्रकारः ।

कांग्रेस, सं. स्त्री. (अं.) महासभा, प्रतिनिधि सभा, समाजः ।

काँच, सं. स्त्री. (सं. कक्षः) कच्छः-च्छं, कच्छा, टी-टिका २. गुदावर्तः, गुदचक्रम् ।

काँच, सं. पुं. (सं. काचः) स्फटिकः ।

कांचन, सं. पुं. (सं. न.) स्वर्णम् , सुवर्णं, कनकम् २. धनं, संपत्तिः (स्त्री.) । (सं. पुं.) धुस्तूरः २. चंपकः ३. कोविदारः ४. कांच-नालः ।

—मय, वि. सुवर्णमय, हैम (-मी स्त्री.) ।

कांची, सं. स्त्री. (सं.) रसना, मेखला २. कांजिवरम् ।

कांजिव (वा) रम् , सं. पुं., (सं. कांची) कांची,-पुरी-नगरी ।

काँजी, सं. स्त्री. (सं.) गृहाम्लं, रक्षोघ्नं, सुवी-राम्लं, काञ्जि(जी)कम् ।

काँजी हौद, सं. पुं. (अं. काइन हाउस) पशु,-शाला गुप्तिः (स्त्री.), गोगृहं, अवरोधः ।

काँटा, सं. पुं. (सं. कंटकः-कम्) तरु-द्रुम-, नखः, शिताग्रः, शल्यम् २. पृष्ठवंशः, कशेरुका ३. नखः-खं, नखरः-रम् ४. लघु,-तुला-धटः ५. शूलः-लम् ६. मयूरकुक्कुटादीनां नखः । ७. तुला,-जिह्वा-सूची ८. बडिशं, मत्स्यवेध-नम् ९. मत्स्यास्थि (न.) १०. जिह्वोद्भेदः ११. शलं, शललम् १२. घटीसूची १३. कूप-कंटकः १४. रोमांचः ।

—खटकना, मु, (हृदयं) कंटकमिव व्यध् (दि. प. अ.)

—होना, मु., अतिकृश (वि.) भू ।

काँटे बोना, मु., पीड् (चु.) ।

काँटों में घसीटना, मु., मिथ्यास्तु (अ. प. अ.) ।

रास्ते में काँटे बिखेरना, मु., विघ्नयति (ना. धा.) ।

काँटी, सं. स्त्री. (हिं. काँटा) क्षुद्रकंटकः २. लघु-क्षुद्र,-धरणी-आकर्षणी ३. क्षुद्रतुला ४. क्षुद्रकीलः ५. कार्पासमलम् ।

कांड, सं. पुं. (सं. पुं. न.) अध्यायः, उच्छ्वासः, प्रकरणं, परिच्छेदः, स्कंधः २. वि-, भागः, खंडः-डम् ३. दण्डः, यष्टिः (स्त्री.) ४. बाणः ५. शरवृक्षः ६. अवसरः ७. तृणादिगुच्छः ८. तरुस्कन्धः ९. समूहः १०. वंशादेः पर्वन् (न.) ११. शाखा १२. व्यापारः, घटना १३. नालम् ।

कांडी, सं. स्त्री. (सं. कांडः >) दीर्घ,-स्थूणा-काष्ठम् , गृहस्थूणा, तुला ।

कांत, सं. पुं. (सं.) पतिः, भर्तृ २. अयस्-लोह,-कान्त, चुंबकः ३. चन्द्रः ४. वसन्तः ५. श्रीकृष्णः । वि., मनोरम, शोभन ।

कांता, सं. स्त्री. (सं.) पत्नी, भार्या २. दयिता, प्रिया ३. सर्वांगसुन्दरी नारी ।

कांतार, सं. पुं. (सं. पुं. न.) महावनं, बृहद्-गहनं, अरण्यानी २. वेणुः, वंशः ३. विलं, छिद्रम् ।

कांति, सं. स्त्री. (सं.) द्युतिः-दीप्तिः-छविः (स्त्री.), भा, अभिख्या २. सौन्दर्यं, लावण्यम् ।

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

कांदव, सं. पुं. (सं. न.) कटाहीभृष्ट-कन्दुभर्जित, वस्तु (न.)-पदार्थः ।
कांदिशीक, वि. (सं.) भय-त्रास,-पलायित-अपद्रुत-धावित ।
काँप, सं. स्त्री. (सं. कंपा) (१-२) गज-वराह,-दन्तः २. वंशकाशादीनां शलाका ३. कर्णभूषणभेदः ।
काँपना, क्रि. अ. (सं. कम्पनम्) कप्-स्पंद्-वेप् (भ्वा. आ. से.) स्फुर् (तु. प. से.) २. विचल्-वेल्ल् (भ्वा. प. से.) ३. दे, 'डरना' ।
कांबोज, वि. (सं.) कम्बोजदेश,-विषयक-सम्बन्धिन् । सं.पुं. कम्बोजवासिन् । २. कम्बोजाश्वः ।
काँव-काँव, सं. स्त्री. (अनु.) दे. 'काँ-काँ' २. प्रजल्पः, विप्रलापः ।
काँवर, सं. स्त्री. दे. 'बहँगी'
काँस, सं. पुं. (सं. काशः) अमरपुष्पकः, वनहासकः, काशा-शी २. कलहः ।
काँसा, सं. पुं. (सं. कांस्यम्) कंसं, कंसास्थि (न.) ताम्रार्द्धम्, दीप्ति-पीत,-लोहम्, घोषम् ।
कांस्यकार, सं. पुं. (सं.) कंसकारः दे. 'कसेरा' ।
का, प्रत्य. (सं. प्रत्य. 'कः') षष्ठी वा समास द्वारा । (उ० राम की पुस्तक = रामस्य पुस्तकं, रामपुस्तकम्) ।
काई, सं. स्त्री. (सं. कावारम्) शैव (वा) लः, शेव (वा) लः-लं, जलनीली २. अयोमलम् ३. मलम् ।
काक[1], सं. पुं. (सं.) वायसः, ध्वांक्षः ।
—तालीय, वि. (सं.) आकस्मिक-यादृच्छिक (-की स्त्री.), अतर्कित ।
—पक्ष, सं. पुं. (सं.) शिखंडः-डकः, अलकः, चूर्णकुन्तलः केशकलापः ।
—पद, सं. पुं. (सं. न.) हस्तलेखेषु उज्झित-वर्णद्योतकचिह्नम् (= ∧) ।
—बन्ध्या, सं. स्त्री. (सं.) एकापत्यजननी ।
काक[2], सं. पुं. (अं. कार्क) पिधानं, कूपी-छिद्रपिधानम् २. रोधनी, स्तम्भनी ।
काकली, सं. स्त्री. (सं.) सूक्ष्ममधुरास्फुटध्वनिः ।
काका, सं. पुं. (फ़ा. काका = बड़ा भाई >) पितृव्यः, पितुः भ्रातृ २. (पं.) बालः, शिशुः ।
काकी, सं. स्त्री. (फ़ा. काका >) पितृव्या, पितृव्यपत्नी २. (पं.) कन्यका, बालिका ।
काकु, सं. पुं. (सं.) भिन्नकण्ठध्वनिः २. आक्षेपः, व्यंग्यवचनं. आ-अधि,-क्षेपः ३. अलङ्कारभेदः (सा.) ४. जिह्वा ।
काकुत्स्थ, सं. पुं. (सं.) श्रीरामचन्द्रः ।
काकुल, सं. पुं. (फ़ा.) काकपक्षः शिखंडकः ।
काग, सं. पुं. दे. 'काक' १, २.
काग़ज़, सं. पुं. (अ.) कागदः-दं, पत्रं, कर्गलम् ।
—पत्र, सं. पुं. (अ.+सं.) लेख्यपत्राणि, पत्र-काणि, लेख्यानि (सब बहु.) ।
—की नाव, मु. क्षणभंगुर, विनश्वर ।
काग़ज़ी, वि. (अ. काग़ज़ >) कागद-पत्र,-मय. २. सूक्ष्मत्वच् ३. प्रतनु । सं. पुं., पत्रविक्रयिन् २. श्वेतकपोतः ।
—घोड़े दौड़ाना, मु., पत्रैः व्यवह (भ्वा. प. अ.) ।
काच, सं. पुं. (सं.) स्फटिकः २. नेत्ररोगभेदः (सं. न.) काचलवणम् २. सिक्थकम् ।
काछ, सं. स्त्री. (सं. कक्षा >) कटी-जघन,-वस्त्रम् ।
काछना[1], क्रि सं. (सं. कक्षा >) धौताग्रान्तं पृष्ठे निविश् (प्रे.) ।
काछना[2], क्रि. स. (सं. कषणम्) फेनं अपनी (भ्वा. उ. अ.) ।
काछनी, सं. स्त्री. (हिं. काछना) ऊरुवसनं, सक्थिवस्त्रम् ।
काछा, सं. पुं., दे. 'काछनी' ।
काछी, सं. पुं. (सं. कच्छः >) शाक,-उत्पादक-विक्रेतृ २. जातिभेदः ।
काज[1], सं. पुं. (सं. कार्यम्) कृत्यं, कार्यं, कर्मन् (न.), कृतिः (स्त्री.) २. वृत्तिः (स्त्री.), आजीविका ३.उद्देश्यं, प्रयोजनम् ४. विवाहः ।
काज[2], सं. पुं. (अ. कायज़ा >) गण्डाधारः, कुड्यपाधारः (= बटन का छेद) ।
काजल, सं. पुं. (सं. कज्जलम्) लोचकः, दीपकिट्टं, अंजनम् ।
—की कोठरी, मु., निन्द्यस्थानम् ।
काज़ी, सं. पुं. (अ.) न्यायाधीशः, धर्माध्यक्षः (इस्लाम) ।
काट, सं. स्त्री. (हिं काटना) छेदनं, कर्तनं, लवनं, कृन्तनं, व्रश्चनम् २. कर्तनरीतिः (स्त्री.) ३. व्रणः, क्षतम् ४. खण्डः-डं, लवः ५. छलं, कपटम् ।
—छाँट, सं. स्त्री., संक्षेपणं २. शोधनम् ।

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

काटन, सं. पुं. (अं.) कार्पासः, तूलः-लम् २. कार्पासं, तूलाम्बरम्, बादरम्।

काटना, क्रि. स. (सं. कर्तनम्) कृत् (तु. प. से.) लू (क्र्. उ. से.), छिद् (रु. प. अ.), ब्रश्च् (तु. प. वे.) २. तुद् (तु. प. अ.), व्रण् (चु.) ३. ऊन् (चु.), संक्षिप् (तु. प. अ.) ४. हन् (अ. प. अ.) व्यापद् (प्रे.) ५. दे. 'कतरना' ६. संधिं त्रुट् (प्रे.) ७. विफलीकृ ८. दंश् (भ्वा. प. अ.) ९. अल्पांशं उद्धृ (भ्वा. प. अ.) १०. अतिक्रम् (भ्वा. प. से.)।

सं. पुं. तथा भाव, दे. 'काट'।

—योग्य, वि., कर्तनीय, छेदनीय, छेत्तव्य, लवनीय।

—वाला, सं. पुं. छेदकः, लावकः, कर्तनकरः।

काटा हुआ, वि., कृत्त, लून, वृक्ण, छिन्न।

काटने दौड़ना, मु. निर्जन (वि.) दृश् (कर्म.)।

काटो तो खून नहीं, मु., सं-, स्तब्ध।

काठ, सं. पुं. (सं. काष्ठम्) दारु (न.) २. इध्मं, इंधनं ३. काष्ठनिगडः-डम् ४. दे. 'शहतीर'। वि. क्रूर २. मूर्ख।

—का उल्लू, सं. पुं. जड़धीः, मूढः, अज्ञः।

—की हाँडी, सं., आपातरमणीयं वस्तु।

—मारना, मु., काष्ठनिगडेन बंध् (क्र्. प. अ.)।

काठड़ा, सं. पुं., दे. 'कठौता'।

काठिन्य, सं. पुं. (सं. न.) दे. 'कठिनता'।

काठी, सं. स्त्री. (हिं. काठ) पर्याणं, पर्यवणं, पल्ययनम् २. शरीर,-रचना-संस्थानम् ३. असिकोषः।

काढ़ना, क्रि. स. (सं. कर्षणम्) निष्-आ, कृष् (भ्वा. प. अ.), निष्-सं,-पीड् (चु.), निर्-उद्,-हृ (भ्वा. प. अ.) २. सूच्या पुष्पादिकं सिव् (दि. प. से.) ३. काष्ठपाषाणादिषु पुष्पादिकं उल्लिख्-उत्कृ (तु. प. से.) ४. पृथक् कृ, वियुज-विश्लिष् (प्रे.) ५. कथ् (भ्वा. आ. से.)।

काढ़ा, सं. पुं. (हिं. काढ़ना) क्वाथः, कषायः, निर्यासः।

काणेली, सं. स्त्री. (सं.) कुलटा, व्यभिचारिणी, पुंश्चली २. अनूढा, अविवाहिता।

कातना, क्रि. स. (सं. कर्तनम्) तन्तून् सृज् (तु. प. अ.), कृत् (रु. प. से.)।

सं. पुं. तथा भाव, कर्तनं, तन्तुनिर्माणम्।

—योग्य, वि., कर्तनीय, कर्तनार्ह।

—वाला, सं. पुं., कर्तकः, तन्तुकारः।

काता हुआ, वि., कृत्त।

कातर, वि. (सं.) व्याकुल, विह्वल २. भीत, त्रस्त ३. भीरु ४. आर्त्त।

कातरता, सं. स्त्री. (सं.) व्याकुलता, धैर्याभावः २. भयं, त्रासः ३. भीरुता, कातर्यम् ४. अवसादः विषादः।

क़ातिब, सं. पुं. (अ.) लेखकः २. अक्षरचंचुः।

क़ातिल, सं. पुं. (अ.) घातकः, हन्तृ।

कादम्ब, सं. पुं. (सं.) (१-३) कदंब,-वृक्षः-पुष्पं-फलम् ४. कलहंसः ५. इक्षुः ६. बाणः ७ कदंबसुरा।

कादंबरी, सं. स्त्री. (सं.) कोकिला २. मदिरा ३. सरस्वती ४. बाणरचितो गद्यकाव्यविशेषः।

कादंबिनी, सं. स्त्री. (सं.) मेघमाला, जलदावली।

कान, सं. पुं. (सं. कर्णः) श्रोत्रं, श्रवणं, श्रुतिः (स्त्री.), श्रावः, शब्दग्रहः।

—में कहना, क्रि., स., कर्णे जप् (भ्वा. प. से.)।

—का परदा, सं. पुं., कर्ण,-पटहः-दुन्दुभिः।

—का बहना, सं. पुं., कर्णस्रावः।

—का मैल, सं. पुं., कर्ण,-मलं-गूथं, पिंजूषः।

—की शांय-शांय, सं. स्त्री., कर्णप्रणादः।

—उमेठना, मु., दंडरूपेण कर्णौ मुट् (चु.)।

—का कच्चा, मु., विश्वासिन्।

—काटना, मु., अतिशी (अ. आ. से.), अतिरिच् (कर्म.)।

—खड़े होना, मु., विस्मि (भ्वा. आ. अ.)।

—खा जाना, मु., कोलाहलं कृ।

—पकड़ना, मु., पश्चात्तापेन कर्णौ स्पृश् (तु. प. अ.)।

—पर जूँ न रेंगना, मु., नितान्तं अनवहित (वि.) स्था (भ्वा. प. अ.)।

—फूकना, मु., कलहं उद्दीप् (प्रे.)।

—भरना, मु., पृष्ठतो द्वेषं जन् (प्रे.)।

—में उँगली दिये रहना, मु., दे. 'कान पर जूँ न रेंगना'।

कानन, सं. पुं. (सं. न.) वनम् २. गृहम्।

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

कानफरेंस, सं. स्त्री. (अं.) सम्मेलनम् ।
कानस्टेबिल, सं. पुं. (अं.) रक्षिन्, शान्ति-रक्षकः, रक्षापुरुषः ।
काना, वि. पुं. (सं. काणः) एकाक्षः, चन्द्रचक्षुः ।
कानाकानी, सं. स्त्री., (सं. कर्णः >) कर्णेजपनं, उपांशुवादः २. वार्ता, जनप्रवादः ।
कानाफूसी, सं. स्त्री., (सं.+अनु.) दे. 'कानाकानी' ।
कानि, सं. स्त्री. (देश.) लोकलज्जा, मर्यादा ।
कानी, वि. स्त्री. (सं.) काणा, एकाक्षा, एकनेत्रा, काणेयी, काणेरी ।
—उँगली, सं. स्त्री. कनिष्ठा, कनिष्ठिका, कनीनिका, दुर्वलाङ्गुली-लिः (स्त्री.) ।
—कौड़ी, मु., दे. 'कौड़ी' के नीचे ।
कानी हाउस, दे. 'काँजी हौद' ।
कानीन, सं. पुं. (सं.) कन्यापुत्रः, कुमारी-तनयः ।
क़ानून, सं. पुं. (अ.) अधिनियमः २. राज-नियमः, विधिः ३. आचारः, व्यवहारः ।
—गो, सं. पुं. ग्रामगणकाध्यक्षः ।
—दाँ, सं. पुं., व्यवहारनिपुणः, विधिज्ञः ।
क़ानूनी, वि. (अ. क़ानून >) वैध, राजनियम-विषयक २. विधिज्ञ ३. धर्म्य, शास्त्रविहित ४. कुतर्किन् ।
कान्ह, सं. पुं. (सं. कृष्णः) श्रीकृष्णचन्द्रः २. पतिः ।
कापालिक, सं. पुं. (सं.) शैवतांत्रिकसाधुः २. वर्णसंकरजातिभेदः ।
कापुरुष, सं. पुं. (सं.) कु-निंद्य-कातर,-जनः ।
काफ़िया, सं. पुं. (अ.) अन्त्यानुप्रासः ।
—तंग करना, मु., अतीव संतप्-उद्विज्-अर्द् (प्रे.) ।
काफ़िर, सं. पुं. (अ.) अयवनः (इस्लाम.) २. नास्तिकः, अनीश्वरवादिन् ३. क्रूर ४. दुष्ट ।
काफ़िला, सं. पुं. (अ.-लः) सार्थः, यात्रिक-समूहः ।
काफ़ी, वि. (अ.) पर्याप्त, अन्यूनाधिक, समर्थ, उचित, अलम् (अव्य. चतुर्थी के साथ) ।
काफ़ी, सं. स्त्री. (अं.) दे. 'कहवा' ।
काफ़ूर, सं. पुं. (फ़ा.) कर्पूरः-रं, घनसारः ।
—होना, मु., तिरो-भू ।
काबिज़, वि. (अ.) अधिकारिन्, प्रभु २. मलावरोधक, गरिष्ठ ।
काबिल, वि. (अ.) योग्य, समर्थ ।
क़ाबू, सं. पुं. (तु.) अधिकारः, प्रभुत्वं, वशः ।
—करना, क्रि. स., वशं नी (भ्वा. उ. अ.) ।
काम[1], सं. पुं. (सं.) इच्छा, अभिलाषः, मनोरथः, आकांक्षा २. शिवः ३. मदनः, कामदेवः ४. मैथुनेच्छा ५. इन्द्रियाणां विषयप्रवृत्तिः (स्त्री.) ६. चतुर्वर्गेऽन्यतमः ।
—आतुर, वि. (सं.) कामार्त्त, अनंगतप्त, विधुर ।
—केलि, सं. स्त्री. (सं. पुं. स्त्री.) कामक्रीडा, विहारः, विलासः ।
—तरु, सं. पुं. (सं.) कल्पवृक्षः ।
—देव, सं. पुं. (सं.) कामः, मदनः, स्मरः, कंदर्पः, अनंगः, मन्मथः, मनसिजः, मनोजः, कुसुमवाणः, पंचशरः, मारः, मीनकेतनः, मकरध्वजः, पुष्पधन्वन्, आत्मभूः ।
—धेनु, सं. स्त्री. (सं.) कामदुघा, कामदा ।
—रिपु, सं. पुं. (सं.) कामारिः, शिवः ।
—रूप, सं. पुं. (सं.) प्रान्तविशेषः, असम-प्रान्तः । वि., स्वेच्छारूप २. सुरूप ।
—शास्त्र, सं. पुं. (सं. न.) वात्स्यायनप्रणीतो ग्रंथविशेषः २. कामविज्ञानम् ।
काम[2], सं. पुं. (सं. कर्म्मन् न.) कार्यं, कृत्यं, क्रिया २. व्यापारः, व्यवसायः ३. उद्यमः, उद्योगः ४. प्रयोजनम्, उद्देश्यम् ५. उपयोगः, व्यवहारः ।
—आना, क्रि. अ., प्र-उप,-युज् (कर्म.), व्यवह्-व्याप् (कर्म.) । मु., वीरगतिं प्राप् (स्वा. उ. अ.) ।
—काज, सं. पुं., कार्यं, अर्थः, व्यवसायः ।
—काजी, वि., उद्यमिन्, उद्योगिन् ।
—चलाऊ, वि., उपयुक्त, उपयोगिन् ।
—चोर, वि., अलस, कर्तव्यविमुख ।
—तमाम करना, मु., मृ-निषूद्-नश्-व्यापद् (प्रे.), हन् (अ. प. अ.) ।
कामना, सं. स्त्री. (सं.) इच्छा, आकांक्षा ।
कामयाब, वि. (फ़ा.) सफल, कृतकार्य ।
कामयाबी, सं. स्त्री. (फ़ा.) सफलता, कृतकार्यता ।
कामरी, सं. स्त्री., दे. 'कंबल' ।

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

कामला, सं. पुं. (सं. कामलः) पाण्डुः, पाण्डु-रोगः ।

कामिनी, सं. स्त्री. (सं.) सुन्दरी, नारी २. सुरा ३. कामवहुला नारी ।

कामिल, वि. (फ़ा.) सं.-पूर्ण २. दक्ष, योग्य ।

कामी, वि (सं. कामिन्) लंपट, कामासक्त, कामांध, कामन, अभीक, कामातुर, कामुक २. अनुरक्त, आसक्त, सस्नेह,-सेविन् (समासान्त में) ४. इच्छुक, ईप्सु, सस्पृह ।

सं. पुं., अभि (भी) कः, क (का) मनः, कन्नः, कामुकः २. चन्द्रः ३. कपोतः ४. चक्रवाकः ५. चटकः ।

कामुक, वि. (सं.) दे. 'कामी' वि., 'कामी' सं. पुं. (१) ।

कामेडियन, सं. पुं. (अं.) हास्यरसाभिनेतृ (पुं.), वैहासिकः ।

कामेडी, सं. स्त्री. (अं.) सुखान्त-संयोगान्त,-रूपकं-नाटकम्, प्रहसनम्, भाणिका, दुर्मल्लिका ।

कामोद, सं. पुं. (सं.) रागभेदः ।

कामोद्दीपक, वि. (सं.) वाजीकर, कामाग्नि-दीपन ।

काम्य, वि. (सं.) स्पृहणीय, वांछनीय २. सुन्दर, मनोज्ञ ।

काम्या, सं. स्त्री. (सं.) इच्छा, कामना, वाञ्छा ।

काय, सं. स्त्री. (सं. पुं.) शरीरं, देहः २. समुदायः ।

क़ायदा, सं. पुं. (अ.) नियमः, व्यवस्था, रीतिः (स्त्री.), शिष्टाचारः ।

कायम, वि. (अ.) निश्चल, स्थिर, नेश्चेष्ट २. स्थापित ३. निर्धारित ।

—मुक़ाम, सं. पुं. (अ.) प्रतिनिधिः, प्रतिपुरुषः २. उत्तराधिकारिन् । वि., स्थानापन्न ।

कायर, वि., दे. 'कातर' ।

कायल, वि. (अ.) छिन्नसंशय, जातप्रत्यय ।

कायस्थ, सं. पुं. (सं.) परमेश्वरः २. जीवः ३. जातिभेदः । वि., शरीरस्थ ।

काया, सं. स्त्री. (सं. कायः पुं.) शरीरं, देहः, विग्रहः, कलेवरम् ।

—कल्प, सं. पुं. (सं.) पुनर्यौवनोत्पादनम् २. पुनर्यौवनोत्पादनविधिज्ञः ।

—पलट, सं. पुं., वृहत्परिवर्तनं, महापरिवर्तः २. शरीररूपरेखापरिवर्तनम् ।

कायिक, वि. (सं.) शारीर (-री स्त्री.), शारीरिक-दैहिक (-की स्त्री.) ।

कार[१], सं. पुं. (सं.) कार्यं, क्रिया २. कर्तृ, अनुष्ठातृ ३. अक्षरवाचकप्रत्ययः (उ. च=चकारः) ४. ध्वनिवाचकप्रत्ययः (उ. फूत्कारः) ।

कार[२], सं. पुं. (फ़ा.) कार्यं, व्यवसायः ।

—करना, क्रि. स., नियोगं अनुस्था (भ्वा. प. अ.) ।

—खाना, सं. पुं., शिल्प,-शाला-गृहम्, पण्य-निर्माणस्थानम् ।

—वार, सं. पुं., व्यवसायः, व्यापारः ।

—रवाई, सं. स्त्री., क्रिया, कार्यम् २. गुप्त-चेष्टा-क्रिया ।

—साज़, वि., कुशल, दक्ष ।

कारक, वि. (सं.) कर्तृ, अनुष्ठातृ, विधातृ २. क्रियया संबंधसूचकः शब्दरूपभेदः (उ. कर्तृ-कारक इ. व्या.) ।

कारचोब, सं. पुं. (फ़ा.) सूचीकर्मोपजीविन् २. सूचीकर्माधारः ।

कारचोबी, वि. (फ़ा.) सूचीकर्म युक्त । (सं. पुं.) सूचीकर्मन् (न.), शिल्पम् ।

कारटून, सं. पुं. (अं) हासकरमालेख्यम्, हास्यजनकं चित्रं, उपहासचित्रम् ।

कारण, सं. पुं. (सं. न.) हेतुः, निमित्तं, मूलं, वीजं, योनिः (स्त्री.), निदानम् २. साधनम् ३. कर्मन् (न.) ४. प्रमाणम् ५. विष्णुः ६. शिवः ७. पूजान्ते मद्यपानम् (तांत्रिक) ।

कारतूस, सं. पुं. (पुर्त. कारटूस) गुलिः (स्त्री.), गुलिका, आग्नेयचूर्णनाडी-डिः (स्त्री.) ।

कारनिस, सं. स्त्री. (अं.) भित्तिदन्तकः, कुड्य-शृंगम् ।

कारा, सं. स्त्री. (सं.) निरोधः, निरोधनम्, बन्धनं, आसेधः, प्रग्रहः २. क्लेशः, पीडा ।

कारागार, सं. पुं. (सं. पुं. न.) कारा, बंधनालयः, बंदि,-शाला-गृहम्, कारागृहं, चारः, चारकः, गुप्तिस्थानम् ।

कारावास, सं. पुं. (सं.) दे. 'कारागार' ।

कारिंदा, सं. पुं. (फ़ा.) कारकरः, परकार्य-साधकः, प्रति,-हस्तः-निधिः २. कर्मचारिन्, राजपुरुषः, अधिकारिन्

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

कारी[1], सं. पुं. (सं-रिन्) कारकः, कर्तृ ।
कारी[2], वि. (फ़ा.) घातक, प्राणहर ।
कारीगर, सं. पुं. (फ़ा.) शिल्पिन् , कारुः, शिल्पकारः । वि., शिल्पकुशल ।
कारीगरी, सं. स्त्री. (फ़ा) कारुता, शिल्पकौशलं, दक्षता २. मनोहररचना ।
कारुणिक, वि. (सं.) दे. 'करुणामय' ।
कारूँ, सं. पुं. (अ.) मूसानामकस्य सिद्धस्य धनाढ्यकृपणः पितृव्यपुत्रः । वि., कृपणः, कदर्यः ।
—का ख़ज़ाना, सं. पुं., असीमधनं, अमितसंपद् (स्त्री.) ।
कारूरा, सं. पुं. (अ.) मूत्रम् २. मूत्रपात्रम् ।
कारोबार, सं. पुं., दे. 'कारबार' ।
कार्क, सं. पुं. (अं.) कूपी–, पिधानम् ।
कार्कश्य, सं. पुं. (सं. न.) कर्कशता, कठोरता २. दृढता, दृढत्वम् ३. निर्दयता, क्रूरता ।
कार्ड, सं. पुं. (अं.) पत्रम् २. स्थूलकर्गलम् ।
कार्तवीर्य, सं. पुं. (सं.) कृतवीर्यपुत्रः सहस्रबाहुः, अर्जुनः ।
कार्तस्वर, सं. पुं. (सं. न.) कनक, सुवर्ण, स्वर्ण, हिरण्यम् ।
कार्तिक, सं. पुं. (सं.) बाहुलः, ऊर्जः, कौमुदः ।
कार्तिकेय, सं. पुं. (सं.) स्कन्दः, कुमारः, शिखिवाहनः, द्वादशलोचनः ।
—प्रसू, सं. स्त्री. (सं.) पार्वती, गिरिजा ।
कार्बन, सं. पुं. (अं.) प्रांगारः, कार्बनम् ।
कार्बोनिक, वि. (अं.) प्रांगारिक, कार्बनिक ।
—एसिड गैस, सं. स्त्री., कार्बनिकाम्लवातिः (स्त्री.) ।
कार्मुक, सं. पुं. (सं. न.) चापः, दे. 'धनुष' ।
कार्य, सं. पुं. (सं. न.) कर्मन् (न.) कृत्यं, क्रिया २. व्यवसायः ३. परिणामः ४. प्रयोजनम् ।
—अध्यक्ष, सं. पुं. (सं.) अधिकारिन् २. कर्मविक्षकः ।
—कर्ता, सं. पुं. (सं.—र्तृ) कर्मकारिन् २. राजभृत्यः ।
कार्रवाई, सं. स्त्री., दे. 'काररवाई' ।
काल, सं. पुं. (सं.) समयः, वेला, दिष्टः, अनेहस् (पुं.) २. मृत्युः ३. यमः, यमदूतः ४. अवसरः, प्रसंगः ५. दुर्भिक्षं, दुष्कालः ६. कृष्णसर्पः ७. शनैश्चरः ८. शिवः ९. लोहः १०. ऋतुः ।
—कूट, सं. पुं. (सं. पुं. नं.) घोरविषं, प्राणहरगरलम् ।
—कोठरी, सं. स्त्री., कालकोष्ठः ।
—क्षेप, सं. पुं. (सं.) समयातिपातः, व्याक्षेपः २. निर्वाहः ।
—चक्र, सं. पुं. (सं. न.) समयपरिवर्तः २. भाग्यचक्रम् ३. अक्षभेदः ।
—ज्ञ, सं. पुं., (सं.) कालविद्, २. दैवज्ञः ३. कुक्कटः ।
—यापन, सं. पुं. (सं. न.) दे. 'कालक्षेप' ।
—रात्रि, सं. स्त्री. (सं.) भीमा कृष्णा च निशा २. प्रलयरात्रिः ३. मृत्युनिशा ४. दीपावलीनिशा ५. मनुष्यजीवने सप्तसप्ततिवर्षसप्तमाससप्तदिनानन्तरभवा रात्रिः ।
—सर्प, सं. पुं. (सं.) महाविषः, अलगर्दः, कृष्णसर्पविशेषः ।
काला, वि. (सं. काल) कृष्ण, श्याम, असित, नील २. अन्धकारमय, तिमिरावृत, ३. दूषित ४. घोर ५. भयंकर ।
—आजार, सं. पुं., कालज्वरः ।
—कलूटा, वि. अतिकृष्ण ।
—चोर, सं. पुं., सततत्स्करः २. अतिदुष्टपुरुषः ।
—जीरा, सं. पुं., कृष्णजीरकः, काला, कृष्णा ।
—नमक, सं. पुं., कृष्णलवणम्, सौवर्चलम् ।
—नाग, सं. पुं., कृष्ण,-नागः-सर्पः २. प्राणहरः शत्रुः ।
—पानी, सं. पुं., द्वीपान्तरे निर्वासनम् २. अंडमानादयो द्वीपविशेषाः ।
कालेकोसों, क्रि. वि., अतिदूरं-रे ।
—मुँह होना, मु., निंद्-अधिक्षिप् (कर्म०) ।
कालातीत, वि. (सं.) अनवसर, असमयोचित ।
कालापन, सं. पुं. (हिं. काला) कृष्णता, श्यामता, मेचकता ।
कालिंदी, सं. स्त्री. (सं.) यमुना, कलिन्दतनया ।
कालिक, वि. (सं.) सामयिक, कालविषयक २. समयोचित, प्राप्तकाल ३. अनुकाल, नियतकाल ।
कालिका, सं. स्त्री. (सं.) दुर्गा, चण्डी २. मसी–षी ३. कनीनिका ४. श्यामघनघटा ।
कालिख, सं. स्त्री. (सं. कालिका) कज्जलं,

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

मषिः–सिः (स्त्री.) २. कलंकः, लांछनं, दोषः ।
कालिदास, सं. पुं. (सं.) संस्कृतकविशिरोमणिः, रघुकारः, विक्रमसभायाः सप्तमरत्नम् ।
कालिमा, सं. स्त्री. (सं. कालिमन् पुं.) कृष्णिमन् (पुं.), कालता, श्यामता २. मसी ३. लांछनं, दोषः ४. अंधकारः ।
कालिय, सं. पुं. (सं.) यमुनावर्तिकृष्णसर्पविशेषः ।
—मर्दन, सं. पुं. (सं.) श्रीकृष्णः ।
काली, सं. स्त्री. (सं.) चण्डी, दुर्गा २. पार्वती, गिरिजा ३. मसी । सं. पुं. दे. 'कालिय' । वि. स्त्री., कृष्णा, श्यामा ।
—खाँसी, सं. स्त्री., कालकासः ।
—घटा, सं. स्त्री., (सं.) कादंबिनी, श्यामघनश्रेणिः (स्त्री.) ।
—दह, सं. पुं. (सं.+हिं.) यमुनायां जलावर्त्तविशेषः ।
—मिर्च, सं. स्त्री. (सं. कालमरि (री) चम्) कृष्णं, ऊषणं, कालकं, वेल्लजम् ।
—कालीन, वि. (सं.) समय-वेला-काल,-संबंधिन् २. सामयिक, प्रास्ताविक । (टि. यह शब्द समासान्त में ही प्रयुक्त होता है) ।
कालौंछ, सं. स्त्री. (हिं. काला) कृष्णता, श्यामता २. मसी ३. कज्जलम् ।
काल्पनिक, वि. (सं.) संकल्पज, मनःकल्पित, उद्भावित, कृत्रिम, कृतक ।
काल्य, वि. (सं.) काल-समय-अवसर,-उचित-योग्य-अनुकूल, सामयिक । सं. पुं., प्रभातं, विभातं, प्रत्यूषः ।
काल्या, सं. स्त्री. (सं.) १–२ गर्भाधानार्हा नारी-धेनुः (स्त्री.) ।
कावा, सं. पुं. (फ़ा.) वृत्ते अश्वभ्रामणम् २. मण्डलं, वृत्तम् ।
कावेरी, सं. स्त्री. (सं.) दक्षिणभारतस्य प्रसिद्धनदी २. वेश्या ३. हरिद्रा, पीतिका ।
काव्य, सं. पुं. (सं. न.) कविता, कविकृतिः (स्त्री.), सरसप्रबन्धः २. रसात्मकं वाक्यम् ३. कविताग्रन्थः ।
काश[1], अव्य. (अ.) अपि नाम, प्रार्थये, कामये ।
काश[2], सं. पुं. (सं. पुं. न.) काशः, अमरपुष्पकः, वनहासकः २. कासः, क्षवथुः ।
—श्वास, सं. पुं., दे. 'दमा' ।
काशिका, वि. (सं.) प्रकाशिका । सं. स्त्री. (सं.) काशी २. अष्टाध्यायीवृत्तिः (स्त्री.) ।
काशी, सं. स्त्री. (सं.) शिवपुरी, वाराणसी, तपः-स्थली ।
—फल, सं. पुं. (सं. न.) कूष्मांडः–डकः, पीत, पुष्पा–फला ।
काश्त, सं. स्त्री. (फ़ा.) कृषिः (स्त्री.), कर्षणं, कृषिकर्मन् (न.) ।
—कार, सं. पुं. (फ़ा.) कर्षकः, कृषाणः ।
काषाय, वि. (सं.) गैरिक-रक्तधातु,-वर्ण । सं. पुं., गैरिकरंजितवस्त्रम् ।
काष्ठ, सं. पुं. (सं. न.) दे. 'काठ' ।
—कीट, सं. पुं. (सं.) घुणः ।
काष्ठा, सं. स्त्री. (सं.) दिशा, दिश् (स्त्री.) २. सीमा ३. शिखरः–रं ४. चन्द्रकला ५. अष्टादशनिमेषात्मकः कालः ।
कास, सं. पुं. (सं.) क्षवथुः २. काशः, वनहासकः ।
कासनी, सं. स्त्री. (फ़ा.) गुल्मभेदः २. तस्य बीजम् ३. नील-श्याम,-वर्णः ।
कासार, सं. पुं. (सं.) सरोवरः, महाजलाशयः ।
कासीस, सं. पुं. (सं. न.) धातुशेखरं, शोधनम् ।
कास्टिक, वि. (अं.) दाहक ।
—सोडा, सं. पुं. (अं.) दाहकविक्षारः ।
कास्मिक रे, सं. स्त्री. (अं) सृष्टिरश्मिः ।
काहिल, वि. (अ.) अलस, मंद ।
किंकर, सं. पुं. (सं.) भृत्यः, सेवकः, प्रेष्यः, चेटः २. क्रीतदासः ।
किंकर्तव्यविमूढ, वि. (सं.) संभ्रान्तमनस्, व्याकुलचित्त ।
किंकिणी, सं. स्त्री. (सं.) क्षुद्र,-घंटी-घंटिका २. कांची-चिः (स्त्री.), रशना ।
किंचित्, वि. (सं.) स्तोक, अल्प ।
किंजल्क, सं. पुं. (सं.) पद्म-कमल,-केसरः २. पद्मपरागः, जलजरजस् (न.) ३. नागकेसरः ।
किंतु, अव्य. (सं.) परन्तु, तु, पुनः २. अपि तु, प्रत्युत, पुनः, परन्तु ।
किंनर, सं. पुं. (सं.) किंपुरुषः, तुरंगवदनः, अश्वमुखः ।
किंपुरुष, सं. पुं. (सं.) किन्नरः २. दुष्कुलीनः ३. वर्णसंकरः ।

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

किंवदंती, सं. स्त्री. (सं.) जन,-प्रवादः-श्रुतिः (स्त्री.), कर्णोपकर्णिका ।
किंवा, अव्य. (सं.) वा, अथवा, यद्वा, किमुत ।
किंशुक, सं. पुं. (सं.) पलाशः, दे. 'ढाक' ।
किं, क्रि, वि. (सं. किम्) कथं, केन प्रकारेण ।
कि, अव्य, (फ़ा.) यत्, यथा, इति ।
किचकिच, सं. स्त्री. (अनु.) प्रलापः, प्रजल्पनम् २. कलहः ।
किचकिचाना, क्रि. अ. (अनु.) दंतैर्दंतान् निष्पीड् (चु.)-घृष् (भ्वा. प. से.) ।
किट्ट, सं. पुं. (सं. न.) धातुमलम् २. तैलादीनां मलम् ३. कल्कं, मलं, शेपम् ।
कितना, वि. (सं. कियत्) किंपरिमाण, किंमात्र २. अधिक, बहु ।
कितने, वि. पुं. (सं. कति) किंसंख्याकाः ।
कितव, सं. पुं. (सं.) द्यूतकारः, अक्षदेविन् २. वंचकः ३. दुष्टः ।
किताब, सं. स्त्री. (अ.) पुस्तकं. ग्रन्थः २. पत्रिका, पंजिका ।
—का (किताबी) कीड़ा, सं. पुं., ग्रंथ-पुस्तक,-कीटः । २. सदापाठिन् ।
किताबत, सं. स्त्री. (अ.) लेखः, लेखनम् । ख़त व—, सं. स्त्री., पत्रव्यवहारः ।
किधर, क्रि. वि, (सं. कुत्र) क, कस्मिन् स्थाने २. कां दिशां प्रति, कस्यां दिशि ।
किन, सर्व. ('किस' का बहु.) के (पुं.), काः (स्त्री.), कानि (न.) ।
किनका, सं. पुं. (सं. कणिका) कणी, कणा, क्षत,-तंडुलः-धान्यम् ।
किनारा, सं. पुं. (फ़ा.) तीरं, तटम् २. उपांतः, प्रांतः ३. वस्त्रप्रान्तः, अंचलः ४. पार्श्वः, पक्षः ५. सीमा ६. अन्तः ।
—करना, मु. दूरे स्था (भ्वा. प. अ.), परित्यज् (भ्वा. प. अ.) ।
किनारी, सं. स्त्री. (फ़ा. किनारा >) स्वर्ण-रजत-, जालाभरणम् ।
किनारे, क्रि. वि. (फ़ा. किनारा) तीरे, तटे २. सीमायाम् ३. पृथक्, दूरे ।
—किनारे, अनु,-कूलं-तटं-तीरम् २. सीमाम् अनु ।
—लगाना, मु., समाप्-संपद् (प्रे.) ।
किन्नर, सं. पुं. (सं.) किंपुरुषः, देवयोनिभेदः ।
किन्नरी, सं. स्त्री. (सं.) किन्नरजातेर्नारी ।
किफ़ायत, सं. स्त्री. (अ.) मितव्ययः, अमुक्तहस्तत्वम् ।
किबला, सं. पुं. (अ.) प्रतीची २. मक्कानगरी ३. पूज्यजनः ४. पितृ ।
—नुमा, सं. पुं. (अ + फ़ा.) दिग्दर्शकयंत्रम्, दिग्घटी, दिग्घटिका ।
किरकिरा, वि. (सं. कर्करम् >) शार्करिल, सिकतिल ।
किरकिरी, सं. स्त्री. (सं. कर्करम् >) नेत्रपतितो धूल्यादिकणः २. त्रसरेणुः, अणुरेणुः ।
किरच, सं. स्त्री. (सं. कृतिः >) अजिह्मखड्गः, अग्न्यस्त्रसंसक्ता छुरिका २. काष्ठकाचादीनां तीक्ष्णाग्रं शकलम् ।
किरण, सं. स्त्री. (सं. पुं.) रश्मिः, मरीचिः, दीधितिः, मयूखः, करः, अंशुः, अभीशुः ।
—माली, सं. पुं. (सं.-लिन्) सूर्यः ।
किरमिच, सं. पुं. (अं. कैन्वस) शाणं, शणपटः, स्थूलवस्त्रभेदः ।
किरांची, सं. स्त्री. (अं. कैरेज >) वहनं, शकटः-टम् ।
किरात, सं. पुं. (सं.) अशिष्ट-असभ्य,-जनः २. वन्यजातिभेदः ।
—पति, सं. पुं. (सं.) शिवः ।
किरातार्जुनीय, सं. पुं. (सं. न.) भारविप्रणीतं महाकाव्यम् ।
किराना, सं. पुं. (सं. क्रयणम् अथवा कीर्ण >) वाणिज्यं, वणिक्कर्मन् (न.) २. गंधद्रव्याणि ।
किराया, सं. पुं. (अ.) वहनमूल्यं, तार्यं, आत-(ता) रः २. भाटं, भाटकन् ३. भृतिः (स्त्री.), भृत्या ।
—नामा, सं. पुं., भाटकपत्रम् ।
किराये का टट्टू, सं. पुं., वैतनिकः, सवेतनो दासेरः ।
किरायेदार, सं. पुं. (फ़ा.-यादार) भाटकवासिन् ।
किरीट, सं. पुं. (सं.) दे. 'मुकुट' ।
किलक, सं. स्त्री. (हिं. किलकना) हर्ष,-ध्वनिः-नादः-स्वनः, किलकिला २. कलम,-नडः-नलः ।
किलकना, क्रि. अ. (सं. किलकिला >) किलकिलारावं कृ, हर्षध्वनिं कृ ।

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

किलकारना, क्रि. अ., दे. 'किलकना'।

किलकिलाना, क्रि. अ. (सं. किलकिला >) १. दे. 'किलकना' २. कोलाहलं कृ ३. वाक्-कलहं कृ।

किलनी, सं. स्त्री. (हिं. कीड़ा)। कुक्कुर,-यूकः यूका।

किला, सं. पुं. (अ.) दुर्गं, कोटः।

—दार, सं. पुं. दुर्गाध्यक्षः, कोटपालः।

—बंदी, सं. स्त्री., दुर्गनिर्माणम् २. व्यूहरचना।

किल्कारी, सं. स्त्री. (हिं. किलकना) किल-किला, हर्षनादः २. कलकलः ३. चीत्कारः।

किल्लत, सं. स्त्री. (अ.) न्यूनता।

किल्ला, सं. पुं. (सं. कीलः >) बृहत्-स्थूल,-कीलः-शंकुः २. बृहत्, शूलः-स्थूणा-शलाका।

किल्ली, सं. स्त्री. (हिं. किल्ला) अर्गलं, अर्गलाबंधः २. कीलः, कीलम् ३. शूलः, स्थूणा।

किल्विष, सं. पुं. (सं. न.) पापम् २. अपराधः ३. रोगः।

किवाड़, सं. पुं. (सं. कपाटः) कपाटं-टी, अर-रम् २. द्वारं, द्वार् (स्त्री.)।

—खटखटाना, क्रि. स., कपाटम् अभिहन् (अ. प. अ.)।

किशमिश, सं. स्त्री. (फ़ा) शुष्क,-द्राक्षा-गोस्तनी।

किशलय, सं. पुं. (सं. पुं. न.) किसलयः-यं, पल्लवः-वं, अंकुरः, प्ररोहः २. मंजरी।

किशोर, सं. पुं. (सं.) एकादशावधिपंचदशवर्ष-पर्यन्तवयस्को बालः २. बालकः ३. पुत्रः।

किशोरी, सं. स्त्री. (सं.) तरुणी, बाला, बालिका, कन्या, युवती-तिः (स्त्री.)।

किश्ती, सं. स्त्री. (फ़ा.) नौका २. दीर्घचतुर-स्रपात्रम् ३. मञ्जा, क्षुद्रकोषः।

किस, सर्व. (सं. कस्य >) 'किम्' के रूपों से।

—तरह, क्रि. वि., कथं, केन प्रकारेण, कया रीत्या।

किसलय, सं. पुं., दे. 'किशलय'।

किसान, सं. पुं. (सं. कृषाणः) कर्षकः, कृषिकः, कृषीवलः, क्षेत्रिकः, क्षेत्राजीवः, क्षेत्रिन्।

किसानी, सं. स्त्री. (हिं. किसान) कृषिः (स्त्री.), कृषिकर्मन् (न.)।

किसी, सर्व (हिं. किस) 'किम्' के रूपों के साथ चित्, चन वा अपि लगाकर। [उ० किसी ने = कश्चित्, कोऽपि, कश्चन (पुं.); काचित् (स्त्री.); किंचित् (न.) इ.।]

—तरह, क्रि. वि. येन केन प्रकारेण, कथंचित्।

किसे, सर्व. (हिं. किस) कं, कां, किम् (द्वितीया); कस्मै, कस्यै, कस्मै (चतुर्थी)।

किस्त, सं. स्त्री. (अ.) देयभागः, ऋणांशः, खण्डिका।

—करना, क्रि. स., अंशांशतः ऋणं परिशुध् (प्रे.)।

—वार, क्रि. वि., अंशशः, अंशांशतः।

क़िस्म, सं. स्त्री. (अ.) प्रकारः, भेदः, जातिः (स्त्री.) २. प्रकृतिः (स्त्री.), स्वभावः।

क़िस्मत, सं. स्त्री. (अ.) भाग्यं, भागधेयं, दिष्टं, दैवम् २. प्रान्त,-भागः-खण्डः।

खुश—, वि., धन्य, पुण्यवत्।

बद—, वि., अधन्य, दैवहतक।

—आज़माना, मु., भाग्यं परीक्ष् (भ्वा. आ. से.)।

क़िस्सा, सं. पुं. (अ.) कथा २. वृत्तान्तः ३. कलहः।

की, प्रत्य. ('का' का स्त्री.) दे. 'का'।

कीक, सं. स्त्री. (अनु.) चीत्कारः, उत्क्रोशः।

कीकट, सं. पुं. (सं. कीकटाः) मगधप्रदेशः २. तत्रत्यानार्यजातिः (स्त्री.) वि०, निर्धन २. कृपण।

कीकर, सं. पुं. (सं. किंकिरातः) दीर्घकण्टकः।

कीकस, सं. पुं. (सं. न.) अस्थि (न.), हड्डुम् २. कीटभेदः। वि., दृढ, कठिन।

—मुख, सं. पुं. (सं.) खगः, पक्षिन्।

कीचक, सं. पुं. (सं.) सरंध्रो वंशः, सच्छिद्रो वेणुः। २. विराटराजस्य श्यालः।

कीचड़, सं. पुं. (सं. चिकिलः) पंकः-कं, जंबालः-लं, अवकीलः, कर्दमः, शादः, निषद्वरः।

कीट[1], सं. पुं. (सं.) कीटकः, कृमिः, क्रिमिः, नीलंगुः।

कीट[2], सं. स्त्री. (सं. किट्टम्) घृततैलादीनां मलम्।

कीड़ा, सं. पुं. (सं. कीटः) दे. 'कीट[1]'। २. सर्पणशीलः, सरीसृपः ३. सर्पः, अहिः (पुं.) ४. रक्तपा, जलौका।

—लगना, क्रि. अ., कीटैः भक्ष् (कर्म.)।

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

कीड़ी, सं. स्त्री. (हिं. कीड़ा) क्षुद्रकीटः २. पिपीलिका ३. जलूका ।

कीना, सं. पुं. (फ़ा.) द्वेषः वैरं, द्रोहः ।

कीप, सं. स्त्री. (अ. कीफ़) निवापः ।

क़ीमत, सं. स्त्री. (अ.) मूल्यं, अर्घः ।

कीमती, वि. (अ.) महार्घ, बहुमूल्य ।

क़ीमा, सं. पुं. (अ.) कृत्तमांसम् ।

कीमिया, सं. स्त्री. (फ़ा.) रसायनम्, रस,-विद्या शास्त्रं-तंत्रम् ।

कीर, सं. पुं. (सं.) शुकः, दे. 'तोता' ।

कीर्तन, सं. पुं. (सं. न.) गुणकथनम् २. ईश-गुणगानम् ।

कीर्ति, सं. स्त्री. (सं.) यशस् (न.), विख्यातिः-विश्रुतिः (स्त्री.), अभिख्या, समाख्या ।

—मान्, वि. (सं.-मत्) यशस्विन्, विश्रुत, विख्यात ।

कील, सं. स्त्री. (सं. पुं.) कीलकः, शंकुः, लोह,-कीलः-शंकुः २. लवंगनामकं नासिकाभूषणम् ३. मुखस्फोटकः ।

कीलक, सं. पुं. (सं.) कीलः, कीला २. नाग-दांतः, भारयष्टिः (स्त्री.) ३. महाकीलः, शूलः ४. स्थाणुः, स्थूणा ५. अन्यमंत्रप्रभावनाशको मंत्रः ।

कीलना, क्रि. स. (सं. कीलनम्) कील् (चु.) कीलैः बंध् (क्र्. प. अ.) २. अभिचारप्रभावं नाश् (प्रे.) ३. (सर्पादिकं) वशीकृ ।

कीला, सं. पुं. (सं.) दे. 'किला' ।

कीलाल, सं. पुं. (सं. न.) अमृतम् २. जलम् ३. रक्तम् ४. मधु (न.) ।

कीलित, वि. (सं.) (कीलैः) बद्ध, दृढीकृत, पिनद्ध ।

किली, सं. स्त्री. (सं. कीलः >) कर्पणी, व्या-वर्तनकीलः, वलयकीलकः २. कुञ्चिका, उद्-घाटकम् ३. विवर्तनकीलः ४. कीलः ५. अक्ष-रेखा, अक्षः ।

कीश, सं. पुं. (सं.) कपिः २. खगः ३. सूर्यः ।

कुंअर, सं. पुं. (सं. कुमारः) पुत्रः, सूनुः (पुं.) २. बालकः ३. राजकुमारः ४. युवराजः ।

कुंआरा, वि. पुं. (सं. कुमार) अकृतविवाहः । [-री (स्त्री.) =अपरिणीता, अनूढा, कुमारी ।]

कुंइ, सं. स्त्री., दे. 'कुमुदिनी' ।

कुंकुम, सं. पुं. (सं. न.) काश्मीरजं, दे. 'केसर' २. दे. 'रोली' ।

कुंचन, सं. पुं. (सं. न.) संकोचः, संकोचनम्, संक्षेपणम् ।

कुंचिका, सं. स्त्री. (सं.) ताली, तालिका, साधारणी ।

कुंचित, वि. (सं.) दे. 'आकुंचित' ।

कुंज, सं. पुं. (सं. पुं. न.) निकुंजः-जं, लता,-गृहं-मंडपः ।

—कुटीर, सं. स्त्री. (सं. पुं.) लतागृहं, पर्ण-शाला, कुंजगृहम् ।

—विहारी, सं. पुं. (सं.-रिन्) श्रीकृष्णः ।

कुंजड़ा, सं. पुं. (सं. कुंज >) हरितकविक्रेतृ-जातिविशेषः २. शाकविक्रयिन् ।

कुंजर, सं. पुं. (सं.) गजः, द्विपः २. केशः । (टि. समासान्त में 'कुंजर' श्रेष्ठतावाचक है—नरकुंजर = श्रेष्ठपुरुषः) ।

कुंजी, सं. स्त्री. (सं. कुंचिका) ताली, उद्घा-टकः-कं, अंकुटः, साधारणी । २. टीका, व्याख्या ।

कुंठ, वि. (सं.) कुंठित, धाराहीन, तीक्ष्णता-रहित २. मूर्ख ।

कुंठित, वि. (सं.) कुंठीकृत, हततैक्ष्ण्य २. निष्प्र-भीकृत ३. अनुपयोगिन् ।

कुंड, सं. पुं. (सं. कुण्डः-डं-डी) पल्वलः-लं, अल्पसरस् (न.), वेशंतः, क्षुद्रजलाशयः २. अग्नि-यज्ञ-हवन,-कुण्डम् ३. स्थाली ४. विशा-लमुखमतिगंभीरपात्रम् (हिं. मटका) ५. सध-वाया जारजपुत्रः ६. लौहशिरस्त्रम् ७. मानभेदः ।

कुंडल, सं. पुं. (सं. पुं. न.) कर्ण-श्रवण,-वेष्टनं, कर्णभूषणभेदः २. वलयः ३. परिवेशः-षः, तेजोमंडलम् ४. आवेष्टनम्, व्यावर्तनम् ।

—करना वा मारना, क्रि. स., वर्तुली-पुटी,-कृ, व्यावृत्-परिवेष्ट् (प्रे.) ।

कुँडलिया, सं. स्त्री. (सं. कुण्डलिका) मात्रिक-छन्दोभेदः ।

कुंडली, सं. स्त्री. (सं.) मिष्टान्नभेदः (हिं. जलेबी) २. कुरलः, चूर्णकुन्तलः ३. जन्म-पत्रं,-पत्रिका ४. सर्पस्य वर्तुलाकारस्थितिः (स्त्री.) ।

कुंडा[1], सं. पुं. (सं. कुण्डः) जीवति भर्तरि जारजः ।

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

कुंडा[२], सं. पुं. (सं. कुण्डलम् >) लोह,-ग्रहणी-धरणी २. अर्गलः-लं-ला-ली ।

कुंडा[३], सं. पुं. (सं. कुण्डः-डम्) विशालमुख-मतिगम्भीरपात्रम् (हिं. मटका) ।

कुंडिन, सं. पुं. (सं. न.) विदर्भराजधानी ।

कुंडी[१], सं. स्त्री. (सं.) कुण्डी, खल्लः ।

—डंडा, सं. पुं., कुण्डीदण्डं-डौ ।

कुंडी[२], सं. स्त्री. (हिं. कुण्डा) द्वारशृंखला २. अर्गलः-लं-ला-ली ३, शृङ्खला,-संधिः-ग्रंथि ।

कुंत, सं. पुं. (सं.) प्रासः, तोमरः ।

कुंतल, सं. पुं. (सं.) केशः, शिरोरुहः ।

कुंतिभोज, सं. पुं. (सं.) भोजप्रदेशशासकः, कुन्त्याः पालकपितृ (पुं.) ।

कुंती, सं. स्त्री. (सं.) पृथा, पाण्डुपत्नी, युधिष्ठिर-जननी ।

कुंद[१], सं. पुं. (सं. पुं. न.) सदापुष्पः, वन-हासः २. कमलम् ।

कुंद[२], वि. (फ़ा.) कुण्ठ, तीक्ष्णतारहित २. मन्द, जड ।

—ज़हन, वि. (फ़ा.) मन्दमति, मूर्ख ।

कुंदन, सं. पुं. (सं. कुन्दः >) विशुद्धं सुवर्णम् वि. भास्वर २. पवित्र ३. नीरोग ।

कुंदा, सं. पुं. (फ़ा.) बृहत्-स्थूल,-काष्ठम् २. अग्न्यस्त्रस्य काष्ठमयोऽपरभागः ३. काष्ठनिगडः ४. मुष्टिः (स्त्री.), वारंगः ।

कुंदी, सं. स्त्री. (फ़ा. कुन्दा >) मुद्गरैर्वस्त्रता-डनम् २. ताडनम् ।

कुंभ, सं. पुं. (सं.) घटः, घटी, कलशः-शी-शम् २. गजकुम्भः, हस्तिशिरसः पिण्डद्वयम् ३. कुम्भकप्राणायामः ४. द्वादशवार्षिकः पर्व-विशेषः ५. रात्रिविशेषः (ज्यो.) ।

—कर्ण, सं. पुं. (सं.) रावणानुजः ।

—योनि, सं. पुं. (सं.) अगस्त्यो मुनिः ।

कुंभक, सं. पुं. (सं.) कुम्भः, प्राणायामे वायु-स्तम्भनम् ।

कुंभी, सं. स्त्री. (सं.) क्षुद्र-लघु,-कुम्भः-घटः ।

—पाक, सं. पुं. (सं.) नरकविशेषः ।

कुंभी, सं. पुं. (सं. कुम्भिन्) गजः २. नक्रः ३. विषकीटभेदः ।

कुंवर, सं. पुं., दे. 'कुँअर' ।

कु, अव्य. (सं.) पापकुत्साऽल्पत्वादिद्योतक-मव्ययम् (उ. कुकर्म = पापकर्म) ।

कुआँ, सं. पुं. (सं. कूपः) अंधुः, प्रहिः, अवटः, खातः, अवतः, केवटः ।

—खोदना, मु., परान् पीड् (चु.) ।

कुआर, सं. पुं. (सं. कुमारः >) आश्विनः, इषः, आश्वयुजः ।

कुइयाँ, सं. स्त्री. (हिं. कुआँ) कूपी, कूपकः, खातकः, अन्धुकः ।

कुई, सं. स्त्री., दे. 'कुमुदिनी' ।

कुक, सं. पुं. (अं.) पाचकः, सूदः, वल्लवः, रन्धकः ।

कुकड़ी सं. स्त्री. (सं. कुक्कुटी) ताम्रचूडी २. शस्यम् ३. सूत्रपंजी, तंतुगुच्छः ।

कुकर, सं. पुं. (अं.) पचन-पाक,-यन्त्रभेदः, *कुकरम् ।

कुकर्म, सं. पुं. (सं. न.) कु,-कार्य-कृत्यं-कृतिः (स्त्री.), दुराचारः, पापं, दुष्टता ।

कुकर्मी, वि. (सं.-र्मिन्) दुर्वृत्त, पापिन्, पाप, दुरात्मन् ।

कुकुरमुत्ता, सं. पुं. (सं. कुक्कुरमूत्रम् >) कुछत्रकः ।

कुक्कुट, सं. पुं. (सं.) ताम्रचूडः, चरणायुधः, कालज्ञः, उषाकरः, शिखण्डिकः ।

कुक्कुर, सं. पुं. (सं.) श्वन्, दे. 'कुत्ता' ।

कुक्षि, सं. स्त्री. (सं. पुं.) उदरं, जठरं, तुंदम् २. गर्भाशयः, गर्भस्थानम् ३. पदार्थान्तर्भागः ४. गुहा ।

कुगति, सं. स्त्री. (सं.) दुर्दशा, दुर्गतिः (स्त्री.) ।

कुच, सं. पुं. (सं.) स्तनः, उरोजः २. चूचुकः-कं, स्तनाग्रम् ।

कुचकुचाना, क्रि. स. (अनु. कुचकुच) व्यध् (दि. प. अ.), छिद्रं कृ ।

कुचक्र, सं. पुं. (सं. न.) कूट-कपट, उपायः, उपजापः, कपट,-संकल्पः-प्रयोगः ।

कुचक्री, वि. (सं.-क्रिन्) उपजापकः, कपट-प्रबन्धयोजकः ।

कुचलना, क्रि. स. (अनु.) क्षुण् (त. प. से.) २. मृद् (क्र. प. से.), पिष् (रु. प. अ.) ३. भूरि तड् (चु.) ४. पादतलेन आहन् (अ. प. अ.) ।

कुचला, सं. पुं. (सं. कचीरः) किंपाकः, विष-तिंदुः, रम्यफलः, कुपीलुः, कालकूटः ।

कुचाल, सं. पुं. (सं. कु + हिं. चाल) दुराचारः, कुचर्या, कदाचरणम् ।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

कुचाली, वि (हिं. कुचाल) दुराचारिन्, दुर्वृत्त।
कुचेष्टा, सं. स्त्री. (सं.) दुश्चेष्टा, हानिकरोयत्नः।
कुचैला, वि. (सं. कुचेल) मलिनवेष, कुवसन।
कुछ, वि. (सं. किंचित्) (मात्रा) अल्प, स्वल्प, स्तोक, ईषत्, २. (संख्या) कतिचित्, कतिपय, ३. किमपि, यत्किंचन, ४. 'किम्' के तीनों लिंगों के रूपों के साथ चित्, चन, अपि लगाते हैं, उ. केचित्, काश्चित्, कानिचित् इ.।
—कर देना, मु., मंत्रैः वशीकृ।
कुज, सं. पुं. (सं.) मंगलग्रहः २. वृक्षः।
कुजाति, सं. स्त्री. (सं.) हीन-नीच-निकृष्ट,-जातिः-वर्णः। सं. पुं., दुष्कुलीनः, अन्त्यजः, नीचः।
कुट[1], सं. पुं. (सं. कुष्ठम्) गदाहं, कौवेरम्।
कुट[2], सं. पुं. (सं.) दुर्ग, कोटः २. गृहम् ३. पर्वतः ४. कलशः।
कुटकी, सं. स्त्री. (सं. कटुकीटः) दंशः, मशकः, प्राचिका, वनमक्षिका।
कुटनपन, सं. पुं. (सं. कुट्टनी >) दूतीवृत्तिः (स्त्री.) २. उपजापः, भेदवर्द्धनम्।
कुटना, सं. पुं. (हिं. कुटनी) भगभक्षकः, संचारकः, कुंडाशिन् २. पिशुनः।
कुटनी, सं. स्त्री. (सं. कुट्टनी) कुट्टिनी, दूती, दूतिका, संचारिका, शंभली, रततालो।
कुटिया, सं. स्त्री. (सं. कुटी) उटजः-जं, पर्णशाला, पर्णकुटी-टिः (स्त्री.) कुटीरः।
कुटिल, वि. (सं.) वक्र, जिह्म, अराल, भुग्न, न्युब्ज २. वञ्चक, प्रतारक, कपटिन्, छलिन्।
कुटिलता, सं. स्त्री. (सं.) कौटिल्यं, वक्रता, जिह्मता २. छलं, कपटं, प्रतारणा।
कुटी, सं. स्त्री. (सं.)] क्षुद्रगृहम्,
कुटीर, सं. पुं. (सं.)] दे. 'कुटिया'।
कुटुम्ब, सं. पुं. (सं. पुं. न.) गृहजनः, पुत्रकलत्रादयः, ज्ञातिः (स्त्री.), बान्धवाः, संततिः (स्त्री.) २. कुलं, वंशः, जातिः (स्त्री.)।
कुटुंबी, सं. पुं. (सं.-बिन्) गृहस्थः, गृहपतिः, गेहिन् २. ज्ञातिः (स्त्री.), बन्धुः, बांधवः।
कुटुम्बिनी, सं. स्त्री. (सं.) गृहिणी, गेहिनी, आर्या, सुतिनी, पुरन्ध्री।
कुटेव, सं. स्त्री. (सं. कु+हिं. टेव) कुप्रवृत्तिः (स्त्री.), व्यसनं, दुर्गुणः।
कुट्टनी, सं. स्त्री. (सं.) दे. 'कुटनी'।
कुट्टी, सं. स्त्री. (हिं. काटना) यवसखण्डाः २. बालकेषु मैत्रीविच्छेदः।
कुठला, सं. पुं. (सं. कोष्ठः >) क्षुद्रधान्यकोष्ठः, मृन्मयं लघुधान्यागारम्।
कुठार, सं. पुं. (सं.) परशुः, द्रुघणः, वृक्षादनी, वृक्षभेदिन्, परश्वधः।
कुठाराघात, सं. पुं. (सं.) परशुप्रहारः २. तीव्रप्रहारः।
कुठाली, सं. स्त्री. (सं. कु+स्थाली >) तैजसावर्तनी, मु (मू)षा-षी।
कुठौर, सं. पुं. (सं. कु+हिं. ठौर) कुस्थानम् २. अनवसरः, असमयः।
कुड़कुड़ी, सं. स्त्री. (अनु.) दे. 'गुड़गुड़ाना'।
कुड़बुड़ाना, क्रि. अ., दे. 'कुढ़ना'।
कुड़ल, सं. पुं., (रक्ताल्पतया) अंग,-व्यावर्तनं-आकुंचनम्।
कुड़ुक, सं. स्त्री. (फा. कुरक) कुक्कुटीरुतम् २. अनंडदा कुक्कुटी। चि., व्यर्थं, निरर्थक।
कुडौल, वि. (सं. कु+हिं. डौल) दुर्दर्शन, कदाकार, कुरूप।
कुढंगा, वि. पुं. (सं. कु+हिं. ढंग) अशिष्ट, असभ्य, दुःशील।
कुढ़न, सं. स्त्री. (हिं. कुढ़ना) मनस्तापः, चित्तव्यथा।
कुढ़ना, क्रि. अ. (सं. क्रुद्ध >) दुर्मनायते (ना. धा.), क्षुभ् (दि. प. से.), अन्तः परितप् (दि. आ. अ.)।
कुढब, वि. (सं. कु+हिं. ढब) कुरूप, दुर्दर्शन २. अशिष्ट ३. कठिन।
कुढ़ाना, क्रि. स. (हिं. कुढ़ना) संतप्-उद्विज् (प्रे.) २. प्रकुप्-क्रुध् (प्रे.)।
कुतरना, क्रि. सं. (सं. कर्तनम्) चर्वणेन कृत् (तु. प. से.), दन्तैः खण्ड् (चु.)।
कुतर्क, सं. पुं. (सं.) हेत्वाभासः, मिथ्याहेतुः, वितंडा, प्रजल्पः, विवादः।
कुतर्की, वि. (सं.-किंन्) वितण्डावादिन्, मिथ्याहेतुवादिन् २. वाचालः, वावदूकः।
कुतिया, सं. स्त्री. (हिं कुत्ता) सरमा, कुक्कुरी, शुनी, सारमेयी, भषी।
कुतुब, सं. पुं. (अ.) ध्रुवः, ध्रुवतारा।
—नुमा, सं. पुं., दे. 'दिक्सूचयन्त्र'।

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

कुतूहल, सं. पुं. (सं. न.) उत्कण्ठा, कौतूहलं, कुतुकं, कौतुकं, जिज्ञासा २. अपूर्व-दुर्लभ-अदृष्ट,-वस्तु (न.) ३. विनोदः ४. आश्चर्यम्।

कुत्ता, सं. पुं. (देश.) कुक्कुरः, श्वन् , शुनकः, कौलेयकः, भषकः, सारमेयः, मृगदंशकः, भषणः, वक्रलांगूलः, वृकारिः, शयालुः।

कुत्ते की हड़(ल)क, सं. स्त्री., आलर्कं, जलसंत्रासः, अलर्काभिभवः।

कुत्ती, सं. स्त्री. (हिं. कुत्ता) दे. 'कुतिया'।

कुत्सित, वि. (सं.) अधम, अवम, गर्ह्य, निन्दित।

कुदरत, सं. स्त्री. (अ.) प्रकृतिः (स्त्री.), माया, ईश्वरशक्तिः (स्त्री.) २. अधिकारः, प्रभुत्वम् ३. संसारः, जगत् (न.) ४. रचना।

कुदरती, वि. (अ.) नैसर्गिक, प्राकृतिक, मायामय २. स्वाभाविक, सहज ३. दिव्य, ऐश्वर (-री स्त्री.)।

कुदाँव, सं. पुं. (सं. कु+हिं. दाँव) छलं, विश्वासघातः २. कुस्थितिः (स्त्री.)३. कुस्थानम्।

कुदान[1], सं. पुं. (सं. न.) गर्ह्यदानम् २. कुपात्राय दानम्।

कुदान[2], सं. स्त्री. (हिं. कूदना) कूर्दनं, झंपः-पा २. कूर्दनभूमिः (स्त्री.), झंपान्तरालम्।

कुदाना, क्रि. स., 'कूदना' के धातुओं के प्रे. रूप।

कुदाल, सं. पुं. (सं. कुद्दालः) कुद्दारः, अवदारणः, स्तम्बघ्नः, खनित्रम् २. टंकः, पाषाणदारणः।

कुदिन, सं. पुं. (सं. न.) आपत्कालः, विपत्तिसमयः २. दुर्दिनम्, ऋतुविपरीतं दिनम्।

कुदृष्टि, सं. स्त्री. (सं.) पापदृष्टिः (स्त्री.) २. अमंगलदृष्टिः।

कुधर, सं. पुं. (सं.) पर्वतः २. शेषनागः।

कुनकुना, वि. (सं. कदुष्ण) ईषदुष्ण, कोष्ण, कवोष्ण, मन्दोष्ण।

कुनवा, सं. पुं., दे. 'कुटुम्ब'।

कुनाम, सं. पुं. (सं.-मन् न.) अप, ख्यातिः कीर्तिः (स्त्री.)।

कुपन्थ, सं. पुं. (सं. कुपथः) कापथः, कुमार्गः २. निषिद्धाचरणम् ३. कुत्सितसंप्रदायः।

कुपन्थी, वि. (हिं कुपन्थ) कुपथिन्, कुमार्गिन्, कदाचारिन्।

कुपथ, सं. पुं. (सं.) दे. 'कुपन्थ'।

—गामी, वि. (सं.-मिन्) दे. 'कुपन्थी'।

कुपथ्य, सं. पुं. (सं. न.) रोगजनकौ आहारविहारौ।

कुपात्र, वि. (सं. न.) अयोग्य, अनर्ह, निर्गुण, अनधिकारिन्।

कुपित, वि. (सं.) क्रुद्ध, रुष्ट।

कुपुत्र, सं. पुं. (सं.) दे. 'कपूत'।

कुप्पा, सं. पुं. (सं. कुतुपः) कूपकः, कुतूः (स्त्री.) चर्ममयं स्नेहपात्रम्।

—होना, मु. आप्याम्-स्फाय् (भ्वा. आ. से.) पीनीभू०।

कुप्पी, सं. स्त्री. (हि. कुप्पा) चर्मकूपी, लघुकुतुपः-कुतूः (स्त्री.))

कुफ़र, सं. पुं. (अ. कुफ्र) यवनेतरसंप्रदायः २. यवनमतविरोधिवाक्यम्।

कुफ़ल, सं. पुं. (अं.) तालः, द्वारयंत्रम्।

कुब, सं. पुं. (सं. कुब्जः >) ककुदः-दं, कुद् (स्त्री.)।

कुबड़ा, वि. (सं. कुब्ज) कुब्जक, न्युब्ज, वक्रपृष्ठ, गडुल-र, गडु। सं. पुं. कुब्जः इ.।

कुबड़ी, सं. स्त्री. (हिं. कुबड़ा) नतशीर्षा यष्टिः (स्त्री.) २. दे. 'कुब्जा'।

कुबानि, सं. स्त्री., दे. 'कुटेव'।

कुबुद्धि, वि. (सं.) मूर्ख, मन्दमति। सं. स्त्री., मौर्ख्यं, मूढता।

कुबेर, सं. पुं. (सं. कुबेरः) धनदः, यक्षराज,ः वैश्रवणः, राजराजः, इच्छावसुः, नरवाहन,ः निधीश्वरः।

कुबेला, सं. स्त्री. (सं. कुवेला) कु,-समयः-कालः २. अनवसरः, अयोग्यकालः।

कुब्ज, वि. (सं.) दे. 'कुबड़ा'।

कुब्जा, सं. स्त्री. (सं.) कंसदासी २. मंथरानाम्नी कैकेयीदासी। वि. वक्रपृष्ठा, कुब्जा।

कुभा, सं. स्त्री. (सं.) काबुलनदी २. भूमिच्छाया।

कुमक, सं. स्त्री. (तु.) सैन्य-, सहायता।

कुमकुम, सं. पुं. (सं. कुंकमम्) केसरः-रम्, काश्मीरजम्।

कुमुकुमा, सं. पुं. (तु०-मः) लाक्षा,-गोलः-वर्तुलः २. अलंकरणोपयुक्तः काचगोलः ३. संकीर्णमुख-कमंडलुः-करंकः।

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

कुमाच, सं. पुं. (अ. कुमाश) कौशेयवस्त्रभेदः ।
कुमार, सं. पुं. (सं.) बालः, बालकः २. पुत्रः ३. राजपुत्रः ४. युवराजः ५. कार्त्तिकेयः ६. अप्राप्तयौवनः ८. सनकादयः ऋषयः ७, भारतवर्षः-र्षम् । वि., दे. 'कुआरा' ।
कुमारबाज, सं. पुं. (अ.+फ़ा.) द्यूतकारः, कितवः ।
कुमारी, सं. स्त्री. (सं.) बाला, बालिका, कन्या २. पुत्री, ३. राजपुत्री ४. द्वादशवर्षा कन्या ५. सह्या, घृतकुमारी ६. सीता ७. पार्वती । वि. दे. 'कुँआरी' ।
कुमार्ग, सं. पुं. (सं.) दे. 'कुपंथ' ।
कुमुद, सं. पुं. (सं. न.) कैरवं, चन्द्रकान्तं, कल्हारं, शीतलकं, इन्दुकमलं, चन्द्रिकाबुजं, गन्धसोमं, कुवलयम् २. कर्पूरः-रं ३. रूप्यम् । —बंधु, सं. पुं. (सं.) चन्द्रः २. कर्पूरः-रम् ।
कुमुदिनी, सं. स्त्री. (सं.) दे. 'कुमुद' २. कुमुदवत् सरस् (न.) । —पति, सं. पुं. (सं.) चन्द्रः ।
कुमेरु, सं. पुं. (सं.) दक्षिणध्रुवः ।
कुमोदिनी, सं. स्त्री., दे. 'कुमुदिनी' ।
कुम्मैत, सं. पुं. (तु.) पिंग,-वर्णः-रंगः २. पिंगाश्वः ।
कुम्हड़ा, सं. पुं. (सं. कूष्मांडः) दे. 'काशीफल' ।
कुम्हलाना, क्रि. अ. (सं. कुम्लानं) म्लै-म्लै (भ्वा. प. अ.), विशृ (कर्म.), विवर्णी भू ।
कुम्हार, सं. पुं. (सं. कुंभकारः) कुलालः, चक्रिन् ।
कुम्हारिन , सं. स्त्री. (हिं. कुम्हार) कुलाली, कुंभकारी, चक्रिणी ।
कुरंग[1], सं. पुं. (सं.) हरिणः, मृगः २. कृष्णसारः ।
कुरंग[2], वि. कुवर्ण, निन्द्यरंग ।
कुरंगी, सं. स्त्री. (सं.) मृगी, हरिणी ।
कुरंड, सं. पुं. (सं. कुरुविंदम्) काचलवणम् २. माणिक्यम् ।
कुरकुरा, वि. (अनु. कुरकुर) भंगुर, भिदुर ।
कुरबान, वि. (अ.) इष्ट, हुत, बलित्वेन दत्त ।
कुरबानी, सं. स्त्री. (अ.) यज्ञः, यागः २. बलिः, उत्सर्गः, आलंभः ३. समर्पणं, परित्यागः ।
कुरसी, सं. स्त्री. (अ.) आसंदी, पीठं, आसनम् २-४. स्तम्भ-प्राकार-भवन,-मूलम् ५. वंशपरंपरा ।
—नामा, सं. पुं. (अ+फ़ा.) वंश,-वृक्षः-परंपरा ।
आराम—, सं. स्त्री. (फ़ा.+अ.) विश्रामासंदी ।
कुरा, सं. पुं. (अ.) दे. 'पाँसा' ।
कुरान, सं. पुं. (अ.) यवनधर्मपुस्तकम् ।
कुराह, सं. स्त्री. (सं. कु + फ़ा. राह) दे. 'कुपंथ' ।
कुरीति, सं. स्त्री. (सं.) कप्रथा, कदाचारः, कुव्यवहारः ।
कुरु, सं. पुं. (सं.) नृपविशेषः २. प्रान्तविशेषः ३. कुरुवंशजः । —क्षेत्र, सं. पुं. (सं. न.) महाभारतसंग्राम-भूमिः (स्त्री.) ।
कुरूप, वि. (सं.) विरूप, कदाकार, दुर्दर्शन । सं. पुं. (सं. न.) वैरूप्यं, कदाकारः ।
कुरूपता, सं. स्त्री. (सं.) दे. 'कुरूप' सं. पुं. ।
कुरेद (ल) ना, क्रि. स. (सं. कर्तनम् ?) उत्-वि, लिख् (तु. प. से.), तक्ष् (भ्वा. प. से.), खुर् (तु. प. से.), घृष् (भ्वा. प. से.) त्वक्ष् (भ्वा. प. वे.) उत्खन् (भ्वा. प. से) ।
कुर्क़, वि. (तु.) ऋणहेतोः अपहृत । —करना; क्रि. स.. ऋणहेतोः अपह्न (भ्वा. उ. अ.) । —अमीन, सं. पुं. (तु.+फ़ा) ऋणादिहेतोः द्रव्यापहर्ता, राजकर्मचारिन् ।
कुर्क़ी, सं. स्त्री. (तु कुर्क़ >) (राजाज्ञया) सम्पत्तिहरणम् ।
कुर्ता, सं. पुं. (तु.) चोलः, उरोवस्त्रम् ।
कुर्ती, सं स्त्री. (तु, कुर्ता >) आंगिकः-कं, कूर्पासकः-कम् ।
कुर्पर, सं. पुं. [सं. कु (कू) परः] जानु (न.) चक्रिका २. कफोणिः (पुं. स्त्री.) कफणी ।
कुर्बानी, दे. 'कुरबानी' ।
कुर्री, सं स्त्री. (देश.) कोमलास्थि (न.) ।
कुर्स, सं. पुं. (अ.), गुटिका, गुलिका, वटिका ।
कुर्सी, दे. 'कुरसी' ।
कुलंग, सं. पुं. (अ.) रक्तशीर्षो धूसरः खगभेदः । २. कुक्कुटः ३. दीर्घजंघो मनुष्यः ।
कुलंजन, सं. पुं. (सं.) कुलंजः, कुर्णजः, गंध-मूलः २. तांबूली-नागलता,-मूलम् ।
कुल, सं. पुं. (सं. न.) वंशः, अन्वयः, वंशावली-लिः (स्त्री.) २, जातिः (स्त्री.) ३. समूहः ४. गृहम् ५. न्यायमार्गः ।

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

—कलंक, सं. पुं. (सं.) कुलांगारः, कुलपांसलः।
—कानि, सं. स्त्री. (सं.+हिं.) कुल, गौरवं-मर्यादा।
—तारण, सं. पुं. (सं.) वंशोद्धारकः।
—पति, सं. पुं. (सं.) गृहस्वामिन् २. दश-सहस्रच्छात्राणां पोषकोऽध्यापकश्च ३. विश्वविद्यालयस्य उपप्रधानाधिकारिन् (अं० वाइस-चान्सलर)।
—वंती, सं. स्त्री. (सं. कुलवती) कुलीना, सद्वंशजा, आर्या।
कुल, वि. (अ.) सकल, समस्त, निखिल।
कुलकलाना, क्रि. अ. (अनु.) कुलकुलध्वनिं कृ।
आँतें—, मु., अतीव क्षुध् (दि. प. अ.)।
कुलक्षण, सं. पुं. (सं. न.) अपशकुनः, दुश्चिह्नं २. कदाचारः, गर्ह्याचरणम्। वि., दुराचारिन्।
कुलचा, सं. पुं. (फा. कलीचा) सकिण्वोऽपूपः २. दे. 'पूँजी'।
कुलटा, सं. स्त्री. (सं.) व्यभिचारिणी, पुंश्चली, वंधकी, भ्रष्टा, स्वैरिणी, निशाचरी, त्रपारण्डा।
कुलत्थ, सं. पुं. (सं. कुलत्था) चक्षुष्या, लोचनहिता, दृक्प्रसादा।
कुलथी, सं. स्त्री. (सं. कुलत्थः) कालवृन्तः (शस्यभेदः)।
कुलफ, सं. पुं. (अ. क़ुफ़्ल) दे. 'ताला'।
कुलफ़ा, सं. पुं. (फ़ा. खुर्फ़ः) वृहल्लोणी, घोलिका, शाकभेदः। २. दे. 'कुलफी'।
कुलफ़ी, सं. स्त्री. (हिं. कुलफ) धूमपान-यंत्रस्य भुग्ननाली २. हिमसन्तानीनिर्माण-पात्रम् ३. हिमसन्तानी, घनमधुरदुग्धम्।
कुलबुलाना, क्रि. अ. (अनु. कुलबुल) दुःखात् अंगानि आकृष् (भ्वा प. अ.) २. अंत्राणि गंभीरं स्वन् (भ्वा. प. से.) ३. वि-सं-प्र,-सृप् (भ्वा. प. अ.) ४. व्याकुल (वि.) भू ५. दे. 'खुजलाना'।
कुलबुलाहट, सं. स्त्री. (पूर्व.) शनैः सर्पणं, कृमिसदृशी चेष्टा २. कंडूलता, कच्छुरता।
कुलहा, सं. पुं. (फ़ा. कुलाह) शंकाकारं शिरस्कम्।
कुलही, सं. स्त्री. (हिं. कुलहा) शिशुशिर-स्कम्, दे. 'कनटोप'।
कुलाँच, सं. स्त्री. (तु. कुलाच) दे. छलाँग।
कुलाबा, सं. पुं. (अ.) लोहपुटः २. वडिशं, मत्स्यवेधनम् ३. द्वारसंधिः (पुं.) ४. शृङ्खलांगं, अंदूः-दुः (स्त्री.) ५. अर्गलः-लम् ६. जलमार्गः, नाली।
कुलाल, सं. पुं. (सं.) कुम्भकारः २. वन-कुक्कुटः ३. उलूकः।
कुलिक, सं. पुं. (सं.) कलाविद् (पुं.) २. शिल्पिन् ३. कुलीनः ४. कुलपतिः।
कुलिश, सं. पुं. (सं.) वज्रः-ज्रं, पविः २. विद्युत् (स्त्री.) ३. कुठारः।
कुली, सं. पुं. (तु.) भार,-वाहः-हरः, भारिकः २. कर्मक (का) रः, श्रमजीविन्।
कुलीन, वि. (सं.) महाकुल, अभिजात, आर्य, सभ्य, सत्कुलज।
कुलीनता, सं. स्त्री. (सं.) आभिजात्यं आर्यता।
कुलेल, सं. स्त्री. (सं. कल्लोलः >) क्रीडा, खेला, विहारः, केलिः (पुं. स्त्री.), विलासः, लीला।
कुल्या, सं. स्त्री. (सं.) क्षुद्रकृत्रिमनदी २. क्षुद्रनदी ३. पयःप्रणाली ४. कुलस्त्री।
कुल्ला, सं. पुं. (सं. कवलः >) चलुः, चलुकः, चुलुकः।
कुल्हड़, सं. पुं. (सं. कुल्हरिका) करकः, क्षुद्र-मृत्पात्रम्।
कुल्हाड़ा, सं. पुं. (सं. कुठारः, दे.)।
कुल्हिया, सं. स्त्री. (हिं. कुल्हड़) क्षुद्रकरकः, अतिक्षुद्रमृत्पात्रम्।
कुवलय, सं. पुं. (सं. न.) नील,-कुमुदं-कैरवं-शशिकान्तम् २. नील,-कमलं-उत्पलम् ३. भू-मण्डलम्।
कुवाच्य, वि. (सं.) अश्लील, अशिष्ट, अवाच्य। सं. पुं. (सं. न.) गाली, कुवचनं अपशब्दः।
कुवेणी, सं. स्त्री. (सं.) मत्स्यकरंडी २. कुग्रथितवेणी।
कुवेर, सं. पुं. (सं.) कुवेरः, दे.।
कुश, सं. पुं. (सं.) कुथः, दर्भः पवित्रम् २. जलम् ३. रामपुत्रः ४. कालः।
कुशन, सं. पुं. (अं.) उपधानं, उपवर्हं, उपबर्हणम्।
कुशल, वि. (सं.) दक्ष, चतुर, प्रवीण, निपुण, विशारद, विचक्षण २. श्रेष्ठ, भद्र।
सं. पुं. (सं. न.) सुखं, क्षेमं, मंगलम्, भद्रं, शिवम् २. कुशग्राहिन् ३. शिवः।

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

—क्षेम, सं. पुं. (सं. न.) सुखं, क्षेमं । मंगलम् ।
कुशलता, सं. स्त्री. (सं.) पाटवं, चातुर्यं, निपुणता ।
कुशा, सं. स्त्री. (सं. कुश:-शम्) दर्भः, कुथः, पवित्रं, याज्ञिकः ह्रस्वगर्भः, वर्हिस् (पुं. न.) ।
कुशाग्र, वि. (सं.) तीक्ष्ण, सूक्ष्म, तीव्र प्रखर ।
—बुद्धि, वि. (सं.) तीक्ष्णमति । सं. स्त्री., तीव्र,-मतिः (स्त्री.) ।
कुशादगी, सं. स्त्री. (फ़ा.) विशालता २. विस्तारः, विस्तृतिः (स्त्री.) ।
कुशादा, सं. पुं. (फ़ा.) विस्तृत २. आवरण-रहित ।
कुशासन[1], सं. पुं. (सं. कुश + आसनम्) कुथ-विष्टरः, दर्भासनम् ।
कुशासन[2], सं. पुं. (सं. कु + शासनम्) दुःशासनम्, कुत्सितराज्यव्यवस्था ।
कुशील, वि. (सं.) दुःशील, दुर्वृत्त, दुःस्वभाव ।
कुश्ता, सं. पुं. (फ़ा.-तः) धातुभस्मन् (न.) ।
कुश्ती, सं. स्त्री. (फ़ा.) नियुद्धं, मल्ल-बाहु-, युद्धम् ।
कुष्ठ, सं. पुं. (सं. न.) श्वित्रं, श्वेतं-त्रं, मंडलकं, दुश्चर्मन् (न.) २. दे. 'कुट'[1] ।
—नाशन, सं. पुं. (सं.) वाराहीकन्दः २. गौर-सर्षपः ३. क्षीरीशवृक्षः ।
कुष्ठी, वि. (सं. कुष्ठिन्) श्वित्रिन् ।
कुष्माण्ड, सं. पुं. (सं.) दे. 'कुम्हड़ा' ।
कुसंग, सं. पुं. (सं.) कु-दुस्,-संगतिः (स्त्री.) ।
कुसमय, सं. पुं. (सं.) कुकालः, अशुभसमयः २. अनवसरः, असमयः ३. विपत्कालः ।
कुसाइत, सं. स्त्री. (सं. कु + अ. सायत) अशुभमुहूर्तं, अनवसरः, कुसमयः ।
कुसीद, सं. पुं. (सं. न.) वार्द्धुष्यं, वृद्धिः (स्त्री.) ।
—जीवी, दे. 'सूदखोर' ।
—पथ, दे. 'सूदखोरी' ।
कुसुम्भ, सं. पुं. (सं. न.) वस्त्ररंजनं, महा-रंजनम् २. दे. 'केसर' ।
कुसुम्भा, सं. पुं. (सं. कुसुम्भम् >) कुसुम्भ-रागः २. अहिफेनभंगानिर्मितं मादकद्रव्यम् ।
कुसुम, सं. पुं. (सं. न.) पुष्पं, प्रसूनं, सुमं, सूनं, मणीवकं, सुमनसः (स्त्री., केवल बहु.) २. लघुवाक्यमयं गद्यम् ३. क्षीरजम् (न.) ।
—पुर, सं. पुं. (सं. न.) पाटलिपुत्रम् ।
—बाण, सं. पुं. (सं.) कामदेवः ।
कुसुमांजलि, सं. स्त्री. (सं. पुं.) पुष्पांजलिः ।
कुसुमित, वि. (सं.) पुष्पित, उत्फुल्ल, फुल्लित ।
कुसूर, सं. पुं. (अ.) अपराधः, स्खलितम् ।
—वार, वि. अपराधिन्, दोषिन् ।
कुहक, सं. पुं. (सं. न.) माया, अभिचारः, इन्द्रजालम् २. ऐन्द्रजालिकः ३. वंचकः ।
कुहकना, क्रि. अ. (अनु. कुहू) कुहूरवं कृ, कूज् (भ्वा. प. से.) ।
कुहनी, सं. स्त्री. (सं. कफोणिः पुं.) कफणिः (पुं. स्त्री.), कफणी, कु (कू) पंरः ।
कुहर, सं. पुं. (सं. न.) छिद्रं, विवरं, बिलं, रन्ध्रम् ।
कुहरा, सं. पुं. (सं. कुहेडी) तुषारः, खवाष्पः, धूमिका, कुहेडिका, कुज्झटिका ।
कुहराम, सं. पुं. (अ. क़हर + आम) विलापः, आक्रन्दनं, परिवेदना २. संकुलं, तुमुलम् ।
कुही, सं. स्त्री. (सं. कुधिः) श्येनः, खगान्तकः, शशादनः, कपोतारिः ।
कुहुक, पुं., दे. कुहू (२) ।
कुहुकना, क्रि. अ., दे. 'कुहकना' ।
कुहू, सं. स्त्री. (सं.) अमावस्या २. कोकिल-मयूर,-आलापः ।
कूँचा, सं. पुं. (सं. कूर्चम्) शोधनी, संमार्जनी, कूर्चकम् ।
कूँची, सं. स्त्री. (हिं. कूँचा) लघु-क्षुद्र,-शोधनी-कूर्चम् २. लोममयी मार्जनी ३. तूलिका, वर्ण,-तूली-तूलिका ।
कूँज, सं. पुं. (सं. क्रुंचः-चा) क्रौंचः-चा, कलिकः, कालिकः ।
कूँड, सं. पुं. (सं. कुंडम्) सेचनं-नी २. सीता, हलरेखा ३. 'खोद' ।
कूँड़ा, सं. पुं. (सं. कुंडम्), (जलार्थं) बृह-न्मृत्पात्रम् २. द्रोणी-णिः (स्त्री.) ३. कुसुम-पात्रम् ।
कूँड़ी, सं. स्त्री. (हिं. कूँड़ा) लघुपाषाणद्रोणी-णिः (स्त्री.) २. पाषाणचषकः-कम् ।
कूक, सं. स्त्री. (अनु.) कोकिलकूजितम् २. केका, मयूरध्वनिः ३. दीर्घमधुरध्वनिः ।
कूकना, क्रि. अ. (हिं. कूक) कूज् (भ्वा. प. से.) कुहूरवं कृ, केकां कृ ।

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

कूकर, सं. पुं. (सं. कुक्कुरः दे.)।
कूच, सं. पुं. (तु.) प्रस्थानं, प्रयाणं, अपक्रमः २. कटकत्यागः ३. यात्रा।
—करना, क्रि. अ., प्रस्था (भ्वा. आ. अ.). प्रया (अ. प. अ.)।
कूचा, सं. पुं. (फ़ा. चः) वीथी, दे. 'गली'।
कूजन, सं. पुं. (सं. न.) कूजितं, कलरवः, खगध्वनिः, विरुतं, गुंजनम्।
कूजना, क्रि. अ. (सं. कूजनम्) कूज् (भ्वा. प. से.), कु (अ. प. अ.), वि,-रु (अ. प. से.) २. गुंज् (भ्वा. प. से.), हुं कृ।
कूजा, सं. पुं. (फ़ा.) सनालीकः करकः।
—मिसरी, सं. स्त्री., अर्द्धगोलाकारा घनीकृता सिता।
कूजित, वि. (सं.) ध्वनित, स्वनित, गुञ्जित, झंकृत, कलरवपूर्ण।
कूट[1], सं. पुं. (सं. न.) छलं, कपटः-टं, माया, वञ्चना, प्रतारणा २. असत्यं ३. शृंगं. विषाणम् ४. उच्चशिखरम् ५. राशिः ६. गूढार्थवार्ता, सनिंद उपालम्भः ७. प्रहेलिका, गूढप्रश्नः ८. लोहमुद्गरः ९. हरिणजालम् १०. प्रच्छन्नवैरम् ११. नगरद्वारम् १२. भग्नशृंगो वृषभः।
वि., असत्यवादिन् २. प्रवञ्चक ३. कृत्रिम ४. श्रेष्ठ ५. निश्चल।
—नीति, सं. स्त्री. (सं.) दौत्यकर्मन् (न.)
—युद्ध, सं. पुं. (सं. न.) कपटसंग्रामः।
—योजना, सं. स्त्री. (सं.) कुचक्रम्।
—साक्षी, सं. पुं. (सं.-क्षिन्) मिथ्यासाक्षिन्।
कूट[2], सं. स्त्री. (हिं. काटना वा कूटना) कर्तनं, कृन्तनम् २. ताडनं, कुट्टनम्।
कूटक, सं. पुं. (सं. न.) छलं, कपटम् २. उत्सेधः, उत्तुंगता ३. फालः-लं, कुशिकम्।
कूटना, क्रि. स. (सं. कुट्टनम्) कुट्-चूर्ण्-खंड् (चु.), पिप् (रु. प. अ.) २. प्रबलं तड् (चु.)।
सं. पुं. तथा भाव, कुट्टनं, चूर्णनं, खण्डनम्, पेषणम् २. ताडनं, प्रहरणम्।
—योग्य, वि., कुट्टनीय, चूर्णयितव्य।
—वाला, सं. पुं. कुट्टकः, पेषकः, ताडयितृ।
कूटा हुआ, वि., कुट्टित, पिष्ट, ताडित।
कूटस्थ, वि. (सं.) शिखरस्थ २. निश्चल ३. नित्य ४. गूढ।
कूटाक्ष, सं. पुं. (सं.) कूट-कपट-,अक्षः-देवनः-सारः।
कूटाख्यान, सं. पुं. (सं. न.) गुप्तार्थ-गूढार्थ,-कथा-उपाख्यानम्।
कूड़ा, सं. पुं. (सं. कूटः = राशि >) अवस्करः, उच्छिष्टं, मलं, निस्सारवस्तुसमूहः।
—करकट, सं. पुं., दे. 'कूड़ा'।
कूद, सं. स्त्री. (हिं. 'कूदना') प्लवः, उत्-, प्लुतिः (स्त्री.), प्लवनं, झंपः-पा, वल्गनं, उत्प्लवः।
—फाँद, सं. स्त्री. कूर्दनप्लवनं, झंपवल्गितम्।
कूदना, क्रि. अ. (सं. कूर्दनम्) कुर्द् (भ्वा. आ. से.), उत्प्लु (भ्व. आ. अ.), वल्ग् (भ्वा. प. से.) २. प्र-मुद् (भ्वा. आ. से.)। सं. पुं., दे. 'कूद'।
—फाँदना, क्रि. अ., इतस्ततः वल्ग्। २. व्यायाम कृ।
कूप, सं. पुं. (सं.) दे. 'कुआँ' २. छिद्रं, रध्रम्।
—मंडूक, सं. पुं. (सं.) व्यवहारानभिज्ञः, अपक्वबुद्धिः, अल्पदर्शिन्। २. अंधुभेकः।
कूपन, सं. पुं. (अं.) पर्णिका, °कूपनम्।
कूपी, सं. स्त्री. (सं.) कूपकः, खातकः २. दे. 'कुप्पी' ३. नाभिः (पुं. स्त्री.), नाभी, तुंदिका।
कूबड़, सं. पुं. (सं. कूवरः >) ककुदः-दम्।
कूर, वि. (स. क्रूर) निर्दय, निर्घृण, नृशंस २. भयंकर २. दुष्ट ४. अलस ५. मूर्ख ६. कुलक्षण।
कूर्म, सं. पुं. (सं.) कच्छपः, दे. 'कछुआ' २. विष्णोः कच्छपावतारः ३. पृथिवी ४-७. ऋषि-प्राण-नाडी-आसन,-विशेषः।
कूल, सं. पुं. (सं. न.) तटः-टी-टं, तीरम् २. समीपे, निकटे ३. कुल्या ४. सरस् (न.)।
कूल्हा, सं. पुं. (सं. क्रोडम् >) नितंबास्थि (न.)।
कूष्मांड, सं. पुं. (सं.) दे. 'कुम्हड़ा')।
कृच्छ्र, सं. पुं. (सं. न.) दुःखं, कष्टम् २. पापम् ३. मूत्रकृच्छ्ररोगः ४. व्रतभेदः। वि., दुष्कर, दुस्साध्य।

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

कृत, वि. (सं.) विहित, अनुष्ठित, रचित, संपादित, निर्मित । सं. पुं. सत्ययुगम् २. चतुर् इति संख्या ।
—कार्य, वि. (सं.) सफल, सिद्धार्थ ।
—कृत्य, आप्तकाम, सफलमनोरथ ।
—युग, सं. पुं. (सं. न.) सत्ययुगम् ।
—विद्य, वि. (सं.) विद्वस्, पंडित, बहुश्रुत ।
कृतक, वि. (सं.) कृत्रिम, अनैसर्गिक, अस्वाभाविक, २. अनित्य (न्याय०) ।
—पुत्र, सं. पुं. (सं.) दत्तकः, दत्रिमः सुतः ।
कृतघ्न, वि. (सं.) कृतज्ञतारहित, अकृतवेदिन् ।
कृतघ्नता, सं. स्त्री. (सं.) अकृतवेदिता, उपकारविस्मरणम्, कृतज्ञताराहित्यम् ।
कृतज्ञ, वि. (सं.) उपकारज्ञ, कृतविद्, कृतवेदिन् ।
कृतज्ञता, सं. स्त्री. (सं.) उपकारज्ञता, उपकारस्मरणं, कृतवेदित्वम् ।
कृतांक, वि. (सं.) सचिह्न, चिह्नित, अंकित, सांक ।
कृतांजलि, वि. (सं.) बद्धांजलि, बद्धकर ।
कृतांत, सं. पुं. (सं.) मृत्युः २. यमः ३. पापम् ४. देवता ५. पूर्वजन्मकर्मफलम् ६. सिद्धान्तः ७, शनैश्चरवारः ।
कृतार्थ, वि. (सं.) पूर्णकाम, दे. 'कृतकार्य' २. संतुष्ट ३. निपुण ४. मुक्त ।
कृतास्त्र, वि. (सं.) सशस्त्र, सास्त्र, सन्नद्ध २. अस्त्रविद्, शस्त्रनिपुण ।
कृति, सं. स्त्री. (सं.) चेष्टा, क्रिया २. कर्मन् (न.) कार्यम् ३. इन्द्रजालम्, माया ४. रचना, ग्रंथः ७. प्रहारः ८. क्षतिः (स्त्री.) ।
कृती, वि. (सं. कृतिन्) कुशल, दक्ष, पटु २. पुण्यात्मन्, शुचिव्रत ।
कृतोदक, वि. (सं.) स्नात, कृतस्नान, कृताभिषेक
कृत्ति, सं. स्त्री. (सं.) मृगचर्मन् (न.) २. त्वच् (स्त्री.) ३. भूर्जः ४. दे. 'कृत्तिका' ।
—वासा, सं. पुं. (सं.-वासस्) शिवः ।
कृत्तिका, सं. स्त्री. (सं.) बहुला, अग्निदेवा, नक्षत्रविशेषः ।
कृत्य, सं. पुं. (सं. न.) अनुष्ठेयं, कर्तव्यं, विधेयं धर्मः, आवश्यकं कार्यम् २. कर्मन् (न.) ।
कृत्रिम, वि. (सं.) कृतक, अनैसर्गिक ।
कृदन्त, सं. पुं. (सं.) कृत्प्रत्ययान्तशब्दः (उ. पाचक, भोक्तृ इ.) २. कृत्प्रत्ययविषयकं व्याकरणप्रकरणम् ।
कृपण, वि. (सं.) कदर्य, दे. 'कंजूस' २. क्षुद्र ।
कृपणता, सं. स्त्री. (सं.) कदर्यता, दे. 'कंजूसी' ।
कृपया, क्रि. वि. (सं.) सदयं, सकृपं, सानुकंपं, सानुग्रहम् ।
कृपा, सं. स्त्री. (सं.) करुणा, दया, अनुग्रहः, प्रसादः, उपकारः, अनुकंपा २. क्षमा, मर्षणम् ।
—निधान, सं. पुं. (सं. न.) दयानिधिः । वि. अत्यन्तकृपालु ।
—पात्र, सं. पुं. (सं. न.) प्रसादभाजनं, अनुग्राह्यः, दयार्हः ।
—सिंधु, सं. पुं. (सं.) दयासागरः, अतिदयालुः ।
कृपाण, सं. पुं. (सं.) खड्गः असिः २. दे. 'कटार' ३. दंडकवृत्तभेदः (छन्द.) ।
कृपालु, वि. (सं.) दयालु, कारुणिक, कृपामय ।
कृपालुता, सं. स्त्री. (सं.) दयालुता, कारुणिकता ।
कृमि, सं. पुं. (सं.) कीटः, नीलांगः, क्रिमिः (पुं.) २. लाक्षा ।
—कोश, सं. पुं. (सं.) पट्टकीट,-कोषः-गृहं ।
—नाशक, वि. (सं.) कृमिघ्न, कृमिहर ।
कृमिक, सं. पुं. (सं.) कीटकः, लघु,-कृमिः-क्रिमिः ।
कृमिज, सं. पुं. (सं. न.) अगुरु (न.), राजार्ह २. कौशेयं ३. दे. 'हिरमिज़ी' ।
कृमिजा, सं. स्त्री. (सं.) कीटजा, लाक्षा ।
कृमिल, वि. (सं.) कृमिकुल,-चित-पूर्ण, कृमिमय ।
कृमिला, सं. स्त्री. (सं.) बहुप्रसूः (स्त्री.), बहुप्रजा ।
कृश, वि. (सं.) क्षीण, क्षाम, तन्वंग-कृशांग (-गी स्त्री.), प्र-,तनु, दुर्बल २. अल्प, स्तोक, क्षुद्र, सूक्ष्म, अणु, लघु ।
कृशता, सं. स्त्री. (सं.) क्षीणता, क्षामता, दुर्बलता २. अल्पता, सूक्ष्मता ।
कृशांगी, सं. स्त्री. (सं.) तन्वंगी, क्षीणांगी, तन्वी ।
कृशानु, सं. पुं. (सं.) अनलः, अग्नि (पुं.) २. चित्रकः ।

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

कृशोदरी, वि. स्त्री. (सं.) तनु-क्षीण,-मध्या-मध्यमा।
कृषक, सं. पुं. (सं.) कृषीवलः, कृषिकः, कृषाणः।
कृषि, सं. स्त्री. (सं.) कर्षणं, हलभृतिः (स्त्री.)।
कृष्ण, सं. पुं. (सं.) वासुदेवः, केशवः, चक्रपाणिः (पुं.) चक्रिन् (पुं.), जनार्दनः, पीतांबरः, माधवः, मधुसूदनः, हृषीकेशः, गोपालः, गोवर्धनधारिन् (पुं.), गोविंदः, दामोदरः, मुरारिः (पुं.), राधारमणः। २. कोकिलः ३. काकः ४. कृष्णपक्षः। वि., काल, असित, २. नील, मेचक, श्याम ३. तिमिर, निष्प्रभ।
—जटा, सं. स्त्री. (सं.) जटांमांसी, सुगन्धित-मूलभेदः।
—जीरक, सं. पुं. (सं.) कृष्णा, काला, बहुगन्धा।
—द्वैपायन, सं. पुं. (सं.) वेदव्यासः, महाभारतकारः।
—पक्ष, सं. पुं. (सं.) असितपक्षः, प्रतिपदादामावस्यान्तानि पंचदश दिनानि।
—लवण, सं. पुं. (सं. न.) रुचकं, अक्षं, सौवर्च्चलं।
—लोह, सं. पुं. (सं. न.) अयस्कांतः, चुंबकः।
—शार, —सारंग, —सार, सं. पुं. (सं.) मृगभेदः।
कृष्णता, सं. स्त्री. (सं.) कृष्णिमन् (पुं.), कालिमन् (पुं.), नीलत्वं, श्यामत्वं।
कृष्णा, सं. स्त्री. (सं.) द्रौपदी, पांचाली २. कालीदेवी ३. दक्षिणदेशे नदीविशेषः ४. कृष्णजीरकः ५. कृष्णद्राक्षा ६. नयनतारा।
कृष्णाष्टमी, सं. स्त्री. (सं.) श्रीकृष्णजन्मदिवसः, जन्माष्टमी, भाद्रमासस्य कृष्णपक्षस्याष्टमी तिथिः।
कृष्णी, सं. स्त्री. (सं.) कृष्ण,-रजनी-रात्रिः (स्त्री.)।
कृष्य, वि. (सं.) कर्षणीय, कृषियोग्य।
केंचुआ, सं. पुं. (सं. किंचुलुकः) महीलता, गंडूपदः, किञ्चिलिकः।
केंचुल, सं. स्त्री. (सं. कंचुकः) निर्मोकः, अहि-भुजंग-सर्प,-त्वच् (स्त्री.)।
केंचुली, वि. (हिं. केंचुल) कंचुक,-सदृश-तुल्य। सं. स्त्री. दे. 'केंचुल'।
केंद्र, सं. पुं. (सं. न.) मध्यः-ध्यं, मध्यभागः २. उदरं, गर्भः ३. मुख्य-प्रमुख,-स्थानम्।
केंद्री, वि. (सं. केन्द्रं>) मध्यम, मध्यस्थ, मध्य,-गत-वर्तिन्, मध्य, केन्द्रीय।
—करण, सं. पुं. (सं. न.) मध्यवर्तिनं कृः, एकतंत्री कृ।
कैंसर, सं. पुं. (अं.) कर्कट-कर्कटिका,-रोगः, कर्कस्फोटः।
के, प्रत्य., (हिं. का) दे. 'का'।
केकड़ा, सं. पुं. (सं. कर्कटः) कर्कटकः, कुलीरः।
केकय, सं. पुं. (सं.) १. वर्तमानकाश्मीरांत-र्गतप्रदेशविशेषः २. दशरथश्वशुरः।
केकयी, सं. स्त्री. (सं. कैकेयी)।
केका, सं. स्त्री. (सं.) मयूरवाणी।
केकी, सं. पुं. (सं.-किन्) मयूरः, शिखिन्।
केत, सं. पुं. (सं.) भवनं, गृहं २. स्थानं ३. ध्वजः, केतनं ४. बुद्धिः (स्त्री.) ५. संकल्प ६. मंत्रणा ७. अन्नम्।
केतक[1], सं. पुं. (सं.) केतकीवृक्षः २. तत्पुष्पं।
केतक[2], वि. (सं. कति+एक) दे. 'कितने', 'कितना', बहुत'।
केतकी, सं. स्त्री. (सं.) सूचीपुष्पः, केतकः, ककचच्छदः, विफला, ककचा, गंधपुष्पा।
केतन, सं. पुं. (सं. न.) भवनं, गृहम् २. स्थानं ३. चिन्ह ४. ध्वजः ५. निमंत्रणं, आह्वानम्।
केतली, सं. स्त्री. (अं. केटल) उखा, स्थाली, लौहा, लौहभूः (स्त्री.)।
केतित, वि. (सं.) आमंत्रित, आहूत, आकारित २. जनाकीर्ण, लोकाध्युषित।
केतु, सं. पुं. (सं.) ग्रहविशेषः २. उल्का, उत्पातः ३. ज्ञानं ४. दीप्तिः (स्त्री.) ५. ध्वजः ६. चिह्नम् ७. राक्षसविशेषस्य कबंधः।
—तारा, सं. पुं. (सं. स्त्री.) धूमकेतुः (पुं.), उल्का।
—मान्, वि. (सं.-मत्) तेजस्विन् २. ध्वजिन् ३. बुधः।
—माल, सं. पुं. (सं. न.) जंबुद्वीपस्य नवखंडांतर्गतखंडविशेषः।
—रत्न, सं. पुं. (सं. न.) वैदूर्यमणिः (पुं.)।
केथीटर, सं. पुं. (अं.) मूत्रशलाका।
केलसियम, सं. पुं. (अं.) चूर्णातु (न.), खटिकम्।
केदार, सं. पुं. (सं.) व्रीहिक्षेत्रं २. हिमालये

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

तीर्थविशेषः ३. आलवालं ४. मेघरागपुत्रः ५. सपुष्पः क्षेत्रभागः ।

केन, सं. पुं. (सं., 'किं' का तृतीया एकवचन) उपनिषद्विशेषः ।

केमरा, सं. पुं. (अं.) छायाचित्रपेटिका ।

केमिस्ट्री, सं. स्त्री. (अं.) रसायनम् ।

केयूर, सं. पुं. (सं. पुं. न.) अंगदः-दं, वलयः-यं ।

केराना, सं. पुं. दे. 'किराना' ।

केराना, सं. पुं. (अं. क्रिश्चियन >) भारोपीयः २. लेखकः, कायस्थः, लिपिकारः ।

केराया, सं. पुं. दे. 'किराया' ।

किराये की गाड़ी, सं. स्त्री., पण्य-साधारण,-वाहनं-रथः ।

केला, सं. पुं. (सं. कदलः), (वृक्ष) कदली, रंभा, मोचा, काष्ठीला, सकृत्फला, गुच्छफला, निःसारा, ऊरुस्तभा, मो(रो, लो)चकः, वारणवल्लभा । (फल) कदलीफलं, मोचं इ. ।

केलि, सं. स्त्री. (सं.) क्रीडा, खेला २. रतिः (स्त्री.), मैथुनं ३. नर्मन् (न.), परि (री) हासः ४. पृथिवी ।

—कला, सं. स्त्री. शारदावीणा २. रतिविज्ञानं ।

केलोरी, सं. स्त्री. (अं.) उष्मम् ।

केवट, सं. पुं. (सं. केवतः) नाविकः, पोतवाहः, औडुपिकः २. धीवरः, कैवर्तः, जालिकः, मत्स्याजीवः ।

केवटी, सं. स्त्री. (हिं. केवट) मिश्रद्विदलं, वैदलसंकरः ।

केवड़ा, सं. पुं. (सं. केविका) केवी, कविका, भृङ्गारिः (पुं.), महागंधा, नृपवल्लभा २. केवीपुष्पं इ. ३. महागंधासवः ।

केवल, वि. (सं.) एक, अद्वितीय २. विशुद्ध ३. श्रेष्ठ । क्रि. वि.,-एव, केवलं,-मात्र (समासांत में) २. सामस्त्येन, संपूर्णतया ।

केवलात्मा, सं. पुं. (सं.-त्मन्) परमेश्वरः, जगदीश्वरः २. शुद्धसत्त्वमनुष्यः, पूतात्मन् ।

केवली, सं. पुं. (सं.-लिन्) मोक्षाधिकारी साधुः २. तीर्थंकरः (जैन.) ।

केवाँच, सं. स्त्री. (सं. कच्छु >), (लता) कपिकच्छूः (स्त्री.) स्व-आत्म-,गुप्ता, कंडूरा, मर्कटी २. (फली)कपिकच्छु,-बीजकोशः-शिंबी ।

केवाड़, सं. पुं., दे. 'किवाड़' ।

केश, सं. पुं. (सं.) वालः, कचः, कुन्तलः, चिकुरः, शिरोरुहः, शिरसिजः, मूर्द्धजः, वृजिनः २. किरणः ३. वरुणः ४. विष्णुः ५. सूर्यः ६. विश्वं (७-८) अश्व-सिंह,-स्कंधकेशः ।

—कर्म सं. पुं., केशकर्मन् (न.), केश,-विन्यासः-प्रसाधनम् ।

—कलाप,-पाश, सं. पुं. (सं.) प्रसाधितकेशाः, अलकः, कुरलः ।

—प्रसाधनी, सं. स्त्री. } कंकतिका, दे. 'कंघी' ।
—मार्जक, सं. पुं. }

—विन्यास, सं. पुं. (सं.) दे. 'केशकर्म' ।

केशक, वि. (सं.) केशकर्म-केशविन्यास,-कुशल, केशप्रसाधक ।

केशरी, सं. पुं. (सं.-रिन्) सिंहः, मृगेन्द्रः २. घोटकः (३-४) पुन्नाग-नागकेशर,-वृक्षः ।

केशाकेशी, सं. स्त्री. [सं.-शि(न.)] अन्योऽन्यकेशग्रहणपूर्वकप्रवृत्तं युद्धं ।

केशिनी, सं. स्त्री. (सं.) सुकेशी-शा, सुकचीचा ।

केशी, सं. पुं. (सं. केशिन्) सिंहः २. घोटकः २. सुकेशः (पुरुषः) ३. राक्षसविशेषः ।

केस[१], सं. पुं., दे. 'केश' ।

केस[२], सं. पुं. (अं.) व्यवहारपदं, कार्यं २. दुर्घटना ३. कोषः, पुटः ।

केसर, सं. पुं. (सं. पुं. न.) काश्मीर्यं, काश्मीरजं, कुंकुमं, अग्निशिखं, वरं, वाह्लि (ह्ली) कं, पीतनं, गौरं, रक्तं, लोहितचन्दनं, वर्ण्यं, संकोचं, धीरं, घस्रं, घुसृणं, घोरम् २. नागकेशरवृक्षः ३. अश्व-सिंह,-स्कन्धवालाः ४. स्वर्गः ।

केसराचल, सं. पुं. (सं.) मेरुः, सुमेरुः, हेमाद्रिः ।

केसरिया, वि. (सं. केसरं >) घनपीत, कुंकुमवर्ण ।

—बाना, सं. पुं., कुंकुमवर्ण-घनपीत,-वेशः-वेषः ।

केसरी, सं. पुं. (सं.-रिन्) दे. 'केशरी' ।

केसू, सं. पुं. (सं. किंशुकः) पलाशः, रक्तपुष्पकः ।

केहा, सं. पुं. (सं. केका >) मयूरः, दे. 'मोर' ।

केहरी, सं. पुं. (सं. केशरिन्) सिंहः २. अश्वः ।

कैंची, सं. स्त्री. (तु.) दे. 'कतरनी' ।

—करना, मु., अग्राणि निकृत् (तु. प. से.)-लू (क्र. उ. से.)-अवच्छिद् (रु. प. अ.) ।

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

—सी जबान चलना, मु., शीघ्रं-सत्वरं-वेगेन भद् (भ्वा. प. से.)-भाष् (भ्वा. आ. से.)।
कैंचुली, सं. स्त्री., दे. 'केंचुली'।
कै, वि. (सं. कति) दे. 'कितने', 'कितनी'। अव्य., वा, अथवा, यद्वा २. अन्यतर।
—दफ़ा,—बार,—वेर, कतिकृत्वः (अव्य.), कतिवारं।
कैंप, सं. पुं. (अ.) दे. 'कंपू'।
कै, सं. स्त्री. (अं.) वांतं, वमनोद्गारः २. वमनं, वमः, वमिः (स्त्री.), प्रच्छर्दिका, वमथुः (पुं.)।
—आना, क्रि. अ., वमनेच्छया पीड् (कर्म.), विवमिषति (सन्नन्त.)।
—करना, क्रि. स. उद्,-वम् (भ्वा. प. से.) छर्द् (चु.), उत्क्षिप् (तु. प. अ.), उद्गृ (तु. प. से.)।
कैतव, सं. पुं. (सं. न.) छलं, कपटं, वंचनं २. द्यूतं ३. वैदूर्यमणिः (पुं.) ४. धुस्तूरः। वि., छलिन् , कापटिक २. शठ, धूर्त्त ३. अक्षदेविन् , कितव, (-वी. स्त्री.)।
कैथ-था, सं. पुं. (सं. कपित्थः) दधित्थः, मन्मथः, दधि-पुष्प-कुच-गन्ध-दन्त,-फलः।
क़ैद, सं. स्त्री. (अ.) बन्धनं, निग्रहः, निरोधः २. कारा,-निरोधः-बन्धनं-प्रवेशः-वासः, बंदीकरणं, प्रग्रहः, आसेधः ३. नियमः, समयः, प्रतिज्ञा, संकेतः।
—करना, क्रि. स., कारागृहे निक्षिप् (तु. प. अ.)-बन्ध्(क्र्. प. अ.)-निरुध् (रु. उ. अ.), बन्दीग्राहं ग्रह् (क्र. प. से.), बंदीकृ।
—होना, क्रि. अ., करायां निक्षिप्-बन्ध् निरुध्-बन्दीकृ (सब कर्म.)।
—ख़ाना, सं. पुं. (फ़ा.) कारा, कारागारः-रं, कारावासः, बन्दि,-शाला-गृहं, बन्धनालयः, चारः, चारकः, गुप्तिस्थानं।
—तनहाई, सं. स्त्री. (अ+फ़ा) एकांत-विजन-निभृत,-आसेधः।
—मेहज़, सं. स्त्री. (अ.) सरल सुगम-,प्रग्रहः-आसेधः।
—सख़्त, सं. स्त्री. (अ. + फ़ा.) विषम-दुःसह,-आसेधः, इ.।
क़ैदी, सं. पुं. (अ.) बंदी-दिः (स्त्री.), बन्दिन् (पुं.), कारागुप्तः, ग्रहकः, प्रग्रहः, रुद्धः।
कैप, सं. पुं. (अं.) दे. 'टोपी'।
कैपिटल, पुं. (अं.) मूल-धनं-द्रव्यम् , २. धन,-पुंजः-राशिः, पुंजिः (स्त्री.) ३. राजधानी।
कैपिटलिस्ट, सं. पुं. (अं.) धनिकः, कोटीश्वरः, पुंजिपतिः।
कैबिनेट, सं. पुं. (अं.) मंत्रिमंडलम् २. कोष्ठकः ३. मंत्रणागृहम्।
कैफ़ियत, सं. स्त्री. (अ.) अवस्था, स्थितिः (स्त्री.), दशा २, विवरणं, वर्णनं ३. आश्चर्योत्पादकघटना।
कैरव, सं. पुं. (सं. न.) कुमुदं २. सितोत्पलं, श्वेतकमलं। (सं. पुं.) कितवः २. शत्रुः।
कैरी, सं. स्त्री. (देश.) दे. 'अँविया'।
—आंख, सं. स्त्री., कपिल-पिंगल,-नयनं-नेत्रं।
कैलास, सं. पुं. (सं.) पर्वतविशेषः, शिव-कुबेर,-निवासः।
—नाथ, पति, सं. पुं. (सं.) शिवः।
—वास, सं. पुं. (सं.) मृत्युः।
कैवर्त, सं. पुं. (सं.) दे. 'केवट'।
कैवल्य, सं. पुं. (सं. न.) एकत्वं, असंसृष्टता २. अपवर्गः, मुक्तिः (स्त्री.) ३. उपनिषद्विशेषः।
क़ैसर, सं. पुं. (लै० सीज़र) सम्राज् , राजाधिराजः, अधिराजः, अधीश्वरः।
कैसा, वि. (सं. कीदृश) कीदृक्ष, किंरूप, किंविध, किमाकार।
कैसी, वि. स्त्री. (सं. कीदृशी) कीदृक्षी, किंरूपा, किमाकारा, किंविधा।
कैसे, क्रि. वि. (हिं. कैसा) कथं, केन प्रकारेण, कया रीत्या।
कोंकण, सं. पुं. (सं.) दक्षिणदिशि प्रान्तविशेषः।
कोंपल, सं. स्त्री. (सं. कोमल >) पल्लवः-वं, अंकुरः, प्ररोहः, किस (श) लयः-यं, उद्भिद् (पुं.), उद्भिज्जः।
—निकलना या फूटना, क्रि. अ., प्ररुह् (भ्वा. प. अ.), स्फुट् (तु. प. से.) उद्भिद् (कर्म.) फुल्ल्-विकस् (भ्वा. प. से.)।
को, प्रत्य. (यह कर्म और संप्रदान कारक का प्रत्यय है, इसका अनुवाद प्रायः द्वितीया और चतुर्थी के रूपों से होता है। (राम को कह = उ., राम ब्रूहि, ब्राह्मण को दे = विप्राय देहि)।
कोआ, सं. पुं. (सं. कोशः-षः), (पट्टकीट-) कोशः-षः २. दे. 'कोया'। ३. पनसखंडः-डं ४. दे. 'मधुआ' (फल)।

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

कोई, सर्व (सं. कोऽपि) कश्चन, कश्चित् (पुं.), का,-अपि-चन-चित् (स्त्री.) किं,-अपि-चन-चित् (न.)।
—कोई, वि. स्तोकाः, कतिपयाः, परिमिताः।
—चीज़, सं. स्त्री., किमपि (वस्तु)।
—दम में, क्रि. वि., सपद्येव, तत्काले, झटिति, द्राक् (सव अव्य.)।
—दम का मेहमान, सं. पुं., मुमूर्षुं, आसन्न,-मरण-मृत्यु, मरणाभिमुख, मरणोन्मुख।
—न कोई, एषं वा परो वा, यः कश्चिदपि, कश्चित्तु।
—नहीं, न कोपि-कापि किंचिदपि इ.।
कोक[1], सं. पुं. (सं.) चक्रवाकः, द्वन्द्वचरः, रथांगः, चक्रः २. मंडूकः ३. विष्णुः (पुं.) ४. वृकः ५. खजरीवृक्षः। [कोकी (स्त्री.), चक्रवाकी, रथांगी इ.]।
कोक[2], सं. पुं. (अं.) न्यङ्गारः।
—शास्त्र, सं. पुं. (सं. न.) कोकपंडितरचितो रतिविज्ञानग्रन्थः।
साफ़्ट-, सं. पुं., मृदुन्यङ्गारः।
हार्ड-, सं. पुं. दृढन्यङ्गारः।
कोकनद, सं. पुं. (सं. न.) रक्तोत्पलं २. रक्त-कुमुदम्।
कोकनी, वि. (देश.) क्षुद्र, लघु।
कोका, सं. पुं. (अं.) वृक्षभेदः।
कोका, सं. पुं. स्त्री. (तु.) धात्री-उपमातृ,-पुत्रः-पुत्री, धात्रेयः-यी।
—बेली,-बेरी, सं. स्त्री. (सं. कोकनदं + हिं. वेला) नीलकुमुदं।
कोकाह, सं. पुं. (सं.) कर्कः, श्वेतघोटकः।
कोकिल, सं. स्त्री. (सं. पुं.) पिकः, पर,-भृतः-पुष्टः, कालः, गन्धर्वः, मधुगायनः, कलकंठः, कुहूरवः, काकलीरवः, वसन्तदूतः, वनप्रियः, ताम्राक्षः। दे. 'कोकिला'।
—बैनी, वि. स्त्री. (सं. + हिं.) सुकंठी, मधुर-भाषिणी।
कोकिला, सं. स्त्री. (सं.) मदनशलाका, पर,-भृता-पुष्टा, वनप्रिया, कलकंठी, ताम्राक्षी, वसंत-दूती।
कोकिलावास, सं. पुं. (सं.) कोकिलोत्सवः, आम्रः, रसालः।
कोकी, सं. स्त्री. (सं.) चक्रवाकी, चक्री, रथांगनाम्नी।
कोकीन, सं. स्त्री. (अं. कोकेन) कोकापत्र-निर्मितमादकपदार्थः * कोकीनम्।
कोको, सं. स्त्री. (अनु.) काकः, वायसः २. काल्पनिकभयहेतुः (पुं.)।
कोख, सं. स्त्री. (सं. कुक्षिः) गर्भाशयः, गर्भ-कोशः-पः।
—जली,-बन्द, वि., वंध्या, सन्तानहीना।
—की आँच, सं. स्त्री., अपत्यप्रेमन् (पुं.), वात्सल्यं, सन्ततिस्नेहः।
—मारी जाना, मु., च्युतगर्भा भू, गर्भः पत् (भ्वा. प. से.) च्यु (भ्वा. आ. अ.)।
—खुलना, मु. सन्तानः उत्पद् (दि. आ. अ.)।
कोचना, क्रि. स., दे. 'चुभाना', 'धँसाना'।
कोचबकस, सं. पुं. (अं. कोचबॉक्स) सूतासनं।
कोचवान, सं. पुं. (अं. कोच >) सारथिः (पुं.), सूतः, वाहकः।
कोजागर, सं. पुं. (सं.) आश्विनी-द्यूत,-पूर्णिमा, कौमुदी, शारदी, शरत्पर्वन् (न.)।
कोट[1], सं. पुं. (सं.) दुर्गं २. प्राचीरं ३. राज-प्रासादः।
—वाल, सं. पुं., कोटपालः, दुर्गाध्यक्षः।
कोट[2], सं. पुं. (अं.) प्रावारः-रकः, कंचुकः।
कोटर, सं. पुं. (सं. पुं. न.) निष्कुहः, तरु-विवरं, प्रान्तरं २. कोटरावणं, रक्षार्थं कृत्रि-मवनं।
कोटि, सं. स्त्री. (सं.) शतलक्षसंख्या, दे. 'करोड़' २. धनुरग्रं ३. अस्त्रादेः कोणः ४. वर्गः, श्रेणी।
कोटिक, वि. (सं. कोटिः स्त्री.) कोटी-टिः (स्त्री.) लक्षशतकं २. असंख्य, अगणित। सं. स्त्री., उक्ता संख्या तदंकाश्च।
कोटिशः, क्रि. वि. (सं.) बहुधा,-बहुधा २. अनेक-कोटिवारं। वि., बहुसंख्याक, अनेक।
कोटीश्वर, सं. पुं. (सं.) कोट्यधीशः, अति-धनाढ्यः।
कोठरी-ड़ी, सं. स्त्री. (हिं. कोठा) लघु-क्षुद्र,-कोष्ठः-शाला, अन्तःकोष्ठः, गर्भागारं।
कोठा, सं. पुं. (सं. कोष्ठः) गृहं, सदनं, आ-नि,-वासः, वेश्मन्-सद्मन् (न.) २. प्र-,कोष्ठः, शाला ३. पण्यागारं, पण्याधानं ४. धान्यागार, कुशूलः

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

५. चन्द्रशाला, अट्टालिका ६. पटलं, छदिस् (स्त्री.) ७. उदरं ८. आमाशयः ९. अंत्राणि (न. बहु.) १०. निभृतागारं ११. पत्त्रभागः १२. गर्भाशयः।

—बिगड़ना, मु. अजीर्णरोगेण पीड् (कर्म.)।

कोठार, सं. पुं. (हिं. कोठा) दे. 'भंडार'।

कोठरी, सं. पुं. (हिं. कोठा) दे. 'भंडारी'।

कोठी, सं. स्त्री. (हिं. कोठा) भवनं, गृहं, हर्म्यं २. एकभूमिकं हर्म्यं ३. पण्य,-आगार-आधानं ४. धान्यागारं ५. भांडारं, कोषः ६. वणिग्जनसमवायः ७. बृहदापणः, महती विक्रयशाला ८. गर्भाशयः ९. गुलिकाक्षेपण्या-माग्नेयचूर्णाधानं १०. मृण्मयं बृहद्धान्यपात्रं ११. लोहमयं ताम्रमयं वा बृहज्जलपात्रं।

—वाल, सं. पुं., श्रेष्ठिन् (पुं.). वाणिजश्रेष्ठः।

कोड़ना, क्रि. सं., दे. 'खोदना'।

कोड़ा, सं. पुं. (सं. कवरं>) प्रतोदः, कषा-शा, प्रतिष्कषः-शः, ताडनरज्जुः (स्त्री.)।

—मारना, क्रि. सं., कशया प्रतोदेन वा प्रह (भ्वा. प. अ.)-तड् चुद्-दंड् (सब चु.)-आहन् (अ. प. अ.)।

कोड़ी, सं. स्त्री. (अं. स्कोर) विंशतिः (स्त्री.), विंशतिवस्तुसमुदायः।

कोढ़, सं. पुं., दे. 'कुष्ठ'।

—में खाज निकलना, मु., रन्ध्रोपनिपातिनोऽनर्थाः, छिद्रेष्वनर्था बहुलीभवन्ति, गण्डे स्फोटकसंजननम्।

कोढ़ी, वि., दे. 'कुष्ठी'।

कोण, सं. पुं. (सं.) दे. 'कोना'।

कोणि, वि. (सं.) वक्र-आभुग्न,-कर-हस्त।

कोतल, सं. पुं. (फ़ा.) दर्शनीयघोटकः २. राजाश्वः।

कोतवाल, सं. पुं. (सं. कोटपालः) पुररक्षकः।

कोतवाली, सं. स्त्री. (हिं कोतवाल) कोट-पाल-पुररक्षक,-कार्यालयः।

कोताह, वि. (फ़ा.) न्यून, अल्प, २. लघु, ह्रस्व ३. संकीर्ण, संकुचित।

—हिम्मत, वि., अल्प,-साहस-विक्रम।

कोताही, सं. स्त्री. (फ़ा.) त्रुटिः (स्त्री.), न्यूनता २. प्रमादः।

कोथला, सं. पुं. (हिं. गूथल) बृहत्,-पुटः-कोषः प्रसेवः २. आमाशयः।

—भरना, मु. उदरं पूर् (चु.)।

कोदंड, सं. पुं. (सं. न.) धनुस् (न.)। (सं. पुं.) भ्रूः (स्त्री.) २. देशविशेषः।

कोदो-दों, सं. पुं. (सं. कोद्रवः) कोरदूषः, कुद्रवः, कुद्दालः।

कोन, सं. पुं., दे. 'कोना'।

कोना, सं. पुं. (सं. कोणः) अस्रः २. कोटिः-अश्रिः पालिः (स्त्री.) ३. निभृतस्थानं ४. चतुर्थभागः।

—दार, वि., अस्रोपेत, कोणविशिष्ट, अस्रिन्।

—कचोना, सं. पुं., प्रत्यस्रं, सर्वे कोणाः।

कोप, सं. पुं. (सं.) क्रोधः, रोषः।

कोपन, वि. (सं.) समन्यु, सरोष, क्रोधिन्।

कोपिनी, वि. स्त्री. (सं.) दे. 'क्रोधिनी'।

कोपी, वि. पुं. (सं.-पिन्) दे. 'क्रोधी'।

कोपीन, सं. पुं., दे. 'कौपीन'।

—बंदी, सं. स्त्री., मौनं, वाग्यमः २. भाषण-निरोधः ३. जिह्वास्तम्भः (रोगभेदः) ।
—का मीठा, मु., मधुरभाषिन्, मधुजिह्व ।
—को मुँह में रखना, मु., जोषं-तूष्णीं स्था (भ्वा. प. अ.), मौनं भज् (भ्वा. उ. अ.) ।
—देना या हारना, मु., दे. 'प्रतिज्ञा करना' ।
—पकड़ना, मु. भाषणात् निवृत् (प्रे.)-नि-विनि-वृ (प्रे.) ।
—बंद करना, मु., मौनं लभ् (प्रे., लंभयति) २. निरुत्तरी कृ ।
—बंद होना, वक्तुं न पार् (चु.), तूष्णीं स्था ।
ज़बानी, वि. (फ़ा. ज़बान) शाब्द [-ब्दी (स्त्री.)], शाब्दिक [-की (स्त्री.)], वाचिक-वाचनिक-मौखिक [-की (स्त्री.)] । क्रि. वि., स्मृत्या-वाचा (तृ. एक.), शब्दतः, अस्खलितम् ।
—पढ़ना, क्रि. स., स्मृत्या पठ् (भ्वा. प. से.) उच्चर् (प्रे.) ।
—जमा खर्च, मु., प्र-,जल्पः-पनं, निरर्थक-वचनानि (बहु.) ।
ज़बून, वि. (फ़ा.) निकृष्ट, गर्ह्य, निन्द्य २. अबल, निर्बल ।
ज़ब्त, सं. पुं. (अ.) निग्रहः, निरोधः, संयमः २. दंडरूपेण अपहृतं ३. राजसात्करणम् ।
—करना, क्रि. स., राजसात् कृ, दंडरूपेण अपह (भ्वा. प. अ.) ।
—होना, क्रि. अ., राजसात् भू, दंडरूपेण अपह (कर्म.) ।
ज़ब्ती, सं. स्त्री. (अ. ज़ब्त) सर्वस्व,-अपहारः-दंडः, दे. 'ज़ब्त' (२) ।
जब्र, सं. पुं. (अ.) क्रौर्यं, नैष्ठुर्यं, अत्याचारः ।
—करना, क्रि. स., अद् (प्रे.), पीड् (चु.) ।
जब्रन, जब्रिया, क्रि. वि., दे. 'जबरन्' ।
जब्री, वि. (अ.) बलात् कारित, अनिवार्य ।
जम, सं. पुं., दे. 'यम' ।
जमघट, सं. पुं. (हिं. जमना + घट्ट) जनौघः, जनसंमर्दः, संकुलं, लोकसंघः ।
जम-जम, अव्य. (सं. जन्मन् >) सदा, सर्वदा, नित्यम् ।
ज़म-ज़म, सं. पुं. (अ.) काबासमीपस्थः पूप-विशेषः ।
जमना[1], क्रि. अ. [सं. जन्मन् (न.) >] प्ररुह् (भ्वा. प. अ.), उद्भिद् (कर्म.) २. जन् (दि. आ. से.), उत्पद् (दि. आ. अ.) ।
जमना[2], क्रि. अ. (सं. यमनं=जकड़ना >) घनी-पिंडी-शीती,-भू, संहन् (कर्म.), श्यै (भ्वा. आ. अ.) २. संमिल् (तु. प. से.), समागम् (भ्वा. प. अ.) ३. अनुषक्त-ससक्त (वि.) भू, संलग् (भ्वा. प. से.) ४. स्थिरभू, निवासं स्थिरीकृ ५. प्रतिष्ठित-बद्ध-मूल-(वि.) भू ६. उपपद्-युज् (कर्म.), सुसंगत वि.) भू ७. निर्बंधेन वद् (भ्वा. प. से.) । सं. पुं., घनी-शीती-पिंडी,-भावः; सम्मेलनं; संसक्तिः (स्त्री.); स्थिरीभावः इ. ।
जमना[3], सं. स्त्री. (सं. यमुना) कालिन्दी ।
जमराज, सं. पुं., दे. 'यमराज' ।
जमा, वि. (अ.) संगृहीत, संचित, समहृत २. निक्षिप्त, न्यस्त, निहित । सं. स्त्री., मूलं, मूल,-द्रव्यं-धनं २. धनं, संपद् (स्त्री.) ३. भूमि-करः ४. योगः, पिंडः, संकलः-लनं (गणि०) ४. बहुवचनं (व्या.) ।
—करना, क्रि. स., संचि (स्वा, उ. अ.), संग्रह् (क्र्. प. से.) २. निधा (जु. उ. अ.), निक्षप् (तु. प. अ.) ३. दे. 'जोड़ना' (२) ।
—होना, क्रि. अ., संचि-संग्रह् (कर्म.) २. निधा-निक्षिप्-न्यस् (कर्म.) ।
—खर्च, सं. पुं. (फ़ा.) आयव्ययौ २. आय-व्ययलेखः

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

—जथा, सं. स्त्री., संचित,-धनं-द्रव्यम् ।
—जमाई, सं. पुं. [सं. जामातृ (पुं.)] दुहितृ-पुत्री,-पतिः ।
जमात, सं. स्त्री. (अ. जमाअत) कक्षा, श्रेणी २. जनौघः, जनसंमर्दः ३. गणः, संघः ।
जमादार, सं. पुं. (फ़ा.) नायकः, रक्षिमुख्यः ।
ज़मानत, सं. स्त्री. (अ.) (द्रव्य) आधिः (पुं.), निक्षेपः, न्यासः, प्रातिभाव्यं । (पुरुष) प्रतिभूः (पुं.), बंधकः, लग्नकः ।
—देना, क्रि. सं., निक्षेपं-लग्नकं दा अथवा दत्त्वा मुच (प्रे.) ।
—नामा, सं. पुं. (अ.+फ़ा.) प्रातिभाव्यपत्रम् ।
ज़मानती, वि (अ. ज़मानत >) निक्षेपार्हः, प्रातिभाव्यार्हः २. प्रतिभूः (पुं.) लग्नकः, बन्धकः ।
ज़माना, सं. पु. (फ़ा.-नः) समयः, कालः २. चिरकालः, सुदीर्घसमयः ३. जगत् (न.) ।
—साज़, वि. (फ़ा.) कालानुवर्तिन्, समयानुरोधिन् ।
—साज़ी, सं. स्त्री. (फ़ा.) कालानुवर्तनं, स्वार्थपरता ।
जमाना, क्रि. स., व. 'जमना' के प्रे. रूप ।
जमाल, सं. पुं. (अं.) सौन्दर्यं, सुषमा, मनोज्ञता, लावण्यत्न् ।
जमालगोटा, सं. पुं. (सं. जयपालः+गोटा >) (वृक्ष) जयपालः, सारकः, रेचकः २. (बीज) जयपाल-कुंभी-घंटा-शोधनी,-बीजं, वीजरेचनम् ।
जमाव, सं. पुं. (हिं. जमना) जनौघः, जनसंमर्दः २. दे. 'जमना' सं. पुं. ।
ज़मींदार, सं. पुं. (फ़ा) क्षेत्रपतिः (पुं.), भूस्वामिन् ।
ज़मींदारी, सं. स्त्री. (फ़ा.) भूमिः (स्त्री.), भूमिरिक्थं, क्षेत्रं २. क्षेत्रपतित्वं, भूस्वामित्वम् ।
ज़मींदोज़, वि. (फ़ा.) आंतर्भौम (-मी स्त्री.), भूगर्भवर्तिन् , भूगूढ ।
ज़मीन, सं. स्त्री. (फ़ा.) भूमिः (स्त्री.), पृथिवी-श्वी २. भू-पृथ्वी,-तलं ३. वस्त्रपत्रादेः तलं २. क्षेत्रं, भूरिक्थम् ।
—आसमान एक करना, मु., अत्यधिकं परिश्रम् (दि. प. से.) ।
—आसमान का फ़र्क़, मु. महदंतरं, महद्वैषम्यं. खभूभेदः ।
—आसमान के क़ुलाबे मिलाना, मु., अत्युक्त्या वर्ण् (चु.)-प्रतिपद् (प्रे.) ।
जमुना, सं. स्त्री., दे. 'यमुना' ।
ज़मीमा, सं. पुं. (अ.) अतिरिक्त-क्रोड,-पत्रम् ।
ज़मुर्रद, सं. पुं. (फ़ा.) दे. 'पन्ना' ।
जमैयत, सं. स्त्री. (अ.) जन,-समुदायः-समूहः २. परिषद् (स्त्री.), सभा ।
जयंत, सं. पुं. (सं.) इंद्रपुत्रः २. कार्तिकेयः । वि. [सं. जयत् (शत्रंत)] विजयिन्, जैत्र (-त्री सं.), जिष्णु, जेतृ, जित्वर [-री स्त्री.)] २. दे. 'बहुरूपिया' ।
जयंती, सं. स्त्री. (सं.) केतनं, केतुः (पुं.), ध्वजः २. दुर्गा ३. जन्मोत्सवः ४. स्थापनादिवसोत्सवः ।
जय, सं. स्त्री. (सं. पुं.) वि-, जयः, वि-जितिः (स्त्री.) ।
जय(जय जय)कार, सं. पुं. (सं.) जय-, ध्वनिः (पुं.) नादः-स्वनः-शब्दः ।
जयजयकार करना, क्रि. सं. जयध्वनिं कृ., जयजयेति नद् (भ्वा. प. से.) ।
—पत्र, सं. पुं. (सं. न.) विजत,-पत्रं-लेखः २. आधिकरणिकस्य मुद्रितनिर्णयपत्रम् (धर्म.) ।
—माल, सं. स्त्री. (सं.-ला) जय-विजय,-मालास्रज् (स्त्री.)-माल्यम् ।
—स्तंभ, सं. पुं. (सं.) विजयस्थूणा ।
जयमा(वा)न, जयवंत, जयी, वि., दे. 'जयंत' वि. ।
ज़र, सं. पुं. (फ़ा.) सुवर्णं, कांचनं, २. धनं, वित्तम् ।
—खरीद, वि. (फ़ा.) वित्तक्रीत ।
—खेज़, वि. (फ़ा.) उर्वर, शस्यद, फलप्रद ।
—खेज़ी, सं. स्त्री. (फ़ा.) उर्वरता, फलप्रदता ।
—दार, वि. (फ़ा.) धनिक, धनाढ्य ।
—दोज़, सं. पुं. (फ़ा.) कार्मिकवस्त्रकृत् (पुं.), सूचीकर्मोपजीविन् ।
—दोज़ी, सं. स्त्री. (फ़ा.) शिल्पं सूचीकर्मन्(न.)।
जरनल, सं. पुं. (अं.) दैनिक,-वृत्तपत्रं-समाचारपत्रम् २. पत्रिका ३. आयव्यय-पंजी-पंजि(स्त्री.) ।
जननलिज्म, सं. पुं. (अं.) पत्रकारिता, पत्रकारव्यवसायः ।
जरनलिस्ट, सं. पुं. (अं.) पत्रकारः ।
जरनैल, सं. पुं., दे. 'जनरल' सं. पुं. ।

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

ज़रब, सं. स्त्री. (अ.) आघातः, प्रहारः, २. व्रणःणं ३. अभ्यासः, आघातः, गुणनं, हननं ४. अंकः, मुद्राचिह्नम् ।
—देना, क्रि. स., गुणयति (ना. धा.); आ-नि-, हन् (अ. प. अ., या प्रे, घातयति), पुर् (चु.) । मु., प्रह्व (भ्वा. प. अ.) तड् (चु)।
ज़रर, सं. पुं. (अ.) क्षतिः-हानिः (स्त्री.) २. प्रहारः ३. आपत्तिः (स्त्री.) ।
जरस, सं. पुं. (अ.) घंटा, घनम् ।
ज़रा, वि. (अ. जर्रः) अल्प, न्यून । कि. वि., किंचित्, ईषत् ।
जरा, सं. स्त्री. (सं.) दे. वार्द्धकं-क्यम् ।
—ग्रस्त,-जीर्ण, वि. (सं.) वृद्ध, जरठ ।
ज़राअत, सं. स्त्री. (अ.) कृषिः (स्त्री.) कर्षणं, हलभृतिः (स्त्री.) ।
—पेशा, वि., कर्षक, कृषिजीविन् , क्षेत्रिक ।
जरातुर, वि. (सं.) वृद्ध, जरठ, स्थविर, पलित, जीर्ण ।
जरायु, सं.पुं. (सं.) उल्वं, कललः, २. गर्भाशयः ।
जरायुज, वि. (सं.) गर्भाशयजातः (मनुष्य, गौ आदि) ।
जरासंध, सं. पुं. (सं.) चंद्रवंशीयनृपविशेषः, कंसश्वशुरः ।
ज़रिया, सं. पुं. (अ.) दे. 'साधन' ।
ज़री, सं. स्त्री. (फ़ा.) ताशाख्यं वस्त्रं २. सौवर्णं कार्मिकवस्त्रम् ।
ज़रीफ़ वि. (अ.) विनोद-परिहास,-शील,-प्रिय ।
जरीब, सं. स्त्री. (फ़ा.) पंचपंचाशद्गजात्मकः क्षेत्रमानभेदः, जरीबं २. यष्टिः (स्त्री.) ।
—कश, सं. पुं. (फ़ा) भू-क्षेत्र,-मापकः ।
—कशी, सं. स्त्री. भू-क्षेत्र,-मापनम् ।
ज़रूर, क्रि. वि. (अ.) अवश्य, अपरिहार्यतया, निश्चयेन, निःसंदेहं, निःसंशयम् ।
ज़रूरत, सं. स्त्री. (अ.) आवश्यकता, प्रयोजनम् ।
ज़रूरी, वि. (फ़ा.) अपेक्षित, आकांक्षित २. आवश्यक [-की (स्त्री.)], अपरिहार्य, अनिवार्य, अवश्यकरणीय ।
ज़र्क बर्क, वि. (फ़ा.) उज्ज्वल, भासुर, भासमान ।
जर्जर, जर्जरित, वि. (सं.) जीर्ण, शीर्ण, सच्छिद्र २. भग्न, खंडित ३. वृद्ध ।
ज़र्द, वि. (फ़ा.) पीत, दे. 'पीला' ।
ज़र्दी, सं. स्त्री. (फ़ा.) पीतिमन् (पुं.) दे. 'पीलाई' २. अंडपीतिमन् (पुं.) ।
जर्म, सं. पुं. (अं.) जीवाणुः, रोगकीटाणुः ।
ज़र्रा, सं. पुं. (अ.) अणुः, परमाणुः २. द्व्यणुकं, त्र्यणुकं ३, कणः-णी-णिका, लवः ।
जर्राह, सं. पुं. (अ.) शल्यचिकित्सकः, शस्त्रवैद्यः ।
जर्राही, सं. स्त्री. (अ.) शल्य,-शास्त्रं-चिकित्सा ।
जलंधर, सं. पुं., दे. 'जलोदर' ।
जल, सं. पुं. (सं. न.) पानीयं, आपः (स्त्री., नित्य बहु.) । पयस्-अंभस्-अंबु-वारि (न.), सलिलं, अमृतं, जीवनं, उदकं, तोयं, नीरं, घनरसः ।
—कूपी, सं. स्त्री. (सं.) कूपगर्तः, पुष्करिणी ।
—क्रीडा, सं. स्त्री. (सं.) कर,-पात्रं,-पत्रिका, व्यात्युक्षी, जलविहारः ।
—चर, वि. (सं.) वारिचर, जलचारिन् ।
—जंतु, सं. पुं. (सं.) यादस् (न.), जलजीवः ।
—जात, सं. पुं. (सं. न.) कमलं, पद्मम् ।
—तरंग, सं. पुं. (सं.) वाद्यभेदः २, लहरी ।
—धर, सं. पुं. (सं.) मेघः, जलदः २. समुद्रः ।
—धारा, सं. स्त्री. (सं.) वारिप्रवाहः ।
—पक्षी, सं. पुं. (सं.-क्षिन्) जलशकुनः ।
—पान, सं. पुं. (सं. न.) उपाहारः, लघुभोजनम् ।
—प्रपात, सं. पुं. (सं.) निर्झरः ।
—प्लावन, सं. पुं., (सं. न,) जलोपप्लवः, तोयविप्लवः ।
—मार्जार, सं. पुं. (सं.) उद्रः, जलनकुलः, जलबिडालः ।
—यान, सं. पुं. (सं. न.) नौका, पोतः, वाष्पपोतः ।
—शायी, सं. पुं. (सं.-यिन्) वरुणः ।
—सेना, सं. स्त्री. (सं.) नौ-समुद्र,-सेना-सैन्यम् ।
जलज, सं. पुं. (सं. न.) कमलं, वारिजम् ।
ज़लज़ला, सं. पुं. (फ़ा.) भूकम्पः, भूचालः ।
जलडमरूमध्य, सं. पुं. (सं. न.) सामुद्रधुनी ।
जलद, सं. पुं. (सं.) मेघः, वारिदः ।
जलधि, सं. पुं. (सं.) अब्धिः (पुं.), सागरः ।
जलन, सं. स्त्री. (सं. ज्वलनं) तापः, दाहः, २. पाकः (चिकित्सा, उ. नेत्रपाकः), ३. ईर्षा-

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

र्ष्या, सापत्न्यं, मात्सर्यं ४. गात्रदाहः (रोग-भेदः)।

जलना, क्रि. अ. (सं. ज्वलनं) ज्वल् (भ्वा. प. से.) तप-दह् (कर्म.) दीप् (दि. आ. से.) २. असूयति (ना. धा.) ईर्ष्य् (भ्वा. प. से). परोत्कर्षं न सह् (भ्वा. आ. से.) मृष् (दि. प. से; चु.)। सं. पुं., तापः, ज्वलनं, दहनं, दाहः, प्लोषः इ. ।

जले पर नोन छिड़कना, मु. क्षते क्षारं क्षिप् (तु. प. अ.)।

जलरुह, सं. पुं. (सं. न.) जलरुह् (पुं.), कमलम्।

जलवा, सं. पुं. (फ़ा.) श्रीः (स्त्री.), प्रभा, शोभा।

जलसा, सं. पुं. (अ.) उत्सवः, महोत्सवः, संमेलनं, बृहदधिवेशनं २. संगीतोत्सवः २. संभोजनम्।

जलांजलि, सं. स्त्री. (सं. पुं.) अंजलि-करपुट-मात्रं जलम् २, तर्पणम् , प्रेततर्पणजलम्।

जलाकर, सं. पुं. (सं.) समुद्रः, सागरः २. जल-तोय,-राशिः ३. कूपः ४. निर्झरः, उत्सः।

जलाखु, सं. पुं. (सं.) दे. 'ऊदबिलाव'।

जलातंक, सं. पुं. (सं.) अलर्कांभिभवः, आलर्कं, जलत्रासाख्यो रोगः (हिं. हलक)।

जलात्यय, सं. पुं. (सं.) शरद्ऋतुः, वर्षावसानः, मेघान्तः।

जलाना, क्रि. स. (हिं. जलना) उष् (भ्वा. प. से.), ज्वल् (प्रे. ज्वलयति), तप् (भ्वा. प. अ., प्रे.) । दह् (भ्वा. प. अ.), दीप् (प्रे.), प्लुष् (भ्वा. प. से.) २. ईर्ष्या-असूयां-मात्सर्यं जन् (प्रे.), ३. पीड् (प्रे.), तुद् (तु. प. अ.)। सं. पुं., दहनं, तापनं, प्लोषणं, दीपनं इ.।

जलाने योग्य, वि., ज्वलयितव्य, दग्धव्य, दीपनीय, तपनीय।

जलानेवाला, सं. पुं., तापकः, दाहकः इ.।

जलाया हुआ, दग्ध, ज्वलित, दीपित।

जला भुना, वि., कुपित, क्रुद्ध, कु-दुः,-शील, दुष्प्रकृति।

जलार्द्र, वि. (सं.) छिन्न, उत्त, उन्न।

जलावतन, वि. (अ.) निर्वासित, विवासित।

जलावतनी, सं. स्त्री. (अ.) निर्-वि,-वासनम्।

जलाशय, सं. पुं. (सं.) जल-तोय,-आधारः, तडागः-गं, वापी।

ज़लील, वि. (अ.) नीच, क्षुद्र, जघन्य। (२) अपमानित, तिरस्कृत।

—करना, क्रि. स., अपकृष् (भ्वा, प. अ.), लघूकृ।

जलूस, सं. पुं. (अ.) उत्सव-,यात्रा, *संप्रचलनम्।

जलेबी, सं. स्त्री. (देश.) कुण्डली, मिष्टान्नभेदः।

जलोका, सं. स्त्री. (सं.) दे. 'जौंक'।

जलोदर, सं. पुं. (सं. न.) जठरामयः।

जल्द, क्रि. वि. (अ.) अचिरात् , अचिरेण, झटिति, द्राक् , अविलंबं, आशु, शीघ्रं २. जवेन, वेगेन, सत्वरम्।

—बाज़, वि. (अ.+फ़ा.) अविमृश्य-असमीक्ष्य-क्षिप्र,-कारिन् , साहसिन्।

—बाज़ी, सं. स्त्री., अविमृश्य-असमीक्ष्य,-कारिता-कारित्वं, साहसम्।

जल्दी, सं. स्त्री. (अ.) शीघ्रता, त्वरा, क्षिप्रता।

—करना, क्रि. अ., त्वर् (भ्वा. आ. से.), आशु-शीघ्रं त्वरितं कृ अथवा चल् (भ्वा. प. से.)।

जल्प, सं. पुं. (सं.) कथनं, वदनं २. प्रजल्पः, प्र-,जल्पितं, वृथा,-आलापः-कथा, व्यर्थवार्ता ३. वादभेदः (न्या०)।

जल्पक, वि. (सं) जल्पाकः, वाचाटः, वाचालः, वावदूकः।

जल्लाद, सं. पुं. (अ.) घातकः, दंडपाशिकः, मातंगः, वधाधिकृतः। वि., क्रूर, निर्दय।

जल्सा, सं. पुं., दे. 'जलसा'।

जव, सं. पुं. (सं.) वेगः, त्वरा रंहस् (न.)।

जवन, सं. पुं., दे. 'यवन'।

जवनिका, सं. स्त्री., दे. 'यवनिका'।

जवाँमर्द, वि. (फ़ा.) वीर, शूर, पराक्रमिन्।

जवाँमर्दी, सं. स्त्री. (फ़ा.) वीरता, शूरता।

जवाखार, सं. पुं. (सं. यवक्षारः) यवाह्वः, यवनालजः।

जवान, वि. (फ़ा.) युवन् , तरुण, अभिनव-वयस्क, कुमार २. वीर, शूर। सं. पुं., पुरुषः, मनुष्यः सैनिकः ३. वीरः।

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

जवानी, सं. स्त्री. (फ़ा.) कौमारं, तारुण्यं, यौवनं, अभिनव-पूर्व-प्रथम,-वयस् (न.)।

जवाब, सं. पुं. (अ.) उत्तरं, प्रति,-वचनं-वाच् (स्त्री.), प्रत्युक्तिः (स्त्री.), प्रत्युत्तरं २. प्रतिक्रिया, प्रतीकारः, ३. कारभ्रंशादेश, ४. पदच्युतिः (स्त्री.), अधिकारभ्रंशः।

—**दावा**, सं. पुं. (अ.) उत्तरम् , उत्तर,-पक्षः-पादः।

—**देह**, वि. (अ. + फ़ा.) उत्तर,-दातृ-दायिन् , अनुयोज्य, प्रष्टव्य।

—**देही**, सं. स्त्री. (अ. + फ़ा.) उत्तरादायित्वं, प्रष्टव्यता, भारः।

—**सवाल**, सं. पुं. प्रश्नोत्तराणि (बहु.), वाद-विवादौ (द्वि.)।

—**देना**, मु., पदात् अवरुह्-च्यु (प्रे.)। क्रि. स., दे. 'उत्तर देना'।

—**मिलना**, मु., अधिकारात् च्यु (भ्वा. आ. अ.), पदभ्रष्ट (वि.) भू।

जवाबी, वि. (अ.) उत्तरापेक्षिन्।

—**कार्ड**, सं. पुं., उत्तरापेक्षि-उत्तरणीय,-पत्रम्।

—**तार**, सं. पुं., उत्तरापेक्षी तडित्संदेशः।

जवार, सं. पुं., दे. 'ज्वार'।

जवारा, सं. पुं. (हिं. जव) यव,-अंकुरः-प्ररोहः।

ज़वाल, सं. पुं. (अ.) क्षयः, ह्रासः २. विपद् (स्त्री.)।

जवास-सा, सं. पुं. (सं. यवासः) यासः, दुःस्पर्शः, रोदनी, दुरालभा।

जवाह(हि)र, सं. पुं. (अ.) रत्नं, मणिः।

जवाह(हि)रात, सं. पुं. (अ., बहु.) रत्नानि-मणयः (बहु.)।

जशन, सं. पुं. (फ़ा.) धार्मिकोत्सवः २. उत्सवः, क्षणः ३. आनंदः, हर्षः ४. संगीतोत्सवः।

जसामत, सं. स्त्री. (अ.) स्थूलता, पीनता, पीवरता।

जसीम, वि. (अ.) पीन, पीवर, स्थूल।

जस्टिस, सं. पुं. (अं.) उच्चन्यायालयस्य धर्म,-अधिकारिन्-अध्यक्षः, २. न्यायः, दंडयोगः।

जस्त, जस्ता, सं. पुं. (सं. यशदं) कुधातु (न.)।

जहन्नुम, सं. पुं. (अ.) नरकः, निरयः २. तीव्रपीडास्थानम्।

ज़हमत, सं. स्त्री. (अ.) कष्टं, अपाद् (स्त्री.), २. व्यामोहः, चित्तविक्षेपः।

ज़हर, सं. पुं. (फ़ा. जह्र) गरलं, विषः-षम्। वि., घातक, प्राणहर २. अतिहानिकर [-री (स्त्री.)]।

ज़हरदार, वि. (फ़ा.) विषाक्त, गरलदिग्ध।

ज़हरबाद, सं. पुं. (फ़ा.) विसर्पः।

ज़हरमोहरा, सं. पुं. (फ़ा. जहरमुहरा) विषघ्नः प्रस्तरभेदः।

ज़हरीला, वि. (फ़ा. ज़हर) दे. 'ज़हरदार'।

जहाँ[1], क्रि. वि. (सं. यत्र) यस्मिन् देशे-स्थाने।

—**कहीं**, क्रि. वि., यत्रकुत्र,-चित्-अपि, यत्र यत्र।

—**का तहाँ**, क्रि. वि., तत्रैव, पूर्वस्मिन्नेव स्थले।

—**तक**, क्रि. वि., यावत्।

—**तहाँ**, क्रि. वि., इतस्ततः, अत्र तत्र २. सर्वत्र।

—**से**, क्रि. वि., यतः, यस्मात् स्थानात्।

जहाँ[2], सं. पुं. (फ़ा.) जगत् , संसारः।

—**दीद,—दीदा**, वि. (फ़ा.) अनुभविन्।

—**पनाह**, सं. पुं. (फ़ा.) जगद्रक्षकः, प्रभुः २. प्रभुचरणाः, देवपादाः।

जहाज, सं. पुं. (अ.) तरांधु (पुं.) बृहन्नौका, पोतः-थः, होडः।

जहाज़ी, वि. (अ. जहाज)। सं. पुं., नाविकः, नौ-पोत,-वाहः, समुद्रगः।

—**डाकू**, सं. पुं., सागरतस्करः, समुद्रदस्युः (पुं.)।

—**बेड़ा**, सं. पुं. (रण-) पोतगणः।

जहान, सं. पुं. (फ़ा.) जगत् (न.), सृष्टिः (स्त्री.)।

जहालत, सं. स्त्री. (अ.) अज्ञानम् , मूर्खता।

ज़हीन, वि. (अ.) कुशाग्रबुद्धि २. मेधाविन्।

जहूर, सं. पुं. (अ.) आविर्भावः, प्रकाशः।

जहेज़, सं. पुं. (अ.) युतकं, यौतकं, वाहनिकं, स्त्रीधनम्।

जह्नु, सं. पुं. (सं.) नृपविशेषः, सुहोत्रपुत्रः।

—**कन्या—तनया**, सं. स्त्री. (सं.) गंगा।

जांगलू-ली, वि. (सं. जांगल) आरण्यक, वन्य, २. अशिष्ट, क्रूर।

जाँघ, सं. स्त्री. (सं. जंघा) ऊरु (पुं.), सक्थि (न.)।

जाँघिया, सं. पुं. (हिं. जाँघ) *जांघिकः, *ऊरुछदः दे. 'काछा'।

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

जाँच, सं. स्त्री. (हिं. जाँचना) परीक्षणं-क्षा, विचारणं-णा २. अनुसंधानं, गवेषणा ।

जाँचना, क्रि. स. (सं. याचनं >) परीक्ष् (भ्वा. आ. से.), विमृश् (तु. प. अ.), आ-पर्या लोच् (चु.), अनुसंधा (जु. उ. अ.), निरूप् (चु.), विचर् (प्रे.) ।

जांबूनद, सं. पुं. (सं. न.) सुवर्णं, काञ्चनं, हिरण्यम् ।

जा, सं. स्त्री. (फ़ा.) स्थानं, प्रदेशः । वि., उचित, योग्य, संगत ।

—बजा, क्रि. वि., सर्वत्र ।

—बेजा, वि., उचितानुचित, तथ्यातथ्य ।

जाई, सं. स्त्री. (सं. जा = जाता) पुत्री, दुहितृ (स्त्री.) ।

जाग, सं. पुं., (सं. यज्ञः) मखः, क्रतुः ।

जाग, सं. स्त्री. (हिं. जागना) जागरणं, प्ररात्रि,-जागरः ।

जागना, क्रि. अ. (सं. जागरणं) जागृ (अ. प. से.), प्र-वि-बुध् (दि. आ. अ.) सं. पुं., दे. 'जागरण' ।

जागनेवाला, सं. पुं., जागरकः, जागरितृ (पुं.)। अवहितः; जागरूकः ।

जागरण, सं. पुं. (सं. न.) प्र-,जागरः, प्र-, बोधः-धनं, निद्रा-स्वाप,-अभावः २. अवधानं दक्षता ।

जागरित, वि. (सं.) उन्निद्र, विनिद्र, प्रबुद्ध । २. जागरूक, सावधान । सं. पुं., (सं. न.) दे. 'जागरण' ।

जागरूक, वि. (सं.) जागरितृ, जागरक, जागरिन् २. अवहित, दक्ष, सावधान ।

जागर्ति, सं. स्त्री. (सं.) जागर्या, जाग्रिया, निद्राऽभावः, प्रबोधः २. दक्षता ।

जागीर, सं. स्त्री. (फ़ा.) अग्रहारः २. भूसंपद् (स्त्री.) ।

—दार, सं. पुं. (फ़ा.) अग्रहारिन् २. भूस्वामिन् ।

जाग्रत, वि. (सं. जाग्रत) दे. 'जागरूक' ।

जाग्रति, जागृति, सं. स्त्री., दे. 'जागर्ति' ।

जाज़रुर, सं. पुं. (फ़ा. जा + अ.) दे. 'पाखाना' ।

जाजिम, सं. स्त्री. (तु. जाजम) चित्रितास्तरणं, तलाच्छादनम् ।

जाज्वल्यमान, वि. (सं.) प्रज्वलत्, दह्यमान २. तेजस्विन्, कांतिमत् ।

जाट, सं. पुं. (सं. जर्टः) आर्येषु जातिविशेषः २. जडः, मूढः ३. ग्रामीणः, ग्रामीयः, ग्रामिन् ।

जाठ, सं. पुं. [सं. यष्टिः (स्त्री.)] तैल-इक्षु,-पेषणीयष्टिः ।

जाठर, वि. (सं.) जठर-उदर,-सम्बधिन्-विषयक, औदर, जठर,-ज-स्थित-वर्तिन् । सं. पुं., जठराग्निः २, बालः ।

—अग्नि, सं. पुं. (सं.) जठरानलः, जठराग्निः ।

जाड़ा, सं. पुं. (सं. जाड्यं) शीतता, शीतलता, शैत्यं २. शिशिरः, शीतकालः, हिमागमः, शीतर्तुः (पुं.) ।

जाड्य, सं. पुं. (सं. न.) जडता, मूर्खता, मूढता २. मंदता, मंथरता ।

जात[1], वि. (सं.) उत्पन्न, प्रसूत, संभूत २. प्रकट, व्यक्त ३. अच्छ, प्रशस्त ४. नव-जात ।

जात[2], सं. स्त्री., दे. 'जाति' ।

ज़ात, सं. स्त्री. (अ.) प्रकृतिः (स्त्री.), स्वभावः २. देहः ३. व्यक्तिः (स्त्री.) ।

जातक, सं. पुं. (सं.) वत्सः, बालः २. शिशुः नवजातः (पुं.) ३. भिक्षुः (पुं.), याचकः ४. बुद्धस्य पूर्वजन्मकथाः (स्त्री. बहु.) ।

जातकर्म, सं. पुं. (सं.-र्मन् न.) जातक्रिया, संस्कारभेदः (धर्म.) ।

जातपाँत, सं. स्त्री., दे. 'जातिपाँति' ।

जाता, सं. स्त्री. (सं.) बाला, कन्या, कुमारी २. पुत्री, सुता, तनुजा ।

जाति, सं. स्त्री. (सं.) वर्णः २. कुलं, वंशः ३. वंशावली, गोत्रं ४. भेदः, प्रकारः ५. वर्गः, श्रेणी ६.-७. समाजः, जनसमूहः ८. सामान्यं ९. जातिफलं १०. मालती ।

—से खारिज करना, क्रि. स., जातेः-समाजात्-बहिष्कृ या च्युत्-भ्रंश् (प्रे.) ।

—च्युत, वि. (सं.) जातिहीन, अपांक्तेय, बहिष्कृत ।

—पांति, सं. स्त्री., जात्युपजातो (स्त्री. द्वि.) ।

—स्वभाव, सं. पुं. (सं.) सहज,-प्रकृतिः (स्त्री.)-स्वभावः ।

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

ज़ाती, वि. (अ. ज़ात) वैयक्तिक २. स्वीय, नैज ।

जाती, सं. स्त्री. (सं.) सुरभिगंधा, सुरप्रिया, चेतकी, मालती ।

—पत्री, सं. स्त्री. (सं.) जातिकोषी, मालती-पत्रिका ।

—फल, सं. पुं. (सं. न.) जाति(ती)कोशः-शं-षः-षम् ।

—रस, सं. पुं. (सं. न.) वोलः ।

जातीय, वि. (सं.) जातिभव, जातिसंबंधिन् २. राष्ट्रीय, देशीय ३. सामाजिक ।

जातीयता, सं. स्त्री. (सं.) जाति,-प्रेमन् (पुं.)-अनुरागः २. राष्ट्रीयता ३. सामजिकता ।

जातुधान, सं. पुं. (सं.) निशाचारः, राक्षसः।

जादू, सं. पुं. (फ़ा.) अभिचारः, इन्द्रजालं, कार्मणं, कुसृतिः (स्त्री.) कुहकः-कं, माया, मोहः, मंत्रयोगः ।

—करना, क्रि. स., अभिचर् (प्रे.), मंत्रैः वशीकृ वा मुह् (प्रे.), मायां कृ ।

जादूगर, सं. पुं. (मा.) कौसृतिकः सौभिकः, ऐं(इं)द्रजालिकः, कुहकाजीविन्, मायाकारः ।

जादूगरी, सं. स्त्री. (फ़ा.) ऐन्द्रजालिकता, दे. 'जादू' ।

जान, सं. स्त्री. (सं. ज्ञानं) बोधः, उपलब्धिः (स्त्री.), विचारः २. अनुमानं, ऊहः, तर्कः ।

—कार, वि., ज्ञातृ, ज्ञानिन्, वेत्तृ:-ज्ञ,-अभिज्ञ (समासांत में) २. दक्ष, कुशल ।

—कारी, सं. स्त्री., परिचय, अभिज्ञता २. नैपुण्यं, दाक्ष्यम् ।

—बूझ कर, क्रि. वि., कामतः, ज्ञान-बुद्धि-विचार,-पूर्वकम् ।

—पहिचान, सं. स्त्री., परिचयः परिचितिः (स्त्री.) ।

जान, सं. स्त्री. (फ़ा.) प्राणः, जीवः-वनं, श्वासः २. बलं, सामर्थ्यं ३. सारः, उत्तमांशः ४. प्रियः, प्रिया ।

—जोखों, सं. स्त्री., प्राण,-संकटं-संशयः-भयम् ।

—दार, वि. (फ़ा.) प्राणिन्, सप्राण ।

—फ़िशानी, सं. स्त्री. (फ़ा.) परमोद्योगः, घोरपरिश्रमः ।

—किसी पर देना, मु., अत्यंतं स्निह् (दि. प. से.; सप्तमी के योग में) ।

—खाना, मु., दु (स्वा. प. अ.), वाध् (भ्वा. आ. से.) ।

—छुड़ाना, मु., अपसृ-अपसृप् (भ्वा. प. अ.) ।

—में जान आना, मु., आ-समा-श्वस् (अ. प. से.), सुस्थ-निर्वृत-(वि.) भू ।

जानकी, सं. स्त्री. (सं.) सीता, वैदेही, जनकतनया ।

जानना, क्रि. स. (सं. ज्ञानं) ज्ञा (क्र्. उ. अ.), अव-इ (अ. प. से.) अवगम्, बुध् (भ्वा. उ. से.), विद् (अ. प. से.) २. मन् (दि. आ. अ.), ऊह् (भ्वा. आ. से.), वितर्क् (चु.) । सं. पुं., दे. 'ज्ञान' ।

जानने योग्य, वि., दे. 'ज्ञातव्य' ।

जाननेवाला, सं. पुं., दे. 'ज्ञाता' ।

जानपद, सं. पुं. (सं.) ग्रामवासिन्, ग्रामिन, ग्रामीणः, ग्राम्यजनः २. जनपदप्राप्तकरः वि. जनपदग्राम,-सम्बन्धिन् ।

जानवर, सं. पुं. (फ़ा.) जीवः, प्राणिन्, चरः, चेतनः २. पशुः,-जंतुः (पुं.) । वि., जड, मूर्ख ।

जानशीन, सं. पुं. (फ़ा.) उत्तराधिकारिन् ।

जाना, क्रि. अ. (सं. यानं) या-इ (अ. प. अ.), गम् (भ्वा. प. अ.), चर्-चल्-व्रज् (भ्वा. प. से.) पद् (दि. आ. अ.), ऋ (भ्वा. जु. प. अ.) २. प्रस्था (भ्वा. आ. अ.), प्रया, प्रचल्, निर्गम् । सं. पुं., गमनं, यानं, व्रजनं, प्रस्थानं, प्रचलनं इ. ।

जाने योग्य, वि., गंतव्य, यातव्य ।

जानेवाला, सं. पुं., गंतृ-यातृ,चलितृ (पुं.) इ. ।

गया हुआ, वि., गत, यात, हत, चलित इ. ।

जाने देना, मु., दे. 'क्षमा करना' ।

जानी, वि. (फ़ा. जान) प्राणसंबंधिन् । सं. स्त्री., प्रिया, दयिता ।

—दोस्त, सं. पुं., अभिन्नहृदयः सुहृद् (पुं.) ।

—दुश्मन, सं. पुं., अंतकरः-प्राणहरः शत्रुः (पुं.) ।

जानु, सं. पुं. (सं. न.) ऊरुपर्वन् (न.), अष्ठीवत् (पुं. न.), जानुसंधिः (पुं.), चक्रिका ।

जाने अनजाने, क्रि. वि. (हिं. जानना) ज्ञानतोऽज्ञानतो वा, कामतोऽकामतो वा, बुद्धि-पूर्वमबुद्धिपूर्वं वा ।

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

जानो, अव्य., दे, 'मानो'।
जाप, सं. पुं. (सं.) दे. 'जप'।
जापक, सं. पुं. (सं.) दे. 'जपी'।
ज़ाफ़त, सं. स्त्री. (अ. ज़ियाफ़त) सह-सं,-भोजनम्।
ज़ाफ़रान, सं. पुं. (अ.) दे. 'केसर'।
ज़ाफ़रानी, वि. (अ.) दे. 'केसरिया'।
जॉब, सं. पुं. (अं.) कर्मन् (न.), कार्यम् २. वैतनिक,-कार्यम्-कर्मन्।
ज़ाब्ता, सं. पुं. (अ.) नियमः, व्यवस्था, विधिः (पुं.)।
—दीवानी, सं. पुं., व्यवहारसंहिता।
—फ़ौजदारी, सं. पुं., दण्डसंहिता।
बेज़ाब्ता, वि. नियम-विधि, विरुद्ध, अवैध।
बेज़ाब्तगी, सं. स्त्री., अनियमः, उत्सूत्रता।
जाम[1], सं. पुं. (सं. यामः) दे. 'पहर'।
जाम[2], सं. पुं. (फ़ा.) चषकः-कम्।
जामदग्न्य, सं. पुं. (सं.) जमदग्निपुत्रः परशुरामः।
ज़ामन, सं. पुं. (हिं. जमाना) द्र(द्रा)प्सं, त्र(द्र)प्स्यम्।
जामन, सं. पुं. दे. 'जामुन'।
जामा, सं. पुं. (फ़ा.) वसनं, वस्त्रं २. कंचुकः, प्रावारकः।
जामे से बाहर होना, मु., अत्यंतं क्रुध् (दि. प. अ.)।
जामे में फूला न समाना, मु., भृशं हृष् (दि. प. से.)।
जामाता, सं. पुं. दे. 'जमाई'।
ज़ामिन, सं. पुं. (अ.) प्रतिभूः (पुं.), बंधकः, लक्षकः।
ज़ामिनी, सं. स्त्री., दे. 'ज़मानत' (द्रव्य)।
जामिनी, सं. स्त्री., (सं. यामिनी) दे. रात्री-त्रिः (स्त्री.), निशा।
जामुन, सं. पुं. (सं. जम्बुः) (वृक्ष) जम्बूः-बुः (स्त्री.)। (फल) जम्बु (न.), जम्बुः-म्बूः (स्त्री.), जंबुफलं, जाम्बवम्।
ज़ायक़ा, सं. पुं. (अ.) आ-,स्वादः, रसः।
ज़ायकेदार, वि. (अ.+फ़ा.) स्वादु, सरस, रसवत्।
जायज़, वि. (अ.) उचित, युक्त, संगत।
जायदाद, सं. स्त्री. (फ़ा.) रिक्थं, दायः, भूमिः-संपत्तिः (स्त्री.)।
जायफल, सं. पुं. [सं. जाति(ती)फलं] जाति-कोषं-सारं-शस्यं, कोश(ष)म्, पपुटम्।
जाया[1], सं. स्त्री. (सं.) पत्नी, भार्या, पाणि-गृहीती।
—पती, सं. पुं. (सं.) दम्पती-जम्पती, (पुं. द्वि.)।
जाया[2], सं. पुं. (सं. जातः) पुत्रः, सुतः। वि., उत्पन्न, जात।
ज़ाया, वि. (फ़ा.) नष्ट, निरर्थक।
जार, सं. पुं. (सं.) उपपतिः, परदारलंपटः।
—ज, सं. पुं. (सं.) उपपतिसंतानः।
जारिणी, सं. स्त्री. (सं.) कुलटाः पुंश्चली, जघनचपला।
जारी, वि. (अ.) प्रवहत्, प्रवाहित २. वर्तमान, प्रचलत्, प्रचलित।
जालंजर, सं. पुं. (सं.) (१-४) नगर-नृप-मुनि-दैत्य,-विशेषः।
जाल[1], सं. पुं. (सं. न.) जालकं, पाशः, आनायः, वागुरा २. समूहः, निकरः ३. लूता-लूतिका,-जालम्।
जाल[2], सं. पुं. (अ. जअल) छलं, कपटं, माया।
—साज़, सं. पुं. (अ.+फ़ा.) धूर्तः, शठः, मायिकः।
—साज़ी, सं. स्त्री., धूर्तता, कापट्यं, शाठ्यम्।
जाला, सं. पुं. (सं. जालं) लूता-लूतिका,-जालं २. जालदुष्टिः (स्त्री.) नेत्ररोगभेदः ३. घासादिबन्धनार्थं जालम्।
जालिक, सं. पुं. (सं.) धीवरः केवर्तः २. ऐन्द्रजालिकः, कुहककारः ३. उर्ण-तंतु,-नामः।
ज़ालिम, वि. (अ.) घोर, क्रूरकर्मन्, आततायिन्, पापिष्ठ।
जालिया, दे. 'जालसाज़'।
जाली[1], सं. स्त्री. (सं. जालं >) छिद्रप्रायं वस्त्रं, जालिका २. काष्ठादिपट्टेषु छिद्रसमूहः ३. सूचीकर्मभेदः जालिकाकर्मन्।
जाली[2], वि. (अ. जअल) कृत्रिम, कृतक।
जावा, सं. पुं. (सं. यवद्वीपः-पं) द्वीपविशेषः।

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

जाविन्त्री, सं. स्त्री. [सं. जाति(ती)पत्री] सौमनसायनी, जातिकोषी मालती-सुमनः,-पत्रिका ।

ज़ाविया, सं. पुं. (अ.) द्विभुजः, कोणः अस्रः ।

जासूस, सं. पुं. (फ़ा.) च(चा)रः, स्पशः, अपसर्पः, गूढपुरुषः, भीमर, प्रणिधिः ।

जासूसी, सं. स्त्री. (फ़ा. जासूस) स्पशता, च(चा.)रकर्मन् (न.), प्राणिध्यम् ।

ज़ाहिर, वि. (अ.) प्रकट, प्रत्यक्ष २. विदित ।

ज़ाहिरा, अव्य (अ.) बाह्यतः, बहिरंगतः, आपाततः, प्रत्यक्षतः (सब अव्य.) ।

ज़ाहिरी, वि. (हिं. ज़ाहिर) बाह्य, बहिःस्थ, बाहीक, बहिर् ,-भव-भूत-वर्तिन् ।

जाहिल, वि. (अ.) मूर्ख, अज्ञानिन् २. निरक्षर, अविद्य ।

जाहिली, सं. स्त्री., मूर्खता, अज्ञता २. निरक्षरता, विद्याहीनता ।

जाह्नवी, सं. स्त्री. (सं.) जह्नु,-कन्या-तनया, भागीरथी, गङ्गा ।

ज़िंदगी, सं. स्त्री. (फ़ा.) जीवनं २. आयुस (न.) ।

—के दिन पूरे करना, मु., जीवनं या (प्रे.) २. मरणासन्न (वि.) वृत् (भ्वा. आ. से.) ।

ज़िंदा, वि. (फ़ा.) जीवित, सप्राण, सजीव ।

—दिल, वि., हास्यप्रिय, विनोदशील ।

—दिली सं. स्त्री., विनोदशीलता, हास्यप्रियता ।

जिंस, सं. स्त्री. (फ़ा.) प्रकारः, भेदः २. द्रव्यं, वस्तु (न.), सामग्री, उपकरणजातं ४. अन्नम् ।

ज़िक्र, सं. पुं. (अ.) वर्णनं, चर्चा ।

जिगर, सं. पुं. (फ़ा.) यकृत् (न.) कालकं, कालखंडं, कालेयं २. चित्तं, मानसम् ।

जिगरा, सं. पुं. (फ़ा. जिगर) साहसं, पौरुषं, शौर्य्यम् ।

जिज्ञासा, सं. स्त्री. (सं.) ज्ञानेच्छा, कौतूहलं, पिप्रच्छिषा, अनुयोगः,-पृच्छा, निरूपणा ।

जिज्ञासु, वि. (सं.) ज्ञानेच्छु, कौतूहलिन् , पिप्रच्छिषु ।

जिठानी, सं. स्त्री. (हिं. जेठ) ज्येष्ठस्य जाया, ज्येष्ठयातृ (स्त्री.) ।

जित, वि (सं.) पराजित, पराभूत, विजित ।

जितना, वि. (हिं. जिस) यावत् (-ती स्त्री.), यावन्मात्र, यावत्परिमाण (वि.) २. क्रि. वि., यावत् ।

जिताना, क्रि. प्रे., व. 'जीतना' के प्रे. रूप ।

जितेन्द्रिय, वि. (सं.) हृषीकेश, वशिन् , दान्त, शान्त, इन्द्रियजित् ।

ज़िद्द , सं. स्त्री. (अ.) हठः, आग्रहः ।

जिद्दी, वि. (फ़ा.) हठिन् , आग्रहिन् ।

जिधर, क्रि. वि. (सं. यत्र) यस्मिन् स्थाने ।

जिन[1], सं. पुं. (सं.) विष्णुः २. सूर्यः ३. बुद्धः ४. जैनतीर्थंकरः ।

जिन[2], सं. पुं. (अ.) भूतः, प्रेतः ।

जिन[3], सर्व. (हिं. जिस) यद् ।

जिमाना, क्रि. प्रे. (हिं. जीमना) दे. 'खिलाना' ।

ज़िम्मा, सं. पुं. (अ.) भारः, उत्तरदायित्वम् ।

—दार, वि., उत्तरदायिन् , प्रष्टव्य, अनुयोज्य ।

—वार

—वारी, सं. स्त्री., उत्तरदायित्वं २. संरक्षणम् ।

ज़िया, सं. स्त्री. (अ.) सूर्यालोकः, प्रभा २. रत्नकान्तिः (स्त्री.) ।

ज़ियान, सं. पुं. (फ़ा.) हानिः (स्त्री.), अर्थनाशः ।

ज़ियाफ़त, सं. स्त्री. (अ.) आतिथ्यं, अतिथिसेवा २. निमंत्रणं, भोजनोत्सवः ।

ज़ियारत, सं. स्त्री. (अ.) साधुदेवमूर्त्यादिदर्शनम् ।

जिरगा, सं. पुं. (फ़ा.) वृन्दं, समूहः २. समाजः, सभा ।

जिरयान, सं. पुं. (अ.) धातु-दौर्बल्यं-स्रावः, शुक्रक्षरणम् ।

जिरह, सं. पुं. (अ. जुरह) प्रतिपृच्छा ।

—करना, क्रि. स., प्रतिप्रच्छ् (तु. प. अ.) ।

ज़िरह, सं. स्त्री. (फ़ा.) कवचः-चं, तनुत्राणं, वर्मन् (न.), सन्नाहः ।

ज़िला, सं. पुं. (अ.) मण्डलं, चक्रम् ।

जिलाना, क्रि. प्रे, व. 'जीना' के प्रे. रूप ।

जिल्द, सं. स्त्री. (अ.) त्वच् (स्त्री.), चर्मन् (न.) २. आवरणं, वेष्टनं २. पृथक् स्यूत पुस्तक,-खंडः भागः ४. पुस्तकसंख्या ।

—बाँधना, क्रि. स., पुस्तकं आवृ (स्वा. उ. से.), आवरणेन युज् (प्रे.) ।

—बंद

—साज़] सं. पुं., पुस्तकावरकः, *ग्रन्थबन्धकः ।

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

ज़िल्लत, सं. स्त्री. (अ.) अपमानः, अवज्ञा, तिरस्कारः, अनादरः २. दुर्गतिः (स्त्री.), दुर्दशा ।

जिस, सर्व. (सं. यः >) यत् ।

जिस्म, सं. पुं. (फ़ा.) शरीरं, देहः ।

ज़िहन, सं. पुं. (अ.) बुद्धिः-मतिः (स्त्री.) ।

जिहाद, सं. पुं. (अ.) धर्मयुद्धम् ।

जिह्वा, सं. स्त्री. (सं.) रसना, रसज्ञा, दे. 'जीभ' ।

जी, सं. पुं. (सं. जोवः >) चित्तं, मानसं, चेतस्-मनस् (न.) २. साहसं, पौरुषं ३. संकल्पः, विचारः ।

—आना (किसी पर), अनुरागं बन्ध् (क्र. प. अ.), स्निह् (दि. प. से., सप्तमी के साथ) ।

—करना, मु., इष् (तु. प. से) ।

—का बुख़ार निकलना, मु. रोदनजल्पनादिभिः मनोवेगाः शम् (दि. प. से.) ।

—खट्टा होना, मु., निर्विद् (दि. आ. अ., तृतीया के साथ). विरक्त (वि.) भू ।

—खोल कर, मु., निस्संकोचं २. यथेच्छम् ।

—चुराना, मु., परिहृ (भ्वा. प. अ., द्वितीया के योग में) ।

—छोटा करना, मु., विषद् (भ्वा. प. अ.) २. औदार्यं हा (जु. प. अ.) ।

—बहलना, मु., मनोविनोदः जन् (दि. आ. से.) ।

—बिगड़ना, मु., वम् (सन्नन्त., विवमिषति), वमनेच्छा जन् ।

—भरना, मु., तृप् (दि. प. अ.) ।

—भर कर, मु., यथेच्छं, यथाकामम् ।

—मचलाना या—मतलाना, मु., दे. 'जी बिगड़ना' ।

—में आना, मु., वाञ्छ् (भ्वा. प. से.) ।

—लगाना, मु., दे. 'जी आना' ।

जीजा, सं. पुं. (हिं. जीजी) भगिनीपतिः, आयुत्तः ।

जीजी, सं. स्त्री. (अनु.) जीजी (ज्यायसी) भगिनी, स्वस् (स्त्री.) ।

जीत, सं. स्त्री. (सं. जितम्) जयः, विजयः २. लाभः ३. साफल्यं, कृतकार्यता ।

—हार, सं. स्त्री., जयाजयौ, जयपराजयौ ।

जीतना, क्रि. स. (हिं. जीत) जि (भ्वा. प. अ.), वि-परा-जि (भ्वा. आ. अ.), अभि-परा-भू १. वशीकृ, दम् (प्रे.) ३. स्वायत्ती-आत्मसात् कृ । सं. पुं., दे. 'जीत' सं. स्त्री. ।

—योग्य, वि., वि-, जेय, जेतव्य, जयनीय,-अभि-परा-भवनीय; दमनीय; वशीकार्य इ. ।

—वाला, सं. पुं., वि-,जेतृ, अभिभाविन्, अभिभाव(वु)क ।

जीता, वि. (हिं. जीना) जीवित, सजीव, जीवोपेत, सप्राण ।

जीतेजी, मु., यावज्जीवं, जीवनपर्यन्तं, जीवनावधि (न.) ।

ज़ीन, सं. पुं. (फ़ा.) पल्ययनं, पर्याणम् ।

ज़ीनत, सं. स्त्री. (फ़ा.) शोभा, छविः (स्त्री.), आभा ।

जीना, क्रि. अ. (सं. जीवनं) जीव् (भ्वा. प. से.), प्र-अन् (अ. प. से.), श्वस् (अ. प. से.) । सं. पुं. जीवनं, प्राणधारणम् ।

ज़ीना, सं. पुं. (फ़ा.) सोपानं, आरोहणं, अधिरोहि(ह)णी ।

जीभ, सं. स्त्री. (सं. जिह्वा) रसा, लोला, रसला, सुधास्रवा, रसिका, रसांका, रसना ।

—चाटना, मु., गृध् (दि. प. से.), अभिलष् (भ्वा. प. से.), लुभ् (दि. प. से.) ।

जीभी, सं. स्त्री. (हिं. जीभ) जिह्वा-रसना,-मार्जनी-शोधनी २. जिह्वा-रसना,-मार्जन-शोधनम् ३. लघु-जिह्वा-रसा-रसला ४. कलमाग्रम् , लेखनीचंचुः (स्त्री.) ५. पशुरोगभेदः ।

जीमना, क्रि. स. (सं. जेमनं) अद् (अ. प. अ.), खाद् (भ्वा. प. से.) ।

जीमूत, सं. पुं. (सं.) मेघः, वारिवाहः, अभ्रं २. पर्वतः, नगः ।

—वाहन, सं. पुं. (सं.) इन्द्रः, वज्रिन् (पुं.) ।

जीरा, सं. पुं. (सं. जीरः) दीपकः, दीप्यः, जीरकः, जरणः ।

जीर्ण, वि. (सं.) शीर्ण, गलित २. परिपक्व, परिणमित ।

जीर्णा, वि. (सं.) वृद्धा, स्थविरा, पलिता, पालक्की ।

जीर्णोद्धार, सं. पुं. (सं.) नवीकरणं, संधानं, उद्धारः ।

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

जीवंत, वि. (सं. जीवत्) सप्राण, जीवित, सजीव, जीवोपेत ।

जीव, सं. पुं. (सं.) । जीव-, आत्मन् .(पुं.), शरीरिन् , देहिन् ।

—दान, सं. पुं. (सं. न.) प्राणदानं, जीवन-रक्षणम् ।

—दण्ड, सं. पुं. (सं.) प्राणदण्डः, मृत्युदण्डः २. वधः, मारणं, हननम् ।

जीवक, सं. पुं. (सं.) प्राणिन् , जीवधारिन् २. सेवकः, दासः ३. अ(आ)हितुंडिकः, कालग्राहिन् ४. कुसीदः-दकः, वार्द्धुषिकः, कुसीदिन् ।

जीवन, सं. पुं. (सं. न.) प्राणधारणं, चैतन्यं, सप्राणता ।

—चरित, सं. पुं. (सं. न.) जीवन,-चर्या-वृत्तान्तः-चरित्रम् ।

जीवन वृत्त,-वृत्तान्त, सं. पुं. (सं.) दे. 'जीवन चरित' ।

जीवनवृत्ति, सं. स्त्री. (सं.) आजीविका, व्यवसायः, उपजीविका, जीवनोपायः, जीवन-साधनम् ।

जीवात्मा, सं. पुं. (सं.-त्मन्) दे. 'जीव' ।

जीविका, सं. स्त्री. (सं.) दे. 'जीवनवृत्ति' ।

जीवित, वि. (सं.) दे. 'जीता' ।

जुआ, सं. पुं. (सं. द्यूतं) पणः,पणनं-देवनं-ना, द्यूत-अक्ष,-क्रीडा ।

—खेलना, क्रि. अ., दिव् (दि. प. से.) (अक्षैः) क्रीड् (भ्वा. प. से.) ।

जुआरी, सं. पुं. (हिं, जुआ) द्यूतकारः, कितवः, अक्षदेविन् , देविन् ।

ज़ुकाम, सं. पुं. (अ.) प्रतिश्यायः, श्लेष्म-स्रावः ।

जुग, सं. पुं. (सं. युगं) कालमानभेदः २. युगलं, द्वन्द्वम् ।

जुगनू, सं. पुं. (हिं. जुगजुगाना) खद्योतः, ज्योति-रिङ्गणः, दृष्टिबन्धुः प्रभाकीटः, उप-सूर्यकः, तमोमणिः ।

जुगल, सं. पुं. (सं. युगलं) दे. 'युगलं' या 'जुग' (२) ।

जुगालना, क्रि. अ. (सं. उद्गिलनम् >) रोमन्थं कृ, रोमन्थायते (ना. धा.) ।

जुगाली, सं. स्त्री. (हिं. जुगालना) रोमन्थः, पुनश्चर्वणम् ।

जुगुप्सा, सं. स्त्री. (सं.) बीभत्सः, घृणा, गर्हा, अरुचिः (स्त्री.) ।

जुटना, जुड़ना, क्रि, अ. (सं. युक्त) सं-,युज (कर्म.); संश्लिष् (दि. प. अ.); संमिल् (तु. प. से.) ।

जुटाना, जुड़ाना, क्रि. प्रे., ब. 'जुड़ना' के प्रे. रूप ।

जुतना, क्रि. अ. (सं. युक्त >) युगं-योक्त्रं वह् (भ्वा. उ. अ.) ।

जुदा, वि. (फ़ा.) पृथक् , भिन्न ।

—करना, क्रि. स. वियुज (रुध् उ. अ.) पृथक्-कृ ।

—होना, क्रि. अ., पृथग्भू, विश्लिष् (दि. प. अ.) ।

जुदाई, सं. स्त्री. (फ़ा.) वियोगः, पार्थक्यम् ।

जुद्ध, सं. पुं. (सं. युद्धं) संग्रामः ।

जुमा, सं. पुं. (अ.) शुक्र-भृगु-,वारः-वासरः ।

जुरअत, सं. स्त्री. (फ़ा.) साहसिक्यं, साहसं, उत्साहः ।

जुरमाना, सं. पुं. (फ़ा.) दमः, अर्थदण्डः ।

जुर्म, सं. पुं. (अ.) अपराधः, दोषः ।

जुर्माना, सं. पुं. (फ़ा.) दे. 'जुरमाना' ।

—करना, क्रि. अ., दण्ड् (चु. द्विकर्मक) ।

—देना, क्रि. स., दण्डं-दमं दद् (भ्वा. उ. अ.) ।

—मुआफ करना, क्रि. स., दण्डं-दमं क्षम् (भ्वा. आ. से.) ।

जुलाब, सं. पुं. (अ. जुल्लाब) रेचनं, विरेचनं उदरशोधनं २. रेचकः-कं, विरेचकः-कम् ।

—देना, क्रि. स., विरिच् (प्रे.) ।

—लेना, क्रि. अ. (उदरं) विरिच् (रु. प. अ.) ।

जुलाहा, सं. पुं. (फ़ा. जौलाह) तन्तुवायः, वयः, कुविन्दः, तंत्रवापः, पटकारः ।

जुलूस, सं. पुं. (अ.) दे. 'जलूस' ।

ज़ुल्फ, सं. स्त्री. (फ़ा.) कुटिल-चूर्णं,-कुन्तलः, अलकः २. द्विफालबद्धाः चिकुराः ।

ज़ुल्म, सं. पुं. (अ.) अत्यचारः, क्रूर-घोर-, कर्मन् (न.) ।

ज़ुल्मत, सं. स्त्री. (अ.), अन्धकारः, तिमिरं, तमस् (न.) २. तिमिर-अन्धकार,-कालिमन् (पुं.)-कृष्णिमन् (पुं.)-श्यामता ।

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

ज़ुल्मी, वि. (अ. जुल्म >) पापिष्ठ, आतताथिन्, अत्याचारिन्, क्रूर ।
जुवा, सं. पुं. (हिं. जुआ) दे. 'जुआ' ।
जुवारी, वि. (हिं. जुआरी) दे० 'जुआरी' ।
जुष्ट, वि. (सं.) भुक्तशिष्ट, उच्छिष्ट २. प्रिय, इष्ट, प्रीत, प्रेष्ठ ३. युक्त, अन्वित, युत ४. सेवित ।
जुस्तजू, सं. स्त्री. (फ़ा.) अन्वेषणा, गवेषणा, मार्गणा ।
जुही, सं. स्त्री. (सं. यूथी) (सफ़ेद) यूथिका, बालपुष्पी, वासन्ती, (पीली) पीत-सुवर्ण, यूथी, हेमयूथिका, कनकप्रभा, हेमपुष्पिका ।
जू, सं स्त्री. (सं. यूका) केशटः, केशकीटः, स्वेदसंभवा, यूकः-का, षट्पदः-दी ।
जूआ, सं. पुं. (सं. युगं-गः) योक्त्रं, धुर्वी, प्रासंगः, ईषान्तबंधनं, धुर् (स्त्री.) ।
जूआ, सं. पुं., दे. 'जुआ' ।
जूठ-जूठन, सं. स्त्री. (हिं. जूठा) भुक्तशेषः, उच्छिष्टं, अवशिष्टम् ।
जूठा, वि. (सं. जुष्ट) उच्छिष्ट, भुक्तशेष ।
जूड़ा, सं. पुं. (सं. जूटः) जूटकं, केशबन्धः, जटाग्रन्थिः ।
जूत-जूता, सं. पुं. (सं. युक्त >) पादत्राणं, उपानह् (स्त्री.) ।
—मारना, मु., पादत्राणेन तड् (चु.) २. तिरस्कृत ।
—खाना, मु., तिरस्कारं लभ् (भ्वा. आ. अ.) ।
जूती, सं. स्त्री., दे. 'जूता' ।
जूथ, सं. पुं., दे. 'यूथ' ।
जूनियर, वि. (इं.) अवर, अधर, अवरपदभाज् ।
जूही, सं. स्त्री., दे. 'जुही' ।
जृम्भा, सं. स्त्री (सं.) जृम्भः, जृम्भणं, जृम्भिका, जंभा, जंभका ।
जेठ, सं. पुं., दे. 'ज्येष्ठ' ।
जेठा, सं. पुं. (सं. ज्येष्ठः) प्रथमजः, अग्रजः ।
जेठानी, सं. स्त्री., दे. 'जिठानी' ।
जेब, सं. पुं. (फ़ा.) (चोलकङ्कुकादीनां)कोशः-षः ।
—कतरा, सं. पुं., चिल्लामः, ग्रंथिच्छेदकः ।
जेर, सं. स्त्री. (सं. जरायुः) उल्वं, कललः ।
जेल, स. पुं. (अं.) कारा,-गृहं-आगारं, बन्दि,-गृहं-शाला ।
—ख़ाना, सं. पुं. (अ. फ़ा.) दे. 'जेल' ।
जेवर, सं. पुं. (फ़ा.) वि-आ-, भूषणं, आभरणं, अलंकारः, अलंकरणम् ।
जेहन, सं. पुं. (अ.) दे. 'ज़िहन' ।
जैन, सं. पुं. (सं.) जैनमतावलम्बिन् २. जैन,-मतं-सम्प्रदायः ।
जैनी, सं. पुं. (सं. जैन) दे. 'जैन' (१) ।
जैसा, वि. (सं. यादृश) यादृश्(श), यत्प्रकारक [जैसी (स्त्री.)=यादृशी] ।
—का तैसा, मु., पूर्ववत्, यथापूर्वम् ।
—चाहिए, मु., यथोचितं, यथार्हं, यथायोग्यम् ।
जो, सर्व. (सं. यः) यः (पुं.) या (स्त्री.), यत् (न.) ।
—कुछ, यत्किञ्चित् ।
—कोई, यः कश्चित्-कश्चन-कोऽपि ।
जोक, जोंक, सं. स्त्री. (सं. जलौका) जलुका, रक्त,-पा-पायिनी, जलाका, जलजन्तुका ।
ज़ोखों, सं. स्त्री., संकटं, विपद् (स्त्री.) ।
जोग, सं. पुं. (सं. योगक्षेम ?) दे. 'योग' ।
जोगिया, वि. (हिं. जोगी) परिव्राजक, योगिसम्बन्धिन्, २. गैरिकरागयुक्त, गैरिकाक्त, गैरिकवर्ण ।
जोगी, सं. पुं. (सं. योगिन्) दे. 'योगी' ।
जोगिन, सं. स्त्री., दे. 'योगिनी' ।
जोजन, सं. पुं. (सं. योजनं) दे. 'योजन' ।
जोड़, सं. पुं. (सं. जोडः) बन्धनं, मेलनं २. योगः, संकलः, परिसंख्या, पिंडः । ३. अंग-सन्धिः, अंगग्रन्थिः ।
जोड़ना, क्रि. स. (सं. जोड़नं) एकत्र कृ, संमिल् (प्रे.) जुड् (भ्वा. तु. प. से.) युज् (रुधा. उ. अ.), संश्लिष् (प्रे.) २. संकल् (चु.), परिसंख्या (अ. प. अ.) ।
जोड़ा, सं. पुं. (हिं. जोड़ना) युगलं, युग्मं २. द्वन्द्वं, मिथुनं ३. उपानद्युगलं ४. वेषः-शः ।
जोड़ी, सं. स्त्री. (हिं. जोड़ा) दे. 'जोड़ा' (१-२) ।
जोत[1], सं. स्त्री. [सं. ज्योतिस् (न.)] प्रकाशः, आभा, द्युतिः ।
जोत[2], सं. स्त्री. (हिं. जोतना) चर्मपट्टः, वरत्रा, वध्री ।
जोतना, क्रि. स. (सं. युक्त >) योक्त्रयति (ना. धा.), युज् (चु.) २. कृष् (भ्वा. प. अ.), इल् (भ्वा. प. से.) ।
जोतिष, सं. पुं., दे. 'ज्योतिष' ।

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

जोतिषी, सं. पुं., दे. 'ज्योतिषी'।

जोधा, सं. पुं. (सं. योद्धृ) योधः, भटः।

ज़ोफ़, सं. पुं. (अ.) दुर्बलता, निर्बलता।

जोवन, सं. पुं. (सं. यौवनं) तारुण्यम्।

ज़ोम, सं. पुं. (अ.) गर्वः, दर्पः, अहंमानः, अहंकारः।

ज़ोर, सं. पुं. (फ़ा.) बलं, शक्तिः २. वशः, अधिकारः ३. वृद्धिः-समृद्धिः (स्त्री.) ४. वेगः, आवेशः ५. आश्रयः ६. परिश्रमः ७. व्यायामः।

ज़ोरावर, वि. (फ़ा.) बलिष्ठ, शक्तिशालिन्।

ज़ोरदार, वि. (फ़ा) प्रबल, बलवत् २. अकाट्य, अखण्ड्य।

ज़ोराज़ोरी, अव्य. (फ़ा. ज़ोर >) बलात्, हठात्, प्रसभं, प्रसह्य (सब अव्य०)।

जोरू, सं. स्त्री. (हिं. जोड़ा) भार्या, पत्नी, गेहिनी।

जोलाहा, सं. पुं., दे. 'जुलाहा'।

जोश, सं. पुं. (फ़ा.) उत्तेजनं-ना, उत्साहः, व्यग्रता, चण्डता, मनोवेगः, आवेशः।

—देना, क्रि. स, प्रोत्सह् (प्रे.), उत्तिज् (प्रे.) २. पच् (भ्वा. प. अ.), क्वथ् (भ्वा. प. से.)।

जोशांदा, सं. पुं. (फ़ा.) क्वाथः, कषायः, निर्यासः।

जोशीला, वि., व्यग्र, उग्र, उत्साहिन्, उत्साहवत्, प्रचण्ड।

जोहड़, सं. पुं. (देश.) जलाशयः, ह्रदः, पल्वलम्।

जौ, सं. पुं. (सं. यवः) प्रवेटः, दीर्घ-सित,-शूकः, अश्वप्रियः, महाबुसः।

जौहर, सं. पुं. (अ.) रत्नं, मणिः (पुं., कभी स्त्री.) २. सारः, तत्त्वम्।

जौहरी, सं. पुं. (फ़ा.) मणिकारः, रत्नकारः २. रत्नपरीक्षकः।

ज्ञातव्य, वि. (सं.) ज्ञेय, अवगन्तव्य, बोद्धव्य।

ज्ञाता, वि. (सं. ज्ञातृ) वेत्तृ, ज्ञानिन्, बोद्धृ।

ज्ञाति, सं. पुं. (सं.) सगोत्रः, बन्धुः, बान्धवः, स्वः, स्वजनः, सकुल्यः, बंधकः, दायादः।

ज्ञान, सं. पुं. (सं. न.) बोधः, प्रतीतिः (स्त्री.)।

ज्या, सं. स्त्री. (सं.) मौर्वी, शिञ्जिनी, गुणः।

ज्यादती, सं. स्त्री. (फ़ा.) आधिक्यं, प्राचुर्यं, अधिकता २, अत्याचारः।

ज्यादा, वि. (फ़ा.) अधिक, महत्, बहु।

—तर, वि. बहुसंख्याक, अधिकतर, भूयस्।

ज्येष्ठ, सं. पुं. (सं.) अग्रजः, प्रथमजः २. मर्तुः ज्यायान् भ्रातृ ३. ज्येष्ठः (मासः)। वि., वृद्ध २. श्रेष्ठ।

ज्यों, क्रि. वि. (सं.यः + इव यथा,) येन प्रकारेण।

—का त्यों, मु., यथापूर्वम्।

—त्यों, मु., यथा तथा।

ज्योति, सं. स्त्री. [सं. ज्योतिस् (न.)] प्रकाशः, प्रभा, द्युतिः (स्त्री.)।

ज्योतिष, सं. पुं. (सं. न.) ज्योतिर्विद्या, ज्योतिःशास्त्रं, नक्षत्रविद्या।

ज्योतिषी, सं. पुं. (सं. ज्योतिषिन्) दैवज्ञः, ज्योतिर्विद्, ज्योतिषिकः।

ज्योत्स्ना, सं. स्त्री. (सं.) चन्द्रिका, कौमुदी।

ज्वर, सं. पुं. (सं.) ज्वरिः, ज्वरा. जूर्तिः (स्त्री.), महागदः, तापकः।

थोड़ी थोड़ी देर बाद होनेवाला—, स्वल्पविरामज्वरः।

दौरेवाला—, पौनःपुनिकज्वरः।

प्रतिदिन होनेवाला—, अन्येद्युष्कज्वरः।

रुक रुककर होनेवाला—, सविरामज्वरः।

सड़ा—, रक्तदुष्टिः (स्त्री.)।

हर तीसरे दिन होनेवाला—, तृतीयकज्वरः।

हर चौथे दिन होनेवाला—, चतुर्थकज्वरः।

ज्वलंत, वि. (सं. ज्वलत्) उद्दीप्त, प्रकाशित।

ज्वलन, सं. पुं. (सं. न.) दाहः, तापः २, अग्निः ३. ज्वाला।

ज्वार[1], सं. स्त्री. (सं. यावनालः) अन्नविशेषः, वृत्ततण्डुलः, क्षेत्रेक्षुः।

ज्वार[2], सं. पुं. (देश.) वेलावृद्धिः (स्त्री.)।

—भाटा, सं. पुं., वेलाया वृद्धिक्षयौ (द्वि.)।

ज्वाला, सं. स्त्री. (सं.) शिखा, अर्चिः (न.)।

—मुखी, सं. पुं. (सं.) अग्निपर्वतः।

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

झ

झ, देवनागरीवर्णमालाया नवमो व्यञ्जनवर्णः, झकारः।

झं, झंकार, सं. पुं. स्त्री. (अनु.) झणत्कारः, झणझणध्वनिः, शिञ्जितम्।

झंखाड़, सं. पुं. (हिं. 'झाड़' का अनु.) कंटगुल्मः-ल्मं, कंटस्तम्बः।

झंझट, सं. स्त्री., (अनु.) कृच्छ्रम्, आयासः, क्लेशः, वैषम्यम्।

झंझनाना, क्रि. अ. (अनु.) झणझणायते (ना. धा.), झणझणध्वनिं उत्पद् (प्रे.)।

झंझनाहट, सं. स्त्री. (अनु.) दे. 'झंकार'।

झंझा, सं. स्त्री. (सं.) झंझावातः, सवृष्टिको वातः।

झंझोड़ना, क्रि. स. (सं. झर्झनम्) क्षुभ् (प्रे.), सरभसं कंप् (प्रे.)।

झंड, सं. पुं. (हिं. झंडा) शिशोः असुंडिताः केशाः, सहज-जन्मज,-केशाः-कचाः (पुं. बहु.)।

झंडा, सं. पुं. (हिं. झण्डी) ध्वजः, केतुः, केतनम्।

—बरदार, सं. पुं. पताकिन्, ध्वजिन्, वैजयन्तिकः, ध्वजपताका,- धारिन्-वाहिन्।

—गाड़ना, मु., स्वायत्ती-आत्मसात् कृ, अभिपरा,-भू।

झंडी, सं. स्त्री. (सं. जयन्ती) वैजयन्ती, पताका, दे. 'झंडा'।

झंडूला, वि. (हिं. झंड) असुंडित, अनुप्त-अकृत्त अच्छिन्न,-केश-मूर्द्धज।

झंप, सं. पुं. (सं.) झंपा, प्लुतं-तिः (स्त्री.) २. अश्वगलभूषणम्।

झक, सं. स्त्री. (अनु.) आवेशः, अभिनिवेशः, आग्रहः, निर्बन्धः २. प्रलापः, असंबद्धभाषणं, प्रजल्पः।

—मारना, क्रि. स., प्रलप्-प्रजल्प् (भ्वा. प. से.), निर्विवेकं भाष् (भ्वा. आ. से.)।

झकझक, सं. स्त्री. (अनु.) दे. 'झक'।

झकना, क्रि. अ., प्रलप्-प्रजल्प् (भ्वा. प. से.), विवद् (भ्वा. आ. से.)।

झक्की, सं. पुं. (हिं. झक) वावदूकः, प्र-, जल्पकः, वाचालः २. दृढाग्रहिन्।

झख, सं. स्त्री. (अनु.) दे. 'झक'।

झगड़ना, क्रि. अ. (हिं. झकझक) विवद् (भ्वा. आ. से.), विप्रलप् (भ्वा. प. से.), कलहं कृ, कलहायते (ना. धा.)।

झगड़ा, सं. पुं. (हिं. झगड़ना) वाग्युद्धं, कलिः, कलहः, विवादः।

झगड़ालु-लू, वि. (हिं. झगड़ा) विवादिन्, कलहप्रिय।

झट, क्रि. वि. (सं. झटिति) तत्क्षणं, अनुपदं, शीघ्रम्।

—पट, क्रि. वि., तत्कालमेव, सत्वरम्।

झटकना, क्रि. स. (हिं. झट) (सहसा) वेप्-कंप् (प्रे.) २. छलेन बलेन वा अपहृ (भ्वा. प. अ.)।

झटका, सं. पुं. (हिं. झटकना) हस्तादिकेन प्रचालनं-प्रेरणं-प्रणोदनं, ईषत्,-आघातः-प्रहारः २. सहसा वधः-हननम्।

झड़, सं. स्त्री. (हिं. झड़ना) दे. 'झड़ी'।

झड़झड़ाना, क्रि. स. (अनु.) दे. 'झंझोड़ना'।

झड़ना, क्रि. अ. (सं. झरणम् >) पत्-क्षर् (भ्वा. प. से.), शॄ (कर्म.) २. धाव्-निर्णिज् (कर्म.)।

झड़प, सं. स्त्री. (अनु.) कलहः २. क्रोधः ३. आवेशः।

झड़बेरी, सं. स्त्री. (हिं. झाड़ + बेरी), (फल) वन्यवदरम् (वृक्ष) भूवदरी, वन्यवदरः, शबराहारः।

झड़ी, सं. स्त्री. (हिं. झड़ना) सतत,-क्षरणं-पतनं २. सततवृष्टिः (स्त्री.)।

झड़वाना, क्रि. स. (झाड़ना) शुध्-मृज् (प्रे.) २. अपवह् (प्रे.) ब. 'झाड़ना' के (प्रे.) रूप।

झड़ाना, क्रि. स. (झाड़ना) दे. 'झड़वाना'।

झपक, सं. स्त्री. (हिं. झपकना) नेत्रनिमीलनं, पक्ष्मसंकोचः, निमेषः, तन्द्रा, ईषन्निद्रा २. पलं, क्षणः-णम्।

झपकना, क्रि. स. (अनु. झप्) निमील् (भ्वा. प. से.) नेत्रं संकुच् (भ्वा. प. से.), निमिष् (तु. प. से.)। क्रि. अ., निमील्, निमिष्

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

२. अल्पं निद्रा (अ. प. अ.)-स्वप् (अ. प. अ.)।

झपकाना, क्रि. स., दे. 'झपकना' क्रि. स.।

झपट, सं. स्त्री. (हिं. झपटना) आच्छेदः आकस्मिकग्रहणं २. सहसाक्रमणं, आकस्मिकः प्रहारः।

झपटना, क्रि. स. अ. (सं. झंपः >) आच्छिद् (रु. प. अ.), सहसा आ-कृष् (भ्वा. प. अ.) २. आक्रम् (दि. प. से.)।

झपट्टा, सं. पुं., **झपेट**, सं. स्त्री., दे. 'झपट'।

झबरा, वि. (अनु.) सघनकेश, लोमश, दीर्घलोमन्।

झबरीला, वि., दे. 'झबरा'।

झमक, सं. स्त्री. (हिं. चमक) द्युतिः (स्त्री.), आभा, कान्तिः (स्त्री.)।

झमझम, झमाझम सं. स्त्री. (अनु.) धारासारः, धारापातः, झंझा २. झणत्कारः, झणझणशब्दः।

झमेला, सं. पुं. (अनु. झांव) दे. 'झंझट'।

झरना, क्रि. अ. (सं. झरणं >) क्षर् (भ्वा. प. से.), स्रु (भ्वा. प. अ.), प्रपत् (भ्वा. प. से.)। सं. पुं., प्रपातः, स्रोतस् (न.), निर्झरः, उत्सः।

झरोखा, सं. पुं. (अनु. झरझर + हिं. गोखा) गवाक्षः, वातायनम्।

झलक, सं. स्त्री. (सं. झल्लिका) आभा, द्युतिः (स्त्री.), प्रकाशः २. प्रतिविम्बः-बं, प्रतिच्छाया, प्रतिफलम्।

झलकना, क्रि. अ. (हिं. झलक) प्रकाश-विद्युत् (भ्वा. आ. से.) २. प्रतिफल् (भ्वा. प. से.) संक्रान्त-प्रतिबिंबित-प्रतिफलित (वि.) भू, प्रतिभा (अ. प. अ.)।

झलकाना, क्रि. स., ब. 'झलकाना' के प्रे. रूप।

झलझलाना, क्रि. अ., दे. 'चमकना' क्रि. स., दे. 'चमकाना'।

झलझलाहट, सं. स्त्री., दे. 'चमक'।

झलना, क्रि. स. (हिं झलझल) वीज् (चु.), व्यंजनं धूर्ण् (प्रे.)।

झलमलाना, क्रि. अ. (अनु. झलमल) सकम्पं प्रकाश (भ्वा. आ. से.)।

झलवाना, क्रि. प्रे., ब. 'झलना' के प्रे. रूप।

झल्लाना, क्रि. अ. (हिं झल = क्रोध) प्रकुप् (दि. प. से.), क्रुध् (दि. प. अ.)। क्रि. स., ब. उक्त धातुओं के प्रे. रूप।

झष, सं. पुं. (सं.) मत्स्यः, मीनः।

—**केतु**, सं. पुं. (सं.) कामः, मारः, रतिपतिः, मनोजः।

झाँई, सं. स्त्री. (सं. छाया) प्रतिविम्बः-बं, प्रति,-च्छाया-फलं-रूपं २. अंधकारः २. छलम्।

झांकना, क्रि. अ. (सं. झष् अथवा अध्यक्ष) जालमार्गेण दृश् (भ्वा. प. अ.) २. निगूढं निरूप् (चु.)।

झांकी, सं. स्त्री. (हिं. झांकना) ईषद् अभिव्यक्तिः (स्त्री.) २. ईक्षणं, निरूपणं ३. दृश्यं ४. गवाक्षः।

झांझ, सं. स्त्री. (अनु. झनझन) झल्लकं, झल्लरी, कांस्यकरतालकम्।

झाँझन, सं. स्त्री. (अनु.) नूपुरः-रम्।

झाँझरी, सं. स्त्री., दे. 'झाँझ' तथा 'झाँझन'।

झांवां, सं. पुं. (सं. झामकम्) दग्धेष्टका २. क्रोधः ३. कुचेष्टा।

झांसा, सं. पुं. (सं. अध्यासः >) छलं, कपटं, प्रतारणा।

—**देना**, **झांसना**, क्रि. स., वंच् (चु.), प्रतृ (प्रे.), छलयति (ना. धा.)।

झाऊ, सं. पुं. (सं. झावूः) पिचुलः, झावुः, क्षुपभेदः।

झाग, सं. पुं. (हिं. गाज) फेनः, डिंडीरः, अम्बुकफः, मंडः-डम्।

झाड़, सं. पुं. (सं. झाटः >) कंटगुल्मः-मं, कंटस्तम्बः। (झाड़ी स्त्री.)।

—**झंखाड़**, सं. पुं., गोक्षुरः, शुष्कगुल्मः।

झूंड़, सं. पुं., गुल्मगहनं, निविडस्तम्बः।

—**पोंछ**, सं. स्त्री., मार्जनं, शोधनम्।

—**फानूस**, सं. पुं., काचदीपिका।

—**फूँक**, सं. स्त्री. यंत्रमंत्रम्, मंत्रयोगः।

झाड़न, सं. पुं. (हिं. झाड़ना) नक्तकः, मार्जनपटः।

झाड़ना, क्रि. स. (हिं. झड़ना) रेणुं अपमृज् (अ. प. वे.), निर्धूलीकृ।

—**पोंछना**, क्रि. स., प्रोंछ् (भ्वा. प. से.)।

झाड़ा, सं. पुं. (हिं. झाड़ना) वस्त्र-वसन-, अनेषणा-निरीक्षा २. गूथः-थं, मलं, पुरीषम्।

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

झाड़ू, सं. स्त्री. (हिं. झाड़ना) संमार्जनी, शोधनी ।
—देना, क्रि. स., संमृज् (अ. प. वे.),शुध् (प्रे.)।
झामा, सं. पुं. (सं. झामकं) दग्धेष्टका ।
झालर, सं. स्त्री. (सं. झल्लरी) दशाः (स्त्री. बहु.), वस्तयः (स्त्री.पुं.बहु.), वस्त्रप्रान्तः ।
—दार, वि., झल्लरीयुक्त, प्रान्तोपेत ।
झिझक, सं. स्त्री. (हिं. झिझकना) आशंका, विकल्पः, सन्देहः ।
झिझकना, क्रि. अ. (अनु.) आशंक्-विकल्प् (भ्वा. प. से.), दोलायते-चिरायते (ना. धा.), संशी (अ. आ. से.)।
झिड़क, सं. स्त्री. (हिं. झिड़कना) भर्त्सनं, आक्रोशः, अधिक्षेपः ।
झिड़कना, क्रि. स. (अनु.) आक्रुश् (भ्वा. प. अ.), अधिक्षिप् (तु. प. अ.), निर्भर्त्स् (चु. आ. से.)।
झिड़की, सं. स्त्री. (हिं. झिड़कना) दे. 'झिड़क' ।
झिलमिल, सं. स्त्री. (अनु.) प्रकम्पमानः प्रकाशः ।
झिल्ली[1], सं. स्त्री. (सं.) चिल्ली, झिरी, झिरिका, झिल्लिका, झङ्गारी ।
झिल्ली[2], सं. स्त्री.(सं. चैलं >) सूक्ष्म-त्वच् (स्त्री.)-चर्मन् (न.) २. जरायुः, उल्वम् ।
झींकना, झींखना, क्रि. अ. (हिं. खीजना) अनुशुच् (भ्वा. प. से.), अनुतप् (दि. आ. अ.), पश्चात्तापं कृ । सं. पुं., पश्चात्तापः, विप्रतीसारः, अनुतापः, अनुशयः ।
झींगुर, सं. पुं. (अनु. झीं-झीं) दे. 'झिल्ली'(१) ।
झीना, वि. (सं. झीर्णं >) सूक्ष्म, विरल, तनु ।
झील, सं. स्त्री. (सं. क्षीरं >) सरोवरः, जलाशयः, सरसी, सरस् (न.)।
झीवर, सं. पुं. (सं. धीवरः) नाविकः, औडुपिकः २. कैवर्तः, मत्स्याजीवः ।
झुंझलाना, क्रि. अ. (अनु.) कुप् (दि. प. से.), क्रुध् (दि. प. अ.)।
झुंझलाहट, सं. स्त्री. (हिं. झुंझलाना) कोपः, क्रोधः, रोषः, अमर्षः ।
झुंड, सं. पुं. (सं.) अस्कन्धवृक्षः, अप्रकाण्डतरुः ।
झुंड, सं. पुं. (सं. झुण्टः >) समुदायः, समूहः, गणः, वृन्दः, कदम्बकम् ।
झुकना, क्रि. अ. (सं. युज् >) अव-, नम् (भ्वा. प. अ.), नम्रीभू २. वक्रीभू ।
झुकाना, क्रि. स. (हिं. झुकना) नम् (प्रे.), वक्री कृ ।
झुकवाना, क्रि. प्रे. (हिं. झुकना) दे. 'झुकाना' ।
झुकाव, सं. पुं. (हिं. झुकना) प्रवणता, नतिः (स्त्री.) २. वक्रता ३. प्रवृत्तिः (स्त्री.) ।
झुकावट, सं. स्त्री. (हिं. झुकना) दे. 'झुकाव' ।
झुटपुटा, सं. पुं. (अनु. झुटपुट) संधिकालः, अहोरात्रसंयोगसमयः, संध्या ।
झुटलाना, झुठलाना, झुठाना, क्रि. स. (हिं. झूठ) मिथ्यावादित्वं प्रमाणयति (ना. धा.), निराकृ, प्रत्याख्या (अ. प. अ.) ।
झुठाई, सं. स्त्री. (हिं. झूठ) असत्यता, अनृतत्वं, अलीकता, मिथ्यात्वम् ।
झुनझुन, सं. स्त्री. (अनु.) छणत्कारः, झणत्कारः, झणझणध्वनिः (पुं.) ।
झुनझुना, सं. पुं. (अनु.)* झुणझुणकः ।
झुनझुनी, सं. स्त्री. (अनु.) *झुणझुणी, अंगेषु जाड्यानुभूतिः (स्त्री.) ।
झुमका, सं. पुं. (हिं. झूमना) तालपत्रम् ।
झुरमट, झुरमुट, सं. पुं. (सं. झुंटः >) समुदायः, समूहः २. स्तम्बः, गुल्मः ।
झुर्री, (हिं. झुरना) वली-लिः (स्त्री.), चर्मसंकोचः २. पुटः, भंगः ।
झुलसना, क्रि. अ. (सं. ज्वलनं) ईषत् दह्-प्लुष् (कर्म.)।
झुलसाना, क्रि. स., ईषत् दह् (भ्वा. प. अ.), प्लुष् (भ्वा. प. से.)।
झुलाना, क्रि. स. (हिं झूलना) प्रेंख् (प्रे.) इतस्ततः चल् (प्रे.)।
झूट, झूठ, सं. पुं. (सं. अयुक्तं) असत्यं, अनृतं, अलीकं, मिथ्यावचनं, असत्यभाषणं। वि., मिथ्या-मृषा-(समासके आदिमें) असत्य, अतथ्य, वितथ ।
झूटा, झूठा, वि. (हिं. झूट-ठ) मिथ्या असत्य, असत्यवादिन्-मिथ्याभाषिन् ।
झूम, सं. स्त्री. (हिं. झूमना) तन्द्रा, आलस्यं २. आन्दोलनं, प्रेंखणम् ।
झूमना, क्रि. अ. (सं. झंपः) अथवा 'घूम'का (अनु.) इतस्ततः चल् (भ्वा. प. से.)।
झूल, सं. स्त्री. (हिं. झूलना) कुथः-थं-था, प्रवेणी-णिः (स्त्री.), परिस्तोमः, सज्जना ।

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

झूलना, क्रि. अ. (सं. दोलनं)दोलायते(ना.धा.), प्रेंख् (भ्वा. प. से.)।
झूला, सं. पुं. (सं. दोला-लः-लिका) प्रेंखा, हिंदोलः, आन्दोलः।
झेलना, क्रि. स. (सं. क्वेलनं >) सह् (भ्वा. आ. से.), मृष् (दि. उ. से.)।
झोंकना, क्रि. स. (हिं. झुकना) अग्नौ क्षिप् (तु. उ. अ.) २. प्रेर् (चु.) प्रणुद् (प्रे.)।
झोंक देना, क्रि. स., दे. 'झोंकना' (२)।
झोंका, सं. पुं. (हिं. झोंकना,) वायुवेगः, पवनप्रहारः, वातगुल्मः।
झोंपड़ा, सं. पुं. (हिं. छोपना ?) उटजः-जं, कुटीरः-रं. कुटी, कुटीरकः, पर्णशाला।
झोल, सं. पुं. (हिं. झूलना) शैथिल्यं, संकोचः २. संवरणं, व्यवधानं ३. रञ्जनं, लेपनम्।
—फेरना, लिप् (तु. उ. अ.), रंज् (प्रे.)।
झोला, सं. पुं. (हिं. झूलना) पुटः-टं, प्रसेवः. कोषः (झोली स्त्री. = लघुपुटः इ.)।

अ

अ, देवनागरीवर्णमाला या दशमो व्यञ्जनवर्णः, अकारः।

ट

ट, देवनागरीवर्णमालाया एकादशो व्यञ्जनवर्णः, टकारः।
टंक, सं. पुं. (सं.) श्रावदारणः, पाषाणभेदनः २. अश्मनः, तक्षणी ३. परशुः, कुठारः ४. खड्गः ५.चतुर्माषकात्मकः चतुर्विंशतिरक्ति-कात्मको वा तोलभेदः ६. क्रोधः ७. अभिमानः ८. जंघा ९. खनित्रं १०. कोषः, निधिः ११. मुद्रा, नाणकम्।
टँकना, क्रि. अ. (सं. टंकणं) ब. 'टाँकना' के कर्म. के रूप।
टंकवाई, सं. स्त्री. (हिं. टंकवाना) १-३. टंकन-सीवन-लेखन,-भृत्या-भृतिः (स्त्री.)।
टंकवाना, क्रि. प्रे., ब. 'टाँकना' के प्रे. रूप।
टंका, सं. स्त्री. (सं.) जंघा, प्रसृता।
टँकाई, सं. स्त्री. (हिं. टाँकना) दे. 'टंकवाई'।
टँकाना, क्रि. प्रे., दे. 'टंकवाना'।
टंकार, सं. स्त्री. (सं. पुं.) ज्या-मौर्वी,-घोषः-शब्दः, शिंजिनीशिंजितं २. टणत्कारः, रणितिः ३. झण-झण,रणितं-निनदः।
टंकारना, क्रि. स. (सं. टंकारः >) ज्यां घुष् (चु.), मौर्वीं आस्फल् (प्रे.) टंकारयति (ना. धा.)।
टंकी, सं. स्त्री. (अं. टैंक) तोयाधारः, वापिका २. द्रोणी-णिः (स्त्री.)।
टंग, सं. पुं. (सं. पुं. न.) श्रावदारणः, पाषाण-भेदनः २. परशुः ३. चतुर्माशात्मकः तोलभेदः ४. दे. 'रांग'।
टंगना, क्रि. अ., दे. 'लटकना'।
टंटा, सं. पुं. (अनु. टन टन) उपद्रवः, कलहः २. प्रपंचः, आडंबरः।
टक, सं. स्त्री. (सं. टंक् = बाँधना >) अनिमेष-बद्ध-स्थिर,-दृष्टिः (स्त्री.)।
—बाँधना, मु., अनिमि(मे)षनयन (वि.) दृश् (भ्वा. प. अ.)।
—लगाना, मु. प्रतीक्ष् (भ्वा. आ. से.)।
टकटकी, सं. स्त्री., दे. 'टक'।
—बाँधना, मु., बद्ध-स्थिर,-दृष्ट्या अवलोक् (चु.)।
टकराना, क्रि. अ. (हिं. टक्कर) संघट्ट् (भ्वा. आ. से.), अभि-आ-प्रति,-हन् (अ. प. अ.), अभि-सं-पत् (भ्वा. प. से.) क्रि. स., उक्त धातुओं के प्रे. रूप।
टकसाल, सं. स्त्री. (सं. टंकशाला), मुद्रांकण-शाला।
टकसाली-लिया, सं. पुं. (हिं. टकसाल) टंक,-अध्यक्षः-पतिः (पुं.), नैष्किकः। वि., टंक-शालासंबन्धिन् २. शुद्ध, निर्दोष ३. सर्वसम्मत ४. प्रामाणिक, परीक्षित।
टका, सं. पुं. (सं. टंकः >) अर्द्धाणी, पणयुगलं २. रूप्यं-प्यकं, कार्षिकः, टंकः ३. धनम्।
—सा जवाब देना, मु., झटिति नि-प्रति-विध् (भ्वा. प. से.)-प्रत्याख्या (अ. प. अ.)।
—सा मुँह लेकर रह जाना, मु., त्रप् (भ्वा. आ. से.), लज्ज् (तु. आ. से.)।
टकोर, सं. स्त्री. (सं. टङ्कारः) दे. 'टङ्कार' (२), २. आघातः, प्रहारः ३. पटहप्रहारः ४. दुंदुभि-

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

पटह,-ध्वनिः (पुं.) ५. प्र-,स्वेदनं, (उष्ण-जलादिना) सेकः ।

टकोरना, क्रि. स. (हिं. टकोर) भेरीं आहन् (अ. प. अ.) २. प्रह्व (भ्वा. प. अ.) ३. (उष्णजलादिभिः) सिच् (तु. प. अ.), लिप् (तु. प. अ.), प्र-,स्विद् (प्रे.) ।

टक्कर, सं. स्त्री. (अनु. टक) संघट्टः, संमर्दः, समा-प्रति,-घातः २. विग्रहः, संग्रामः, संप्रहारः ३. हानिः (स्त्री.) ४. मस्तक-शीर्ष,-आघातः ।

—का, मु., सम, समान, तुल्य ।

—खाना, मु., दे. 'टकराना' क्रि. अ. ।

—मारना, मु., व. 'टकराना' के प्रे. रूप २. विरुध् (रु. उ. अ.) ३. यत् (भ्वा. आ. से.) ।

टख़ना, सं. पुं. (सं. टंकः = टांग >) गुल्फः, घुटिकः, घुटी, घुण्टः, खुडकः ।

टटोल, सं. स्त्री. (हिं. टटोलना) स्पर्शः, सम्पर्कः, परामर्शः, स्पर्शजो बोधः ।

टटोलना, क्रि. स. (सं. त्वक् + तोलनं >) स्पर्शेन परीक्ष् (भ्वा. आ. से.) निरूप् (चु.), स्पृश्-परामृश् (तु. प. अ.) २. अंधकारे अन्विष् (दि. प. से.)-निरूप्-परामृश् ।

टट्टी, सं. स्त्री. (सं. स्थात्री ?) (वंशतृणादि-रचित) कपा(वा)टः-टं-टी, २. प्रतिसीरा, तिरस्करिणी ३. सूक्ष्मभित्ति (स्त्री.) ४. शौच-कूपं, मलालयः ५. मलं, उच्चारः ।

—जाना, मु., पुरीषोत्सर्गाय गम् ।

—की आड़ (या. ओट) से शिकार खेलना, मु., प्रच्छन्नं प्रह्व (भ्वा. प. अ.), निभृतं पाप-माचर् (भ्वा. प. से.) ।

टट्टू, सं. पुं. (अनु.) क्षुद्रघोटकः अश्वशावकः ।

टन, सं. पुं. (अनु.) घंटाध्वनिः (पुं.), टण-त्कारः, टणिति ।

—टन, सं. पुं., टणटण,-निनदः-रणितं, टणटण-त्कारः कृतिः (स्त्री.) ।

टन, सं. पुं. (अं.) अष्टाविंशतिमणकल्पः, तोल-भेदः, *टनम् ।

टनकना, कि. अ. (अनु.) टणटणायते (ना. धा.), टणत्कारं कृ २. धर्मेण शिरःपीड् (कर्म.) ।

टनटनाना, क्रि. स. (अनु.) घंटां नद्-वद् (प्रे.) । क्रि. अ., दे. 'टनकना' ।

टनाटन, सं. स्त्री. (अनु.) निरन्तरः टणटण-त्कारः ।

टप[1], सं. पुं. (हिं. तोपना = ढांकना) प्रवहणा-दीनाम् आच्छादनं-आवरणं-छत्रम् ।

टप[2], सं. पुं. (अं. टब) द्रोणी-णिः (स्त्री.) ।

टप[3], सं. स्त्री. (अनु.) बिंदुपातध्वनिः (पुं.), टप् इति शब्दः ।

—से, मु. झटिति, आशु, शीघ्रम् ।

टपक, सं. स्त्री., दे. 'टपकाव' ।

टपकना, क्रि. अ. (अनु. टप) कणशः-बिंदु-क्रमेण क्षर्-गल् (भ्वा. प. से.)-स्रु (भ्वा. प. अ.)-स्यन्द् (भ्वा. आ. से.) २. (फलादि) झटिति नि-अव-पत् (भ्वा. प. से.) ३. परिस्रु, क्षर् ४. दे. 'टीसना' ।

टपका, सं. पुं. (हिं. टपकना) स्वयं पतितं पक्कफलम् ।

—टपकी, सं. स्त्री., शीकर,-वर्षः-पातः २. सतत-फलपातः ।

टपकाना, क्रि. स., व. 'टपकना' के प्रे. रूप ।

टपकाव, सं. पुं. (हिं. टपकना), (कणशः) क्षरणं-गलनं-स्यन्दनं-स्रावः ।

टपना, क्रि, अ., दे. 'कूदना' ।

टपाटप, क्रि. वि. (अनु.) सततं, निरंतरं, अविरतम् ।

टप्पा, सं. पुं. (अनु.) प्लवः, प्लवनं, प्लुतं-तिः (स्त्री.), झंपः-पा २. गीतिकाभेदः ।

—खाना, क्रि. अ., उत्पत् (भ्वा. प. से.), उत्प्लु (भ्वा. आ. अ.) ।

टब, सं. पुं. (अं.) दे. 'टप'[2] ।

टब्बर, सं. पुं., दे. 'कुटुम्ब' ।

टमकी, सं. स्त्री. (अनु० टमक) डिंडिमः, लघुपटहः ।

टमटम, सं. स्त्री. (अं. टैंडम) अश्वयानभेदः, *टमटमम् ।

टमाटर, सं. पुं. (अं. टमैटो) आंग्लीय-रक्त, वृन्ताकम् ।

टर, सं. स्त्री. (अनु.) टरशब्दः, अप्रिय-कर्कश-कर्णकटु,-शब्दः २. भेकरवः ३. दुर्वोक्तिः (स्त्री.) ४. दुराग्रहः, प्रतीपता ५. तुच्छवचनम् ।

—टर, सं. स्त्री., वृथालापः, प्र-,जल्पः-पितं २. भेकरुतम् ।

—टर करना, क्रि. अ., दे. 'टरटराना' ।

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

टरकना, क्रि. अ., दे. 'टलना' तथा 'टरटराना'।
टरकाना, क्रि. सं., दे. 'टालना'।

टरटराना, क्रि. अ. (अनु. टरटर) प्रलप्-प्रजल्प् (भ्वा. प. से.) २. अविनयेन ब्रू (अ. उ. से.) टरटरायते (ना. धा.)।

टर्रा, वि. (अनु. टरटर) वावदूक, वाचाल इ. २. धृष्ट, निर्व्रीड।

टर्राना, क्रि. अ. (अनु. टर) साभिमानं वद् (भ्वा. प. से.) धार्ष्ट्येन ब्रू (अ. उ. से.), कटु वद्।

टलना, क्रि. अ. (सं. टलनं >) विचल् (भ्वा. प. से.), अपस् (भ्वा. प. अ.) २. स्थानान्तरं या (अ. प. अ.). प्रस्था (भ्वा. आ. अ.) ३. वि-,नश् (दि. प. वे.), लुप् (दि. प. अ.) ४. व्याक्षिप् (कर्म.), विलंब् (भ्वा. आ. से.) ५. अन्यथा भू ६. (समयः) व्यतिइ (अ. प. अ.), गम्।

टस, सं. स्त्री. (अनु.) गुरुद्रव्यसरणशब्दः, टस् इति शब्दः।
—से मस न होना, मु., ईषदपि न विचल्।

टसक, सं. स्त्री. (हिं. टसकना) दे. 'टीस'।

टसकना, क्रि. अ. (हिं. टस) अप,-गम्-सृ (भ्वा. प. अ.), अपया (अ. प. अ.) २. दे. 'टीसना'।

टसकाना, क्रि. स., व. 'टसकना' के प्रे. रूप।

टसर, सं. पुं. (सं. त्रसरः >) क्षौमभेदः, *टसरम्।

टसर-मसर, सं. पुं. (हिं. टस + मस) विलंबः, व्याक्षेपः।

टसुआ, सं. पुं. (हिं. अँसुआ) मिथ्याश्रु (न.), वितथबाष्पः।

टहना, सं. पुं. (सं. तनुः >) विटपः, शाखा।

टहनी, सं. स्त्री. (हिं. टहना) तनु-सूक्ष्म, त्रिटपः-शाखा।

टहल, सं. स्त्री., दे. 'सेवा'।

टहलना, क्रि. अ. (सं. तत् + चलनं ?) परि,-अट्-भ्रम् (भ्वा. प. से.), विह् (भ्वा. प. अ.), इतस्ततः चर् (भ्वा. प. से.), परिक्रम् (भ्वा. प. से; भ्वा. आ. अ.)।

टहलनी, सं. स्त्री., दे. 'नौकरानी'।

टहलाना, क्रि. स., व. 'टहलना' के प्रे. रूप।

टहलुआ-वा, टहलू, } स. पुं., दे. 'नौकर'।

टहलुई, सं. स्त्री., दे. 'नौकरानी'।

टाँक[1], सं. स्त्री. (सं. टंकः) चतुर्माषकात्मकः तोलभेदः २. अर्धगणना, मूल्यनिरूपणम्।

टाँक[2], सं. स्त्री. (हिं. टाँकना) लेखः, लिखनं, लिपिः (स्त्री.) २. दे. 'निब'।

टाँकना, क्रि. स. (सं. टंकनं) टँक् (भ्वा. प. से; चु.), कीलादिभिः संधा (जु. उ. अ.)-संयुज् (रु. उ. अ.) २. सिव् (दि. प. से.), वे (भ्वा. उ. अ.) ३. पादुकाः संधा ४. संश्लिष् (प्रे.) संयुज् ५. पंजिकादिषु लिख् (तु. प. से.) ६. शिलादीनि दंतुरयति (ना. धा.)।

टाँका, सं. पुं. (हिं. टाँकना) संधायक-संयोजक,-कीलः-शंकुः २. सी(से)वन,-अंशः-भागः ३. सी(से)वनं, स्यूतिः (स्त्री.) ४. पट-वस्त्र,-खंडः ५. टंकन, संधायक,-धातुः ६. व्रणसेवनम्।

टाँकी, सं. स्त्री. (सं. टंकः) तक्षणी, व्रश्चनः २. खर्वूजादिषु कृतं छिद्रं ३. दे. 'टाँका'।

टांग, सं. स्त्री. (सं. टंगा) टंकः-कं-का, जंघा, प्रसृता, पादः।
—अड़ाना, मु., परकार्याणि चंच् (तु. प. से; चु. आ. से.)-निरूप् (चु.)।
—तले से निकलना, मु., स्वपराजयं स्वीकृ।
—पसार कर सोना, मु., निःशंकं-निर्भयं स्वप् (अ. प. अ.)-शे (अ. आ. से.) २. सानन्दं जीवनं या (प्रे.)।

टाँगना, क्रि. स., दे, 'लटकाना'।

टांगा, सं. पुं. (हिं. टँगना) अश्ववाहनभेदः।

टांगी, सं. स्त्री., दे. 'कुल्हाड़ी'।

टाँच, सं. स्त्री. (हिं. टाँकी) कार्यबाधक,-उक्तिः (स्त्री.)-कथनम्।

टाँचना, क्रि. स., दे. 'टाँकना'।

टाँड, सं. स्त्री. [सं. स्थाणुः (पुं.) >] मंचः २. दे. 'परछत्ती'।

टाँयटाँय, सं. स्त्री. (अनु.) कर्कश कटु,-शब्दः-ध्वनिः (पुं.) २. प्रलापः, प्र-,जल्पः।
—फिस, मु., निष्फलः आडंबरः, व्यर्थः प्रयासः।

टाइप, सं. पुं. (अं.) मुद्राक्षरं २. टंकणयन्त्रम्।

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

टाइफ़स बुख़ार, सं. पुं. (अं+अ.) मोहज्वरः, *यूकाज्वरः ।

टाट, सं. पुं. (सं. तंतुः >) शाण,-पटः-वस्त्रं, शाणं, वराशिः-सिः (पुं.) ।

टाप, सं. स्त्री. (अनु.) अश्व,-खुरः-क्षुरः-शफः-शफम् २. अश्वपादशब्दः ।

टापना, क्रि. अ. (हिं. टाप) खुरेण अभिहन् (अ. प. अ.)-विलिख् (तु. प. से.) २. अधीर-व्यग्र (वि.) भू ३. व्यर्थं परिभ्रम् (भ्वा. प. से.) ४. दे. 'कूदना' ।

टापू, सं. पुं., दे. 'द्वीप' ।

टारना, क्रि. स., दे. 'टालना' ।

टारपीडो, सं. पुं. (अं.) अन्तर्जलाग्निनालिका, अस्त्रभेदः, *तारपीडुः ।

टार्च, सं. स्त्री. (अं.) वियुज्जिह्विनी ।

टाल[1], सं. स्त्री. (सं. अट्टालः >) चयः, राशिः (पुं.), उत्किरः, चितिः (स्त्री.) २. (काष्ठादीनां) बृहद् ,-आपणः-विपणिः (स्त्री.) ।

टाल[2], सं. स्त्री. (हिं. टालना) अप-व्यप,-देशः, छलेन परिहरणं, निह्नवः ।

—टूल, —मटा(टू, टो)ल, } सं. स्त्री., अप-नि,-ह्नवः, अप-व्यप,-देशः, विलंबः, व्याक्षेपः ।

—करना, क्रि. अ., अतिपत् (प्रे.), विलंब् (तु. प. अ.) व्याक्षिप् (तु. प. अ.) ।

टालना, क्रि. स. (हिं. टलना) वक्रोक्तथा-शाठ्येन परिहृ (भ्वा. प. अ.), अप-व्यप् ,-दिश् (तु. प. अ.), अप-नि-ह्नु (अ. आ. अ.) २. ब. 'टलना' (१-६) के प्रे. रूप ।

टायर, सं. पुं. (अं.) (चक्र—) वलयः-यम् ।

टिंचर, सं. पुं. (अं. टिंकचर) कषायः, निर्यासः, फांटः ।

टिंडा, सं. पुं. (सं. टिंडिशः) रोमशफलः, तिंदिशः, डिंडिशः ।

टिकट, सं. पुं. (अं.) अनुज्ञा-निर्देश-प्रवेश,-पत्रकम् ।

टिकटिकी[1], सं. स्त्री., दे. 'टकटकी' ।

टिकटिकी[2], सं. स्त्री., दे. 'टिकठी' ।

टिकठी, सं. स्त्री. (हिं. तीन+काठ) त्रिकाष्ठी, २. त्रिपादी ।

टिकना, क्रि. अ. (सं. स्थित+क >) वस्-स्था (भ्वा. प. अ.), वृत् (भ्वा. आ. से.) २. विरम् (भ्वा. प. अ.), अवस्था (भ्वा. आ. अ.) ।

टिकली, सं. स्त्री. (हिं. टीका) धातुतारा, चक्रकम् ।

टिकस, सं. पुं. (अं. टैक्स) करः, राजस्वं, शुल्कः-कं, बलिः (पुं.) ।

टिकस, सं. पुं., दे. 'टिकट' ।

टिकाऊ, वि. (हिं. टिकना) चिर-, स्थायिन् , दृढ, ध्रुव, स्थिर, अक्षय ।

टिकाना, क्रि. स., ब. टिकना' के प्रे. रूप ।

टिकाव, सं. पुं. (हिं. टिकना) स्थिरता, चिरस्थायिता २. स्थितिः (स्त्री.), विरामः ३. दे. 'पड़ाव' ।

टिकिया, सं. स्त्री. (सं. वटिका) चक्रिका, वटी, २. अपूपः, पूपः, पिष्टकः ।

टिकुली, सं. स्त्री., दे. 'टिकली' ।

टिकैत, सं. पुं. (हिं. टीका) दे. 'युवराज' ।

टिक्कड़, सं. पुं. (हिं. टिकिया) स्थूल-बृहत् ,-पूपः ।

टिक्का, सं. पुं. (देश.) दे. 'टीका' ।

टिक्की, सं. स्त्री., दे. 'टिकिया' ।

टिघलना, क्रि. अ., दे. 'पिघलना' ।

टिचन, वि. (अं. अटेन्शन) सज्ज, सन्नद्ध, उद्युक्त २. सिद्ध, उपकल्प्त, आयोजित ।

टिटकारना, क्रि. स. (अनु.) (अश्वादीन्) सटिकटिकशब्दं प्रोत्सह्-प्रणुद् (प्रे.) ।

टिटिह,-हा,-हरा, सं. पुं. (सं. टिट्टिभः) टिट्टिभकः, टीटिभकः, टिटिभः ।

टिटिहरी, सं. स्त्री. (हिं. टिटिहरा) टिटि(ट्टि)भी, टिट्टिभकी ।

टिड्डा, सं. पुं. (सं. टिट्टिभः >) शर(ल)भः, पतंगः ।

टिड्डी, सं. स्त्री. (हिं. टिड्डा) शिरिः (पुं.), शर(ल)भः ।

—दल, मु., विपुलवृंदं, असंख्यसमूहः ।

टिपटिप, सं. स्त्री. (अनु.) विंदुपातध्वनिः (पुं.), टिपटिपशब्दः ।

टिप्पणी-नी, सं. स्त्री. (सं.) टीका, भाष्यं, वृत्तिः (स्त्री.), व्याख्या ।

टिप्पस, सं. स्त्री. (देश.) उपायः, युक्तिः (स्त्री.) ।

टिब्बा, सं. पुं., दे. 'टीला' ।

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

टिमटिमाना, क्रि. अ. (सं. तिम्=ठंडा होना>) स्फुर् (तु. प. से.) तरलं-मंदं-सकंपं दीप् (दि. आ. से.) द्युत्-प्रकाश् (भ्वा. आ. से.) प्रभा (अ. प. अ.) २. आसन्नमृत्यु (वि.) वृत् (भ्वा. आ. से.)।

टिमटिमाहट, सं. स्त्री. (हिं. टिमटिमाना) तरल,-प्रभा,-ज्योतिस् (न.), स्फुरणं-रितम्।

टीका[1], सं. पुं. (सं. तिलकः-कं) चित्रकं, विशेषकः-कं, पुण्ड्रः-ड्रकः, तमालपत्रं २. तिलकं, औद्वाहिकरीतिविशेषः ३. अन्तः,-स्रावणं-प्रवेशनं ४. (रोगनिवारणाय) रोगद्रव्यनिवेशनं ५. गव्यद्रव्यसंक्रामणं ६. प्रधानः, मुख्यः, ७. युवराजः ८. राजत्व,-चिह्नं-लक्षणं ९. राज्य-,अभिषेकः १०. विंदुः (पुं.), लाञ्छनं, चिह्नम् ११. ललाटिका, मस्तकभूषणभेदः।

—करना, क्रि. स., (रोगनिवारणार्थं) रोगद्रव्यं निविश्-संक्रम् (प्रे.) २. गव्यद्रव्यं निविश्-संक्रम् (प्रे.)।

—करनेवाला, सं. पुं., गव्य-रोग,-द्रव्य-निवेशकः।

—भेजना, क्रि. स., औद्वाहिकोपहारान् प्रेष् (प्रे.)।

—लगाना, क्रि. स., तिलकं कृ अथवा विधा (जु. उ. अ.)।

टीका[2], सं. स्त्री. (सं.) व्याख्या, वृत्तिः (स्त्री.), भाष्यं, टिप्पणी-नी।

—कार, सं. पुं. (सं.) टीका-भाष्य-व्याख्या-वृत्तिः,-कारः-कृत् (पुं.)।

टीन, सं. पुं. (अं. टिन) रंगं, वंगं, कस्तीरं, त्रपु (न.) रंगलिप्तं लौहतनुफलकम्।

टीप, सं. स्त्री. (हिं. टीपना), (हस्तेन) आपीडनं २. शनैः प्रहरणं ३. इष्टकासंधिषु सुधापूर्तिरेखाः ४. (समय-) लेखः-पत्रं ५. जन्म,-पत्रं-पत्रिका।

—करना, क्रि. स., इष्टकादिसंधिषु सुधां पूर् (चु.)।

—टाप, सं. स्त्री., आडंबरः वैभवं २. संस्कारः, परिष्कारः, भूषा, अलंकरणम्।

—टाप करना, क्रि. स., अलं-परिष्,-कृ, मंड् (चु.)।

टीपना, क्रि. स. (सं. टेपनं = फेंकना) आपीड् (चु.), संकोच् (भ्वा. प. से.) २. लिख् (तु. प. से.) ३. शनैः प्रह् (भ्वा. प. अ.) ४. उच्चैः गै (भ्वा. प. अ.)।

टीम, सं. स्त्री. (अं.) क्रीडकसंघः २. गणः, वर्गः।

टीमटाम, सं. स्त्री. (देश.) दे. 'टीपटाप'।

टीरा, सं. पुं. (सं. टेरः) टेरकः, केकरः, केदरः, टगरः, बलिरः।

टीला, सं. पुं. (सं. अष्टीला>) उन्नतभूभागः २. क्षुद्रपर्वतः ३. मृत्तिकाचयः, वल्मीकः-कम्।

टीस, सं. स्त्री. (अनु.) विध्यद्-स्फुरद्,-व्यथा-वेदना-यातना।

टीसना, क्रि. अ., (हिं. टीस) मुहुर्मुहुः व्यथ (भ्वा. आ. से.), सस्पंदं पीड् (कर्म.)।

टुंच, वि., दे. 'टुच्चा'।

टुंड, सं. पुं. (सं. तुंडं>) छिन्नो हस्तः २. छिन्न-शाखः तरुः, स्थाणु (पुं. न.), ध्रुवः, शंकुः (पुं.)।

टुंडा, वि. (हिं. टुंड) अहस्त, छिन्नहस्त २. शाखाहीन ३. एकशृंग।

टुंडी, सं. स्त्री. [सं. तुंडिः (स्त्री.)], नाभिः (स्त्री.)।

टुक, क्रि. वि. (सं. स्तोकं) क्षणं, कंचित्कालम्। वि., किंचित्, अल्प, क्षुद्र।

टुकड़ा, सं. पुं. (हिं. टुक) खंडः-डं, शकलः-लं, लवः, वि-,भागः, अंशः,वि-, दलं २. ग्रासः, कवलः, पिंडः।

टुकड़े करना, क्रि. स., भंज् (रु. प. अ.), खंड् (चु.), शकली कृ २. विच्छिद्-विभिद् (रु. प. अ.), विभज् (भ्वा. उ. अ.)।

टुकड़े-टुकड़े करना, मु., चूर्ण् (चु.), खंडशः भंज्, मृद् (क्र्. प. से.)।

टुकड़े माँगना, मु., भिक्ष् (भ्वा. आ. से.), भिक्षां याच् (भ्वा. आ. से.)।

टुकड़ी, सं. स्त्री. (हिं. टुकड़ा) दे. 'टुकड़ा'(१) २. समूहः, गणः ३. सैन्यदलं, गुल्मः-मम्।

टुच्चा, वि. (सं. तुच्छ) क्षुद्र, नीच, हीनजाति।

टुटपुँजिया, वि. (हिं. टूटी+पूंजी) परिक्षीण, निर्धन, अल्प,-धन-मूल, दरिद्र।

टूँडी, सं. स्त्री., दे. 'टुंडी'।

टूक-का, सं. पुं., दे. 'टुकड़ा'।

टूटना, क्रि. अ. (सं. त्रुट्) दृ-भंज्-भिद् (कर्म.), त्रुट् (दि. तथा तु. प. से.), दल् (भ्वा. प. से.), स्फुट् (तु. प. से.)

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

२. विरम् (भ्वा. प. अ.), विच्छिद् (कर्म.), निवृत् (भ्वा. आ. से.) ३. वियुज् (कर्म.), पृथक् भू ४. निर्बली-भू ५. दरिद्र (वि.) जन् (दि. आ. से.) ६. आक्रम् (भ्वा. प. से.), अभिद्रु (भ्वा. प. अ.)। सं. पुं., भंजनं, भंगः; विरामः, विच्छेदः, निवृत्तिः (स्त्री.)।

टूटनेवाला, सं. पुं., भिदुर, भंगुर, सुभंग।

टूटा, वि., भग्न, दीर्ण, त्रुटित, स्फुटित; विच्छिन्न, निवृत्त इ.।

—फूटा, वि., शकली-खंडशः,-कृत, खंडित, विदीर्ण।

टूर्नामेंट, सं. स्त्री. (अं.) पुरस्कारान्विता क्रीडा-खेला, क्रीडाप्रतियोगिता।

टूल, सं. पुं. (अं.) उपकरणं, साधनम्।

टेंट-टी, सं. स्त्री. (देश.) शाटीपुटः-टं,शाटिका-व्यावृत्तिः (स्त्री.) २. दे. 'करील' (वृक्ष तथा फल)।

टेंटुआ, सं. पुं.(देश.)श्वासनालिका, कंठः, गलः।

टेंटें, सं. स्त्री. (अनु.) शुकशब्दः, कीररावः, टेंटें इति ध्वनिः (पुं.) २. प्रलापः, व्यर्थ-वचनम्।

—करना, निर्विवेकं भाष् (भ्वा. आ. से.), जल्प् (भ्वा. प. से.)।

टेंप्रेचर, सं. पुं. (अं.) तापः, ऊष्मन् (पुं.)।

टेक, सं. स्त्री. (हिं. टिकना) स्थूणा, उपस्तंभः, उत्तंभः, अवष्टंभः, उपघ्नः २. आश्रयः, अवलंबः ३. वेदी ४. आग्रहः, अभिनिवेशः ५. क्षुद्रपर्वतः ६. प्रतिज्ञा ७. स्थायिन् (संगीत) ८. अभ्यासः, नित्यव्यवहारः।

टेकन, सं. पुं., दे. 'टेक' १. २.।

टेकना, क्रि. स. (हिं. टेक) अव-आ,-लंब् (भ्वा. आ. से.), अवष्टंभ् (क्र. प. से.), धृ (भ्वा. प. अ; चु.)।

माथा—, क्रि. स., प्रणम् (भ्वा. प. अ.), पादयोः पत् (भ्वा. प. से.), वंद् (भ्वा. आ. से.)।

टेकी, वि. (हिं. टेक) सत्यसन्ध, दृढप्रतिज्ञ २. आग्रहिन्, अभिनिवेशिन्।

टेटेनस, सं. पुं. (अं.) धनुर्वातः, प्रतानः (भयंकररोगः)।

टेढ़ा, वि. (सं. तिरस् >) अराल, कुटिल, जिह्म, वक्र, आ-,न(ना)मित, आभुग्न, न्युब्ज, आकुञ्चित, विषम, तिर्यंच् २. कठिन, दुष्कर ३. उद्धत, अशिष्ट, दुःशील।

—करना, क्रि. स., आवृज् (चु.), वक्री-कुटिली-कृ, अव-आ-,नम् [प्रे. न(ना)मयति], आ-वि-,भुज् (तु. प. से)।

—मेढा, वि., वक्र, कदाकार, कुटिल।

—होना, मु., क्रुद्ध-रुष्ट (वि.) भू।

टेढ़ापन, सं. पुं. (हिं. टेढ़ा) कुटिलता, जिह्मता, वक्रता, अरालता इ.।

टेढ़ी, वि. स्त्री. (हि. टेढ़ा) वक्रा, कुटिला, जिह्मा इ.।

—खीर, मु., दुष्करं कार्यम्।

—चितवन, मु., कटाक्षः, साचिविलोकितं, अपांगदृष्टिः (स्त्री.)।

टेढ़े, क्रि. वि. (हिं. टेढा) तिरः, तिर्यक्, वक्रं साचि (सब अव्य.)।

टेना, क्रि. स. (देश.), दे. 'सान देना' २. दे. 'मूँछ पर ताव देना'।

टेनिस, सं. सं. (अं.) कंदुकक्रीडाभेदः।

टेब(ब्लु)ल, सं. पुं. (अं.) पादफलकः-कम्।

—क्लाथ, सं. पुं. (अं.) पादफलक,-वसनं,-आच्छादनम्।

टेर, सं. स्त्री. (सं. तारः) तारध्वनिः, उच्चस्वरः २. आह्वानं, संबोधनं, आह्वानशब्दः।

टेरना, क्रि. स. (हिं. टेर) उच्चैः गै (भ्वा. प. अ.) २. आकृ (प्रे.), आहे (भ्वा. प. अ.)।

टेराकोटा, सं. पुं. (अं.) पक्वमृन्मूर्तिः (स्त्री.), तप्तमृत्प्रतिमा २. पक्व-तप्त,-मृत्तिका-मृद् (स्त्री.)।

टेलीग्राम, सं. पुं. (अं.) तड़ित्-विद्युत्,-संदेशः।

टेलीपैथी, सं. स्त्री. (अं.) अन्यचित्त-ज्ञानम्, भाव-विचार,-संक्रान्तिः (स्त्री.)।

टेलीप्रिंटर, सं. पुं. (अं.) * दूरमुद्रकम्।

टेलीफ़ोटोग्राफ़ी, सं. स्त्री. (अं.) *दूरच्छाया-चित्रणम्।

टेलीफोन, पुं. पुं. (अं.) दूर,-भाषं-ध्वनम्।

टेलीविज़न, सं. पुं. (अं.) *दूरदर्शनम्।

टेलीस्कोप, सं. पुं. (अं.) दे. 'दूरबीन'।

टेव, सं. स्त्री. (हिं. टेक) दे. 'आदत'।

टेवा, सं. पुं. (सं. टिप्पनं >) जन्मपत्रिका।

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

टेसू, सं. पुं. (हिं. केसू) किंशुकः, पलाशः, रक्तपुष्पकः, यज्ञियः २. किंशुककुसुमम् ।

टेस्टट्यूब, सं. स्त्री. (अं.) परीक्षणनालिका ।

टोंटी, सं. स्त्री. (सं. तुंडं >) नाली, नालिका ।

टोक, सं. स्त्री. (हिं. 'रोक' का अनु.) अंतराय-उपरोध-विघ्न,-वचनं-वाक्यं २. कुदृष्टिः (स्त्री.) ३. कुदृष्टिप्रभावः ।

—टाक या टोका टाकी, सं. स्त्री., निषेध-पृच्छा-व्याघात,-वचनानि (न. बहु.) ।

टोकना, क्रि. स. (हिं. टोक), नि-विनि,-वृ (प्रे.), अव-नि-प्रति-, रुध् (क्र. प. अ.), (प्रश्नैः) बाध् (भ्वा. आ. से.),-निषिध् (भ्वा. प. से.) ।

टोकनेवाला, सं. पुं., विघ्नकरः, निवारकः, प्रतिबंधकः ।

टोकरा, सं. पुं. (?) कंडोलः, करंडः ।

टोकरी, सं. स्त्री. (हिं. टोकरा) करंडी, कंडोलकः ।

टोटका, सं. पुं. (सं. त्रोटकः >) गारुडं, मंत्रः २. रक्षाकरंडः ।

टोटल, सं. पुं. (अं.) योगः, पिंडः, संकलः, परिसंख्या ।

टोटा, सं. पुं. (हिं. टूटना) हानिः-क्षतिः (स्त्री.) २. अभावः, न्यूनता ३. खंडः-डं, शकल-लम् ।

टोडी, सं. स्त्री. (सं. त्रोटकी) रागिणीभेदः ।

टोडी, सं. पुं. (अं.) श्ववृत्तिः, चाटुपटुः, प्रजा-स्वदेश,-शत्रुः-द्रोहिन् ।

टोना, सं. पुं. (सं. तंत्र) अभिचार,-मंत्रः, अभिचारः; कुहकं, वशक्रिया, मोहः, योगः २. गीतिभेदः ।

टोनेबाज़, सं. पुं., कुहकः, अभिचारिन्, कौसृतिकः ।

टोप, सं. पुं. (हिं. तोपना = ढाँकना) *टोपं, आंग्लीय-गुरुंड,-शिरस्कं २. शिरस्त्राणं ३. कोशः-षः, वेष्टनम् ।

टोपी, सं. स्त्री. (हिं. टोप) । शीर्षण्यं, शिरस्कं. *टोपी ।

टोला, सं. पुं. (सं. प्रतोलिका) नगर-पुर,-विभागः २. वर्गः, गणः ।

टोली, सं. स्त्री. (हिं. टोला) गणः, संघः, वर्गः, समूहः ।

टोह, सं. स्त्री., दे. 'खोज' ।

टोहना, क्रि. स., दे. 'खोजना' तथा 'टटोलना' ।

ट्रंक, सं. पुं. (अं.) लौह-आयस,-पिटक-पेटिका-समुद्गकः ।

ट्राम, सं. स्त्री. (अं.) विद्युच्छकटिका, ट्रामाख्यं यानम् ।

ट्रेडमार्क, सं. पुं. (अं.) पण्यमुद्रा ।

ट्रेन, सं. स्त्री. (अं.) वाष्पशकटी ।

ठ

ठ, देवनागरीवर्णमालाया द्वादशो व्यंजनवर्णः, ठकारः ।

ठंठ, वि., दे. 'ठूँठ' ।

ठंड-ढ, सं. स्त्री. (हिं. ठंढा) शीतं, शीतता, शैत्यं, हिमं, हिमता, शीतलता ।

ठंड(ढ)क, सं. स्त्री. (हिं. ठंढा) दे. 'ठंड' २. तृप्तिः (स्त्री.), संतोषः ३. उपद्रव-रोग,-शांतिः (स्त्री.) ।

ठंढा, वि. (सं. स्तब्ध) शीत, शीतल, उष्णता-रहित, आर्द्र, हिम, शिशिर २. धीर, प्रशांत ३. तृप्त, संतुष्ट ४. मृत, दिवंगत ५. निर्वाण, निर्वापित ।

—करना, क्रि. स., आर्द्री-शीती-कृ, आर्द्रयति (ना. धा.), तापं हृ (भ्वा. प. अ.) । मु., तुष्-प्रसद्-प्रशम् (प्रे.), सांत्व् (चु.) २. निर्वा (प्रे. निर्वापयति) ।

—होना, क्रि. अ., शीती-शीतली-भू, शीतलायते (ना. धा.) । मु., दे. 'मरना' ।

ठंढी सांस, सं. स्त्री., दीर्घ,-श्वासः-निश्वासः, नि(निः)श्वासः, उच्छ्वासः ।

—पड़ना, मु., उप-प्र-शम् (दि. प. से.), ह्रस् (भ्वा. प. से.), क्षि (कर्म.) ।

कलेजा—होना, मु., वैर,-निर्यातनं-साधनं-शुद्धिः (स्त्री.) जन् (दि. आ. से.) २. प्रसद् (भ्वा. प. अ.) ।

ठंढा (डा) ई, सं. स्त्री. (हिं. ठंढा) शीतपेयं, तापहरमानं २. संगापेयम् ।

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

ठंढे–ठंडे, अव्य० (हिं. ठंढा) प्रातः सायं वा, आतपाभावे २. ससुखम् , सानन्दम् ३. शान्तं, समौनम् (दोनों अव्य०)।

ठक, सं. स्त्री. (अनु.) अभिघात-पात-प्रहार,-शब्दः, ठक् इतिध्वनिः (पुं.)।

—ठक, सं. स्त्री. (अनु.) ठकठकायितं, ठक-ठकध्वनिः २. कलहः, कलिः। वि., स्तब्ध, चकित, निश्चेष्ट।

ठकठकाना, क्रि. स. (अनु.) ठकठकायते (ना. धा.), मंदं अभि आ-हन् (अ. प. अ.) अथवा प्रह (भ्वा. प. अ.) २. लघु प्रह या तड् (चु.)।

ठकठकिया, वि. (अनु. ठकठक) विवादिन् , कलह,-कलि-प्रिय।

ठकुरसुहाती, सं. स्त्री. (हिं. ठाकुर + सुहाना) दे. 'खुशामद'।

ठाकुराइ(य)न, सं. स्त्री. (हिं. ठाकुर) ठक्कुरी, ठक्कुरभार्या (२) नापिती, क्षुरिणी २. स्वामिनी, ईश्वरी।

ठकुराई, सं. स्त्री. (हिं. ठाकुर) प्रभुत्वं, आधिपत्यं, स्वामित्वं २. अधिकारः, शासनं ३. महत्त्वम्

ठकुरायत, सं. स्त्री. (हिं. ठाकुर) दे. 'ठकुराई'।

ठग, सं. पुं. (सं. स्थगः) कितवः, दांभिकः, धूर्तः, प्रतारकः, वंचकः।

—बाज़ी, सं. स्त्री., कैतवं, कपटं, दंभः, प्रतारणं, स्थगत्वं अति-अभि,-संधानं, वंचनम्।

ठगना, क्रि. स. (सं. स्थगनं) अति-अभि,-संधा (जु. उ. अ.), प्रतृ-मुह् (प्रे.), वंच्-शठ् (चु), विप्रलभ् (भ्वा. आ. अ.)। सं. पुं., दे. 'ठगवाज़ी'।

ठग(गि)नी, सं. स्त्री. (हिं. ठग) वंचिका, प्रतारिका, दांभिकी, कपटिनी।

ठगी, सं. स्त्री., दे. 'ठगवाज़ी'।

ठगाना, क्रि. प्रे., व. 'ठगना' के प्रे. रूप।

ठट, सं. पुं., दे. 'ठठ'।

ठट(ठ)री, सं. स्त्री. (हिं. ठाट) शवयानं, खाटः-टी २. कंकालः, अस्थिपंजरः ३. घास-पलाल,-जालं ४. कृशमनुष्यः।

ठट्ठा, सं. पुं. (पुं. अट्टहासः या अनु.) हास्यं, परि(री)हासः, केलि-क्रिया, मह सवं, नर्म (न.), नर्म-विनोद-परिहास,-आलापः-उक्तिः (स्त्री.) वचनं २. उपहासः।

—करना, क्रि. स., परिहस् (भ्वा. प. से.), विनोदवचनं उदीर् (प्रे.) २. अव-उप-वि,-हस्, उपहासास्पदी कृ, अवज्ञा (क्र. उ. अ.)।

ठट्ठेबाज़, सं. पुं., (हिं. + फ़ा.) विनोदशीलः, हास्यप्रियः, वैहासिकः, भंडः।

ठट्ठेबाज़ी, सं. स्त्री.. विनोद,-कारिता-शीलता, वैहासिकता।

ठठ, सं. पुं. (सं. स्थित >) समूहः, समुदायः, जन-,संमर्दः-ओघः।

ठठेरा-री, सं. पुं. (अनु. ठन ठन) कांस्य-ताम्र,-कारः।

ठठेरिन, सं. स्त्री. (हिं. ठठेरा) कांस्य-ताम्र,-कारी।

ठठोल, सं. पुं. (हिं. ठट्ठा) दे. 'ठट्ठेबाज़'।

ठठोली, सं. स्त्री. (हिं. ठठोल) दे. 'ठट्ठेबाजी'।

ठनक, सं. स्त्री. (हिं. ठनकना) ठणिति, ठणत्कारः, शिंजा, कणनं, झणत्कारः, मृदंनादीनां ध्वनिः (पुं.) २. दे. 'टीस'।

ठनकना, क्रि. अ. (अनु. ठन ठन) क्वण् (भ्वा. प. से.), शिंज् (अ. आ. से.)। ठणठणायते (ना. धा.), ठणिति कृ।

ठनकाना, क्रि. स., व. 'ठनकना' के प्रे. रूप।

ठनठन, सं. स्त्री. (अनु.) दे. 'ठनक'।

—गोपाल, सं. पुं., दरिद्रः, निर्धनः २. निस्सारं वस्तु।

ठनना, क्रि. अ., (हि. ठानना) निर्णी-निश्चि-अध्यवसो (कर्म.)।

ठनाका, सं. पुं., दे. 'ठनक'।

ठनाठन, क्रि. वि. (अनु. ठनठन) सठणत्कारं, सझणत्कारम्।

ठप्पा, सं. पुं. (सं. स्थापनं) मुद्रा, मुद्रायंत्रं, २. आकर-संस्कार,-साधनं ३. अंकः, चिह्नं, मुद्रा, न्यासः।

—लगाना, क्रि. स., मुद्रयति-चिह्नयति (ना. धा.), अंक् (चु०), लांछ् (भ्वा. प. से.)।

ठरना, क्रि. अ., दे. 'ठिठुरना'।

ठर्रा, सं. पुं. (देश.) निकृष्टसुरा २. स्थूलमूत्रं ३. अर्द्धपक्वेष्टका।

ठस, वि. (सं. स्थास्नु >) घन, दृढसंधि, सुदृढ, कठिन, स्थूल, सुसंहत २. दे. 'गफ' ३. गुरु,

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

भारवत् ४. अलस, मंथर ५. (सिक्का.) कूट-कपट-कृत्रिम-(समासारंभ में) ६. धनाढ्य ७. कृपण ८. अत्याग्रहिन् ९. ठसिति शब्दः, वस्तुभंगध्वनिः (पुं.) ।

ठसक, सं. स्त्री. (हिं. ठस) हावः, भावः, विभ्रमः २. दर्पः, गर्वः ।

ठसका, सं. पुं. (अनु. ठस) शुष्क-अकफ,-कासः-क्षवथुः २. आघातः, संमर्दः ३. पाशः, वागुरा ।

ठसनी, सं. स्त्री. (हिं. ठस) अयोघनः, मुद्गरः ।

ठसाठस, वि. (हिं. ठस) परि-सं-पूर्ण, आ-सं-कीर्ण, आकुल, संकुल, समाकुल ।

ठस्सा, सं. पुं. (देश.) अहंकारः, दर्पः २. हाव-भावाः ३. आडंबरः ।

ठहरना, क्रि. अ. (सं. स्थिर) स्था (भ्वा. प. अ.), अवस्था (भ्वा. आ. अ.), निश्चल-रुद्धगति-स्थिर-स्तब्ध (वि.) भू २. वस् (भ्वा. प. अ.) ३. निविश् (तु. प. अ.), प्रयाणभंगं कृ ४. विश्रम् (दि. प. से.), विरम् (भ्वा. प. अ.) ५. निश्चि-निर्णी (कर्म.) ६. प्रतीक्ष् (भ्वा. आ. से.) । सं. पुं अव-,स्थितिः (स्त्री.)-स्थानं, निश्चलता, स्तब्धता, वासः; विश्रामः इ. ।

ठहरनेवाला, सं. पुं., अव-,स्थातृ (पुं.) ।

ठहराना, क्रि, स., ब. 'ठहरना' के प्रे. रूप ।

ठहराव, सं. पुं. (हिं. ठहरना) अव-,स्थितिः (स्त्री.), निवेशः २. निर्धारणं, निश्चयः ।

ठहरौनी, सं. स्त्री. (हिं. ठहराना) विवाहे युतकादिनिश्चयः ।

ठहाका, सं. पुं. (अनु.) सशब्द,-स्फोटनं-भंगः २. अति-प्र-अट्ट-उच्चैर् ,-हासः ।

ठाँव, सं. पुं. (सं. स्थानं) स्थलं, प्रदेशः २. निवासः, वसतिः (स्त्री.) ।

ठाँसना, क्रि. स., दे. 'ठोंसना' ।

ठाकुर, सं. पुं. (सं. ठक्कुरः) परमेश्वरः, जगदीशः २. पूज्यः, मान्यः (मानवः) ३. नायकः, अधिष्ठातृ (पुं.) ४. ग्रामेशः, भूस्वामिन् ५. क्षत्रियोपाधिः (पुं.) ६. प्रभुः, स्वामिन् ७. नापितः ८. देवः, देवता ९. देवप्रतिमा ।

—द्वारा, सं. पुं.) देव,-मंदिरं-स्थानं-आलयः,
—वाड़ी, सं. स्त्री.) मंदिरम् ।

ठाकुरी, सं. स्त्री., दे. 'ठकुराई' ।

ठाट, सं. पुं. (सं. स्थातृ) तृण,-पटलं-छदिः (स्त्री.) २. दे. 'ढाँचा' ३. अलंक्रिया, वेशः ४. आडंबरः, शोभा, वैभवं ५. सुखं, मोदः ६. रीतिः (स्त्री.), शैली ७. आयोजनं समारंभः ८. सामग्री, परिच्छदः ९. युक्तिः (स्त्री.), उपायः १०. आधिक्यं, प्राचुर्य ११. समूहः, वृंदम् ।

—बाट, सं. पुं., आडंबरः, श्रीः (स्त्री.), शोभा, ऐश्वर्यं, वैभवं, प्रतापः ।

—बदलना, मु., आकारं-भावं परिवृत् (प्रे.) ।

ठाठ, सं. पुं., दे. 'ठाट' ।

ठाढ़ा, वि. (सं. स्थातृ) उच्छ्रित, उन्नत, ऊर्ध्व, दंडवत् उत्थित, उत्तान २. जात, उत्पन्न ३. समस्त, समग्र, अपिष्ट ।

ठानना, क्रि. स. (सं. अनुष्ठानं) अध्यव-व्यव,-सो (दि. प. अ., अध्यवस्यति), निश्चि (स्वा. उ. अ.), संकल्प् (प्रे.), निर्णी (भ्वा. प. अ.) २. साग्रहं प्रारभ् (भ्वा. आ. अ.), अध्यवसायेन अनुस्था (भ्वा. प. अ.) ।

ठार, सं. पुं. (सं.) हिमं, तुहिनं, तुषारः २. अतिशीतं, शैत्यातिशयः ।

ठाला, सं. पुं. (हिं. निठल्ला) कार्य-जीविका-व्यवसाय,-अभावः ।

ठाली, वि., दे. 'निठल्ला' ।

ठिंगना, वि. (हिं. हेठ+अंग) खर्व, ह्रस्व, वामन, ह्रस्वकाय ।

ठिकाना, सं. पुं. (हिं. टिकान) स्थलं-ली, स्थानं, प्र-,देशः, भूः-भूमिः (स्त्री.) २. आ-नि,-वासः, आ-नि,-लयः ३. आश्रय-निर्वाह,-स्थानं ४. याथार्थ्यं, प्रामाण्यं ५. आयोजनं, संविधा, प्रबन्धः ६. अंतः, सीमा ७. नामधाम-परिचयः ८. निर्दिष्ट-गंतव्य,-स्थानम् ।

ठिकाने लगना, मु., हन्-हिंस् (कर्म.) २. समाप् (कर्म.) ।

ठिकाने लगाना, मु., हन् (अ. उ. अ.), हिंस् (रु. प. से.) २. निर्दिष्टस्थानं नी (भ्वा. प. अ.) ३. सम्यक् उपयुज् (रु. उ. अ.) ४. कार्यं समाप् (स्वा. उ. अ.) ५. सफली कृ ।

ठिठकाना, क्रि. अ. (सं. स्थित+करणं>) अकस्मात्-अकांडे विरम् (भ्वा. प. अ.)-रुध् (कर्म.) स्तब्ध-निश्चेष्ट-रुद्धगति (वि.) भू ।

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

ठिठ(ठु)रना, क्रि. अ. (सं. ठारः >) शीती-जडी-भू , स्तंभ् (कर्म.) २. शीतेन कंप् (भ्वा. आ. से.)।

ठि (ठु)नक, सं. स्त्री. (अनु.) गद्गदः, फु-(फू)त्कारः।

ठि(ठु)नकना, क्रि. अ. (अनु.) सगद्गदं क्रंद् (भ्वा. प. से.)-रुद् (अ. प. से.), शिशुवत् रुद् ।

ठिरना, क्रि. अ., दे. 'ठिठरना'।

ठीक, वि. (हिं. ठिकाना) अवितथ, तथ्य, सत्य, यथार्थ २. उचित, न्याय्य, धर्म्य, समंजस ३. शुद्ध, निर्भ्रांत, निर्दोष ४. सुस्थ, अविकृत ५. यथार्ह, यथायोग्य, अनुरूप ६. नम्र, विनीत ७. अन्यूनाधिक, निर्दिष्ट ८. नियत, ९. पूर्ण, समाप्त । क्रि. वि., यथावत् , याथातथं, सम्यक् , साधु, तत्त्वतः, पूर्णतया ।

—आना, क्रि. अ., उपपद्-युज्-दिलघ् (कर्म.), सुश्लिष्ट-सुसंगत (वि.) भू २. तुल्य-अनुरूप (वि.) भू ।

—करना, क्रि. स., निर्दोषी-कृ, परि-वि-सं-शुध् (प्रे.) २. सुश्लिष्टं-सुसंगतं कृ ।

—ठाक, वि., सिद्ध, सज्ज, उपस्थित, उपक्लृप्त ।

—ठीक, क्रि. वि., दे. 'ठाक' क्रि. वि. ।

ठीकरा, सं. पुं. (हिं. टुकड़ा) घट,-शकलं-खंडं, भिन्नमृत्पात्रं, क(ख)र्परः, २. भिक्षा,-भाजनं-पात्रं ३. जीर्णपात्रम् ।

ठीकरी, सं. स्त्री. (हिं. ठीकरा) क्षुद्रघटखंडं २. तुच्छ-निरर्थक,-वस्तु (न.) ।

ठीका, सं. पुं. (हि. ठीक) अभ्युपगमः, नियमः, पणः, समयः, संविद् (स्त्री.) २. पट्टोलिका ।

—देना, क्रि. स., पणं-संविदं कृ,-प्रतिपद् (दोनों प्रे.) ।

—लेना, क्रि. स., पणं-संविदं-समयं कृ, प्रतिपद् (दि. आ. अ.), संविद् (अ. आ. से.) ।

ठीकेदार, सं. पुं. पणकर्तृ, कृतसमयः, नियम-कृत् (पुं.) ।

ठीठी, सं. स्त्री. (अनु.) हास्यध्वनिः (पुं.), अट्टहासः ।

ठीहा, सं. पुं. (सं. स्थितः >) भूनिखातकाष्ठ-खंडः-डम् २. उच्चस्थानम् ३. वेदिका-वेदिः (स्त्री.) ४. आसनम् ५. सीमा ।

ठुंठ, सं. पुं., दे. 'ठूँठ' ।

ठुकना, क्रि. अ. (अनु. ठुक ठुक) आहन्-ताड्-प्रह्न (कर्म) २. अयोघनेन-विघनेन आहन्-ताड् (कर्म.) ३. परा,-भू-जि (कर्म.)

ठुकराना, क्रि. स. (हिं. ठोकर) पादेन प्रह्न (भ्वा. प. अ.)-ताड् (चु.)-आहन् (अ. प. अ.) २. प्रत्याख्या (अ. प. अ.), अवमन् (दि. आ. अ.) धिक्कृ ।

ठुकवाना, क्रि. प्रे., ब. 'ठोकना' के. प्रे. रूप ।

ठुड्डी, सं. स्त्री., दे. 'ठोड़ी' ।

ठुनकाना, क्रि. स. (अनु.) अंगुल्या हस्तेन वा मन्दं-मन्दं आहन् (अ. प. अ.) ।

ठुन ठुन, सं. स्त्री. (अनु.) ठुणठुणत्कारः, ठुणठुणायितं, धातुपात्रक्वणितं २. शिशुक्रंदन-ध्वनिः (पुं.), ठुणठुणशब्दः ।

ठुमक, सं. स्त्री. (अनु.) खेल-विलास,,गतिः (स्त्री.) ।

—ठुमक, क्रि. वि., खेल विलास,-गत्या, सखेलं सविलासं (शिशु-चलनम्) ।

ठुमकना, क्रि. अ., (हिं, ठुमक) सखेलं-सविलासं चल् (ल्वा. प. से.) ।

ठुमका, वि. (हिं. ठुमक) वामन, खर्व, ह्रस्व ।

ठुमरी, सं. स्त्री. (देश.) गीतकं-तिका ।

ठुसकना, क्रि. अ. (अनु.) दे. 'ठिनकना' ।

ठुसना, क्रि. अ. (ठूंसना) अत्यंतं पूर् (सर्म.), २, बलात् निविश् (तु. प. अ.) ।

ठुसवाना, ठुसाना, क्रि. प्रे., ब. 'ठूसना' के. प्रे. रूप ।

ठूँग, सं. स्त्री.) (सं. तुंड) चंचुः-चूः [दोनों
ठूँगा, सं. पुं.) (स्त्री.)] २. चंचुप्रहारः ।

—मारना, क्रि. स., चंच्वा प्रह्न (भ्वा. प. अ.) । मु., न्यून तुल् (चु.) ।

ठूँठ, सं. पुं. (सं. स्थाणुः) शुष्कवृक्षः, पत्र-विटप,-हीनतरुः (पुं.) २. छिन्नो हस्तः, निकृत्तः करः ।

ठूँठा, वि. (हिं. ठूँठ) अपत्र, अशाख, शुष्क (वृक्ष) २. छिन्नहस्त, निकृत्तकर ।

ठू(ठूँ)सना, क्रि. स. (हिं. ठस) अत्यधिकं पूर् (चु.), भृशं पू (प्रे.) २. बलाद् नि-प्र-विश् (प्रे.) ३. अतिमात्रं खाद् (भ्वा. प. से.) ।

ठेंगना, वि., दे. 'ठिंगना' ।

ठेंगा, सं. पुं. (हिं. अँगूठा) अंगुष्ठः २. दंडः, यष्टिः (स्त्री.), लगुडः ३ मेढ्रम् ।

ठेका, सं. पुं., दे. 'ठीका' ।

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

ठेका,[२] सं. पुं. (हिं. टेक) अव-आ, लंबः-लबनं, अवष्टंभः, उपघ्नः २. निवेशस्थानं, विश्रामस्थलं ३. पटहवादनप्रकारभेदः ४. कौवालीनामकस्तालभेदः ५. स्खलनं ६. वाममृदंगः ७. दे. 'ठीका'।

ठेठ, वि. (दे.) विशुद्ध, मिश्रणरहित, स्वच्छ २. केवल,-मात्र (समासांत में)।

ठेलना, क्रि. स., दे. 'धकेलना'।

ठेला, सं. पु. (हिं. ठेलना) दे. 'धक्का'। २. जनौघः,जनसंमर्दः ३.हस्त,-शकटः-शकटम्।

ठेस, सं. स्त्री. (हिं, ठस), प्रहारः, आ-अभि,-घातः, ताडनं, पातः, आहतिः (स्त्री.)।

ठेसना, क्रि. स. दे. 'ठूसना'।

ठोंकना, क्रि. स. (अनु. ठक-ठक) अयोघनेन-मुद्गरेण तड् (चु.)-प्रह्व (भ्वा. प. अ.) २. वलेन-ताडनेन प्रविश् (प्रे.) ३. अभि-आ-हन् (अ. प. अ.), तड् (चु.), प्रह्व। ४. अभियुज् (रु. आ. अ.) राजकुले निविद् (प्रे,) ५.हस्तेन लघुप्रह्व-आहन् , करेण स्पृश् परामृश् (तु. प. अ.)।

ठोंक बजाकर, मु., निपुणं परीक्ष्य, सम्यक् पर्यालोच्य-निरूप्य।

ठोंग, सं. स्त्री. (सं. तुंडम्) चंचूः-चुः (स्त्री.) २. चंचु-प्रहारः ३. अंगुलीप्रहारः।

ठोंसना, क्रि. स. (सं. तुंड >) तुंडेन,चंचुपुटेन अभिहन् (अ. प. अ.)-प्रह्व (भ्वा. प. अ.), चंचूप्रहारं कृ।

ठोंगा, सं. पुं. (हिं. ठोंग) पत्र,-पुटः-पुटिका-कोषः।

ठोंसना, क्रि. स., दे. 'ठूँसना'।

ठोकना, क्रि. स., दे. 'ठोंकना'।

ठोकर, सं. स्त्री. (हिं. ठोकना) स्खलनं, स्खलितं, आघातः, आहतिः (स्त्री.) २. पाद-लत्ता,-आघातः, प्रहारः ३. कट्वनुभवः।

—खाना, क्रि. अ., प्र-,स्खल् (भ्वा. प. से.), पदं विषमी-भू। मु., हानि-क्षतिं-कष्टं सह् (भ्वा. आ. से.) ३. वंच्-प्रतार् (कर्म.) ४. जीविकार्थंमितस्ततः भ्रम् (भ्वा. प. से.)।

—मारना, क्रि. स., लत्तया-पादेन प्रह्व (भ्वा. प. अ.)-आहन् (अ. प. अ.)-तड् (चु.), पादप्रहारं कृ।

—लगना, क्रि. अ., दे. 'ठोकर खाना'।

ठोड़ी-ढ़ी, सं. स्त्री. (सं. तुंडं >) चिबुकं, हनुः (पुं. स्त्री.)।

ठोर, सं. पुं. (देश.) पक्वान्नभेदः, ठोरं। २. चंचुः, चूः (स्त्री.)।

ठोला सं. पुं. (देश.) खगाहारशराबः २. अंगुलि,-संधिः-ग्रंथिः-पर्वन् (न.)।

—मारना, क्रि. स., अंगुलिपर्वणा प्रह्व (भ्वा. प. अ.)।

—रखना, मु., हन् (अ. प. अ.), मृ. (प्रे.)।

ठोस, वि. (हिं. ठस) सान्द्र, सु-, संहत, कठिन, संघातवत् , घन २. पूर्णगर्भ, छिद्ररहित, सगर्भ।

ठोसाई, सं. स्त्री. (हिं. ठोस) घनता, काठिन्यं, निश्छिद्रता।

ठौर, सं. सं. (हि. ठाँव) स्थानं, स्थली, प्रदेशः २. अवसरः, सुयोगः, योग्यकालः।

कुठौर, मु., दुःखद-अनिष्ट,- स्थाने-स्थले।

ठिकाना, सं. पुं., वासस्थानं, आ-नि.-वासः।

ड

ड, देवनागरीवर्णमालायास्त्रयोदशो व्यञ्जनवर्णः, डकारः।

डंक, सं. पुं. (सं. दंशः) कंटकः, दंशचंचूः (स्त्री.), शंकुः (पुं.), (बिच्छू का) अलं २. दंशव्रणः-णं ३. दे, 'निब'।

—मारना, क्रि. स., दंश् (भ्वा. प. अ.) २. मर्माणि भिद् (रु. प. अ.)।

—वाला, वि. सदंश, दंशिन्-दंशक।

डंका, सं. पुं. (सं. डक्का) यशःपटहः, विजय-मर्दलः, दुन्दुभिः, हिंडिमः

—बजाना, मु., प्र-,शास् (अ. प. से.), तंत्र् (चु.)।

—बजाना, मु., विश्रुत-विख्यात (वि.) भू।

डंके की चोट कहना, मु., प्रकाशं उद्घुष्(चु.)।

डंगर, सं. पुं. (सं. कडंग(क)रीयः) पशुः, मृगः, चतुष्पदः, चतुष्पाद् (पुं.)।

डंठल, सं. पुं. (सं. दंडः) कांडः,डं, नालः-लीलं २. वृंतं, प्रसव-बंधनम्।

डंड, सं. पुं. (सं. दण्डः) लगुडः, यष्टिः(स्त्री.) २. बाहु (पुं.), भुजः-जा ३. अर्थ-धन,-दंडः

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

४. निग्रहः,शासनं ५. हानिः क्षतिः (स्त्री.) ६. व्यायामप्रकारः, साष्टाङ्ग-दंड,-व्यायामः ।
—देना, क्रि. स., दंड् (चु.)-शास् (अ. प. से., दोनों द्विकर्मक), दम् (प्रे. दमयति), निग्रह् (क्र. प. से.) ।
—पेलना, क्रि. अ., (दंडवत्) व्यायाम् (भ्वा. प. अ.)-व्यायामं कृ ।
—भरना, क्रि. अ., अर्थदंडं परि-,शुध् (प्रे.) ।
—लेना, क्रि. स., अर्थदंडं दा (प्रे. दापयति) ।
—पेल, सं. पुं. मल्लः, मल्लयोद्धृ (पुं.), व्यायामिन् , दृढांगः, वज्रदेहः ।
डंडवत्, सं. स्त्री. दे. 'दंडवत्' ।
डंडा, सं. पुं. (सं. दंडः) काष्ठं, काष्ठखंडः, लगुडः, यष्टिः (स्त्री.); वेत्रं, वेत्रयष्टिः । २. प्राचीरं, प्राकारः, वरणः ।
डंडिया, सं. पुं. (हिं. डांड) करोद्ग्राहकः, शुल्कसंग्राहकः ।
डंडी, सं. स्त्री. (हिं. डंडा) सूक्ष्म-तनु,-दंडः-यष्टिः (स्त्री) २. तुलायष्टी ३. मुष्टिः (स्त्री.), वारंगः ४. कांडः-डं, नालः-लं ५. पर्वतीय-वाहनभेदः । सं. पुं., दंडधारिन् , सन्न्यासिन् ।
पग—, सं. स्त्री., चरण-पाद,-पथः, पद्धतिः (स्त्री.), पद्या, पदवी ।
डंडौत, सं. पुं. स्त्री., दे. 'दंडवत्' ।
डकरना, क्रि. अ. (अनु.) हंभारवं कृ, रेभ् (भ्वा. आ. से.), नि-,नद् (भ्वा. प. से.) ।
डकराना, क्रि. अ., दे. 'डकरना' ।
डकार, सं. पुं. (सं. उद्गारः) उद्गिरणं, उद्गमः, उद्गमनं २. गर्जनं, गर्जितं, निनादः ।
—लेना, क्रि. अ., दे. 'डकारना' ।
—जाना या—बठना, मु., छलेन आत्मसात् कृ, ग्रस् (भ्वा. आ. से.) ।
डकारना, क्रि. अ. (हिं. डकार) उद्गृ (तु. प. से.), उद्गम् (भ्वा. प. से.) २. दे. 'डकरना' ३. दे. 'डकार जाना' ।
डकैत, सं. पुं., दे. 'डाकू' ।
डकैती, सं. स्त्री., दे. 'डाका' ।
डकौत-तिया, सं. पुं. (देश.) मिथ्यामौहूर्तिकः, ज्योतिर्विदाभासः २. जातिविशेषः ।
डग, सं. पुं. (हिं. डाँकना) दीर्घ,-विक्रमः, पादन्यासः ।
—भरना, क्रि. अ., विक्रम् (भ्वा. प. से., भ्वा. आ. अ.) दीर्घपादान् विन्यस् (दि. प. से.)-निक्षिप् (तु. प. अ.) ।
डगमग, वि. (हिं.डग+मग) प्रस्खलत्, विचलत् कंपमान, वेपमान । अव्य०, सकम्पम्, सवेपथु ।
डगमगाना,क्रि. अ. (हिं. डग+मग) प्र-, कंप्-वेप् (भ्वा. आ. से.) वेल्ल् (भ्वा. प. से.) २. प्रस्खल्-विचल् (भ्वा. प. से.) ३. विशंक्-विकल्प् (भ्वा. आ. से.), चित्तं दोलायते (ना. धा.) ।
डगमगाहट, सं. स्त्री. (हिं. डगमगाना) प्रकंपः, वेपथुः २. प्रस्खलनं, विचलनं ३. विक्षोभः, चित्तवैकल्यं, धृतिनाशः ।
डगर, सं. स्त्री. (हिं. डग) दे. 'मार्ग' ।
डटना, क्रि. अ. (हिं. ठाढा) दृढं-स्थिरं-निश्चलं स्था (भ्वा. प. अ.), अवस्था (भ्वा. आ. अ.), वृत् (भ्वा. आ. से.) ।
डट्टा, सं. पुं. (हिं. डाटना) कूपीछिद्र-,पिधानं, अवष्टंभः, रोधः ।
—लगाना, क्रि. स., रोधेन-अवष्टम्भेन अपि-पि,-धा (जु. उ. अ.)-सं-आ-वृ (स्वा. उ. से.) ।
डढ़ियल, वि. (हिं. डाढ़ी) कूर्चधर, लंबकूर्च, श्मश्रुल, सश्मश्रु ।
डपट, सं. स्त्री. (सं. दर्पः) निर्भर्त्सना, वाग्दंडः ।
डपटना, क्रि. स. (हिं. डपट) तर्ज् (भ्वा. प. से; चु. आ. से.), वाचा दंड् (चु.), निर्भर्त्स् (चु. आ. से.) ।
डपोरसंख, सं. पुं. (अनु. डपोर=बड़ा+सं. शंखः) आत्मश्लाघिन् , विकत्थनशीलः २. बालबुद्धिः (पुं.) ।
डफ, डफला, सं. पुं. (अ. दफ़) डिंडिमभेदः *डफम् ।
डफली, सं. स्त्री. (हिं. डफला) लघु,-डिंडिमः-डफम् ।
डफाली, सं. पुं. (हिं डफला) डफ-डिंडिम,-वादकः ।
डबडबाना, क्रि. अ. (अनु.) साश्र-सवाष्प-सजलनयन-साश्रु (वि.) भू ।
डबडबाई आँखों से, क्रि. वि., साश्रं, साश्रु, सवाष्पं, पर्यश्रु ।

 CC-0. Jangamwadi Math Collection. Digitized by eGangotri

डबोना, क्रि. स., दे. 'डुबोना'

डब्बा, सं. पुं. (सं. डिंबः >) संपुटः, संपुटकः, करंडकः, समुद्गकः । २. (रेलगाड़ी का) शकटः-टम् ।

डमरू, सं. पुं. (सं.-रुः) क्षीणमध्यो गुटिका-द्वययुक्तो वाद्यभेदः ।

—मध्य, सं. पुं. (सं. न.) विशालभूभागद्वय-योजकः संबाधभूखंडः ।

जलडमरूमध्य, सं. पुं. (सं. न.) सामुद्रध्रुनी ।

डर, सं. पुं. (सं. दरः-रं) सं-, त्रासः, भीः-भीतिः (स्त्री.), भयं, साध्वसं २. शंका, चिंता ।

डरना, क्रि. अ. (हिं. डर) भी (जु. प. अ.), वि-सं-त्रस् (भ्वा. दि. प. से.), उद्विज् (तु. प. अ.), भयार्त्त-त्रस्त (वि.) भू २. आ-वि-, शंक् (भ्वा. आ. से.) ।

डरपोक, वि. (हिं. डरना + पोंकना) भीत, भीरु, सभय, ससाध्वस २. साशंक, शंकिल ।

डराना, क्रि. स., ब. 'डरना' के प्रे. रूप ।

डरावना, वि. (हिं. डर) भीम, भीषण, भयंकर ।

डल, सं. स्त्री. (सं. तल्लः) तटाकः-कं (-गः, गं), सरोवरः ।

डलना, क्रि. अ. (हिं. डालना) न्यस्-निक्षिप् (कर्म. २. नि-, सिच् (कर्म.); क्षु (भ्वा प. अ.) ।

डलवाना, क्रि. प्रे., ब. 'डालना' के प्रे. रूप ।

डला[1], सं. पुं. (सं. दलः-लं) खंडः-डं, स्थूल,-अंशः-भागः २. पिंडः-डं, घनः, गंडः, गुल्मः ।

डला[2], सं. पुं. [सं. डल(ल्ल)कं] दे. 'टोकरा' ।

डलिया, सं. स्त्री. (हिं. डला) दे. 'टोकरी' ।

डली, सं. स्त्री. (हिं. डला) पिंडकः-कं, क्षुद्रगंडः २. शकलः-लं, खंडः-डं ३. दे. 'सुपारी' ।

डसन, सं. पुं. (सं. दंशनम्) दंशः २. दंश-दंशन, रीतिः (स्त्री.) ।

डसना, क्रि. स. (सं. दंशनं) दंश् (भ्वा. प. अ.), कंटकेन व्यध् (दि. प. अ.) २. मर्माणि भिद् (रु. प. अ.) ।

डसनेवाला, सं. पुं., दंशकः २. अरुंतुदः, मर्मस्पृश् ।

डहडहा, वि. (अनु.) हरित, रसवत्, सरस, विकसित, विकच २. अभिनव, प्रत्यग्र २. प्रसन्न, आनंदित ।

डहडहाना, क्रि. अ. (हिं. डहडह) प्रफुल्ल्-विकस् (भ्वा. प. से.), हरिती भू २. सम्-ऋध् (दि. प. से.) सं-वि-वृध् (भ्वा. आ. से.) ३. मुद् (भ्वा. आ. से.) ।

डाँकना, क्रि. स., दे. 'लाँघना' क्रि. अ., दे. 'कै करना'

डाँग, सं. स्त्री. (सं. दंडकः) लगुडः-रः लः, स्थूल- बृहद्,-दंडः ।

डाँट, सं. स्त्री. (सं. दांतिः >) तर्जनं, तर्जितं, निर्-, भर्त्सनं-ना, वाग्दंडः ।

—डपट, सं. स्त्री. भ्रूभंगेन तर्जनं, आक्रोशः, विभीषिका, भयदर्शनं, अपकारगिर् (स्त्री.) ।

डाँटना, क्रि. स. (हिं. डाँट) विर्, भर्त्स् (चु. आ. से.), भयं दृश् (प्रे.), भी (प्रे.), तर्ज् (भ्वा. से.; चु. आ. से.) ।

डाँटने योग्य, वि., तर्जनीय, निर्भर्त्सनीय-वाग्दंडार्ह ।

डाँटनेवाला, सं. पुं., तर्जकः, निर्भर्त्सकः ।

डाँड़, सं. पुं. (सं. दंडः) यष्टिः (स्त्री.), लगुडः २. क्षेपणी, नौदंडः ३. पृष्ठवंशः, कशेरुका ४. धन-अर्थ,-दंडः निग्रहः, शासनं, दंडः ६. सम-सरल, रेखा ७. सीमा ।

डाँड़ना, क्रि. स. (सं. दंडनं) अर्थ-धनं दंड् (चु.) ।

डाँड़ा, सं. पुं. (हिं. डाँड़) दे. 'मेंड़' ।

डाँड़ी, सं. स्त्री. (हि. डाँड़) दे. 'डंडी' (१-४) ।

डाँवाँडोल, वि. (हिं. डोलना) अस्थिर, चंचल, तरल, लोल, कम्पमान । (मनुष्य) अस्थिरबुद्धि, चलचित्त, चंचलमानस ।

डाँस[1], सं. पुं. (सं. दंशः) दंशकः, अरण्य-गो-वन,-मक्षिका, पांशुरः, क्षुद्रिका ।

डाँस[2], सं. पुं. (अं.) नृत्यम्, दे. 'नाच' ।

डाइन, सं. स्त्री., (सं. डाकिनी) दे. 'डाकिन' ।

डाइनामाइट, सं. पुं. (अं.) विध्वंसकम्, * विस्फोटकम् ।

डाक, सं. स्त्री. (हिं. डाँकना=फाँदना) । प्रेष्य,-पत्राणि-पत्रिकाः (बहु.) २. पत्रवाहन,-व्यवस्था- संस्था ।

—खाना, सं. पुं. (हिं. + फा.) (प्रेष्य) पत्र,-स्थानं-गृहं-कार्यालयः ।

—गाड़ी, सं. स्त्री., पत्रशकटी ।

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

—घर, सं. पुं., दे. 'डाकखाना'।
—बँगला, सं. पुं. (हिं.+अं.) विश्राम-विश्रांति,-गृहम्।
—महसूल, सं. पुं. (हिं.+अ.) पत्रवाहन-
—व्यय, सं. पुं. (हिं.+सं.) शुल्कम्।
डाका, सं. पुं. (हिं. डाकना) प्रसह्य चौर्यम्, लुंठिः (स्त्री.)-ठी, लुंठनम्।
—जनी, सं. स्त्री. (हिं.+फा.) दे. 'डाका'।
—डालना, या मारना, क्रि. स., लुंट्-लुंठ् (भ्वा. प. से., चु.), प्रसह्य अपहृ (भ्वा. प. अ.)।
—पड़ना, क्रि. अ., लुंठकैः अवस्कंद्-आक्रम् (कर्म.)।
डाकिन,-नी, सं. स्त्री. (सं.-नी) कुहकिनी, अभिचारिणी, योगिनी, मायाविनी, कालीगण-भेदः। २. स्थविरा, वृद्धा ३. कुरूपा नारी।
डाकिया, सं. पुं. (हिं. डाक) पत्रवाहकः।
डाकू, सं. पुं. (हिं. डाकना=कूदना) दस्युः, महासाहसिकः, लुंठकः, लुंटा(ठा)कः, माचलः, प्रसह्यचौरः, चिल्लाभः।
डाट, सं. स्त्री. (सं. दांति >) तोरणः-णं २. दे-'डट्टा' ३. दे. 'डाँट'।
—लगाना, क्रि. स., वृत्तखंडाकृत्या-तोरण-रूपेण निर्मा० (जु. आ. अ.)।
डाटना, क्रि. स. (हिं. डाट) अत्यन्तं पूर् (चु.) २. अत्यधिकं भक्ष् (चु.) ३. सावलेपं वस्त्रादिकं परिधा (जु. उ. अ.) ४. दे. 'डाँटना'।
डाढ़, सं. स्त्री. (सं. दाढ़ा) चर्वणदंतः, जंभः, दंष्ट्रा।
डाढ़ी, सं. स्त्री. दे. 'दाड़ी'।
डाब, सं. स्त्री., दे. 'डाभ'।
डाबर, सं. पुं. (सं. दभ्रः=सागर >) अनूप-कच्छ, भूः (स्त्री.) देशः २. पल्वलः-लं ३. आविलजलं ४. दे. 'चिलमची'।
डाभ, सं. पुं. (दर्भः) कुशः-शं २. आम्र-मंजरी ३. अपक्वनारिकेलः-रः।
डामर, वि. (सं.) भीषण, भयावह २. उपद्र-विन्, कलि-कलह,-प्रिय ३. सरूप, अनुरूप, सदृश। सं. पुं. (सं.) उपद्रवः, कलहः २. उल्लासः, प्रमोदः।
डामल, सं. पुं. (अ० दायमुल हब्स) यावज्जी-विकः कारावासः, आमरणान्तिक-रोधः-निरोधः-आसेधः-प्रग्रहः।
डायन, सं. स्त्री. (दे. डाकिनी)।
डायनामो, सं. पुं. (अं.) विद्युज्जनकं लघुयंत्रम्।
डायरी, सं. स्त्री. (अं. दैनंदिनी दैनिकी।
डायरेक्ट स्पीच, सं. स्त्री. (अं.) प्रत्यक्षवर्णनम्।
डायर्की, सं. स्त्री. (अं.) दे० 'हुराज'।
डायल, सं. पुं. (अं.) घटीमुखं २. सूर्यघटी।
डायस, सं. पुं. (अं.) उच्चासनं, मंचः।
डार, सं. स्त्री. [सं. दारु (न.)] विटपः, शाखा, २. पंक्तिः-ततिः (स्त्री.), श्रेणी।
डाल, सं. स्त्री. [सं. दारु (न.)] विटप,: शाखा २. असि,-धारा-पत्रं-फलम्।
डालना, क्रि. स. (सं. तलनं) प्र-, अस् (दि. प. से.), प्र-, क्षिप् (तु. प. अ.), पत् (प्रे.) २. प्र-, स्रु (प्रे.), नि-, सिच् (तु. प. अ.) ३. परिधा (जु. उ. अ.), वस् (अ. आ. अ.), धृ (चु.) ४. नि.प्र-विश् (प्रे.), निधा (जु. उ. अ.) ५. विस्मृपरित्यज् (भ्वा. प. अ.) ६. मिश्र् (चु.), संमिल् (प्रे.) ७. उप-पत्नीत्वेन अवरुध् (रु. उ. अ.)।
डालर, सं. पुं. (अं.). रौप्यमुद्राभेदः, डालरम्।
डाली,[1] सं. स्त्री. (हि. डाल) शाखा, विटपः।
डाली,[2] सं. स्त्री. (हिं. डाला) दे. 'टोकरी' २. उपहारः, उपायनम्।
डाह, सं. पुं. (सं. दाहः) ईर्ष्या, अभि-, असूया, मत्सरः, मात्सर्य्यं, परोत्कर्षद्वेष, २. द्वेषः, द्रोहः।
डिंगल, वि. (सं. डिंगर) दुष्ट, दुर्वृत्त २. क्षुद्र, नीच। सं. स्त्री, राजस्थानस्य भाषाविशेषः।
डिंडिम, सं. पुं. (सं.) लघु,-पटहः-दुंदुभिः (पुं.)।
डिंभ, सं. पुं. (सं.) डिंबः, शिशुः, पृथुकः, कलभः, पोतः-तकः, शावः-वकः, अर्भकः, अपत्यं, पृथुकः २. मूर्खः- जडः।
डिक्टेटर, सं. पुं. (अं.) एक—अधिपतिः—सर्वाधिकारसम्पन्न,-शासकः—शासितृ।
डिक्टेशन, सं. स्त्री. (अं.) दे. 'इम्ला'।
डिक्शनरी, सं. स्त्री. (अं.) (शब्द)-कोशः-धः, अभिधानम्।
डिगना, क्रि. अ. (हिं. डग) अप,-सृ-गम् (भ्वा. प. अ.), प्र-वि-सृप् (भ्वा. प. अ.) २. विचल् (भ्वा. प. से.), पराङ्मुखी-विमुखी

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

भू, अति-व्यति-इ (अ. प. अ.), अति-व्यभिचर् (भ्वा. प. से.) ३. दे. 'गिरना'।

डिगरी[1], सं. स्त्री. [अं. उपाधिः (पुं.)], उपपदं २. अंशः, कला, मात्रा, समकोणस्य नवतो (१/९० भागः।

डिगरी[2], सं. स्त्री. (अं. डिक्री) स्वत्वप्रापकः, आधिकरणिकनिर्णयः, राजाज्ञा, व्यवस्था।

—देना, क्रि. स., स्वत्वप्रापणात्मकं निर्णयं कृ, व्यवस्था (प्रे.)।

डिठौना, सं. पुं. (हिं. डीठ) कुदृष्टिनिवारकं कज्जलतिलकम्।

डिपटी, सं. पुं. (अ. डिपुटि) प्रति,-निधिः-पुरुषः-हस्तः-हस्तकः, नियोगिन्, नियुक्तः।

—कमिशनर, सं. पुं. (अ.) उपायुक्तः।

डिपार्टमेन्ट, सं. पुं. (अं.) विभागः, शाखा।

डिपो, सं. पुं. (अ.) भांडागारं, आलयः, शाला।

डिप्लोमा, सं. पुं. (अ.) प्रमाणपत्रं, अधिकारपत्रम्।

डिफथीरिया, सं. पुं. (अ.) रोहिणी।

डिबिया, सं. स्त्री. (हिं. डिब्बा) कोषकः, संपुटकः।

डिब्बा, सं. पुं., दे. 'डब्बा'।

डिसमिस, वि.(अ.) अधिकारच्युत, भ्रष्टाधिकार।

—करना, क्रि. स., अधिकारात्-पदात् च्यु-भ्रंश्-अवरुह (प्रे.)।

डिसिनफेक्टेंट, वि. (अ.) रोगाणुनाशक।

डिस्टिल्लेशन, सं. पुं. (अ.) आसवनम्।

डींग, सं. स्त्री. (सं. डीनं<) आत्मश्लाघा, स्वप्रशंसा, विकत्थनम्।

—मारना या हाँकना, आत्मानं श्लाघ्-विकत्थ (भ्वा. आ. से)।

डींगिया, वि. (हिं. डींग) आत्मश्लाघिन्, विकत्थनशील, पिंडीशूर।

डीठ, सं. स्त्री., दे. 'दृष्टि'।

डील, सं. पुं. (देश.) (देह-) प्र-परि,-माणं, आकारः, आकृतिः (स्त्री.), कायमानम्।

—डौल, सं. पुं., मूर्तिः (स्त्री.), संस्थानं, आकारमानम्।

डुगडुगी, सं. स्त्री. (अनु.) डिंडिमः, लघुपटहः।

—पीटना, मु., (सडिंडिमनादं) उद्-वि-घुष् (चु.), प्रख्या प्रख्यापयति)।

डुग्गी, सं. स्त्री., दे. 'डुगडुगी'।

डुबकी, सं. स्त्री. (हिं. डूबना) अवगाहः, आप्लवः, निमज्जथुः (पुं.)।

—लगाना, क्रि. अ., वाड्-अवगाह् (भ्वा, आ. से.), आप्लु (भ्वा. आ. अ.), निमस्ज् (तु. प. अ.)।

डुबाना, क्रि. स., व. 'डूबना' के प्रे. रूप।

डुबाव, सं. पुं. (हिं. डूबना)अगाधता, गांभीर्यम्।

डुबोना, क्रि. स., व. 'डूबना' के प्रे. रूप।

डुलाना, क्रि. स., व. 'डोलना' के प्रे. रूप।

डूँगर, सं. पुं., (सं. तुंग >) पर्वतकः, क्षुद्रपर्वतः २. उच्चभूः (स्त्री.) मृच्चयः।

डूँगरी, सं. स्त्री. (हिं. डूँगर) अतिक्षुद्रपर्वतः २. क्षुद्रमृच्चयः।

डूँडा, वि. (देश०) एक.-शृंग-विषाण-कूणिक। सं. पुं. एकशृग-एकविषाण,-वृषः-वृषभः।

डूबना, क्रि. अ., (हिं. बूड़ना का विपर्यय; अथवा अनु. डुब-डुब) निमस्ज् (तु. प. अ.), निमज्जनेन मृ (तु. आ. अ.)-व्यापद् (दि. आ. अ.) २. अस्तं इं-या (अ. प. अ.), अस्ताचलं-अस्तशिखरं अवलंब् (भ्वा. आ. से), प्राप् (स्वा. प. अ.) ३. नष्ट-ध्वस्त-निर्मूल (वि.) भू, नश् (दि. प. वे.), ध्वंस् (भ्वा. आ. से.), परिक्षि (कर्म.), प्र-वि-ली(दि.आ.अ.) ४. निध्यै (भ्वा. प. अ.), सततं आलोच्-चिंत् (चु.), चिंताकुल (वि.) भू ५. निमग्न-निरत-आसक्त-व्यापृत (वि.) भू। सं. पुं., निमज्जनं, आप्लावः, प्लावनं, निमज्जनेन मरणं, अस्तः, अस्तमनं; नाशः, ध्वंसः; सततचिंतनं, कार्यासक्तिः (स्त्री.)।

डूश, सं. पुं. (अं.) योनिक्षालनम्।

डेंगू बुखार, सं. पुं. (अं. + अ.) दण्डक-अस्थि-भंजन,-ज्वरः।

डेढ़, वि. (सं. अध्यर्द्ध) सार्द्धैक।

—ईंट की मसजिद जुदी बनाना, मु. (दर्पादितः) कार्यमसंभूयैव कृ।

डेपुटेशन, सं. पुं. (अ.) प्रतिनिधिवर्गः, शिष्टमंडलं, नियुक्तजनाः।

डेरा, सं. पुं. (हिं. ठहरना) पट-वस्त्र,-गृहं-कुटी-मंडपः-वेश्मन् (न.), दूष्यं-इयं २, गृहं, आलयः, आवासः ३. विश्रामः, अस्थिरवासः ४. शिविरं, निवेशः।

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

—डालना, मु., सैन्यं निविश् (तु. प. अ.) समावस् (भ्वा. प. अ.)।
डेल्टा, सं. पुं. (यू., अ.) नदीमुखपुलिनः-नम्।
डेलिगेट, सं. पुं. (अ.) नियोगिन्, प्रतिनिधिः(पुं.)।
डेवढ़ा, वि. (हिं. डेढ़) अध्यर्द्धगुण। सं. पुं. अध्यर्द्धगुणनसूची।
डेवढ़ी, सं. स्त्री., दे. 'ड्योढ़ी'।
डेसिमल, सं. पुं. (अ.) दशमलवः २. दशसंख्यक।
डेस्क, सं. पुं. (अ.) लेखन-पीठिका-फलकम्।
डोंगा, सं. पुं. (सं. द्रोणं <) वेडा, वारिरथः-नौः (स्त्री..), तरी।
डोंगी, सं. स्त्री. (सं. द्रोणी) उडुपः, नौका, वेटी, वेडा, तारिका।
डोंडी-ढ़ी, सं. स्त्री., दे. 'डौंडी'।
डोडी, सं. स्त्री. (सं. तुंड) बीजकोषः, पुटः-टम्।
डोबा, सं. पुं. (हिं, डूबना) निमज्जथुः (पुं.), निमज्जनं, अवगाहः-हनं, आप्लवः।
—देना, क्रि. स., (रंगे) नि-, मिस्ज (प्रे. मज्जयति), अवगाह् (प्रे.) २. क्लिद् (प्रे.), आर्द्रीं कृ।
डोम, सं. पुं. (सं.) डोंबः, अस्पृश्यजातिभेदः १. दे. 'मीरासी'।
डोर, सं. स्त्री. (सं. पुं. न.) शुल्वं-ल्वं, शुल्वाल्वी, वराटः-टकः, रज्जुः (स्त्री.), गुणः, वटः-टं-टी।
डोरा, सं. पुं. (सं. डोरः-रं) डोरकः-कं, सूत्रं, तंतुः (पुं.), गुणः २. रेखा-षा, लेखा ३. असि-, धारा ४. चमसभेदः ५. स्नेहसूत्र, प्रेमबंधन ६. कज्जलरेखा ७. नृत्ये ग्रीवागतिभेदः।
—डालना, मु. अनुरंज्-मुह् (प्रे.)।
डोरिया सं. पुं. (हिं. डोरा) *डोरीयः, सरेखोऽशुकभेदः।
डोरी, सं. स्त्री., दे, 'डोर'।
डोल, सं. पुं. (सं. दोलः <)*दोलं, लौहसेचनम्। वि., अस्थिर, लोल।
डोलची, सं. स्त्री. (हिं. डोल) *दोलकं, लघुसेचनी।
डोलना, क्रि. अ. (सं. दोलनं) सु-सृप् (भ्वा. प. अ.), चल् (भ्वा. प. से.) २. भ्रम्-पर्यट् (भ्वा. प. से.) ३. अप,-इया (अ. प. अ.) ४. (चित्तं) विकल्, चंचलं भू ५. दोलायते (ना. धा.), प्रेंख् (भ्वा. प. से.)। सं. पुं, दोलनं, प्रेंखणं इ.।
डोलनेवाला, सं. पुं., सर्पणशीलः पर्यटकः, अपयातृ (पुं.), चलचित्तः, प्रेंखकः।
डोला, सं. पुं. (सं. दोला) डयनं, दोलिका, शिविका।
—देना, मु., नृपादिभ्यः स्वकन्यामुपह् (भ्वा. प. अ.)
डोली, सं. स्त्री. (हिं. डोला) दे. 'डोला'।
डौंड़ी-ढ़ी, सं. स्त्री. (सं. डिंडिमः) पटहः, दुंदुभिः २. (सडिंडिमनादं) घोषः-षणा ३. ख्यापनं, उत्कीर्तनम्।
—देना या पीटना, क्रि. स., दे. 'डुगडुगी पीटना'।
डौल, सं. पुं. (हिं. डील) आकारः, संस्थानं, आकृतिः (स्त्री.), रूपं २. प्रकारः,-विधा (समासांत में) ३. युक्तिः (स्त्री.), उपायः ४. लक्षणं, चिह्नम्।
डाल, सं. पुं., उपायः, युक्तिः (स्त्री.)।
—दार, वि., सुन्दर, रम्य २. पुष्ट, स्वस्थ।
ड्यूटी, सं. स्त्री. (अं.) कर्तव्यं, कार्यं, कृत्यम्, न्याय्य-स्व,-कर्मन्-कार्यम्।
ड्योढ़ा, वि. तथा सं. पुं., दे. 'डेवढ़ा'।
ड्योढ़ी, सं. स्त्री. (सं. देहली) गृहावग्रहण, द्वार,-पिंडी-पिंडिका २. उपशाला, द्वारांगणं, द्वारकोष्ठः।
—दार, —वान, } सं. पुं., दौवारिकः, द्वारपालः।
ड्राइङ्ग, सं. स्त्री. (अं.) *रेखाचित्रणम्।
—रूम, दर्शन-उपवेशन,-कोष्ठः-शाला-कक्षः, चित्रशाला।
ड्राइवर, सं. पुं. (अं.) वाहकः, चालकः।
ड्रापर, सं. पुं. (अं.) बिन्दुपातकम्।
ड्राफ़्ट, सं. पुं. (अ.) प्रारूपम् २. धनार्पणादेशः, ड्राफ्टम्।
—टेबल, सं. पुं. (अं.) शृंगारफलकम्।
ड्राफ़्ट्स्मैन, सं. पुं. (अं.) आलेख्य-चित्र,-करः-कारः-कृत्।
ड्राम, सं. पुं. (अं.) ड्राममानं, मापत्रयात्मकस्तोलभेदः।
ड्रामा, सं. पुं. (अं.) रूपकं, नाटकम्।

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

ड्राअर, सं. पुं. (अं.) चल-,कोष्ठः-संपुटः ।
ड्रेस, सं. स्त्री. (अं.) वेशः-षः, परिधानम् ।
ड्रेसिंग, सं. स्त्री. लेपः, उप,-नाहः- देहः । अं. २. शृंगारः, मण्डनम् ।
ड्रिल, सं. स्त्री. (अं.) व्यायामः, अस्त्र-शस्त्र,-शिक्षा-अभ्यासः ।
—मास्टर, सं. पुं. (अं.) व्यायाम,-शस्त्र,-शिक्षकः ।

ढ

ढ, देवनागरीवर्णमालायाश्चतुर्दशो व्यञ्जनवर्णः, ढकारः ।
ढंग, सं. पुं. (सं. तंग् = गति > ?) शैली, रीतिः-पद्धतिः (स्त्री.) प्रणाली २. प्रकारः, जातिः (स्त्री.), भेदः,-विधा (समासांत में) ३. रचना, घटनं, निर्माणं ४. युक्तिः (स्त्री.), उपायः ५. व्यवहारः, आचरणं ६. व्याजः, मिषं ७. लक्षणं, चिह्नं ८. स्थितिः (स्त्री.), दशा ।
ढंगी, वि. (हिं. ढंग) चतुर, विदग्ध, धूर्त्त ।
ढंढोरा, सं. पुं. (अनु. ढंढं) दे. 'डौंडी' ।
ढँढोरिया, सं. पुं. (हि. ढँढोरा) उद्-,घोषकः, प्रख्यापकः ।
ढई, सं. स्त्री. (हिं. ढहना) दे. 'धरना' सं. पुं. ।
ढकना, सं. पुं., दे. 'ढक्कन' । क्रि. स., दे. 'ढाँकना' । क्रि. अ., आच्छाद्-आवृ-पिधा (कर्म.) ।
ढकनी, सं. स्त्री., दे. 'ढक्कन' ।
ढकवाना, क्रि. प्रे., ब. 'ढाँकना' के प्रे. रूप ।
ढकेल, सं. पुं. दे. 'धकेल' ।
ढकेलना, क्रि. स., दे. 'धकेलना' ।
ढकोसला, सं. पुं. (हिं. ढंग + सं. कौशलम्) दंभः, आडंबरः, पाषंडः-ड, कापट्यं, छाद्मिकता।
ढक्कन, सं. पुं. (सं. ढक्क = छिपना) पिधानं, पुटः-टं-टी, छदः, छदनं, आवरणम् ।
ढचर, सं. पुं. (हिं. ढाँचा) परिच्छदः, उपकरणसामग्री २. आधारः, उपष्टंभः ३. कलहः, विवादः ४. व्यवसायः, धृत्तिः (स्त्री.) ५. आडम्बरः ६. जरठः ।
ढप, सं. पुं., दे. 'डफ' ।
ढपना, सं. पुं. (हिं. ढाँपना) दे. 'ढक्कन' । क्रि. अ., दे. 'ढकना' क्रि. अ. ।
ढब, सं. पुं., दे. 'ढङ्ग' ।
ढमढम, सं. पुं. (अनु.) पटह-भेरी,-नादः, ढमढमध्वनिः (पुं.), ढमढमायितम् ।
ढरका, सं. पुं. [हिं. ढर(ल)कना] नि(त्र)सरः, पिल्लता, नेत्रस्रावः, अभिस्यं(ष्यं)दः २. पशूनामौषधपाननलः ।
ढरकी, सं. स्त्री. [हिं. ढर(ल)कना] त(त्र)सरः, मल्लिकः ।
ढर्रा, सं. पुं. (हिं. ढरना) मार्गः, पथिन् २. शैली, पद्धतिः (स्त्री.) ३. उपायः, युक्तिः (स्त्री.) ४. आचारः, आचरणम् ।
ढलकना, क्रि. अ. (हिं. ढाल) प्र-परि,-स्रु (भ्वा. प. अ.), पत् (भ्वा. प. से.) प्रस्यंद्-च्युत् (भ्वा. आ. से.) २. 'लुढकना' । सं. पुं., स्र(स्रा)वः, च्युतेः, अवपातः ।
ढलका, सं. पुं., दे. 'ढरका' (१) ।
ढलकाना, क्रि. स., व. 'ढलकना' के प्रे. रूप ।
ढलना, क्रि. अ. (हिं. ढाल) विलाप्य संधा-घट्-रच्-क्लृप् (कर्म.) २. दे. 'ढलकना' । ३. व्यति-अति,-इ (अ. प. अ.), व्यतिक्रम् (भ्वा. प. से.) ४. दे. 'लुढ़कना' ५. प्री (दि. आ. अ.), अनुकूली भू ५. अस्तं गम् ।
साँचे में ढला, मु., अति,-सुन्दर-सुभग-शोभन ।
ढलमल, वि., दे. 'ढीला' ।
ढलवाँ, वि. (हिं. ढालना) विलाप्य घटित-रचित-क्लृप्त २. अवसर्पिन्, प्रवण ।
ढलवाना, क्रि. प्रे., ब. 'ढालना' के प्रे. रूप ।
ढलाई, सं. स्त्री. (हिं. ढालना) विलाप्य घटनं-रचनं-कल्पनं २. द्रावण-विलापन,-भृतिः (स्त्री.)।
ढहना, क्रि. अ. (सं. ध्वंसनं) ध्वंस्-अवस्रंस् (भ्वा. आ. से.), अवपत् (भ्वा. प. से.) २. वि-,नश् (दि. प. वे.) ।
ढहवाना, क्रि. प्रे., ब. 'ढहाना' के प्रे. रूप ।
ढहाना, क्रि. स. (सं. ध्वंसनं) अवस्रंस्-ध्वंस्-अवपत्-उन्मूल्-उत्पट्-उच्छिद्-उत्सद् (प्रे.) २. विनश् (प्रे.) । सं. पुं., प्र-वि-ध्वंसः, उत्पाटनं, उन्मूलनं, उत्सादनं इ. ।
ढहाने योग्य, वि., विध्वंसनीय, उन्मूलयितव्य ।

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

ढहानेवाला, सं. पुं., विध्वंसकः, उत्पाटकः ।

ढाँकना, क्रि. स. (सं. ढक्क = छिपाना) आ-प्र-समा-च्छद् (चु.), आ-प्र-सं-वृ (स्वा उ. से.), व्यव-पि,-धा (जु. उ. अ.), अवगुंठ् (चु.), निगुह् (भ्वा. उ. से., निगूहति-ते) २. आ-,स्तृ (स्वा. उ. अ.) स्त (क्र्. उ. से.) । सं. पुं., आ-प्र-समा,-च्छादनं, आ-सं-वरणं, पिधानं, अवगुंठनं, वेष्टनं; आस्तरणं इ. ।

ढाँकनेवाला, सं. पुं., आच्छादकः, आवरकः, पिधायकः ।

ढाँका हुआ, वि., आच्छादित, आवृत, पिहित इ. ।

ढाँचा, सं. पुं. (सं. स्थाता >) आकारः, आधारः, उपष्टंभः, संस्थानं, प्रारम्भिक,-रूपं-आधारः ।

ढाँपना, क्रि. स., दे. 'ढाँकना' ।

ढाई, वि. (सं. अर्द्धद्वितीय >) सार्द्धद्वि ।

ढाक, सं. पुं. (सं. आषाढकः) पलाशः, किंशुकः, पर्णः, यज्ञियः, रक्तपुष्पकः, वातहरः, समिद्वरः ।

—के तीन पात, मु., सदादरिद्रता, निरन्तर-निर्धनता ।

ढाड़, सं. स्त्री. (अनु.) चीत्कारः, आक्रन्दः, उत्क्रोशः २. गर्जितं, गर्जनं-ना, महा-गंभीर,-नादः ।

—मारना, मु., सचीत्कारं-साक्रंदं रुद् (अ. प. से.) ।

ढाढस, सं. पुं. (सं. दृढ >) धीरता, धैर्यं, चित्त-स्थैर्यं, शांतिः (स्त्री.) २. सम्-, आश्वासः-सनं, सांत्वनं-ना ३. साहसं, चित्तदार्ढ्यम् ।

—देना या बँधाना, मु., आ-समा-श्वस् (प्रे.) शां (सां)त्व् (चु.), विनुद् (प्रे.) २. प्रोत्सह् (प्रे.) ।

ढाना, क्रि. स., दे. 'ढहाना' ।

ढाबा, सं. पुं. (देश.) भोजन,-गृहं-शाला २. दे. 'परछत्ती' । ३. कुड्डुट,-कंडोलः- करंडः ३. जालम् , पाशः ।

ढारस, सं. पुं., दे. 'ढाढस' ।

ढाल[1], सं. स्त्री. (सं. न.) चर्मन् (न.), फलकः-कं, फलम् ।

ढाल[2], सं. स्त्री. (सं. धारः >) क्रमशः निम्नता, प्रावण्यं, प्रवणता-त्वं २. निम्नं, प्रवणं, प्रवण-अवसर्पि,-भूमिः (स्त्री.) ३. पर्वत-, उत्संगः-कटकः-कं, नितंबः ४. प्रकारः, विधिः (पुं.), गतिः (स्त्री.) ।

ढालना, क्रि. स. (हिं. ढाल) विलाप्य रच्-घट्-कल्प (प्रे.) निर्मा० (जु. आ. अ.) २. (मद्यं) पा (भ्वा. प. अ.) इ. दे. 'उँडेलना' ।

ढालवाँ, वि. (हिं. ढाल) दे. 'ढलवाँ' (१-२) ।

ढालिया, सं. पुं. (हिं. ढालना) पात्रकारः २. सुवर्णकारः ।

ढाली, सं. पुं. (सं.-लिन्) ढाल-चर्म-फलक,-धारिन् २. सैनिकः, योधः ।

ढासना, सं. पुं. (सं. धा=धारण + आसनं >) पृष्ठासनं (पृष्ठ-) अवष्टंभः-अवलम्बनं-आधारः २. उपधानं, उपबर्हः ।

ढिंढोरा, सं. पुं. (अनु. ढम + सं. ढोलः >) दे. 'डौंडी' (१-२) ।

ढिग, क्रि. वि. (सं. दिश् >) समीपं-पे । सं. स्त्री., सामीप्यं, नैकट्यं २. अंतः, प्रांतः ।

ढिठाई, सं. स्त्री. (हिं. ढीठ) धार्ष्ट्यं, प्रागल्भ्यं, वैयात्यं, अविनयः, अशिष्टता, धृष्टता ।

ढिबरी[1], सं. स्त्री. (हिं. डिब्बी)घृतैलदीपः-पिका ।

ढिबरी[2], सं. स्त्री. (हिं. ढपना) *वलयकील-करोधनी ।

ढिमका, सर्व. (हि. अमका का अनु.) अमुक ।

ढिलढिला, वि. (सं. शिथिल) कोमल, स्निग्ध-मेदुर, अकठिन ।

ढिल्लड़, वि. (हिं. ढीला) मंद, मंथर, अलस ।

ढीठ, वि. (सं. धृष्ट) अशिष्ट, प्रगल्भ, वियात, कु-दुः,-शील, विनयविहीन ।

ढील, सं. स्त्री. (हिं ढीला) काल,-अतिपातः-क्षेपः-यापनं-हरणं, विलम्बः, व्याक्षेपः २. आलस्यं, मंथरता ३. शिथिलता, शैथिल्यं, श्लथता ।

—करना, क्रि. अ., कालं क्षिप् (तु. प. अ.), विलम्ब् (भ्वा. आ. से.) ।

—देना, मु., यथेष्टमाचरितुं अनुमन् (दि. आ. अ.) अनुज्ञा (क्र्. उ. अ.) २. शिथिली कृ, श्लथ् (चु.) ।

ढीला, वि. (सं. शिथिल) प्र-,श्लथ, विगलित, स्रस्त, अदृढ, असंसक्त, २. अलस, तंद्रिल, तंद्राल, मंद, मंथर ३. काल,-अतिपातिन्-क्षेपकः ।

ढीलापन, सं. पुं., दे. 'ढील' ।

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

ढीह, सं. पुं., दे. 'टीला।
ढुँढवाना, क्रि. प्रे., व. 'ढूँढना' के प्रे. रूप।
ढुंढि, पुं. (सं.) गणेशः, गणपतिः।
ढुंढी, सं. स्त्री., (सं. तुंदी) १. तुंदः-दिः (स्त्री.), नाभिः (पुं. स्त्री.) २. वाहुः, भुजः-जी।
ढुकना, क्रि. अ. (देश.) प्रविश् (तु. प. अ.) २. सहसा अभिद्रु (भ्वा. प. अ.)-आक्रम् (भ्वा. प. से.; भ्वा. आ. अ.)।
ढुलकना, क्रि. अ., दे. 'लुढ़कना'।
ढुलकाना, क्रि. स., दे. 'लुढ़काना'।
ढुलना, क्रि. अ., दे. 'ढलकना' २. दे. लुढ़कना' ३. प्री (दि. आ. अ.) अनुग्रह् (क्र्. प. से.), दय्-अनुकंप (भ्वा. आ. से.)।
ढुलवाई, ढुलाई, सं. स्त्री. (हिं. ढुलवाना) वाहनं, नयनं, हरणं, भरणं २. वाहनवेतनं, प्रापणनिर्वेशः।
ढुलवाना, क्रि. प्रे., व. 'ढोना' तथा 'ढुलना' के प्रे. रूप।
ढुलाना, क्रि. प्रे., व. 'ढुलना' तथा 'ढोना' के प्रे. रूप।
ढूँढ, सं. स्त्री. (हिं. ढूँढ़ना) दे. 'खोज'।
ढूँढना, क्रि. क. (सं. ढुंढनं) दे. खोजना'।
ढूह-हा, सं. पुं. (सं. स्तूपः) राशिः (पु.). चयः २. वामलूरः, क्षुद्रपर्वतः।
ढेंकली, सं. स्त्री. (हिं. ढेंक) जलकर्षणयंत्रं २. धान्यकुट्टनी ३. वक्रतुंडयंत्रं (अर्क उतारने का यंत्र) ४. दे. 'कलावाजी'।
ढेर, सं. पुं. (हिं. धरना>?) राशिः (पुं.), निकरः, चितिः (स्त्री.), नि-सं-, चयः, स्तोमः, पुंजः, संभारः। वि., प्रचुर. प्रभूत, वहुल, भूरि, विपुल, पर्याप्त।
—लगाना, क्रि. स., राशी कृ, संचि (स्वा. उ. अ.)।
—करना, मु., व्यापद् मृ (प्रे.)।
ढेरी, सं. स्त्री. (हिं. ढेर) क्षुद्रराशिः (पुं.), दे. 'ढेर'।
ढेला, सं. पुं. (हिं. डला) लोगः, मृत्,-खंडः-पिंडः, लोष्टः-ष्टं, दरिणिः (पुं. स्त्री.) लोष्टुः, २. पिंडः, खंडः-डं ३. धान्यभेदः।
ढैया, सं. पुं. (हिं. ढाई) सार्द्धद्विसेरकात्मक-तोलः २. सार्द्धद्विगुणनसूची।
ढोंग, सं. पुं. (हिं. ढंग) आडंवरः, दंभः, पापंडः-डं, कपटं, छद्मन् (न.), वंचना, प्रतारणा।
ढोंगी-गिया, वि. (हिं. ढोंग) दांभिक, वंचक, प्रतारक, कापटिक, छाद्मिक, पापंडिन्।
ढोटा, सं. पुं. (हिं. ढोटी) पुत्रः २. वालकः।
ढोटा, सं. स्त्री. (सं. दुहितृ) पुत्री २. वालिका।
ढोना, क्रि. स. (सं. वोढ वा ऊढ, विपर्यय से ढोव) वह्-नी (भ्वा. उ. अ.), (उत्थाप्य) हृ (भ्वा. उ. अ.)। सं. पुं., वहनं, नयनं, हरणम्।
ढोनेवाला, सं. पुं., भार,-वाहकः-हारः।
ढोर, सं. पुं., दे, 'पशु'।
ढोल, सं. पुं. (सं.) आनकः, पटहः-हं, ढक्का २. कर्णदुंदुभिः (पुं.)।
ढोलक-की, सं. स्त्री. (सं. ढोलकं) भेरी-रिः (स्त्री.), दुंदुभिः (पुं.)।
ढोलकिया, सं. पुं. (सं. ढोलकं >) ढोलक-वादकः, पटहताडकः।
ढौंचा, सं. पुं. (सं. अर्द्ध+हिं. चार) सार्द्धचतु-र्गुणनसूची।

ण

ण, देवनागरीवर्णमालायाः पंचदशो व्यंजनवर्णः, णकारः।

त

त, देवनागरीवर्णमालायाः षोडशो व्यंजनवर्णः, तकारः।
तंक, सं. पुं. (सं.) भयं, भीतिः (स्त्री.), त्रासः २. कष्टमय-क्लेशमय,-जीवनम् ३. वियोगदुःखम् ४. टंकः, तक्षणी।
तंग, वि. (फ़ा.) दृढ, शैथिल्यशून्य, संसक्त, सुसंहत, गाढ २. अर्दित, उद्विग्न, संतप्त, पीडित, विकल ३. विस्तारविरहित, संबाध, संकट, संकु-(को) चित, संकीर्ण। सं. पुं., कक्ष्या, नध्री, वरत्रा।
तंग, वि. (फ़ा.) निर्धन, दरिद्र।

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

—दस्ती, सं. स्त्री. (फ़ा.) अकिंचनता, दारिद्र्यम् ।
—दिल, वि. (फ़ा.) कदर्य, कृपण, मितंपच ।
—आना, या होना, मु., खिद् (दि. रु. आ. अ.), संतप् (कर्म.) ।
—करना, मु., खिद्-व्यथ्-संतप् (प्रे.) ।
हाथ तंग होना, मु., दरिद्रा (अ. प. से.), निर्धन (वि.) भू ।
तंगी, सं. स्त्री. (फ़ा.) संकोचः, संकीर्णता, विस्ताराभावः, संबाधता २. दृढता, संहतिः-सुसंसक्तिः (स्त्री.), गाढता ३. क्लेशः, दुःखं ४. निर्धनता, दरिद्रता ५. न्यूनता ।
तंडुल, सं. पुं. (सं.) दे. 'चावल' ।
तंति, सं. स्त्री. (सं.) रज्जुः (स्त्री.), गुणः, वटी, रशना २. पंक्तिः (स्त्री.), श्रेणी-णिः (स्त्री.) ।
—पाल, सं. पुं., गोरक्षकः (२) अज्ञातवासे सहदेवस्य संज्ञा (महा०) ।
तंतु, सं. पुं. (सं.) सूत्र, तंत्रं, गुणः २. संतानः ।
—वाय, सं. पुं., दे. 'जुलाहा' ।
तंत्र, सं. पुं. (सं. न.) तंतुः (पुं.), सूत्रं २. तंतु,-वायः-वापः, कुविंदः, पटकारः ३. पट-निर्माणपरिच्छदः ४. संपत्तिः (स्त्री.) ५. अधीनता, पराश्रयः ६. शासनं, शासनपद्धतिः (स्त्री.) ७. कारणं ८. कार्यं ९. परिवारः १०. सेना ११. गारुडं, मंत्रः १२. औषधं १३. राज्यं १४. शास्त्रभेदः ।
तंत्री, सं. स्त्री. (सं.) तंत्रिः (स्त्री.), वीणादीनां गुणः २. गुणः, रज्जुः (स्त्री.) ३. वीणा, सतंत्रीकं वाद्यं ४. देहशिरा । सं. पुं. (सं. तंत्रिन्) वीणावादकः २. गायकः ३. सैनिकः ।
तंदुरुस्त, वि. (फ़ा.) स्वस्थ, नीरोग ।
तंदुरुस्ती, सं. स्त्री. (फ़ा.) स्वास्थ्यं, नीरोगता ।
तंदूर, सं. पुं. (फ़ा. तनूर) आपाकः, उरवा, कंदुः (पुं. स्त्री.) ।
तंदेही, सं. स्त्री. (फ़ा. तंदिही) परिश्रमः, प्रयत्नः ।
तंद्रा, सं. स्त्री. (सं.) निद्रा, आलस्यं, निद्रालुता, शयालुता, तंद्रालुता ।
तंद्रालु, वि. (सं.) तंद्रिल, निद्रालु, निद्रा,-पर-वश, सुषुप्सु, शयालु ।
तंबाकू, सं. पुं., दे. 'तमाकू' ।
तंबीह, सं. स्त्री. (अ.) शिक्षा, अनुशासनं, उपदेशः ।
तंबू, सं. पुं. (हिं तनना) पट,-कुटी-मंडपः-गृह, दृश्यं-ष्यं, केणिका, मलनः, स्थूलम् ।
शाही—, सं. पुं., उपकार्या ।
तंबूर, सं. पुं. (फ़ा.) पटहः, पणवः, मुरजः ।
तंबूरा, सं. पुं. (सं. तुंबरं) *तानपूरकः, वीणाभेदः ।
तंबोल, सं. पुं. (सं. तांबूलं >) *तांबूलं, *वर-शुल्कः-कं (पंजाब) २. *वरयात्रिव्ययः *तांबूलं (बुंदेलखंड) ।
तंबोली, सं. पुं. (हिं. तंबोल) तांबूलिकः, तांबूलविक्रेतृ (पुं.) ।
तअज्जुब, सं. पुं. (अ.) आश्चर्यं, विस्मयः ।
तअम्मुल, सं. पुं. (अ.) धैर्यं, शांतिः (स्त्री.) ।
तअल्लुकः, सं. पुं. (अ.) भूमिः (स्त्री.), क्षेत्रं २. प्रदेशः, प्रांतभागः, मंडलम् ।
—दार, सं. पुं., भू-क्षेत्र,-स्वामिन् , क्षेत्रपतिः ।
तअल्लुक, सं. पुं. (अ.) संबंधः, संसर्गः ।
तअस्सुब, सं. पुं. (अ.) धार्मिक-जातीय,-पक्षपातः ।
तईं, प्रत्य. (प्रा. हुंतो) प्रति,-अर्थम् ।
(इसका अनुवाद प्रायः द्वितीया या चतुर्थी के रूपों से करते हैं) ।
तक, अव्य. (सं. अंत + हिं. क) यावत् ,-पर्यन्तं-आ- (समास में या पंचमीयुक्त) । आमरणं, आमरणात् , मरणं यावत् , मरणपर्यन्तम् इ. ।
तकड़ा, वि. (हिं. तन + कड़ा) बलवत् , सबल, पुष्ट [तकड़ी (स्त्री.)-बलवती, सबला] ।
तकड़ी, सं. स्त्री. (देश.) तुला, मापनः, धटः, तौलम् ।
तक़दीर, सं. स्त्री., (अ.) भाग्यं, दैवम् ।
तकरार सं. स्त्री. (अ.) कलहः, विवादः ।
तक़रीर, सं. स्त्री. (अ.) भाषणं, व्याख्यानम् ।
तलका, सं. पुं. [सं. तर्कुः (पुं. स्त्री.)] तर्कुटं, कार्पासनासिका ।
तकली, सं. स्त्री. (हिं. तकला) तर्कुटी. क्षुद्रतर्कुः (पुं. स्त्री.) २. आवापनं, तंतुकीलः ।
तकलीफ़, सं. स्त्री. (अ.) कष्टं, क्लेशः, आपद् (स्त्री.) ।
तकल्लुफ़, सं. पुं.(अ.) शिष्टाचारः, नैयमिकता ।
—करना, शिष्टवत् आचर् (भ्वा. प. से.), शिष्टाचारं दृश् (प्र.) ।

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

बेतकल्लुफ़, वि., सरल, ऋजु ।

तक़वीयत, सं. स्त्री. (अ०) पुष्टिः-शक्तिः (स्त्री.) बलम् । २. सान्त्वनं-ना, आश्वासः, आश्वासनम् ।

तकसीम, सं. स्त्री. (अ.) अंशनं, विभागः, विभागपरिकल्पनं २. वंटनं, संप्रविभागः ।

—करना, क्रि. स., भज्-विभज् (भ्वा. उ. अ.) २. वंट्-व्यंश् (चु.) ।

तक़सीर, सं. स्त्री. (अ.) अपराधः, दोषः ।

तक़ाजा, सं. पुं. (अ.) (ऋणशोधनार्थं) अनुरोधः, प्रेरणा ।

—करना, ऋणशोधनार्थं सनिर्बंधं प्रार्थ् (चु. आ. से.) २. अनुरुध् (रु. प. अ.) ।

तक़ावी, सं. स्त्री. (अ.) कृषकेभ्यो बीजाद्यर्थं दत्तमृणम् ।

तकिया, सं. पुं. (फ़ा.) उपधानं, उपबर्हः २. आश्रयः, अवलंबः ३. यवनभिक्षुककुटी ।

—कलाम, सं. पुं. (फ़ा+अ.) *वागाश्रयः, *सहजवाक्यम् ।

तकुआ, सं. पुं., दे. 'तकला' ।

तक्र, सं. पुं. (सं. न.) पादांबुसंयुतं दधि (न.), मथितम् ।

तक्षक, सं. पुं (सं. न.) त्वक्षणं, तनूकरणं, काष्ठस्य समीकरणं २. उत्किरणं, उत्कीर्य मूर्तिनिर्माणम् ।

तक्षण, सं. पुं. (सं.) पातालस्थो नागविशेषः २. सर्पः, अहिः (पुं.) ।

तख़मीना, सं. पुं. (अ.) अनुमानं २. मूल्य-निरूपणम् ।

तख़्त, सं. पुं. (फा.) नृपासनं, सिंहासनं ; भद्रासनं २. फलकः-कं, मंचः ।

—नशीन, वि. (फ़ा) सिंहासन,-आसीन-आरूढ़ ।

—पोश, सं. पुं. (फ़ा.) मंचाच्छादनं, फलक-प्रच्छदः २. फलकः-कं, मंचः ३. दे. 'चौकी' ।

तख़्ता, सं. पुं. (फ़ा.) काष्ठ-दारु,-फलकः-, फलकं २. पट्टः-टं ३. पीठं, मंचः ४. शव,-फलकं-यानं ५. दे. 'क्यारी' ।

तख़्ती, सं. स्त्री. (फ़ा. तख़्ता) क्षुद्रफलकं, पीठिका २. (काष्ठ-) पट्टी-पट्टिका ।

तगड़ा, वि., दे. 'तकड़ा' ।

तगण, सं. पुं. (सं.) छन्दः शास्त्रे गणभेदः, अन्तलघुर्गणः । (उ० तूफान, तेंतीस)

तगर, सं. पुं. (सं. न.) वक्रं, कुटिलं, जिह्मं, दीपनम् ।

तगाड़, सं. पुं. (सं. तडागः-गम् >) सुधाकर्द-मादिमिश्रणार्थं कुंडम्, तडागः ।

तगादा, सं. पुं., दे. 'तक़ाजा' ।

तज, सं. पुं. (सं. त्वचं) बहुगंधं, मुखशोधनं, उत्कट, गंधवल्कं, सिंहलम् ।

तज़किरा, सं. पुं. (अ.) वर्णनं, चर्चा २. जीव-नचरितम् ।

तजर(रु)बा, सं. पुं. (अ.) संपरीक्षा, प्रयोगः, परीक्षा-क्षणं, २. अनुभवः, परीक्षालब्ध-अनुभव-जनित,-ज्ञानं, बुद्धिपरिपाकः ।

—कार, सं. पुं. (फ़ा.) अनुभविन् , बहुदर्शिन् ।

—करना, क्रि. स,. अनुभू २. परीक्ष् (भ्वा. आ. से.), प्रयुज् (चु.) ।

तजवीज, सं. स्त्री. (अ.) मतं, मतिः (स्त्री.), तर्कः २. निर्णयः ३. उपायः, युक्तिः (स्त्री.) ।

तट, सं. पुं. (सं. तटः-टं) तटी-टा, कूलं, तीरं, रोधस् (न.) । क्रि. वि., समीपं-पे ।

तटस्थ, वि (सं.) तीरस्थ, कूलस्थ २. निष्प-क्षपात, उदासीन, उभयसामान्य, सम,-भाव-दृष्टि ।

तड़, सं. पुं. (सं. तटः >) पक्षः, दलः-लम् ।

तड़[२], सं. पुं. (अनु.)प्रहारजः शब्दः, तड़त्कारः ।

तड़कना, क्रि. अ. (अनु. तड़) वि-, दल् (भ्वा. प. से.), स्फुट् (तु. प. से.) दॄ-भंज्-भिद् (कर्म.) २. क्रुध् (दि. प. अ.) ।

तड़का, सं. पुं. (हिं. तड़कना) प्रभातं, विभातं, उषस् (स्त्री. न.), प्रत्यूषः, अहर्मुखम् ।

तड़के, क्रि. वि., प्रत्यूषे, प्रभाते ।

तड़प, सं. स्त्री. (हिं. तड़पना) कंपः, स्पंदः, स्फुरितं २. संक्षोभः, उपप्लवः, आकुलत्वम् ।

तड़पना, क्रि. आ (अनु.) क्षुभ् (दि., क्र. प. से., भ्वा. आ. से.) आकुली-क्षुब्धी-विह्वली भू २. अत्यधिकं अभिलष् (भ्वा. उ. से.) ।

तड़पाना, क्रि. स., उद्विज् (प्रे.) प्र-वि-सं-क्षुभ् (प्रे.), आकुली कृ ।

तड़ड़नाफ, **तड़फना**, } क्रि. अ., दे. 'तड़पना' ।

तड़ाक-का, सं. पुं. (अनु.) ताडनध्वनिः (पुं.) २. त्रोटन-भंग,-शब्दः-विरावः ।

तडाक, सं. पुं. (सं. पुं. न.) दे. 'तालाब' ।

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

तड़ातड़, क्रि. वि., (अनु.) सतडतडशब्दम् ।
तडित् , सं. स्त्री. (सं.) विद्युत् (स्त्री.) चपला, चंचला, शंपा ।
—पति, सं. पुं. (सं.) मेघः, नीरदः ।
तड़ी, सं. स्त्री. (अनु०) चपेटः, चपेटिका, चपेट-करतल,-प्रहारः ।
तति, सं. स्त्री. (सं.) पंक्तिः-श्रेणी (स्त्री.), २. समूहः ३. विस्तारः ।
ततैया, सं. स्त्री. (सं. तप्त>) वरटः-टा-टी, इडाचिका, गंधोली, वरलः, वरोलः, विष,-शूकः-शृंगी ।
तत्काल, क्रि. वि. (सं.-लं.) तत्क्षणात्, अचिरादेव, सद्य एव, आशु, द्राक्, झटिति, तत्काले ।
तत्कालीन, वि. (सं.) तात्कालिक [-की (स्त्री.)], तदानींतन [-नी (स्त्री.)] ।
तत्क्षण, क्रि. वि. (सं. तत्क्षणं) दे. 'तत्काल' ।
तत्त्व, सं. पुं. (सं. न.) तथ्यं, याथार्थ्यं, सत्यं, सत्यता, वास्तविकता २. पंचभूतानि ३. मूलकारणं ४. सारः, सार,-अंशः-वस्तु (न.) ५. ब्रह्मन् (न.) ।
—अवधान, सं. पुं. (सं. न.) निरीक्षणं अवेक्षणम् ।
—ज्ञान, सं. पुं. (सं. न.) परमार्थ-ब्रह्म,-ज्ञानम् ।
—ज्ञानी, सं. पुं. (सं.-निन्) तत्त्वज्ञः २.
—दर्शी, सं. पुं. (सं.-र्शिन्) दार्शनिकः ।
—वादी, सं. पुं. (सं.-दिन्) तत्त्ववक्तृ (पुं.) २. यथार्थ,-स्पष्ट-वादिन् ।
वित् , सं. पुं. (सं.-विद्) दे. 'तत्त्वज्ञानी' ।
—विद्या, सं. स्त्री. (सं.) दर्शनशास्त्रम् ।
—वेत्ता, सं. पुं. (सं.-वेत्तृ) दे. 'तत्त्वज्ञानी' ।
तत्पर, वि. (सं.) आसक्त, निरत, व्यापृत, समाहित, अभिनि-नि,-विष्ट, व्यग्र २. एकाग्र, सुसमाहित, सावधान ३. संनद्ध, सज्ज, सज्जीभूत, उपस्कृत ।
तत्परता, सं. स्त्री. (सं.) अभिनिवेशः, आसक्तिः (स्त्री.), मनोयोगः, एकाग्रता, एकनिष्ठता, अनन्यचित्तता ।
तत्पुरुष, सं. पुं. (सं.) परमेश्वरः २. समासभेदः (व्या.) ।
तत्र, अव्य. (सं.) तस्मिन् स्थले-स्थाने ।
तथा, अव्य. (सं.) च, (द्वन्द्व समास से भी; उ. राम तथा श्याम = रामश्यामौ इ.) २. तादृश, तत्सम, तत्तुल्य ।
तथापि, अव्य (सं.) तदपि, तत्रापि, एवं सत्यपि ।
तथास्तु, अव्य. (सं.) एवं अस्तु-भवतु ।
तथ्य, सं. पुं. (सं. न.) यथार्थता, सत्यं, सत्यता ।
तदंतर / तदनंतर } क्रि. वि. (सं. तदनंतरं) तदनु, तत्पश्चात्, ततः, अथ, अनन्तरम् ।
तदनुरूप, वि. (सं.) तत्सदृश, तत्तुल्य, तदाकार ।
तदनुसार, वि. (सं.) तदनुकूल, तदनुरूप ।
तदबीर, सं. स्त्री. (अ.) साधनं, उपायः-युक्तिः (स्त्री.) ।
तदा, क्रि. वि. (सं.) तस्मिन् काले-समये ।
तदाकार, वि. (सं.) तद्रूप २. तन्मय ।
तदीय, सर्व. (सं.) तत्संबंधिन्, तस्य ।
तदुपरांत, क्रि. वि., दे. 'तदनंतर' ।
तद्धित, सं. पुं. (सं.) प्रत्ययभेदः (व्या.) २. तद्धितांतशब्दः ।
तद्रूप, वि. (सं.) सदृश-क्ष [शी-क्षी (स्त्री.)], तदाकार ।
तद्वत्, अव्य. (स.) तत्सदृशं, तत्तुल्यम् ।
तन, सं. पुं. [फा. । मि., सं. तनुः (स्त्री.)] देहः, शरीरं, वपुस् (न.), गात्रम् ।
—मन, सं. पुं., तनुमनसी-देहदेहिनौ (द्वि.) ।
—मन मारना, मु., कामान् अव-नि-सं-रुध् (रु. उ. अ.)
—मन से, मु., सावधानं, अनन्यवृत्त्या-सर्वात्मना एकाग्रचित्तेन (तृ. एक) ।
तनख्वाह, सं. स्त्री. (फा.) दे. 'वेतन' ।
तनना, क्रि. अ. (सं. तननं>) प्र-वि-तन् (कर्म.), प्र-, लंब् (भ्वा. आ. से.), प्रस् (भ्वा. प. अ.), विस्तृ (कर्म.) २. उच्छ्रित-उत्तान-उन्नत (वि.) स्था (भ्वा. प. अ.) ३. रुध् (दि. प. से; चु.) ।
तनय, सं. पुं. (सं.) पुत्रः, सूनुः (पुं.), आत्मजः ।
तनया, सं. स्त्री. (सं.) पुत्री, दुहितृ (स्त्री.), आत्मजा ।
तनहा, वि. (फा.) एकल, एकाकिन्, असहाय । क्रि. वि., एव, केवलम् ।

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

तनहाई, सं. स्त्री. (फा.) विजनता, विविक्तता २.विजनं, विविक्तं ३. एकाकिता, असहायता ।

तनाज़ा, सं. पुं. (अ.) कलहः, कलिः (पुं.) २. वैमनस्यं, शत्रुता ।

तनिक, वि. (सं. तनुक) अल्प, स्तोक, अणु । क्रि. वि., किंचित्, स्तोकं, ईषत्, मनाक् (सब अव्य.) ।

तनी, सं. स्त्री. (हिं. तानना) बंधः, बंधनं, बंधनी ।

तनु, सं. स्त्री. (सं.) तनूः (स्त्री.), देहः, कायः, वपुस् (न.) २. त्वच् (स्त्री.) ३. नारी । वि., कृश, दुर्बल, क्षीणकाय २. अल्प, दभ्र ३. कोमल, पेलव ४. सुंदर, उत्कृष्ट ।

—कूप, सं. पुं. (सं.) रो (लो)म,-कूपः-रंध्रम् ।

—धारी, वि. (सं.-रिन्) देहिन्, शरीरिन्, प्राणिन् ।

तनुज,सं. पुं. (सं.) पुत्रः, आत्मजः, सूनुः ।

तनुजा, सं. स्त्री. (सं.) पुत्री, आत्मजा, तनया ।

तनू, सं. पुं. (सं. स्त्री.) देहः, कायः ।

—उद्भव, सं. पुं. (सं.) पुत्रः, तनुजः ।

—उद्भवा, सं. स्त्री. (सं.) पुत्री, तनुजा ।

तनूर, दे. 'तंदूर' ।

तन्मनस्क, वि. (सं.) तल्लीन, तन्मय ।

तन्मात्रा, सं. स्त्री. (सं.-त्रम्) सूक्ष्ममूलतत्त्वम् (उ. शब्दः, स्पर्शः, रूपं, रसः, गंधः) ।

तन्मय, वि. (सं.) निः, मग्न, दत्तचित्त, अवहित, आसक्त, लीन, निरत,-पर,-परायण ।

तन्वी, सं. स्त्री. (सं.) तन्वंगी, कोमलांगी, कृशांगी ।

तप[1], सं. पुं. [सं. तपस् (न.)] तपस्या, तपः, व्रतादानं, नियमस्थितिः (स्त्री.), परिव्रज्या, व्रतचर्या ।

—करना, क्रि. अ., तपस्यति (ना. धा.), तपः तप् (दि. आ. आ.) या आचर् (भ्वा. प. से.) ।

तप[2], सं. पुं. (सं.) तापः, दाहः, उष्मः, ऊष्मन् (पुं.) २. ग्रीष्मः ३. ज्वरः ।

तपक, सं. स्त्री. (हिं. तपकना) आकस्मिक,-प्रकंपः-स्फुरणं-आकर्षः ।

तपकना, क्रि. अ. (हिं. तमकना) स्फुर् (तु. प. अ.), अकस्मात् कंप्-स्पंद् (भ्वा आ. से.) ।

तपन, सं. पुं. (सं. ज.) तापः, उष्मन् (पुं.), दाहः, तपः २. सूर्यः ३. सूर्यकांतरत्नं ४. ग्रीष्मः ।

तपना, क्रि. अ. (सं. तपनं) तप् (भ्वा. प. अ.), दीप् (दि. आ. से.), उष्णी भू २. संतप्-क्लिश्-पीड् (कर्म.), व्यथ् (भ्वा. आ. से.) ।

तपश्चर्या, तपस्या, } सं. स्त्री. (सं.) दे. 'तप'[1] ।

तपस्विनी, सं. स्त्री. (सं.) तापसी, तपोधना २. प्रतिव्रता ३. दीना ।

तपस्वी, सं. पुं. (सं.,स्विन्) तापसः, तपोधनः, पारि (र) कांक्षिन्, पारिकांक्षकः, यतिः (पुं.) २. दीनः, दरिद्रः ।

तपाक, सं. पुं. (फा.) आवेशः, आवेगः, २. शीघ्रता ।

तपाना, क्रि. स., ब. 'तपना' के प्रे. रूप ।

तपी, सं. पुं. (हिं. तप) दे. 'तपस्वी' ।

तपेदिक, सं. पुं. (फ़ा. तप+अ. दिक्) क्षयरोगः, राजयक्ष्मन् (पुं.) ।

तपोधन, सं. पुं. (सं.) तपो,-निष्ठः-निधिः-राशिः (पुं.), तपस्विन् ।

तपोबल, सं. पुं. (सं. न.) तपस्याशक्तिः (स्त्री.) ।

तपोभूमि, सं. स्त्री. (सं.) तपस्यास्थानम् ।

तपोवन, सं. पुं. (सं. न.) तपस्यारण्यम् ।

तप्त, वि. (सं.) उष्ण, तापित, दे. 'गरम' २. दुःखित, पीडित, क्लेशित ।

तफरीक, सं. स्त्री. (अ.) व्यवकलनं, विवर्जनं, उद्धारः ।

—करना क्रि. स., व्यवकल्-विवृज्-ऊन् (चु.), उद्धृ (भ्वा. प. अ.) ।

तकरीह, सं. स्त्री. (अ.) प्रसन्नता, मोदः २. विनोदः, परिहासः ३. भ्रमणम् ।

तफ़सील, सं. स्त्री. (अ.) विवरणं, विस्तारः २. विस्तृतवर्णनं ३. टीका, व्याख्या ४. सूची ।

तब, क्रि. वि. (सं. तदा) तदानीं, तस्मिन् काले २. ततः, तत्पश्चात्, तदनु, तदनन्तरं, ततः परं ३. अतः, अनेन कारणेन, इति हेतोः ।

—तक, क्रि. वि., तावत्, तावत्,-कालं-पर्यन्तम् ।

—भी, क्रि. वि., तदापि २. तथापि, तदपि, एवं सत्यपि ।

—से, क्रि. वि., ततः-तदा,-प्रभृति-आरभ्य ।

—ही, क्रि. वि., तदैव, तत्कालं, तत्क्षणं, द्राक् ।

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

तबदील, वि. (अ.) परिवर्तित, अन्यथाकृत । —करना, क्रि. स., परिवृत् (प्रे.) ।

तबदीली, सं. स्त्री. (अ.) परिवर्तः,र्तनं, परिवृत्तिः (स्त्री.), विपर्ययः २. विकारः, विकृतिः (स्त्री.) ।

तबलची, सं. पुं. (अ. तबलः)*तबलकवादकः ।

तबला, सं. पुं. (अ. तबलः)* तबलकौ (द्वि.), वाद्यभेदः ।

तबाशी(ख़ी)र, सं. पुं. (सं. तवक्षीरं) यवजं, यवजोद्भवं, पयःक्षीरं, गोधूमजं २. वंशरोचना, त्वक्क्षीरा-री, वंशी, वैणवी ।

तबाह, वि. (फ़ा.) ध्वस्त, नष्ट, उत्सन्न ।

तबाही, सं. स्त्री. (फ़ा.)प्र-वि,-ध्वंसः, वि-,नाशः ।

तबि(बी)अत, सं. स्त्री. (अ.) चित्तं, मानसं, चेतस्-मनस् (न.) अन्तःकरणं, हृदयं, स्वान्तं २. प्रकृतिः (स्त्री.), स्वभावः । —आना, मु. स्निह् (दि. प. से.), अनुरंज् (कर्म.) । —बिगड़ना, मु., रुग्ण् (वि.) भू; विवमिषति (सन्नंत) ।

तबीब, सं.पुं. (अ.) वैद्यः, चिकित्सकः, भिषज्(पुं.)।

तबेला, सं. पुं. (अ.) मंदुरा, अश्व-वाजि,-शाला ।

तभी, क्रि. वि. (हिं. तब+ही) तत्क्षणं, तत्कालं, तदैव २. तेनैव कारणेन, इति हेतोः । —से, क्रि. वि., तदारभ्य, ततः प्रभृति ।

तमंचा, सं. पुं. (फ़ा.) दे. 'पिस्तौल' ।

तम, सं. पुं. [सं. तमस् (न.)] अन्धकारः, तिमिरं, ध्वान्तं, तमिस्रं-स्रा २. प्रकृतेस्तृतीयो गुणः (सांख्य) ३. क्रोधः ४. अज्ञानं, अविद्या ५. कालिमन् (पुं.), श्यामता ६. मोहः ७. पापं ८. नरकः-कम् ।

तमअ, स्त्री. (अ.) इच्छा २. लोभः ।

तमक, सं. स्त्री. (हिं. तमकना) आवेशः, उद्वेगः २. क्षिप्रता, त्वरा ३. क्रोधः, कोपः ४. दर्पः, अभिमानः ५. (कोपादिभ्यः) अरुणाननता ।

तमकना,क्रि. अ.(अनु.)(कोपादिभ्यः) अरुणाननलोहितवदन (वि.) भू २. अत्यन्तं कुप् (दि. प. से.) ।

तमगा, सं. पुं. (तु.) पदक, कीर्ति-प्रतिष्ठा,-मुद्रा ।

तमचर, पुं. (सं. तमीचरः) राक्षसः, निशाचरः, पिशाचः २. उलूकः, घूकः, कौशिकः ।

तमचुर-,चूर-चोर, सं. पुं. (सं. ताम्रचूडः) कुक्कुटः, कालज्ञः, चरणायुधः ।

तमतमाना, क्रि. अ. (सं. ताम्रं>) (क्रोधातपादिभ्यो मुखं) अरुणी-रक्ती भू, अरुणाननलोहितमुख (वि.) जन् (दि. आ. से.) ।

तमतमाहट, सं. स्त्री. (हिं. तमतमाना) (क्रोधादिजा) अरुणवदनता, लोहिताननता ।

तमन्ना, सं. स्त्री. (फ़ा.) अभिलाषः, आकांक्षा ।

तमस, सं. पुं., दे. 'तम' ।

तमस्सुक, सं. पुं. (अ.) ऋणपत्रं, समयलेखः, आधिकरणिकपत्रम् ।

तमा, सं. स्त्री. (अ. तमअ) लोभः, वित्तेहा ।

तमाकू-खू, सं. पुं. (पुर्त. टबैको) ताम्रकूटः, तमाखुः. वज्रभृंगी, कृमिघ्नी, धूम्रपत्रिका, क्षारपत्रा, सुरती । —पीना, क्रि. स., धूमं पा (भ्वा. प. अ.), धूमपानं कृ ।

तमाचा, सं. पुं. (फ़ा.) दे. 'चपत' ।

तमाम, वि. (अ.) समस्त, समग्र, सम्पूर्ण २. समाप्त, अवसित । काम तमाम करना, मु., व्यापद्-सृ (प्रे.) ।

तमाल, सं. पुं. (सं.) कालस्कन्धः, काल-नील,-तालः, महाबलः ।

तमाशबीन, सं. पुं. (अ. तमाशः+फ़ा बीन) दर्शकः, प्रेक्षकः २. पार्श्व-समीप,-स्थः ३. सामाजिकः, पारिषद्यः ४. वेश्यागामिन् ।

तमाशबीनी, सं. स्त्री. (अ.+फ़ा.) वेश्यागामित्वम् ।

तमाशा, सं. पुं. (अ.) नाटकं २. रूपकं कौतुकं, चमत्कारः, दृश्यं ३. अद्भुत-विलक्षण,-व्यापारः । —करना, क्रि. स., नट्-निरूप्-प्रयुज् (चु.), अभिनी (भ्वा. प. अ.) । —करनेवाला, सं. पुं., नटः, अभिनेतृ (पुं.) । —गाह, सं. स्त्री., रंग,-शाला-भूमिः (स्त्री.), नाटकगृहम् ।

तमाशाई, दे. 'तमाशबीन' ।

तमीज, सं. स्त्री. (अ.) विवेकः, परिच्छेदः, विवेचनशक्तिः (स्त्री.) २. ज्ञानं, बोधः ३. सभ्यता, शिष्टाचारः, विनयः ।

तमोगुण, सं. पुं. (सं.) प्रकृतेस्तृतीयः (अधमः) गुणः ।

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

तमोगुणी, वि. (सं.-णिन्) अधमवृत्तिक, तमोगुणप्रधान ।
तमोली, सं. पुं. दे. 'तम्बोली' ।
तय, वि. (अ.) समाप्त, अवसित २. निश्चित, नियत ३. निर्णीत ।
तरंग, सं. स्त्री. (सं. पुं.) भंगः, भंगी-गिः(स्त्री.) वीची-चिः (स्त्री.), ऊर्मी-र्मिः (स्त्री.). लहरी-रिः (स्त्री.) कल्लोलः, जललता, उत्कलिका २. स्वरलहरी, ३. मानसलहरी, चित्ततरंगः, छन्दः, छन्दस् (न.) ।
तरंगित, वि. (सं.) कल्लोलमय [यी (स्त्री.)], नतोन्नत- भंगिमत् [ती (स्त्री.)]।
तरंगी, वि. (सं.—गिन्) सभंग, ऊर्मिमत् , कल्लोलवत् २. स्वैर, स्वैरिन् , कामचारिन् , स्वच्छन्द ।
तर, वि. (फ़ा.) आर्द्र, स्निग्ध २. शीतल ३. हरित, सरस ४. स्निग्ध, चिक्कण ५. समृद्ध, धनाढ्य ।
तरकश, सं. पुं. (फ़ा.) इषुधिः (पुं.), निषंगः, तूणीरः-रम् ।
तरकारी, सं. स्त्री. (फ़ा. तरः=शाक) शाकः-कं, शिग्रुः (पुं.), हरितकं २. पक्वशाकः-कं, व्यञ्जनं ३. मांसम् (पंजाब)।
तरकी, सं. स्त्री. [सं. ताटं(डं)कः] कर्ण,-दर्पणः-मुकुरः, कर्णिका, कर्णभूषणभेदः ।
तरकीब, सं. स्त्री. (अ.) युक्तिः (स्त्री.), उपायः, प्रयोगः २. रचनाप्रणाली, निर्माण-विधिः (पुं.) ।
तरक्की, सं. स्त्री. (अ.) उन्नतिः-वृद्धिः (स्त्री.)।
तरखान, सं. पुं. (सं. तक्षन्) वर्द्धकिनः-किन् तक्षकः, त्वष्टृ, छादः ।
तरग़ीब, सं. स्त्री. (अ.) प्रेरणा, उत्तेजना, प्रोत्साहनम् ।
—देना, क्रि. स., प्रेर्-प्रोत्सह् उत्तिज् प्रवृत् (प्रे.)।
तरजीह, स्त्री. (अ.) अधिमानं, अधिक,-रुचिः (स्त्री.)-अनुरागः-मानं, वृतिः (स्त्री.) वरता ।
तरजुमा, सं. पुं. (अ.) दे. 'अनुवाद' ।
तरजुमान, सं. पुं. (अ.) अनुवादकः, भाषान्तरकारः ।
तरण, सं. पुं. (सं. न.) पारगमनं, प्लवनपूर्वक-देशान्तरगमनं, सन्तरणम् ।
तरणि, सं. स्त्री. (सं.) तरणी, नौका । सं. पुं., सूर्यः २. किरणः ।
—तनूजा, सं. स्त्री. (सं.) यमुना ।
तरणी, सं. स्त्री. (सं.) दे. 'नाव' ।
तरतीब, सं. स्त्री. (अ.) अनु-,क्रमः, विन्यासः, व्यवस्था, यथास्थानं स्थितिः (स्त्री.) ।
—वार, क्रि. वि., यथाक्रमं, क्रमशः, क्रमेण ।
तरदीद, सं. स्त्री. (अ.) प्रत्याख्यानं, खण्डनं, निरासः, निराकरणम् ।
तरना, क्रि. स. (सं. तरणं) दे. 'तैरना' (२.), मोक्षं-मुक्तिं-निःश्रेयसं अधिगम् ।
तरफ़, सं. स्त्री. (अ.) दिश् (स्त्री.), दिशा, आशा, काष्ठा, ककुभ्-हरित् (स्त्री.) २. पार्श्वः-श्वं, पक्षः । क्रि. वि., अभि, प्रति, अभिमुखं, उद्दिश्य, दिशि, दिशायाम् ।
—दार, सं. पुं., पक्षपातिन् , पक्ष्यः, पक्षीयः, पार्श्व(श्विव)कः ।
—दारी, सं. स्त्री., पक्ष,-पातः-अवलम्बनं-ग्रहणम्।
—दारी करना, क्रि. स., पक्षं अवलम्ब् (भ्वा. आ. से.)-ग्रह् (क्र्. प. से.) ।
दोनों—क्रि. वि., उभयतः, उभयत्र ।
सब—या चारों—, क्रि., वि., समन्तात् , समन्ततः, चतुर्दिक्षु, सर्वत्र, विश्वतः, परितः, अभितः ।
तरफ़ैन, सं. पुं. (अ.) उभौ पक्षौ, अर्थिप्रत्यर्थिनौ ।
तरबूज़, सं. पुं. (सं. तरंबुजं । मि. फ़ा. तर्बुज़) कालिंगं, गोडुंबं, सेटु, (न.), मांसफलम् ।
तरमीम, सं. स्त्री. (अ.) संशोधनं, विशुद्धिः (स्त्री.)।
तरल, वि. (सं.) चंचल, कम्प्र, कंपन २. अनित्य, क्षणिक ३. द्रव, प्रवाहिन् ४. भासुर, भास्वर ।
तरला, सं. स्त्री. (सं.) यवागूः, श्राणा, उष्णिका २. सुरा ३. मधुमक्षिका ।
तरवन, सं. पुं., दे, 'तरकी' २. दे. 'कर्णफूल' ।
तरवर, सं. पुं. (सं. तरुवरः) महावृक्षः २. पादपः ।
तरस, सं. पुं. (सं. त्रसः >) कृपा, अनुकम्पा, करुणा ।
—खाना, क्रि. स., दय् (भ्वा. आ. से; षष्ठी के साथ), अनुकम्प् (भ्वा. आ. से.), दयां कृ (सप्तमी के साथ)।
तरसना, क्रि. अ. (सं. तर्षणं) तृष् (दि. प.

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

से,), अत्यन्तं अभिलष् (भ्वा. दि. प. से.)-स्पृह् (चु., चतुर्थी के साथ)-कांक्ष-वांछ् (दोनों भ्वा. प. से.), लब्धुं आकुलीभू ।

तरसाना, क्रि. स., व. 'तरसना' के प्रे. रूप ।

तरसों, क्रि. वि. (सं. तृतीय + श्वस्) तृतीयो गत आगामी वा दिवसः; *इतरश्वः (अव्य.) ।

तरह, सं. स्त्री. (अ.) जातिः (स्त्री.), प्रकारः, भेदः,-विधा (समासांत में) २. रचनाप्रकारः, घटनं ३. शैली, रीतिः (स्त्री.) प्रणाली ४. युक्तिः (स्त्री.), उपायः ५. वत्-इव-तुल्य,-उपम ।

अच्छी—, क्रि. वि., सम्यक्, साधु, सुष्ठु (सब व्य), सु-(समासादि में) ।

इस—, क्रि. वि., इत्थं, एवं, अनया रीत्या ।

उस—, क्रि. वि., तथा, तया रीत्या ।

किस—, क्रि. वि., कथं, केन प्रकारेण ।

जिस—, क्रि. वि., यथा, येन प्रकारेण ।

बुरी—, क्रि. वि., कु-,दुर्-,असम्यक् इ. ।

हर—, क्रि. वि.- सर्वथा, सर्वप्रकारेण ।

—देना, मु. उपेक्ष-क्षम् (भ्वा. आ. से.) ।

तराई, सं. स्त्री. (सं. तलं >) उपत्यका, पर्वतासन्नभूः (स्त्री.) ।

तराज़ू, सं. पुं. स्त्री. (फा.) तुला, मापनः, धटः, तुलायंत्रं, तौलम् ।

—की रस्सी, सं. स्त्री., शिक्या ।

तराबोर, वि. (फ़ा. तर + हि. बोरना) अति,-सिक्त-क्लिन्न ।

तरावट, सं. स्त्री. (फ़ा. तर) आर्द्रता, क्लिन्नता २. शीतलता ३. क्लांतिहरः पदार्थः ४. स्निग्धभोजनम् ।

तराशना, क्रि. स. (फा.) दे. 'काटना', 'कतरना' ।

तरी,[1] सं. स्त्री. (सं.) तरिः (स्त्री.), नौका ।

तरी,[2] सं. स्त्री. (फ़ा.) आर्द्रता, क्लिन्नता २. शीतलता ३. उपत्यका ४. कच्छः-च्छम् ।

तरीका, सं. पुं. (अ.) रीतिः (स्त्री.), प्रकारः, शैली २. आचारः, व्यवहारः, अनुसारः ३. उपायः, युक्तिः (स्त्री.) ।

तरु, सं. पुं. (सं.) पादपः, द्रुमः, दे. 'वृक्ष' ।

तरुण, वि. तथा सं. पुं. (सं.) युवकः, दे. 'जवान' ।

तरुणाई, सं. स्त्री. (सं. तरुण >) यौवनम्, दे. 'जवानी'

तरुणी, वि. स्त्री. तथा सं. स्त्री. (सं.) युवतिः (स्त्री.) दे. 'युवती' ।

तरेरना, क्रि. स., (सं. तिर्यक् + हि. हेरना) तिर्यक्-वक्रं-साचि (सब अव्य०) दृश् (भ्वा. प. अ.) २. तर्जनवर्जनार्थं वक्रं ईक्ष् (भ्वा. आ. से.)

तरोई, सं. स्त्री., दे. 'तुरई' ।

तरौना, सं. पुं., दे. 'तरकी' २. दे. 'कर्णफूल'

तर्क, सं. पुं. (सं.) हेतुः (पुं.), युक्तिः-उपपत्तिः (स्त्री.) २. आन्वीक्षिकी, न्यायः, ऊहापोहः ३. विदग्धोक्तिः (स्त्री.) ४. व्यंग्यम् ।

—वितर्क, सं. पुं. (सं.) वादविवादः, वाद-प्रतिवादः, हेतुवादः २. संशयः, संदेहः, विकल्पः, आ-परि-वि-शंका ।

—विद्या, सं. स्त्री. (सं.) तर्क-न्याय,-शास्त्र-विद्या, तर्कः, न्यायः ।

तर्के, सं. पुं. (अ.) त्यागः, विसर्जनम् ।

तर्कश, सं. पुं., दे. 'तरकश' ।

तर्ज़, सं. स्त्री. (अ.) रीतिः (स्त्री.), शैली, प्रकारः २. रचनाप्रकारः, घटनम् ।

तर्जन, सं. पुं. (सं. न.) तर्जना, भयप्रदर्शनं, भर्त्सनम्, दे. 'डाँटडपट' ।

तर्जना, क्रि. स. (सं. तर्जनं) दे. 'डाँटना' ।

तर्जनी, सं. स्त्री. (सं.) प्रदेशिनी, अंगुष्ठ-समीपांगुली ।

तर्पण, सं. पुं. (सं. न.) तृप्तिः (स्त्री.), प्रीणनं, संतापणं २. पित्रादिभ्यो जलदानं (धर्म.) ।

तल, सं. पुं. (सं. पुं. न.) मूलं, अधोभागः, २. बुध्नः, उपष्टम्भः ३. पाद-चरण,-तलं ४. करतलः-लं, प्रहस्तः । ४. चपेटः, चर्पटः नरक-पाताल,-विशेषः ।

तलक, अव्य., दे. 'तक' ।

तलख़, वि. (फ़ा.) कटु, कटुक २. अप्रिय, अनिष्ट ।

तलछट, सं. स्त्री. (सं. तलं + हिं. छँटना) तलमलं, किल्कं, किट्टं, खलं, मलः-लं, शेषः-षं, उच्छिष्टं, अव-सं,-करः, असारः ।

तलना, क्रि. सं. (सं. तलनं), (घृततैलादिषु) भ्रस्ज् (तु. उ. अ. भृज्जति, चु. भर्जयति)-पच् (भ्वा. प. अ.)-भृज् (भ्वा. आ. से., भर्जते), तल् (भ्वा, प. से., पाकराजेश्वर) ।

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

सं. पुं., (घृतादिषु) भर्जनं-पचनम् । तला हुआ, वि., भ्रष्ट, भर्जित, घृतपक्व इ. ।

तलफना, क्रि. अ., दे. 'तड़पना' ।

तलफी, सं. स्त्री. (फ़ा.), ध्वंसः, विनाशः २. क्षतिः-हानिः (स्त्री.) ।

तलफ़्फ़ुज, सं. पुं. (अ.) उच्चारणम्, भाषण-विधिः (पुं.) ।

तलब, सं. स्त्री. (अ.) वेतनं, भृतिः (स्त्री.) २. आकारणं, आह्वानं ३. लिप्सा ।

तलबगार, वि. (फ़ा.) इच्छुक २. प्रार्थिन् ।

तलबाना, सं. पुं. (फ़ा.) *आकारण-आह्वान,-शुल्कः-कं २. साक्ष्यशुल्कः-कम् ।

तलबी, सं. स्त्री. (अ.) आकारणं-णा, आह्वानम् ।

तलवा, सं. पुं. (पुं. तलः-लं) चरण-पाद,-तलम् ।

—चाटना,
—तले हाथ रखना, } मु, दे. 'खुशामद करना'।
—सहलाना,

—तलवार, सं. स्त्री. [सं. तरवारिः (पुं.)] खड्गः, असिः. निस्त्रिंशः, चंद्रहासः, कौक्षेयकः, करवा(पा)लः, कृपाणः-णी, ऋ(रि)ष्टि. (पुं.), श्रीगर्भः, विजयः, दुरासदः, धर्मपालः ।

—खींचना, क्रि. स., असिं कोशात् उद्धृ-निष्कृष् (भ्वा. प. अ.) ।

—चलाना, क्रि. स., खड्गं चल् (प्रे.), असिना प्रहृ (भ्वा. प. अ.) ।

—चलानेवाला, सं. पुं., आसिकः, खड्गधरः, खड्गिन् ।

तला, सं. पुं. (सं. तलः-लं) अधोभागः, बुध्नः २. उपानत्तलम् ।

तलाक, सं. पुं. (अ.) विवाह-दांपत्य-उच्छेदः-निराकरणं, त्यागः ।

तलाश, सं. स्त्री. (तु.) अन्वेषणं, मार्गणम् ।

तलाशी, सं. स्त्री. (फ़ा.) देह-गेह-परिच्छद,-अन्वेषणा-निरीक्षा ।

—लेना, क्रि. स., देहं-गेहं-परिच्छदं अन्विष् (दि. प. से.)-निरूप् (चु.)-निरीक्ष् (भ्वा. आ. से.) ।

तली, सं. स्त्री., दे. 'तल' तथा 'तला' ।

तलुआ, सं. पुं., दे. 'तलवा' ।

तले, क्रि. वि. (सं. तलं >) अधः, अधस्तात्, नीचैः (सब अव्य.) ।

—ऊपर या ऊपर तले, क्रि. वि., अन्योन्यस्य अधः, अधस्तात्, उपरि, उपरिष्टात् वा २. अक्रमं, विपर्यस्तं, संकीर्णं, अव्यवस्थितम् ।

तलैया, सं. स्त्री. (हिं. ताल) क्षुद्र-लघु,-तडागः-कासारः-सरस् (न.),

तल्प, सं. पुं. (सं. पुं. न.) आस्तरः, आस्तरणम् *विस्तरः २. पत्नी, भार्या ।

—कीट, सं. पुं. (सं.) ओकणः, मत्कुणः, उद्दंशः ।

—ज, सं. पुं. (सं.) नियोगज,-पुत्रः-सुतः, क्षेत्रजः ।

तल्ला, सं. पुं. (सं. तलः-लम्) उपानत्तलम् । २. दे. 'मंज़िल' ।

तवर्ग, सं. पुं. (सं.) तकारादिवर्णपंचकम् ।

तवा, सं. पुं. (हिं. तवना) तप्तकम् ।

तवाज़ा, सं. स्त्री. (अ.) सत् ,-कारः-कृतिः-(स्त्री.)-क्रिया, अतिथि,-सेवा-सत्कारः, आतिथ्यं २. निमंत्रणम् ।

तवारीख़, सं. स्त्री. (अ., तारीख़ का बहु.) दे. 'इतिहास' ।

तवी, सं. स्त्री. (हिं. तवा) ऋचीक(जी)षम् ।

तशख़्ख़ीस, सं. स्त्री. (अ.) रोग,-निर्णयः-निदानम् ।

तशरीफ़, सं. स्त्री. (अ.) महत्त्वं, गुरुत्वं, प्रतिष्ठा ।

—रख़ना, मु. उपविश् (तु. प. अ.), विराज् (भ्वा. आ. से.)

—लाना, मु., आगम् , आया (अ. प. अ.) ।

—ले जाना, मु., प्रस्था (भ्वा. आ. अ.), प्रया (उक्त दोनों मुहावरों में आदरार्थ बहुवचन का प्रयोग करना चाहिए । उ. आप तशरीफ़ रखिए = उपविशन्तु श्रीमंतः इ.) ।

तश्तरी, सं. स्त्री. (फ़ा.) शरावि(का, *स्थालकम् ।

तसकीन, सं. स्त्री. (अ.) आ-समा,-श्वासः-श्वासनं, धैर्यम् ।

तसदीक़, सं. स्त्री. (अ.) सत्यापनं, सत्याकारः ।

—करना, क्रि. स., सत्यापयति (ना. धा.), प्रमाणी कृ ।

तसबीह, सं. स्त्री. (अ.) जपमाला, माला ।

तसमा, सं. पुं. (फ़ा) चर्म,पट्टः-बंधः, वध्री, नध्री २. उपानद्बंधः ।

तसला, सं. पुं. (फ़ा. तश्त) ऋचीकम् ।

तसलीम, सं. स्त्री. (अ.) नमस्ते, नमस्कारः, प्रामणः २. अभ्युपगमः, अंगी-स्वी,-कारः ।

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

तसल्ली, सं. स्त्री. (अ.) सांत्वना, आश्वासनं २. शांतिः (स्त्री.), धैर्यम् ।
तसवीर, सं. स्त्री. (अ.) चित्रं, आलेख्यम् ।
तस्कर, सं. पु. (सं.) चौरः २. दस्युः ।
तस्सू, सं. पुं. (सं. त्रिशूकः>) पञ्चाङ्गुलमानम् ।
तह, सं. स्त्री. (फ़ा.) तलं, अधस्तलं, अधोभागः, मूलं २. बुध्नः, उपष्टंभः ३. तलं, पृष्ठं, पृष्ठभागः ४. स्तरः ५. व्यावृत्तिः (स्त्री.), व्यावर्तनं, पुटः-टं, भंगः ६. तत्त्वं, सारः ।
—करना, क्रि. स., पुटयति (ना. धा.), व्यावृत् (प्रे.), गुणी-पुटी कृ ।
—तक पहुँचना, मु., तत्त्वं अवगम्, रहस्यं विद् (अ. प. से.) ।
तहक़ीक़ात, सं. स्त्री. (अ. तहक़ीक़ का बहु.) अनुसंधानं, अन्वेषणं, गवेषणा ।
तहख़ाना, सं. पुं. (फ़ा.) भूमिगृहं, तलगृहं, गुप्तिः (स्त्री.), आंतर्भौमकोष्ठः ।
तहज़ीब, सं. स्त्री. (अ.) सभ्यता, शिष्टाचारः ।
तहमत, सं. स्त्री. (फ़ा. तहबंद) *पुटबंधः, *धौतिका ।
तहरीर, सं. स्त्री. (अ.) लेखः, लिखितं २. लेखशैली ३. नि-प्र,-बंधः ४. प्रमाणपत्रम् ।
तहलका, सं. पुं. (अ.) दे. 'खलबली' ।
तहस-नहस, वि. (देश.) वि-, नष्ट,प्र-वि-,ध्वस्त ।
तहसील, सं. स्त्री. (अ.) करोद्ग्राहः, राजस्वसंग्रहः, समाहरणं २. राजस्वं, आयः, आगमः, उदयः ३. उपमंडलं ४. उपमंडलेश्वरकार्यालयः ।
—दार, सं. पुं., उपमंडलेशः-श्वरः ।
—दारी, सं. स्त्री. उपमंडलेश्वर,-कार्यं-पदम् ।
नायब तहसीलदार, सं. पुं. (फ़ा.+अ.+फ़ा.) उपमंडलेश्वरसहायकः ।
तहाँ, क्रि. वि. (सं. तद्>) तत्र, तस्मिन् स्थाने, तत्स्थाने ।
ताँगा, सं. पुं., दे. 'टाँगा' ।
तांडव, सं. पुं. (सं. न.) पुरुषनृत्यं २. उद्धतनृत्यं ३. शिवनृत्यं ४. तृणभेदः ।
ताँत, सं. स्त्री. (सं. तंतुः) आंत्र,-सूत्रं-गुणः २. मौर्वी, प्रत्यञ्चा, धनुर्गुणः ३. सूत्रं, गुणः ४. वीणातंत्रं-त्री ।
ताँता, सं. पुं. [सं. ततिः (स्त्री.)] पंक्तिः (स्त्री.), श्रेणी-णिः (स्त्री.) ।
ताँती, सं. स्त्री. (हिं ताँता) आवली-लिः (स्त्री.), पंक्तिः (स्त्री.) २. संततिः (स्त्री.) ।
ताँती, सं. पुं. (हिं. ताँत) तंतुवायः-पः, पटकारः ।
तांत्रिक, सं. पुं. (सं.) तंत्रशास्त्रविद् (पुं.), २. मोहिन्, कुहककारः । वि. तंत्रसंबंधिन् ।
ताँबा, सं. पुं. (सं. ताम्रं) ताम्रकं, म्लेच्छमुखं, रवि,-लोहं-प्रियं, मुनिपित्तलं, लोहितायसम् ।
तांबूल, सं. पुं. (सं. न.) पर्णं, नागवल्लीदलं, दे. 'पान' २. पर्णवीटी-टिका-टिः (स्त्री.) ३. पूगं, पूगफलम् ।
ताई[1], सं. स्त्री. (हिं. ताया) ज्येष्ठपितृव्या ।
ताई[2], सं. स्त्री., दे. 'तवी' ।
ताईद, सं. स्त्री. (अ.) समर्थनं, अनुमोदनं, पुष्टिः (स्त्री.), दृढी,-करणं-कारः, साहाय्यम् ।
ताऊ, सं. पुं., दे. 'ताया' ।
बछिया के ताऊ, मु., बलीवर्दः २. मूर्खः ।
ताऊन, सं. पुं. (अ.) दे. 'प्लेग' ।
ताऊस, सं. पुं. (अ.) मयूरः शिखंडिन् २. मयूराकारो वाद्यभेदः ।
तख्त ताऊस, सं. पुं., मयूरासनं २. शाहजहानस्य मयूरसिंहासनम् ।
ताक[1], सं. पुं. (अ.) कुड्यविदरं, भित्तिगर्तः-र्तं, आलयः २. कुड्य,-फलकः-र्कं ३. असम-विषम,-संख्या-अंकः । वि. अनुपम, अद्वितीय, निपुण ।
—जुफ़्त, सं. पुं. (अ.+फ़ा.) समविषमक्रीडा, द्यूतभेदः ।
—पर रखना, मु., परित्यज् (भ्वा. प. अ.), उज्झ् (तु. प. से.) ।
ताक[2], सं. स्त्री. (हिं. ताकना) अवलोकनं, ईक्षणं, दर्शनम् २. अनिमिषदृष्टिः (स्त्री.) ३. अवसरप्रतीक्षा ४. अन्वेषणम् ।
—झाँक, सं. स्त्री., असकृदवलोकनं २. निभृतं वीक्षणं ३. निरीक्षणं ४. अन्वेषणम् ।
ताकत, सं. स्त्री. (अ.) बलं, शक्तिः (स्त्री.) ।
—वर, वि. (अ.+फा.) बलवत्, शक्तिमत् ।
ताकना, क्रि. स. (सं. तर्कणं>) अनिमि(मे)षं दृश् (भ्वा. प. अ.)-अवलोक् (चु.) २. निभृतं (छिद्रेण) ईक्ष् (भ्वा. आ. से.) ३. अव-निर्,-ईक्ष् ४. हंतुं निभृतं स्था (भ्वा. प. अ.) ।

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

ताकि, अव्य. (फ़ा.) तथा···यथा, यथा ।

ताकीद, सं. स्त्री. (अ.) प्रबलानुरोधः, दृढादेशः, पुनः स्मारणम् ।

—करना, क्रि. स., सानुरोधं आदिश् (तु. प. अ.),-पुनः-दृढं स्मृ (प्रे.) ।

ताग-गा, सं. पुं. (सं. तार्कव>) तंतुः (पुं.), डोरः, गुणः, शुल्वम् ।

तागड़ी, सं. स्त्री., दे. 'करधनी' ।

ताज, सं. पुं. (अ.) राज-म(मु)कुटं, किरीटः-टम् ।

—पोशी, सं. स्त्री. (अ.+फ़ा.) राज्याभिषेकः, मुकुटपरिधापनम् ।

ताज़गी, सं. स्त्री. (फ़ा.) हरितत्वं २. प्रफुल्लता ३. नवीनता ।

ताज़ा, वि. (फ़ा.) हरित, सरस, २. नवं, नूतन, प्रत्यग्र ३. श्रान्तिशून्य, सज्ज ।

मोटा—, वि., दृढांग, बलिष्ठ, सबल ।

ताज़ियाना, सं. पुं. (फ़ा.) अश्वताडनी, कशाघा, प्रतोदः ।

ताज़ी, सं. पुं. (फ़ा.) *अरवाश्वः २. मृगयाकुक्कुरः, विश्वकद्रुः (पुं.) । वि., अरबदेशीय ।

ताज़ीम, सं. स्त्री. (अ.) सत्कारः संमानना ।

ताज़ीर, सं. स्त्री. (अ.) दंडः, अर्थदंडः, निग्रहः ।

ताज़ीराते-हिंद, सं. स्त्री., भारतीयदण्डसंहिता ।

ताज्जुब, सं. पुं., (अ. तअज्जुब) आश्चर्यं; विस्मयः ।

ताड़, सं. पुं. (सं. तालः) दीर्घस्कन्धः, ध्वजद्रुमः, तरुराजः, महोन्नतः, लेख्यपत्रः २. ताडनं, प्रहारः ३. महा,-रवः-ध्वनिः (पुं.) ।

ताड़का, सं. स्त्री. (सं.) राक्षसीविशेषः, सुकेतुकन्या ।

ताड़न, सं. पुं. (सं. न.) प्रहरणं, आहननं, आघातः, प्रहारः २. तर्जनं ३. दण्डः, शासनं ४. गुणनम् ।

ताड़ना[1], क्रि. स. (सं. ताडनं) तड् (चु.), अभिहन् (अ. प. अ.), आहन् (अ. प. अ.), गुद् (तु. उ. अ.), प्रह् (भ्वा. प. अ.), २. दंड् (चु.), शास् (अ. प. से.) ३. तर्ज्-निर्भर्त्स् (चु. आ. से.) । सं. स्त्री., दे. 'ताड़न' (१-३) ।

ताड़ने योग्य, वि., ताडनीय, आहन्तव्य, दंड्य, तर्जनीय इ. ।

ताड़नेवाला, सं. स्त्री., ताडकः, दंडयितृ, तर्जकः ।

ताड़ा हुआ, वि., ताडित, अभिहत, दंडित, तर्जित ।

ताड़ना[2], क्रि. स. (सं. तर्कणं) तर्क् (चु.), अनु-मा (जु आ. अ.), ऊह् (भ्वा. आ. से.) ।

ताड़ी, सं. स्त्री. (सं. ताली) तालकी, ताल,-रसः-आसवः-मद्यं, तारिका ।

तात, सं. पुं. (सं.) पितृ (पुं.), जनकः २. पूज्यः, गुरुः (पुं.) ३. (प्रायः छोटों के लिए संबोधन में) वत्स, प्रिय, अंग ।

तातार, सं. पुं. (फ़ा.) दे. 'तूरान' ।

तातील, सं. स्त्री. (अ.) अवकाशः, अनध्याय-विश्राम,-दिवसः ।

तात्कालिक, वि. (सं.) तत्कालभव २. समकालीन, यौगपदिक ।

तात्त्विक, वि. (सं.) वास्तविक, यथार्थ, परमार्थ ।

तात्पर्य, सं. पुं. (सं. न.) अर्थः, आशयः अभिप्रायः, भावः २. तत्परता, तत्परायणता ।

तादात्म्य, सं. पुं. (सं. न.) अभेदः, अभिन्नता, सायुज्यम्, तद्रूपता ।

तादाद, सं. स्त्री. (अ. तअदाद) संख्या, गणना ।

तादृश, वि. (सं.) तादृक्ष, तत्,-सदृश-तुल्य-समान, तथाविध ।

तान, सं. स्त्री. (सं.) गानांगविशेषः, आलापः, लयविस्तारः २. विस्तृतिः-तनिः (स्त्री.), विस्तारः ।

—पूरा, सं.पुं. (सं. तुंबरं) *तानपूरः, वीणाभेदः ।

तानना, क्रि. स. (सं. तननं) प्र-वि-तन् (त. उ. से.), आयम् (भ्वा. प. अ.) दीर्घीं कृ. विस्तृ-विस्तृ (प्रे.) लंब्-प्रस्तृ (प्रे.) ।

तानकर, मु., बलेन, पूर्णशक्त्या ।

तानकर सोना, मु., निश्चिंतं स्वप् (अ. प. अ.) ।

ताना[1], सं. पुं. (हिं. तानना) तान्तवम्, अन्वानाहततंतवः (पुं. बहु.) ।

—बाना, अन्वानाहतितिर्यक्तंतवः (पुं. बहु.), तान्तवौतू (पुं. द्वि.) ।

ताना,[2] सं. पुं. (अ.), व्यंग्य-वक्र-श्लेष-भंगि,-वचनं-वाक्यं-उक्तिः (स्त्री.), कटाक्षाक्षेपः ।

तानना,[3] क्रि. स. (सं. तापनं) दे. 'तपाना' ।

—मारना, क्रि. स., भंग्या-व्यंग्येन आक्षिप् (तु. प. अ.), वक्रोक्तथा-कटाक्षेण उपन्यस् (दि. प. से.)-व्याहृ (भ्वा. प. अ.) ।

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

तानाशाह, सं. पुं. (हिं+फ़ा.) एक,-अधिपतिः-शासकः, अधिनायकः ।

तानाशाही, सं. स्त्री. अधिनायकत्वं, ऐकाधिपत्यम् ।

ताप, सं. पुं. (सं.) उ(ऊ)ष्मन् (पुं.), उष्णता, उष्मः, उत्-परि-सं,-तापः, दाहः २. ज्वरः ३. दुःखं, कष्टं ४. वेदना, मानसक्लेशः ।

—तिल्ली, सं. स्त्री., प्लीहाभिवृद्धिः (स्त्री.), प्लीहोदरम् ।

तापना, क्रि. अ. (सं. तापनं) पावकं-सूर्यातपं आ-नि-सेव् (भ्वा. आ. से.) । क्रि. स., दे. 'तपाना' ।

तापमान, सं. पुं. (सं. न.) ऊष्ममानम् ।

—यंत्र, सं. पुं. (सं. न.) १–२. ताप-ज्वर,-मापकम् ।

तापस, सं. पुं. (सं.) दे. 'तपस्वी' ।

ताब, सं. स्त्री. (फा. । मि. सं. तापः) ऊष्मः, उष्णता २. दीप्तिः (स्त्री.), आभा ३. सामर्थ्यं, साहसम् ।

ताबड़तोड़, क्रि. वि. (अनु.) अनवरतं, अविश्रान्तं, सततं, अनवच्छिन्नम् ।

ताबूत, सं. पुं. (अ.) शव,-पेटकः-संपुटः ।

ताबे, वि. (अ.) अधीन, वशवर्तिन् ।

ताबेदार, वि. (अ.+फ़ा.) आज्ञा,-पालकः-कारिन् ।

तामजान, सं. पुं. (हिं. थामना+सं. यानं) शिविकाभेदः ।

तामरस, सं. पुं. (सं. न.) रक्तोत्पलं, कोकनदं, २. सुवर्णं ३. ताम्रम् ।

तामस, वि. (सं.) तमोगुणिन्, तमोगुणयुक्त २. काल, कृष्ण ३. अज्ञ ४. दुष्ट । सं. पुं., सर्पः २. उलूकः ३. क्रोधः ४. अंधकारः ।

तामसिक, वि. दे. 'तामस' वि. ।

तामिल, सं. स्त्री. (देश.) द्रविडजातिभेदः २. भाषाविशेषः ।

तामिस्र, सं. पुं. (सं.) नरकविशेषः २. कृष्ण-पक्षः ३. क्रोधः ४. द्वेषः ।

तामील, सं. स्त्री. (अ.) आज्ञापालनं २. निष्पत्तिः-सिद्धिः (स्त्री.) ।

ताम्र, सं. पुं. (सं. न.) ताम्रकं, मुनिपित्तलम् ।

—कार, सं. पुं. (सं.) ताम्र,-कुट्टः-उपजीविन् ।

—चूड़, सं. पुं. (सं.) कुक्कुटः ।

—पत्र, सं. पुं. (सं. न.) ताम्रपट्टः-ट्टं २. ताम्रफलकः-कम् ।

ताया, सं. पुं. (सं. तातः>) ज्येष्ठःतातः, ज्येष्ठ-पितृव्यः, पितुरग्रजः ।

तार, सं. पुं. (सं. न.) रूप्यं, रजतं २. तारः. धातु,-तंतुः-(पुं.)-सूत्रं ३. तड़ित्-विद्युत्,-संदेशः-वार्त्ता ४. सूत्रं, गुणः, तंतुः (पुं.) ५. सततक्रमः, परंपरा ६. नक्षत्रं, तारा, ग्रहः ७. सप्तकभेदः (संगीत) । वि., उच्च, महत् (ध्वनि आदि) २. भासुर ३. निर्मल, स्वच्छ ।

—देना, क्रि. स., विद्युत्संदेशं प्रेष् (प्रे.)-प्रहि (स्वा. प. अ.) ।

—कश, सं. पुं. (हिं+फ़ा.) तारकर्षः-र्षकः ।

—घर, सं. पुं., तारगृहम् ।

—तार, वि., जीर्ण, विदीर्ण ।

—बर्की, सं. स्त्री., तड़ित्-विद्युत्,-तारः ।

—तार करना, मु., (वस्त्रादिकं) तन्तुशः विदृ (प्रे.)-खंड् (चु.) ।

—टूटना, मु., क्रमः-परम्परा भ्रुट् (दि. प. से.) ।

—बाँधना, मु., निरन्तरं विधा(जु.उ.अ.)-कृ ।

तारक, सं. पुं. (सं.) तारः-रं-रा, भं., नक्षत्रं २. नेत्रं ३. कनीनिका, नयनतारा ४. मोचकः, मुक्तिदः ५. कर्णधारः ।

तारका, सं. स्त्री. (सं.) नक्षत्रं, उडुः २. कनीनिका, बिंबिनी ३. बालिपत्नी ।

तारकेश्वर, सं. पुं. (सं.) शिवः, महेशः ।

तारकोल, सं. पुं. (अं. कोलटार दे.)

तारण, सं. पुं. (सं. न.) पारनयनं, उत्तारणं, संतारणं २. मोचनं, उद्धारणं, निस्तारणम् । सं. पुं., तारकः उद्धारकः, भवभयमोचकः २. विष्णुः ।

तारतम्य, सं. पुं. (सं. न.) न्यूनाधिकता, उत्कर्षापकर्षौ २. अन्तरं, भेदः ।

तारना, क्रि. स. (हिं तरना) पारं नी (भ्वा. प. अ.), उत्-सं-, तॄ (प्रे.) उत्-, लंघ् (प्रे.) २. मोक्ष् (चु.), निस्तॄ (प्रे.), उद्,-हृ-धृ (भ्वा. प. अ.), (पापेभ्यः, भवभयात्) मुच् (प्रे.) ।

तारनेवाला, सं. पुं., मोक्षकः, मोचकः, निस्तारकः, उद्धारकः, मुक्तिदः ।

तारपीन, सं. पुं. (अं. टरपेंटाइन) सरल-चीरपर्ण,-तैलं,सरल,-द्रवः-रसः-स्यन्दः, शीतलः, श्री,-वासः-वेष्टः ।

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

तारल्य, सं. पुं. (सं. न.) तरलत्वं, तरलता, द्रवत्वं, प्रवाहिता २. कामुकता, लंपटता, कामान्धता ।

तारा, सं. पुं. (सं. स्त्री.) तारः-रं, तारका, उडुः (पुं.), नक्षत्रं, ऋक्षं, भं, ज्योतिस् (न.) २. कनीनिका, बिंबिनी ३. भाग्यं, नियतिः (स्त्री.) । सं. स्त्री., बालिपत्नी २. बृहस्पति-भार्या ।

—टूटना, क्रि. अ., नक्षत्र-उल्का पत् (भ्वा. प. से.) ।

—अधिप, सं. पुं. (सं.) चंद्रः २. बालिः(पुं.) ।

—मंडल, सं. पुं. (सं. न.) उडु-भ-नक्षत्र,-गणः ।

—होना, मु., नभः चुंब् (भ्वा. प. से.), गगनं-स्पृश् (तु. प. अ.) ।

तारीक, वि. (फ़ा.) काल, कृष्ण २. सतिमिर, निष्प्रभ ।

तारीकी, सं. स्त्री. (फ़ा.) कृष्णता २. अंधकारः, तिमिरम् ।

तारीख़, सं. स्त्री. (फ़ा.) तिथिः (पुं. स्त्री.), दिवसः २. नियततिथिः ।

तारीफ़, सं. स्त्री. (अ.) लक्षणं, परिभाषा २. स्तुतिः-नुतिः (स्त्री.) ३. वर्णनं ४. गुणः, विशिष्टता ।

तारुण्य, सं. पुं. (सं. न.) यौवनं, कौमारम् ।

तारेश, सं. पुं. (सं.) विधुः, सुधांशुः, चन्द्रः ।

तार्किक, सं. पुं. (सं.) तर्कशास्त्रविद् (पुं.) २. तत्त्वज्ञः, दार्शनिकः ।

तार्क्ष्य, सं. पुं. (सं.) गरुड़, वैनतेयः, विष्णु-रथः २. अरुणः ३. अश्वः ४. सर्पः ५. खगः ।

ताल[1], सं. पुं. (सं. तल्लः) दे. 'तालाब' । २. करतलः-लं, प्रहस्तः ३. ताली, करतलध्वनिः (पुं.), करतालः-लकं ४. संगीते काल-क्रिया,-मानं ५. मल्लयुद्धे करतलेन बाहुजंघयोरास्फालनं ६. दे. 'झाँझ' ।

ताल[2], सं. पुं. (सं.) तृणराजः, मधुरसः, आसवद्रुः (पुं.) ।

—से बेताल होना, मु., विताल (वि.) भू ।

तालभखाना, सं. पुं. (हिं. ताल+मक्खन) कौकिलाक्षः, काकेक्षुः, कांडेक्षुः, इक्षुरः ।

तालव्य, वि. (सं.) काकुद-तालु,-संबंधिन् ।

—वर्ण, सं. पुं. (सं.) तालव्यार्यवर्णाः । (इ, ई, चवर्ग, य्, श्) ।

ताला, सं. पुं. (सं. तालकं) तालः, ताल-द्वार, यंत्रम् ।

—लगाना, क्रि. स., तालकेन निरुध (रु. उ. अ.)-पिधा (जु. उ. अ.)-बंध् (क्र्. प. अ.) ।

तालाब, सं. पुं. (हिं. ताल+फ़ा. आब.) तडा(टा) गः-गं, कासारः-रं, सरस् (न.), पुष्करिणी ।

तालिका, सं. स्त्री. (सं.) दे. 'ताली' २. सूचीचिः (स्त्री.), अनुक्रमणी-णिका, नामावली-लिः (स्त्री.) ।

तालिब, सं. पुं. (अ.) अन्वेषकः, अनुसंधातृ (पुं.) २. इच्छुकः, अभिलाषिन् ।

—इल्म, सं. पुं. (अ.) विद्यार्थिन्, छात्रः ।

ताली[1], सं. स्त्री. (सं.) तालिका, कुंचिका, कूचिका, अंकुटः, उद्घाटनी, साधारणी ।

ताली[2], सं. स्त्री. (सं. तालिका) करतालः-लकं, करतल,-शब्दः-ध्वनिः (पुं.) ।

—बजाना, क्रि. स., करतालं वद् (प्रे.)-दा, करतलध्वनिं जन् (प्रे.) ।

तालीम, सं. स्त्री. (अ.) शिक्षा, विद्या ।

तालीशपत्र, सं. पुं. (सं. न.) तालीशं, नीलं, धात्रीपत्रम् ।

तालु, सं. पुं. [सं. तालु (न.)] काकुदं, तालुकम् ।

—मूल, सं. पुं. (सं. तालुमूलम्) काकुदमूलम् २. गलग्रंथिः ।

तालुक, सं. पुं. (अ. तअल्लुक) सम्बन्धः, संसर्गः ।

ताव, सं. पुं. (सं. तापः) दाहः, उ(ऊ)ष्मः-ष्मन् (पुं.), उष्णः-ष्णं २. अन्तर्वेगः, आवेशः ३. त्वरा ४. व्यावर्तनं, मोटनं, आकुञ्चनम् ।

तावान, सं. पुं. (फ़ा.) दण्डः, अर्थ-धन,-दण्डः, निष्कृतिः (स्त्री.), निस्तारः ।

—देना, क्रि, स., निष्कृतिं दा., निस्तृ (प्रे.) ।

तावीज़, सं. पुं. (अ. तअवीज़) यंत्रं, कवचः, क्षारः २. यंत्रसंपुटः ।

ताश, सं. पुं. (अ. तास) क्रीडापत्राणि (न. बहु.), क्रीडापत्रावली २. पत्र,-क्रीडा-खेला ३. दे. 'जरबफ्त' ।

तासीर, सं. स्त्री. (अ.) गुणः, प्रभावः ।

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

तास्सुब, सं. पुं. (अ. तअस्सुब) धार्मिक-जातीय,-पक्षपातः, २. पक्षपातः ३. मतान्धता।

ताहम, अव्य. (फ़ा.) दे. 'तथापि'।

तिकोन, सं. पुं. (त्रिकोणः) त्रिभुजः, त्र्यस्रम्।

तिकोना-निया, वि. (हिं. तिकोन) त्रिकोण, त्र्यस्र, त्रिकोण-त्रिभुज,-आकार।

तिक्त, सं. पुं. (सं.) रसभेदः। वि., तिक्त,-रसस्वाद, तीक्ष्ण, तीव्र।

तिखूँट, सं. स्त्री. (हिं. तीन+खूँट) दे. 'तिकोन'।

—नाप, सं. स्त्री., त्रिकोणमितिः (स्त्री.)।

तिखूँटा, वि., दे. 'तिकोना'।

तिगुना, वि. (सं. त्रिगुण) त्रिगुणित, त्रिरावृत्त, त्रिगुणीकृत।

—करना, क्रि. स., त्रिगुणीकृ, त्रिः आवृत्(प्रे.)।

तिजारत, सं. स्त्री. (अ.) वाणिज्यं, क्रयविक्रयौ (द्वि.)।

तिजारी, सं. स्त्री. (सं. त्रि+ज्वरः) तृतीयक-ज्वरः।

तितरबितर, वि. (हिं. तिधर+अनु.) आ-प्र-वि,-कीर्ण, विक्षिप्त २. अव्यवस्थित, क्रमशून्य, अस्तव्यस्त।

तितली, सं. स्त्री. (हिं. तीतर अथवा सं. तित्र) चित्रपतंगः, *तित्तिरी।

तितिक्षा, सं. स्त्री. (सं.) सहिष्णुता, सहनं २. क्षमा, क्षांतिः (स्त्री.)।

तितिक्षु, वि. (सं.) सहनशील, सहिष्णु २. क्षांत, क्षमाशील।

तिथि, सं. स्त्री. (सं. पुं. स्त्री.) मितिः (स्त्री.), मास-पक्ष,-दिनं-दिवसः, चांद्रदिवसः।

तिनकना, क्रि. अ., दे. 'चिड़चिड़ाना'।

तिनका, सं. पुं. (सं. तृणं), नालः-लं, पलः, पलालः-लं, त्रिणं, खटं, खेटटं, हरितं, तांडवं, अर्जुनम्।

—दाँतों में दबाना या लेना, मु., दे. 'गिड़गिड़ाना'।

तिनके का सहारा, मु., ईषत् साहाय्यम्।

तिनके को पहाड़ समझना, मु., तिले तालं पश्यति।

तिपाई, सं. स्त्री. (सं. त्रिपादिका) त्रिपदिका, त्रिपदम्।

तिबारा, क्रि. वि. (सं. त्रिवारं) त्रिः (अव्य.)।

तिब्ब, स्त्री. (अ.) चिकित्साविज्ञानम, २. यवन-चिकित्साशास्त्रम।

तिब्बत, सं. पुं. (सं. त्रिवि (पि) ष्टपं >) त्रिविष्टपम्।

तिब्बती, वि. त्रैविष्टप, त्रिविष्टप,-सम्बन्धि-विषयक। सं. पुं., त्रिविष्टपीयः, त्रिविष्टप,-वासिन्-वास्तव्यः। सं. स्त्री. त्रिविष्टपभाषा, *त्रिविष्टपी।

तिमंज़िला, वि. (सं. त्रि + अ. मंज़िल) त्रिभूमिक।

तिमिर, सं. पुं. (सं. न.) अंधकारः, तमस् (न.)।

तिरछा, वि. (सं. तिर्यच्) अवसर्पिन्, प्रवण, तिरश्चीन, वक्र, कुटिल, २. वेषाभिमानिन्।

—देखना, क्रि. अ., तिर्यक्-वक्रं वीक्ष् (भ्वा. आ. से.)।

तिरछी चितवन या नज़र, मु., तिर्यग्-वक्र,-दृष्टिः (स्त्री.) २. कटाक्ष-अपांग-नयनोपांत,-वीक्षणं-वीक्षितं, कटाक्षः, भ्रूविलासः।

तिरछापन, सं. पुं. (हिं. तिरछा) प्रवणता, तिरश्चीनता, वक्रता, कुटिलता।

तिरछे, क्रि. वि. (हिं. तिरछा) तिरः, साचि, जिह्मं (सब अव्य.)।

तिरपन, वि. [सं. त्रिपंचाशत् (नित्य स्त्री.)]। सं. पुं., उक्ता संख्या, तदंकौ (५३) च।

तिरपाई, सं. स्त्री. (सं. त्रिपादिका) त्रिपदिका, त्रिपदम्।

तिरपाल, सं. पुं. (अं. टारपालिन) तिंदुलिप्तपटः।

तिरसठ, वि. [सं. त्रिषष्टिः (नित्य स्त्री.)]। सं. पुं., उक्ता संख्या, तदंकौ (६३) च।

तिरस्कार, सं. पुं. (सं.) अनादरः, अपमानः, निकृतिः (स्त्री.), न्यक्कारः, अवज्ञा, अवमानना, तिरस्क्रिया, मानभंगः २. भर्त्सना, तर्जनं ३. सापमानं त्यागः।

तिरस्कृत, वि. (सं.) न्यक्कृत, अनादृत, अप-अव,-मत-मानित, अवज्ञात इ. २. सापमानं त्यक्त ३. आच्छादित।

तिरहुत, सं. पुं. (सं. तीरभुक्तिः>) मिथिला-प्रदेशः।

तिरहुतिया, वि. (हिं. तिरहुत) मैथिल, मिथिला-सम्बन्धिन्। सं. पुं., मैथिलः, मिथिला-वासिन्। सं. स्त्री., मिथिलाभाषा, मैथिली।

तिरानवे, वि. [सं. त्रिणवतिः (नित्य स्त्री.)]। त्रयोणवतिः। सं. पुं., उक्ता संख्या, तदंकौ (९३) च।

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

तिरासी, वि. [सं. त्र्यशीतिः (नित्य स्त्री.)]। सं. पुं., उक्ता संख्या, तदंकौ (८३) च ।

तिराहा, सं. पुं. (सं. त्रि +फ़ा. राह) त्रिपथम् ।

तिरिया, सं. स्त्री. (सं. स्त्री) नारी, रामा ।

—चरित्तर, सं. पुं. (सं. स्त्रीचरित्रं) रामारहस्यं, वामावैदग्ध्यं, नारीचरितम् ।

तिरोधान, सं. पुं. (सं. न.) अदर्शनं, अंतर्धानं, गोपनं, गूहनं, संवरणम् ।

तिरोभाव, सं. पुं. (सं.) दे. 'तिरोधान' ।

तिरोभूत, वि. (सं.) अदृष्ट, अंतर्हित, लुप्त ।

तिरोहित, वि. (सं.) गूढ, निलीन, आच्छादित, संवृत, निभृत, गुप्त ।

तिर्यंची, सं. स्त्री. (सं.) तिरश्री, पशु-खग,-योषा-अंगन-वधूः (स्त्री.) ।

तिर्यक्, अव्य. (सं.) वक्रं, कुटिलं, तिरस्, जिह्मं, असरलम् (सब अव्य.) ।

तिलंगाना, सं. पुं. (सं. तैलंगः) प्रदेशविशेषः ।

तिलंगी, वि. (सं. तिलंगाना>) तैलंगदेशीय ।

तिल, सं. पुं. (सं.) पवित्रः पितृतर्पणः, पूत-होम,-धान्यं, पापघ्नः, स्नेहफलः । २. तिलकः, कालकः, जट्ठ (ड्ठ), लः, पिप्लुः (पुं.) । ३. क्षणः-णं, पलं ४. तारा-रकं, कनीनिका ।

—का तेल, सं. पुं., तिल,-तैलं-रसः-स्नेहः ।

—किट्ट, सं. पुं. (सं. न.) तिल,-खली-चूर्णम् ।

—कुट, सं. स्त्री., तिलकुट्टम् ।

—चटा, सं. पुं., रक्तवर्णकीटभेदः ।

—भुग्गा, सं. पुं., तिलभुक्तम् ।

—पपड़ी-शकरी, सं. स्त्री., तिलपट्टी, *तिल-शर्करी । तिल की ओट पहाड़, मु.,* विन्दौ सिन्धुः, *तिले गिरिः ।

तिल का ताड़ करना, मु., तिलं तालं पश्यति ।

तिल-तिल, मु., अल्पाल्प, किंचित्किंचित् ।

तिल धरने की जगह न होना, मु., स्थानाभावः ।

तिलभर, मु., ईषदिव, किंचिदिव ।

तिलक, सं. पुं. (सं. पुं. न.) दे. 'टीका' (१. २ ६. ८. ९. ११.) ।

—लगाना, क्रि. स., दे. 'टीका' लगाना' ।

तिलड़ा, सं. पुं. / **तिलड़ी**, सं. स्त्री. } (सं.त्रि+हिं. लड़) त्रिसूत्रीहारः ।

तिलवा, सं. पुं. (सं. तिल>) *तिलमोदकः ।

तिलहन, (हिं तेल + धान्य) सं. पुं. तैलस्नेह,-बीजं-बीजकं-रोहिः ।

तिला, सं. पुं. (फ़ा. । मि. सं. तैलं) मर्दनौषधं २. लिंगलेपः ।

तिलाक, सं. पुं., दे. 'तलाक' ।

तिलिस्म, सं. पुं. (यू. टेलिस्मा) दे. 'इन्द्रजाल' ।

तिल्ली, सं. स्त्री. (सं. तिलकं>) प्लीहन् (पुं.), प्लीहा, गुल्मः २ दे. 'तिल्ली' १. ।

ताप—, सं. स्त्री, दे. 'ताप' के नीचे ।

तिवारी, सं. पुं. (सं. त्रिपाठी), दे. 'त्रिवेदी' ।

तिस, सर्व., दे., 'उस' ।

तिहत्तर, वि. [सं. त्रिसप्ततिः (नित्य स्त्री.)]। सं. पुं., उक्ता संख्या, तदंकौ (७३) च ।

तिहरा, वि. दे. 'तेहरा' ।

तिहराना, क्रि. स. (हिं. तिहरा) त्रिः कृ, तृतीयं वारं विधा (जु. उ. अ.) ।

तिहवार, सं. पुं. (सं तिथिवारः)। पर्वन् (न.), उत्सवः, उद्धर्षः, उद्धवः, क्षणः, महः ।

तिहाई, सं. स्त्री. (सं. त्रिभाग>) तृतीय,-अंशः भागः ।

तिहारा, सर्व., दे. 'तुम्हारा' ।

तीक्ष्ण, वि. (सं.) नि;-शात-शित, तीव्र, प्र,-खर, सूच्यग्र, तीक्ष्ण-शित,-धार २. (बुद्धि) कुशाग्र, सूक्ष्म-शीघ्र-,ग्राहिन्, सूक्ष्म, तीव्र ३. उग्र, प्रचंड ४. दे. 'चरपरा' ५. (शब्द) कर्णकटु, अप्रिय ६. उद्यमिन्, अतंद्र, क्षिप्रकर्मन् ७. असह्य, दुःसह ।

तीक्ष्णता, सं. स्त्री. (सं.) तीव्रता, प्रखरता, प्रचंडता इ. ।

तीखा, वि., दे. 'तीक्ष्ण' ।

तीखुर, सं. पुं., दे. 'तवाशीर' ।

तीज, सं. स्त्री. (सं. तृतीया) कृष्णा शुक्ला वा तृतीया तिथिः (स्त्री.) २. श्रावण-भाद्र,-शुक्ल-तृतीया ।

तीत-ता, वि. (सं. तिक्त) दे. 'तिक्त' २. कटु ।

तीतर, सं. पुं. (सं. तित्तिरः) तिति (त्ति) रिः (पुं.), तैतिरः, याज्ञुषोदरः ।

तीन, वि. [सं. त्रीणि (न. बहु.)] त्रयः (पुं.), तिस्रः (स्त्री.), त्रीणि (न.) । सं. पुं. उक्ता संख्या, तदंकः (३) च ।

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

—तेरह करना, मु., विद्रु (प्रे.), अवा-आ-प्र-वि,-कृ (तु. प. से.)।
—पाँच करना, मु., कलहायते (ना. धा.), विवद् (भ्वा. आ. से.)।
न तीन में न तेरह में, मु., सामान्य, साधारण।
तीमार, सं. पुं. (फा.) सेवा, परिचर्या।
—दार, सं. पुं., रोगि-रुग्ण,-सेवकः-परिचारकः।
—दारी, सं. स्त्री., रोगि-रुग्ण,-परिचर्या-सेवा।
तीय, सं. स्त्री., दे. 'स्त्री'।
तीर[1], सं. पुं. (सं. न.) तटः-टं-टी।
तीर[2], सं. पुं. (फा.) बाणः, शरः, इषुः (पुं.), सायकः।
—कश, सं. पुं. (फ़ा.) इषुधिः (पुं.), दे. 'तरकश'।
—चलाना या मारना, क्रि. स., इषुं प्र,-मुच्-क्षिप् (तु. प. अ.)।
तीरंदाज़, सं. पुं. [-+अंदाज़ (फ़ा.)] इषुधनुर्,-धरः, धन्विन् (पुं.), धानुष्कः।
तीरंदाजी, सं. स्त्री., धनुर्,-विद्या-वेदः, शराभ्यासः।
तीर्थ, सं. पुं. (सं. तीर्थं) पुण्य-पवित्र,-स्थानं २. घट्टः ३. घट्टसोपानपथः, अवतारः ४. उपाध्यायः, गुरुः (पुं.) ५. ब्राह्मणः ६. परिव्राजकोपाधिः (पुं.) ७. तारकः, मोक्षकः ८. ईश्वरः ९. जननीजनकौ १०. अतिथिः (पुं.)।
—यात्रा, सं. स्त्री. (सं.) तीर्थाटनम्।
—राज, सं. पुं. (सं.) प्रयागः।
तीर्थिक, सं. पुं. (सं.) तीर्थपुरोहितः २. तीर्थकरः ३. तीर्थयात्रिन्।
तीला, सं. पुं. (फ़ा. तीर) दे. 'तिनका'।
तीली, सं. स्त्री. (हिं. तीला) लघुतृणम् २. धात्वादेः दृढसूक्ष्मतारः।
तीव्र, वि. (सं.) अत्यधिक, अत्यंत, अतिशय २. दे. 'तीक्ष्ण'(१)। ३. सुतप्त, अत्युष्ण ४. असीम, अमित ५. कटु ६. दुःसह ७. प्रचंड ८. तिक्त ९. वेगवत्, शीघ्र १०. तार, उच्च (स्वर)।
तीव्रता, सं. स्त्री. (सं.) अत्यधिकता, बाहुल्यं, अत्युष्णता, असह्यता, प्रचंडता, तिक्तता इ.।
तीस, वि. [सं. त्रिंशत् (नित्य स्त्री.)]। सं. पुं., उक्ता संख्या, तदंकौ (३०) च।
—मार खाँ, मु., वीराग्रणीः (पुं.), शूरशिरोमणिः (पुं.) (व्यंग्य)।
तीसों दिन, मु., सदा, सर्वदा।
तीसरा, वि. पुं. (हिं. तीन) तृतीयः [-या (स्त्री.)]। सं. पुं., मध्यस्थः, तटस्थः।
—पहर, सं. पुं., तृतीयप्रहरः अपराह्णः, पराह्णः, विकालः।
तीसरे, क्रि. वि. (हिं. तीसरा) तृतीयस्थाने, तृतीयं, तृतीयतः (अव्य.)।
तीसवाँ, वि. (हिं. तीस) त्रिंशत्तमः-मं-मी, त्रिंशः-शं-शी (पुं. न. स्त्री.)।
तुंग, वि. (सं.) दे. 'ऊँचा' २. चंड, उग्र।
तुंड, सं. पुं. (सं. न.) मुखं, आस्यं, वदनं २. चञ्चूः-ञ्चुः (स्त्री.)।
तुंडि, सं. स्त्री. (सं. पुं.) दे. 'तुंड' (१-२)। (सं. स्त्री.) नाभिः।
तुंद, सं. पुं. (सं. न.) उदरं, तुन्दि (न.), तुन्दिः (स्त्री.)।
तुंबा, सं. पुं. (सं.) अलाबुः (पुं. स्त्री.) -बूः (स्त्री.) २. अलाबु (न.), अलाबुपात्रम्।
तुंबिया, सं. स्त्री. (सं. तुंबिका >) क्षुद्रालाबु (न.), क्षुद्रालाबुपात्रम्।
तुंबी, सं. स्त्री. (सं.) तुंबिः (स्त्री.) अलाबुः (पुं. स्त्री.) २. दे. 'तुंबा'(२)।
तुअर, सं. पुं. (सं. तुवरी) आढकी, दे. 'अरहर'।
तुक, सं. स्त्री. (हिं. टूक) अंत्यानुप्रासः, अक्षरमैत्री २. पद्यांशः ३. पादांतवर्णः।
बेतुकी, वि., असंबद्ध, असंगत।
—जोड़ना, मु., कुकवितां कृ अथवा रच् (चु.)।
तुख्म, सं. पुं. (अ.) दे. 'बीज'।
तुच्छ, वि. (सं.) नीच, हीन, अधम, क्षुद्र, दीन, निकृष्ट २. असार, लघ्वर्थक, अनर्थक।
तुड़वाना, तुड़ाना, क्रि. प्रे., व. 'तोड़ना' के प्रे. रूप।
तुतला (रा) ना, क्रि. अ. (अनु.) अस्पष्टं-शिशुवत् भाष् (भ्वा. आ. से.)।
तुपक, सं. स्त्री. (तु. तोप) *शतघ्निका २. नालास्त्रम्।
तुफंग, सं. स्त्री. (तु. तोप) वायव्यं नालास्त्रम्।
तुम, सर्व. (सं. त्वम्) त्वं (एक.), यूयं (बहु.) ('तुम को' आदि के लिए 'युष्मद्' की द्वितीया आदि के रूप बनेंगे)।

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

तुमड़ी, सं. स्त्री. (सं.तुम्बी>) शुष्कवर्तुलालाबुः (पुं. स्त्री.) २. दे. 'तुंबा'(२)।

तुमाई, सं. स्त्री. (हिं. तुमाना) कार्पासादि-प्रसाधनभृतिः (स्त्री.)।

तुमाना, क्रि. प्रे., ब. 'तूमना'के प्रे. रूप।

तुमुल, वि. (सं.) घोररव-कलकल-कोलाहल,-मय-पूर्ण-युत। सं. पुं. (सं. पुं. न.) भीषण-घोर,-युद्ध-संग्रामः २. कोलाहलः, कलकलः।

तुम्हारा, सर्व. (हिं. तुम) युष्माकं-तव (त्रिलिंग) युष्मदीय, त्वदीय, तावक, यौष्माक-कीण।

तुम्हीं, सर्व० (हिं. तुम + ही) त्वमेव,युवामेव, यूयमेव।

तुम्हें, सर्व, (हि. तुम) (कर्म) त्वाम् त्वा; युवाम्, वाम्; युष्मान्, वः (संप्रदान) तुभ्यं, ते, युवाभ्यां, वां; युष्मभ्यम्, वः।

तुरंग, तुरंगम, सं. पुं. (सं.) अश्वः, घोटकः।

तुरंत, क्रि. वि. (सं.) झटिति, आशु, सद्यः, सपदि, तत्क्षणं-णे।

तुरई, सं. स्त्री. (सं. तूरं >) मृदंगी, राज-, कोशातकी, जालिनी, कृतवेधना, सु,-पीत-पुष्पा, राजिमत्फला (चिया तुरई, देखो 'नेनुआ')।

तुरक, सं. पुं. (सं. तुरकः) तुरुष्कः २. यवनः ३. सैनिकः ४-५. टर्की-तुर्किस्तान,-वासिन्।

तुरकी, वि. (हिं. तुरक) तुरुष्कदेशीय २. तुरुष्कभाषा।

तुरग, सं. पुं. (सं.) अश्वः, वाजिन् (पुं.)।

तुरत, क्रि. वि., दे. 'तुरंत'।

तुरही, तुरी, सं. स्त्री. (सं. तूरं) तूर्यः-र्यं, काहलः-ला, शृंगवाद्यम्।

तुरीय, वि. (सं.) तुर्य, चतुर्थ।

—अवस्था, सं. स्त्री. (सं.) निःश्रेयसं, मुक्तिः (स्त्री.)।

तुरुष्क, सं. पुं. (सं.) दे. 'तुरक'।

तुर्य, वि., दे. 'तुरीय'।

तुर्रा, सं. पुं. (अ.) उष्णीष,-आलंबः-शेखरः २. चूड़ा, मौलिः (पुं.), शिखा, शेखरः ३. अलकः, चूर्णकुंतलः, भ्रमरकः, कुरलः। ४. वि., विचित्र, अद्भुत।

तुर्श, वि. (फ़ा.) दे. 'खट्टा'।

तुलना[1], सं. स्त्री. (सं.) उपमा, समता, साम्यं, सादृश्यं २. तारतम्यं, न्यूनाधिकता।

तुलना[2], क्रि. अ. (हिं. तोलना) तुल्-तूल् (कर्म., तोल्यते, तूल्यते), तुलया मा (कर्म. मीयते)।

किसी काम पर तुला हुआ, मु., कार्यविशेषं कर्तुं उद्यतः-कृतनिश्चयः-विहितसंकल्पः।

तुलनात्मक, वि. (सं.) तुलनायुक्त, अन्यापेक्षक, अन्यसापेक्ष, सापेक्ष, साम्यवैषम्य,-सूचक-दर्शक।

तुलवाना, क्रि. प्रे., ब. 'तोलना' के प्रे. रूप।

तुलसी, सं. स्त्री. (सं.) सुभगा, पावनी, भूतघ्नी, विष्णुवल्लभा, वृन्दा, पुण्या, वैष्णवी।

—दल, सं. पुं. (सं. न.) वृंदापत्रम्।

—दास, सं. पुं. (सं.) भक्तविशेषः, रामचरित-मानसादिरचयितृ (पुं.)।

तुला, सं. स्त्री. (सं.) दे. 'तकड़ी' २. तुलना, सादृश्यं ३. राशिविशेषः (ज्यो.)।

—दान, सं. पुं. (सं. न.) देहभारसम-सुवर्णादिदानम्। वि., तोलित, तूलित।

तुल्य, वि. (सं.) स-सम,-तोल-भार-परिमाण २. सम, समान, सदृश, सदृक्ष।

तुल्यता, सं. स्त्री. (सं.) सम,-तोलता-परिमाणता २. सादृश्यं, साम्यं, समत्वम्।

तुष, सं. पुं. (सं.) तुसः, बुर्प-सं, कडंगरः, धान्यत्वच् (स्त्री.)।

तुषानल, सं. पुं. (सं.) कुकूलः, तुषाग्निः (पुं.)।

तुषार, सं. पुं. (सं.) तुहिनं, हिमं, प्रालेयं, म(मि)हिका, अवश्यायः, नीहारः। वि., हिम, तुषार, तुषार-हिम,-वत्।

तुष्ट, वि. (सं.) तृप्त, तर्पित, पूर्णकाम २. प्रसन्न, मुदित।

तुष्टि, सं. स्त्री. (सं.) तुष्टता, तृप्तिः (स्त्री.), संतोषः २. हर्षः, प्रसन्नता।

तुहमत, सं. स्त्री., दे. 'तोहमत'।

तुहिन, सं. पुं. (सं. न.) दे. 'तुषार' २. चंद्रिका, कौमुदी ३. शीतलता, हिमता।

तूँबा, सं. पु., दे. 'तुंबा'।

तूँबी, सं. स्त्री., दे. 'तुंबी'।

तू, सर्व. (सं. त्वं)।

—तड़ाक,-तुकार या-तू-तू मैं-मैं करना, मु., अशिष्टभाषायां कलहायते (ना. धा.)।

तूण-णि, सं. पुं. (सं.)
तूणी, सं स्त्री. (सं.)
तूणीर, सं. पुं. (सं. पुं. न.)
} दे. 'तरकश'।

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

तूत, सं. पुं. (फ़ा. । मि. सं. तूदः) ब्रह्म,-काष्ठ-दारु (न.), सुरूपं, सुपुष्पम् ।

तूतिया, सं. पुं., दे. 'नीलाथोथा' ।

तूती, सं. स्त्री. (फ़ा.) शुकभेदः २. कनेरो-चटका ३. चटकाभेदः ४. मुखवाद्यो वाद्यभेदः, दे. 'तुरही' ।

—बोलना, मु., प्र-भू, अधिष्ठा (भ्वा. प. अ.) । नक्कारखाने में–की आवाज, मु., अरण्येरुदितम् ।

तूदा, सं. पुं. (फ़ा.) चयः, राशिः (पुं.) २. सीमाचिह्नम् ।

तून, सं. पुं. (सं. तुन्नः) नदीवृक्षः, तूणि-(णी) कः ।

तूफ़ान, सं. पुं. (अ.) झंझावातः, अति-चंड-महा,-वातः, वात्या, प्रभजनः, प्रकंपनः २. तोय-जल,-ओघः-वृद्धिः (स्त्री.)-उपप्लवः-विप्लवः-प्रलयः, संप्लवः ३. उपद्रवः, संक्षोभः, विप्लवः ४. आपद्-आपत्तिः (स्त्री.) ५. दे. 'तोहमत' ।

—उठाना या मचाना, मु., तुमुलं कृ, संक्षोभं उत्पद् (प्रे.) ।

तूफ़ानी, वि. (फ़ा.) उपद्रविन्, कलहोत्पादक २. उग्र, प्रचंड ३. पिशुन, अभ्यसूयक ।

तूमड़ी, सं. स्त्री. (हिं. तूंबा) दे. 'तुंबी' २ तुम्बीनिर्मित आहितुण्डिकानां वाद्यभेदः ।

तूमना, क्रि. स. (सं. स्तोमः >) ऊर्णा-तूलं संमृज् (अ. प. वे., चु.) -घृण (भ्वा. प. से.)-विश्लिष् (प्रे.) ।

तूरान, सं. पुं. (फ़ा.) तातार–तूरान,–देशः ।

तूरानी, वि. (फ़ा.) तातार-तूरान,-देशीय-सम्बन्धिन् । सं. पुं., तातार-तूरान-वासिन् (पुं.) ।

तूल[1], सं. पुं. (सं. पुं. न.) दे. 'रूई' २. दे. 'तूत' ।

तूल,[2] सं. पुं. (अ.) दे. 'लंबाई' ।

तूलिका, सं. स्त्री. (सं.) इ(ई) षीका, तुलिः (स्त्री.), तूली, ईषिका ।

तूली, सं. स्त्री. (सं.) दे. 'तूलिका' २. नीली ३. वर्त्तिः (स्त्री.) ।

तृण, सं. पुं. (सं. न.) दे. 'तिनका' ।

तृणवत्, वि. (सं.) तृण,-तुल्य-सम, तुच्छ, क्षुद्र २. अग्राह्य, त्याज्य ।

तृतीय, वि. (सं.) दे. 'तीसरा' ।

तृप्त, वि. (सं.) तुष्ट, पूर्णकाम २. प्रहृष्ट, प्रमुदित ।

तृप्ति, सं. स्त्री. (सं.) संतोषः, मौदित्यं, तर्पणं, प्रीणनम् २. आनंदः, हर्षः ।

तृषा, सं. स्त्री. (सं.) पिपासा, तृष्णा, उदन्या २. लोभः ३. इच्छा ।

तृषित, वि. (सं.) पिपासित, तर्षितः सतृष २. इच्छुक ३. लुब्ध ।

तृष्णा, सं. स्त्री. (सं.) दे. 'तृषा' (१-३) ।

तें, प्रत्य. [सं. तस् (प्रत्य.)] दे. 'से' ।

तेंतालीस, वि. [सं त्रिचत्वारिंशत्(नित्य स्त्री.)] त्रयश्चत्वारिंशत् । सं. पुं., उक्ता संख्या, तदंकौ (४३) च ।

तेंतालीसवाँ, वि. (हिं. तेंतालीस) त्रि-(त्रयश) चत्वारिंशत्तमः-मी-मं, त्रि (त्रयश)-चत्वारिंशः-शी-शं (पुं. स्त्री. न.) ।

तेंतीस, वि. (त्रयस्त्रिंशत् (नित्य स्त्री.] । सं. पुं., उक्ता संख्या, तदंकौ (३३) च ।

तेंतीसवाँ, वि. (हिं. तेंतीस) त्रयस्त्रिंशत्तमः-मी-मं, त्रयस्त्रिंशः-शी,शं (पुं. स्त्री. न.) ।

तेंदुआ, सं. पुं. (देश.) चित्रक-चित्रकव्याघ्र,-भेदः ।

तेंदू, सं. पुं. (सं. तिंदुकः) कालस्कंधः, तिंदुलः २. तिंदुलं, तिंदुलफलम् ।

ते, सर्व. (सं. पुं. तद् का बहु.) दे. 'वे' ।

तेईस, वि. [सं. त्रयोविंशतिः (नित्य स्त्री.)] सं. पुं., उक्ता संख्या, तदंकौ (२३) च ।

तेईसवाँ, वि. (हिं. तेईस) त्रयोविंशतितमः-मी-मं. त्रयोविंशः-शी-शं (पुं. स्त्री. न.) ।

तेग़, सं. स्त्री. (फ़ा.) दे. 'तलवार' ।

तेज, सं. पुं. [सं. तेजस् (न.)] कांतिः-दीप्तिः (स्त्री.), आभा, प्रभा २. पराक्रमः, वीर्यं, बलं ३. प्रतापः, अनुभावः, अभिख्या ४. तापः. ऊष्मन् (पुं.) ५. उग्रता, प्रचंडता ६. अग्निः (पुं.) ।

तेज़, वि. (फ़ा.) दे. 'तीक्ष्ण' (१) २. आशु, शीघ्रगामिन्, जवन, महावेग ३. क्षिप्र,-कर्मन्-कारिन् ४. दे. 'चरपरा' ५. उग्र, प्रचंड ६. महार्ह-र्घ, बहु-महा,-मूल्य ७. कुशाग्रबुद्धि ८. अतिचंचल ९. (विषादि) घोर घातक ।

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

तेजपत्र, सं. पुं. (सं. न.) पत्रं, पत्रकं, गंधजातम् ।
तेजपात, सं. पुं., दे. 'तेजपत्र' ।
तेजबल, सं. पुं. (सं. तेजोवती) तेजनी, तेजवती ।
तेजस्वी, वि. (सं.-विन्) तेजोवत्, तेजस्वत्, ओजस्विन्, वर्चस्विन्, सुप्रभ, कांतिमत् २. प्रतापिन्, प्रतापवत् ३. वीर्यवत्, बलवत् ।
तेज़ाब, सं. पुं. (फ़ा.) अम्लः, द्रावकम् ।
तेज़ी, सं. स्त्री. (फ़ा.), निशितत्वं, तीक्ष्णधारता, प्रखरता २. उग्रता, चंडता ३. शीघ्रता, त्वरा ४. महार्धत्वं, बहुमूल्यत्वं इ. ।
तेता, वि., दे. 'उतना' ।
तेरस, सं. स्त्री. (सं. त्रयोदशी) शुक्लकृष्णपक्षयोः त्रयोदशी तिथिः (स्त्री.) ।
तेरह, वि. (सं. त्रयोदश) । सं. पुं., उक्तसंख्या, तदंकौ (१३) च ।
तेरहवाँ, वि. (हिं. तेरह) त्रयोदशः-शी-शं (पुं. स्त्री. न.) ।
तेरा, सर्व. (सं. तव) तावक, [-की (स्त्री.)], तावकी-, त्वत्क, त्वदीय, त्वत्-।
तेल, सं. पुं. (सं. तैलं) स्नेहः, अक्षणं, अभ्यञ्जनम् ।
—**मलना या लगाना**, क्रि. स., तैलेन अंज् (रु. प. से.)-दिह् (अ. उ. अ.)-लिप् (तु. प. अ.) ।
—**निकालना**, क्रि. स., स्नेहं निष्कृ (भ्वा. प. अ.) ।
—**चढ़ाना**, मु., विवाहात्प्राग् वरवध्वोः तैलाभ्यञ्जनम् ।
जलती पर—डालना, मु., कलहं वृध् (प्रे.) ।
तेलगू, सं. स्त्री. (सं. तैलंग >) तैलंगप्रान्तआन्ध्रप्रान्त,-भाषा, तेलगूः (स्त्री.) ।
तेलहन, सं. स्त्री., दे. 'तिलहन' ।
तेलिन, सं. स्त्री. (हिं. तेली) तैलिनी, तैलिकी, तैल,-करी-कारिणी, चाक्रिकी ।
तेलिया, वि. (हिं. तेल) तैल,-निःक्षण-कृष्णभासुरः । सं. पुं., कृष्ण,-रंगः-रागः-वर्णः । २. कृष्णाश्वः ३. वत्सनाभः, गरलः (विषभेदः) ।
तेली, सं. पुं. (सं. तैलिन्) तैलकारः तैलिकः, चाक्रिकः, धूसरः ।
तेवर, सं. पुं. (हिं. तेह=क्रोध) सकोप-सक्रोध,-दृष्टिः (स्त्री.) २. भ्रूः (स्त्री.), भ्रलता ।
—**बदलना**, मु., भ्रूभंगं कृ, भ्रूकुटिं बन्ध् (क्र. प. अ.)-रच् (चु.) ।
तेवरी-ड़ी, सं. स्त्री., 'त्योरी' ।
तेव(त्यो)हार, सं. पुं., दे. 'तिहवार' ।
तेहरा, वि. (हिं. तीन) त्रि-,गुण-गुणित, त्रिरावृत्त, त्रिरावर्तित ।
तैयार, वि. (फ़ा.) (मनुष्य) उद्यत, उद्युक्त, सज्ज, सिद्ध, संनद्ध २. (वस्तु) सज्जी,-कृत-भूत, आयोजित, उपस्थित, उप,-कल्पित-कल्पित, सज्ज, सिद्ध ३. पीन, हृष्टपुष्ट ।
—**करना**, क्रि. स., सज्जीकृ, सन्नह् (प्रे.), उप-परि-कल्प् (प्रे.), उपस्था (प्रे.) ।
—**होना**, क्रि. अ., सज्जीभू, सन्नह (दि. उ. अ.) उद्यत-सन्नद्ध (वि.) भू ।
तैयारी, सं. स्त्री. (फ़ा. तैयार) सज्जता, सन्नद्धता, उद्यतता २. सिद्धिः-उपस्थितिः (स्त्री.) ३. आडम्बरः, श्रीः, शोभा ।
तैरना, क्रि. स. (सं. तरणं) पारं गम् (भ्वा. प. अ.), सं-, तॄ (भ्वा. प. से., द्वितीया के साथ) । क्रि. अ., तॄ, प्लु (भ्वा. आ. अ.) ।
तैराक, सं. पुं. (हिं. तैरना) तारकः, तरित्, तरण-प्लवन,-कृत् (पुं.) ।
तैराकी, सं. पुं. (हिं. तैराक) तरः, तरणं, प्लवः, प्लवनम् ।
तैल, सं. पुं. (सं. न.) दे. 'तेल' ।
तैश, सं. पुं. (अ.) कोपः, क्रोधः ।
तैसा, वि. (सं. तादृश) दे. 'वैसा' ।
तोंद, सं. स्त्री. (सं. तुंद) पिचिण्डः, लम्बोदरम् ।
—**निकलना**, सं. पुं., तुन्दप्रसारः, तुन्दिकता, तुन्दिलता ।
तोंद(दै)ल, वि. (हिं. तोंद) तुंदिक, तुंदित, तुंदिभ, तुंदिल, तुंदिन्, पिचिंडिल, लम्बोदर ।
तोंदी, सं. स्त्री. [सं. तुण्डिः (स्त्री.)] तुन्दः-दी, दे. 'नाभि' ।
तो, तौ, अव्य. (सं. तद् >) तस्यां दशायां-स्थितौ (सप्तमी), तर्हि, तदा, तदानीम् ।
—**भी**, अव्य., दे. 'तथापि' ।
तोड़ना, क्रि. स. (सं. त्रोटनं) त्रुट् (प्रे.), खंड् (चु.), भंज् (रु. प. अ.) २. भिद्-छिद् (रु. प. अ.), दृ-शॄ (क्र. प. से.) ३. अव-सं,-चि (स्वा. उ. अ.), आदा (जु. आ. अ.), ग्रह् (क्र. प. से.) ४. नश्-ध्वंस (प्रे.) ५. स्वपक्षं ग्रह् (प्रे.), स्वपक्षप्रतिनिधा (जु. उ. अ.)

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

६. नाणकानि परिवृत् (प्रे.) *त्रुट् (प्रे.)। सं. पुं., त्रोटनं, भंजनं, भेदनं, अव-सं,-चयनं, नाशः, ध्वंसः इ.।

तोड़नेवाला, सं. पुं., त्रोटकः, भञ्जकः, भेदकः, अवचायकः, नाशकः इ.।

टूटा हुआ, वि., त्रुटित, भग्न, भिन्न, ध्वस्त इ.।

तोड़ा, सं. पुं. (हिं. तोड़ना) नाणक-मुद्रा,-कोशः-कोषः २. धन,-कोषः-ग्रन्थिः (पुं.) ३. सुवर्ण-रजत,-अन्दुः-अन्दूः (दोनों स्त्री.) ४. तटः-टं-टी ५. हानिः (स्त्री.), अपचयः ६. रज्जु,-खण्डः-डम्।

तोतलाना, क्रि. अ., दे. 'तुतलाना'।

तोता, सं. पुं. (फ़ा.) कीरः, शुकः,-वक्त्र,-तुण्डः-चंचुः (पुं.), किंकिरातः। (स्त्री., कीरी, शुकी इ.)।

—चश्म, सं. पुं. (फ़ा.) विश्वासघातकः, अप्रत्ययिन्, अविश्वासिन्।

—चश्मी, सं. स्त्री. (फ़ा.) अविश्वासः, अप्रत्ययः।

तोते की सी आँख फेरना, मु., नितांतं उपेक्ष् (भ्वा. आ. से)-उदास् (अ. आ. से.)।

हाथों के तोते उड़ जाना, मु., अत्याकुली-जडी भू, सं-व्या-मुह् (दि. प. वे.)।

तोप, सं. स्त्री. (तु.) शतघ्नी, अग्न्यस्त्रं, *तोपम्।

—खाना, सं. स्त्री. (तु.+फ़ा.) शतघ्नीशाला २. अग्न्यस्त्र-शतघ्नी-,समूहः।

तोपची, सं. पुं. (तु. तोप) दे. 'गोलंदाज'।

तोबड़ा, सं. पुं. [फ़ा. तो (तु) बरा] *अश्वान्नभस्त्रा।

तोबा, सं. स्त्री. (अ. तौबः) पापानावृत्तिप्रतिज्ञा, पश्चात्तापः।

तोम, सं. पुं (सं. स्तोमः) चयः, निकरः, पुंजः, संभारः।

तोमर, सं. पुं. (सं. पुं. न.) भल्लसदृशं प्राचीनास्त्रम् २-३. द्वादशमात्रा-नववर्ण,-च्छन्दस् (न.)-वृत्तम् ४. राजपुत्रवंशविशेषः।

तोय, सं. पुं. (सं. न.) जलं, पानीयम्।

—कर्म, सं. पुं. (सं.-र्मन् न.) तर्पणम् दे०।

—क्रीडा, सं. स्त्री. (सं.) जलक्रीडा।

—द, सं. पुं. (सं.) जलदः, नीरदः, अंभोदः।

—धि, निधि, सं. पुं. (सं) जलधिः, वारिधिः, समुद्रः।

तोरई, सं. स्त्री., दे. 'तुरई'।

तोरण, सं. पुं. (सं. पुं. न.) बहिर्द्वारं २. वंदनमाला ३. ग्रीवा।

तोल, सं. पुं. (सं.) भारः, गुरुत्वं २. भार-मानं, माडः, मात्रं, परिमाणं ३. तोलनं, भार-मानं, मस्तिः (स्त्री.)।

तोलन, सं. पुं. (सं. न.) तुलया भार,-मानं-मापनं २. उत्थापनम्।

तोलना, क्रि. स. (सं. तोलनं) तुल् (चु.), तूल् (भ्वा. प. से.), तुलायां धृ (चु.)। सं. पुं., दे. 'तोल'।

तोलनेवाला, सं. पुं., तोलकः, भारमातृ(पुं.)।

तोलवाना, क्रि. प्रे., ब. 'तोलना' के प्रे. रूप।

तोला, सं. पं. (सं. तोलः-लं) तोलकः-कं,-पण, वतिरक्तिपरिमाणं, कोलं, वटकं, कर्षार्द्धम्।

तोशक, सं. स्त्री. (तु.) तूला, तूलिका।

तोष, सं. पुं. (सं.) तृप्तिः-तुष्टिः (स्त्री.), संतोषः २. प्रसन्नता, आनन्दः।

तोहफ़ा, सं. पुं. (अ.) उपहारः, उपायनं, उपदा, उपग्राह्यम्। वि., उत्कृष्ट, उत्तम।

तोहमत, सं. स्त्री. (अ.) मिथ्याभियोगः, मृषा-दोषारोपः।

—लगाना, क्रि. स. मिथ्या दुष (प्रे. दूषयति), मृषा अभियुज् (रु. आ. अ.; चु.)।

तौर, सं. पुं. (अ.) आचारः, व्यवहारः २. दशा, अवस्था ३. प्रकारः, विधा (समासांत में)।

—तरीका, सं. पुं. (अ.) शिष्टाचारः २. आचरणम्।

तौल, सं. पुं., दे. 'तोल'।

तौलना, क्रि. स., दे. 'तोलना'।

तौलिया, सं. पुं. (अं. टावेल) मार्जनवस्त्रं, वरकम्।

तौहीन, सं. स्त्री. (अ.) अपमानः, निरादरः, अवमानना, अवज्ञा।

त्यक्त, वि. (सं.) विसृष्ट, उज्झित, अपास्त।

त्याग, सं. पुं. (सं.) उत्सर्गः, मोचनं, अपासनं, उज्झनं, हानं २. विरक्तिः (स्त्री.), वैराग्यं, संन्यासः ३. दे. 'तलाक'।

—पत्र, सं. पुं. (सं. न.) उत्सर्गलेखः।

त्यागना, क्रि. स. (सं. त्यागः) त्यज् (भ्वा.

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

प. अ.), उत्सृज् (तु. प. अ.), उज्झ् (तु. प. से.), रह्-वर्ज् (चु.), दे. 'छोड़ना'। सं. पुं., दे. 'त्याग'।

त्यागने योग्य, वि., त्याज्य, त्यक्तव्य, हेय, परिहार्य, उत्सृष्टव्य।

त्यागनेवाला, सं. पुं., त्यक्तृ, उत्सृष्टृ (पुं.), उज्झकः।

त्यागा हुआ, वि., दे. 'त्यक्त'।

त्यागी, सं. पुं. (सं.-गिन्) त्यक्तसंगः, संन्यासिन्, विरक्तः, वैराग्यवत्।

त्याज्य, वि. (सं.) दे. 'त्यागने योग्य'।

त्यों, क्रि. वि. (सं. तद्+एवं >) तथा, एवं, तद्वत्, एवंविधम्।

ज्यों—, क्रि. वि., यथा...तथा।

—ही, क्रि. वि., तत्क्षणं-णे।

त्योरी, सं. स्त्री. (सं. त्रिकूटः>) कोपदृष्टिः (स्त्री.), क्रोधवीक्षितं २. नयन-दृष्टि-दृक्-पातः।

त्यो(त्यौ)हार, सं. पुं., दे. 'तिहवार'।

त्यो(त्यौ)हारी, सं. स्त्री. (हिं. त्योहार) पावण,-उपायनं-दानम्।

त्रसरेणु, सं. पुं. (सं.) ध्वंसिन्, द्व्यणुकत्रयात्मकरेणुः (पुं.) २. त्रिंशत्परमाणुपरिमाणम्।

त्रसित, **त्रस्त**, वि. (सं. त्रस्त) भीत, सभय, भयार्त, ससाध्वस, भयाविष्ट।

त्राण, सं. पुं. (सं. न.) दे. 'रक्षा'।

त्रात, वि. (सं.) त्रायित, त्राता, गोपायित, पात, अवित, रक्षित।

त्रातव्य, वि. (सं.) त्राणार्ह, रक्षणीय, पातव्य।

त्राता, सं. पुं. [सं.-तृ (पुं.)] दे. 'रक्षक'।

त्रास, सं. पुं. (सं.) भयं, भीतिः (स्त्री.) २. कष्टम्।

त्रासक, सं. पुं. (सं.) भयंकरः, भयावहः, भयानकः, भयजनकः, त्रासयितृ।

त्रासित, वि. (सं.) भीषित, तर्जित, ससाध्वस, दरित, भयातुर।

त्राहि, अव्य. (सं. लोट् २ पा. पाहि, रक्ष, शरणं देहि।

—त्राहि करना, मु., रक्षार्थं असकृत् प्रार्थ् (चु. आ. मे.)।

त्रिक, सं. पुं. (सं. न.) त्रितयं, त्रयं-यी।

त्रिकाल, सं. पुं. (सं. न.) कालत्रयं-यी, भूत-वर्तमानभविष्यत्कालाः २. वेलात्रयं-यी (प्रातः, मध्याह्नः,सायं)। अव्य., त्रिः(अव्य.), त्रिवारम्।

—ज्ञ, वि. (सं.) त्रिकाल-वेत्तृ-विद्, सर्वज्ञ। सं. पुं., ईश्वरः २. बुद्धः।

—दर्शी, सं. पुं. (सं.-र्शिन्) ईश्वरः २. ऋषिः (पुं.)।

त्रिकुटा, सं. पुं. [सं. त्रिकटु (न.)] त्र्युष्णम्, व्योषम्, कटु-त्रयं-त्रिकं, मिश्रितशुंठीमरीचपिप्पल्यः (स्त्री. बहु.)।

त्रिगुण, सं. पुं. (सं. न.) गुण,-त्रयं-त्रिकं, सत्त्वरजस्तमांसि (न. बहु.)।

त्रितय, सं. पुं. (सं. न.) त्रिकं, त्रयं-यी २. धर्मार्थकामाः (पुं. बहु.)।

त्रिदोष, सं. पुं. (सं. न.) वातपित्तकफरूपं दोषत्रयम्।

त्रिपथगा, सं. स्त्री. (सं) गंगा, भागीरथी।

त्रिपाठी, सं. पुं. (सं.-ठिन्) दे. 'त्रिवेदी'।

त्रिपुंड्र, सं. पुं. (सं. न.) भस्मादिकृतं कपालस्थतिर्यग्रेखात्रयं, त्रिपुंड्रकम्।

त्रिपुर, सं. पुं. (सं. न.) मयदानवनिर्मितं पुरत्रयं २. लोकत्रयी, त्रिलोकी ३, बाणासुरः ४. चंदेरीनगरम्।

—अरि, सं. पुं. (सं.) त्रिपुरांतकः, शिवः।

त्रिफला, सं. पुं. (सं. स्त्री.) फल,-त्रिकं-त्रयं, मिलितहरीतकीविभीतकामलकीफलानि (न. बहु.)।

त्रिभुज, सं. पुं. (सं.) दे. 'तिकोन'।

त्रिभुवन, सं. पुं.(सं. न.) त्रिलोकी, लोकत्रयम्। स्वर्गः पृथिवी पातालं च।

त्रिमूर्ति, सं. पुं. (सं.) ब्रह्माविष्णुशिवनामकमूर्तित्रयवत् (पुं.)।

त्रियामा, सं. स्त्री. (सं.) रात्री-त्रिः (स्त्री.)।

त्रिलोक, सं. पुं. (सं. न.), त्रिलोकी, लोकत्रयी, दे. 'त्रिभुवन'।

त्रिवेणी, सं. स्त्री. (सं.) प्रयागे गंगायमुनासरस्वतीनां संगमः।

त्रिवेदी, सं. पुं. (सं. त्रिवेदिन्) त्रिविद्यः, त्रिवेदः, त्रैविद्यः २. ब्राह्मणजातिभेदः।

त्रिशूल, सं. पुं. (सं. न.) त्रिशिखं, शूलं, त्रिशीर्षकम्।

त्रिष्टुभ्, सं. स्त्री., (सं.) छंदोभेदः।

त्रुटि, सं. स्त्री. (सं.) त्रुटी, न्यूनता, अपूर्णता,

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

वैकल्यं २. स्खलितं, भ्रांतिः (स्त्री.) ३. संदेहः, संशयः ।

त्रेता, सं. पुं. (सं.) त्रेता-द्वितीय,-युगम् ।

त्वचा, सं. स्त्री. (सं.) त्वच् (स्त्री.), चर्मन् (न.), छदिस् (स्त्री.), संछादनी, असृग्धरा २. वल्कः-कं, वल्कलः-लं, ३. त्वगिन्द्रियं ४. (साँप की) कंचुकः, निर्मोकः ।

त्वरा, सं. स्त्री. (सं.) शीघ्रता, दे. 'जल्दी' ।

त्वरित, वि. (सं.) शीघ्र, दे. 'तेज' ।

थ

थ, देवनागरीवर्णमालायाः सप्तदशो व्यंजनवर्णः, थकारः ।

थंब-भ, सं. पुं., दे. 'स्तम्भ' ।

थई, सं. स्त्री. (सं. स्थानं) स्थलं २. राशिः (पुं.), चयः ।

थकना, क्रि. अ. (स्थग् >) परि-, श्रम् (दि. प. से.), क्लम् (भ्वा. दि. प. से.) आयस् (भ्वा. दि. प. से.) २. निर्विद् (दि.आ.अ.) ।

थकान, सं. स्त्री. (हिं. थकना) आयासः, क्लमः, खेदः, श्रमः, क्लांतिः (स्त्री.), शैथिल्यम् ।

थकाना, क्रि. स., व. 'थकना' के प्रे. रूप ।

थकामाँदा, वि., परि-, श्रांतः, क्लांतः, खिन्न, म्लान ।

थकावट, सं. स्त्री., दे. 'थकान' ।

थकित, वि., दे. 'थकामाँदा' ।

थड़ा, सं. पुं. (सं. स्थलं) वेदिका, वितर्दीः-र्दिः (स्त्री.) २. आपणिकासनं, पण्याजीव-पीठः-ठम् ।

थन, सं. पुं. (सं. स्तनः) कुचः, पयोधरः ।

थनेली, सं. स्त्री. (हिं. थन) स्तन-कुच,-गण्डः-पिटकः ।

थपकना, क्रि. स. (अनु. थपथप) करतलेन परामृश्-स्पृश् (तु. प. अ.), स्नेहेन आहन् (अ. प. अ.)-लघु प्रह् (भ्वा. प. अ.)-तड् (चु.) ।

थपकी, सं. स्त्री. (हिं थपकना) करतल-परामर्शः, मृदु-लघु-प्रेम,-आघातः-प्रहारः-चपेटः ।

थपड़ी, सं. स्त्री. (अनु०) दे० 'ताली' ।

थपेड़ा, सं. पुं. (अनु. थप) तरंग-कल्लोल-ऊर्मि-वीची,-संघट्टः-संमर्दः-अभिघातः २. दे. 'थप्पड़' ।

थप्पड़, सं. पुं. (अनु. थप) चपेटः-टिका, तल-चपेट,-आघातः-प्रहारः ।

—मारना, क्रि. स., चपेटं दा, चपेटिकया तड् (चु.)-प्रह् (भ्वा. प. अ.)-आहन् (अ. प. अ.) ।

थम, सं. पुं., दे. 'स्तंभ' ।

थमना, क्रि. अ. (सं. स्तंभनं) विरम् (भ्वा. प. अ.), उप-प्र-शम् (दि. प. से.), रुद्धगति (वि.) भू २. विश्रम्, (दि. प. से.), निवृत् (भ्वा. आ. से.) । सं. पुं., उप-प्र,-शमः, विरामः, विरतिः (स्त्री.) २. निवृत्तिः-विश्रांतिः (स्त्री.), विच्छेदः ।

थरथराना, क्रि. अ. (अनु.) (भयेन) कंप्-वेप् (भ्वा. आ. से.) २. स्फुर् (तु. प. से), स्पंद् (भ्वा. आ. से.) ।

थरथराहट, थरथरी, } सं. स्त्री. (हिं. थरथराना) वेपनं, वेपथुः (पुं.), प्र-, कंपः-कंपनं २. स्फुरणं, स्पंदनम् ।

थर्मामीटर, सं. पुं. (अं.) दे. 'तापमानयंत्र' ।

थर्राना, क्रि. अ. (अनु.) दे. 'थरथराना' ।

थल, सं. पुं., दे. 'स्थल' ।

थलथलाना, क्रि. अ. (अनु. थल-थल >) अभीक्ष्णं विचल् (भ्वा. प. से.), थलथलायते (ना. धा.) ।

थवई, सं. पुं. (सं. स्थपतिः) पलगंडः, सुधा-जीविन्, लेपकः, गृह,-कारकः-संवेशकः ।

थाइरायडग्लैंड, सं. पुं. (अं.) चुल्लिकाग्रन्थिः ।

थाक, सं. पुं. (सं. स्था>) ग्रामसीमा २. राशिः (पुं.), चयः ।

थाती, सं. स्त्री. (सं. स्थातृ>) दे. 'अमानत' २. दे. 'पूँजी' ।

थान, सं. पुं. (सं. स्थानं) स्थलं, प्रदेशः २. आलयः, गृहं ३. देवालयः, मंदिरं ४. पशु,-शाला-स्थानं ५. (पटादीनां) *व्यावर्तः ।

थानक, सं. पुं. (सं. स्थानकम्) स्थानं, स्थलम् २. नगरम् ३. फेनः ४. आलवालम् ।

थाना, सं. पुं. (सं.स्थानं>) गुल्मः, रक्षा-रक्षि,-स्थानम् ।

थानेदार, सं. पुं. (हिं+फ़ा.) रक्षास्थाना-ध्यक्षः, *गुल्मनिरीक्षकः, रक्षकोपदर्शकः ।

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

थाप, सं. स्त्री. (सं. स्थापनं>) मृदंगादेराघातो ध्वनिः (पुं.) वा. २. चपेटः-टिका ३. अंकः, चिह्नं ४. प्रतिष्ठा, संमानः ५. शपथः ६. लघु-मृदु,-प्रहारः-आघातः ७. स्थितिः (स्त्री.)।

थापना, क्रि. स. (सं. स्थापनं) स्था (प्रे. स्थापयति), आ-नि-धा (जु. उ. अ.), न्यस् (दि. प. से.), अवरुह्-निविश् (प्रे.), कृ। सं. स्त्री., स्थापनं-ना, आ-नि,-धानं, योजना, रोपणं, २. मूर्त्यादीनां स्थापना-प्रतिष्ठापना।

थापा, सं. पुं. (हिं. थापना) करांकः, पंचांगुली-चिह्नम्।

थापी, सं. स्त्री. (हिं थापना) १-२. मृत्तिका-कुट्टिम,-ताडनमुद्गरः ३. दे. 'थपकी'।

थाम, सं. स्त्री. (हिं. थामना) आ-अव,-लम्बनम्, धारणं,उप-सं,-स्तम्भनम् २. आधारः, आलम्बः, अवष्टम्भः, आश्रयः।

थामना, क्रि. स. (सं. स्तंभनं) अव-उत्-उप-सं-स्तंभ् (क्र्. प. से. या प्रे.), अवलंबं-आलंबं दा, अव-आ-लंब् (भ्वा. आ. से.) २. अव-,स्था (प्रे.), वि-,स्तंभ्, रुध् (रु. उ. अ.), विरम् (प्रे.) ३. साहाय्यं दा ४. निरुध्।

थाल, सं. पुं. (सं. स्थालं) धातुमयभाजनभेदः।

थाला, सं. पुं. (हिं. थाल) आ (अ) लवालं, आवालं, आवापः।

थाली, सं. स्त्री. (हिं. थाल) स्थालकं, लघु-स्थालम्।

थाह, सं. स्त्री. (सं. स्था>) (नद्यादीनां) तलं-अधोभागः २. गाधं ३. गांभीर्यानुमानं ४. अंतः, सीमा।

—**लेना**, क्रि. स. (तलं-वेधं) परीक्ष् (भ्वा. आ. से.)-निरूप् (चु.)-मा (जु. आ. अ.)।

थिएटर, सं. पुं. (अं.) नाट्य-रंग-नाटक,-शाला-गृहं-मन्दिरं-भूमिः (स्त्री.)।

थिगली, सं. स्त्री. (हिं. टिकली) पट,-खंडः-शकलः।

बादल में—लगाना, मु., असंभवं चिकीर्षति (सन्नंत)।

थियोसोफ़ी, सं. स्त्री. (अं.) ब्रह्मविद्या २. सम्प्रदायविशेषः।

थिर, वि., दे. 'स्थिर'।

थिरकना, क्रि. अ. (अनु. थिर) नृत्ये चरणौ निरन्तरं कंप्-वेप् (भ्वा. आ. से.)।

थिरता, सं. स्त्री., दे. 'स्थिरता'।

थुड़ी, सं. स्त्री. (अनु.) धिक्, शान्तम्, अवज्ञा-कुत्सा-गर्हा-अवहेला,-शब्दः।

—**थुड़ी करना**, मु०, अव-ज्ञा (क्र्या. प. से.), दे. 'धिक्कारना'।

—**थुड़ी होना**, मु० ब० 'धिक्कारना' के कर्म० के रूप।

थुथनी, सं. स्त्री., दे. 'थूथनी'।

थूक, सं. स्त्री. (हिं. थूकना) मुखस्रावः, लाला, ष्ठीवनं, नि-,ष्ठ्यूतम्।

—**की गिलटी**, सं. स्त्री., लालाग्रन्थिः (पुं.)।

—**कर चाटना**, मु., प्रतिज्ञां भंज् (रु. प. अ.), वचनं व्यतिक्रम् (भ्वा. प. से.)।

थूकना, क्रि. स. (अनु. थू) नि-,ष्ठिव् (भ्वा. दि. प. से, ष्ठीवति, ष्ठीव्यति), लालां निःसृ (प्रे.), सं. पुं.,नि-,ष्ठीवः-वनं, निष्ठ्यूतिः (स्त्री.)।

थूथनी, सं. स्त्री. (देश. थूथन) प्रलंबमुखं, लंबास्यम्।

थूनी, सं. स्त्री. (सं. स्थूणा) स्थाणु (पुं.), स्तंभः, अवष्टंभः।

थूहर, सं. पुं. (सं. स्थूणा>) नेत्रारिः (पुं.), निस्त्रिंशपत्रिका, स्नुही-हिः (स्त्री.), वज्रिन्, वज्र,-द्रुः-द्रुमः-कण्टकः, सिंहतुण्डः, सीहुण्डः।

थेवा, सं. पुं. (देश.) दे. 'नगीना'।

थैला, सं. पुं. (सं. स्थलम्>)प्रसेवः, स्यूतः-नः, पुटः-टं, स्योतः-नः, धौतकटः।

थैली, सं. स्त्री. (हिं. थैला) प्रसेवकः, स्यू(स्यो)-तकः, पुटकः।

थोक, सं. पुं. (सं. स्तबकः) राशिः (पुं.), चयः २. संघः, गणः।

—**फ़िरोश,-दार**, सं. पुं. (हिं.+फ़ा.) चय-स्तूप,-विक्रयिन्।

थोड़ा, वि. (सं. स्तोक) न्यून, अल्प, स्वल्प, अणुक-अल्प-क्षुद्र-लघु,-परिमाण-मात्र, ईषत्।

—**करना**, क्रि. स., लघयति (ना. धा.), अल्पी-न्यूनी कृ, ह्रस् (प्रे.)।

—**होना**, क्रि. अ., अल्पी-न्यूनी-लघू भू, क्षि-अपचि (कर्म.)। क्रि. वि., स्तोकं, मनाक्, ईषत्, यत्-,किंचित्।

—**थोड़ा**, क्रि.वि., अल्पशः,अल्पाल्पं, स्तोकशः।

—**बहुत**, वि., न्यूनाधिक।

—**सा**, क्रि. वि., दे. 'थोड़ा' क्रि. वि.।

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

थोड़े से, वि., कतिचित्, कतिपयाः, स्तोकाः ।

थोथा, वि. (देश.) रिक्त-शून्य,-गर्भ-मध्य-उदर, सुषिर २. कुंठित, अनिशित ३. निःसार, निर्गुण ४. निरर्थक, निष्प्रयोजन ।

थोपना, क्रि. स. (सं. स्थापनं) अनु-प्र-वि-लिप् (तु. प. अ.), दिह् (अ. उ. अ.) २. राशी-पिंडी कृ, समाक्षिप् (तु. प. अ.) ३. दुष् (प्रे.), दोषं आरुह् (प्रे. आरोपयति)-क्षिप् ।

द

द, देवनागरीवर्णमालाया अष्टादशो व्यंजनवर्णः, दकारः ।

दंग, वि. (फ़ा.) चकित, विस्मित, स्तब्ध ।

दंगई, वि. (हिं. दंगा) उपद्रविन्, कलहप्रिय २. उग्र, प्रचंड ।

दंगल, सं. पुं. (फ़ा.) मल्ल-बाहु-हस्ताहस्ति,-युद्धं, मल्लक्रीडा २. मल्ल,-भूः-भूमिः (दोनों स्त्री.) ३. जनौघः, लोकसमूहः ।

दंगा, सं. पुं. (फ़ा दंगल) कलहः, उपद्रवः २. कलकलः, कोलाहलः ।

दंड, सं. पुं. (सं.) दे. 'डंड' ।

दंडधर, सं. पुं. (सं.) यमराजः, दंडपाणिः २. नृपः, शासकः ३. परिव्राजकः, सन्न्यासिन् ।

दंडनीय, वि. (सं.) दंड्य, दंडयितव्य, दमनीय ।

दंडवत्, सं. पुं. स्त्री. (सं. अव्य.) साष्टांग,-प्रणामः-नमस्कारः ।

दंडी, सं. पुं. (सं.-डिन्) दंडधरः परिव्राजकः २. यमः ३. नृपः ४. दौवारिकः ५. दंडधारी मनुष्यः ६. संस्कृतकविविशेषः ।

दंत, सं. पुं. (सं.) दशनः, रदः, रदनः, दे. 'दाँत' ।

—कथा, सं. स्त्री. (सं.) लोक-पारंपरीय,-कथा, पारंपर्यं, लोक-जन,-श्रुतिः (स्त्री.) ।

—च्छद, सं. पुं. (सं.) ओष्ठः, रदनच्छदः ।

—धावन, सं. पुं. (सं. न.) दंत,-काष्ठं-मार्जनम् ।

दंती,[1] सं. स्त्री. (सं.) एरंडपत्रिका, रेचनी, विशोधनी ।

दंती,[2] सं. पुं. (सं.-न्तिन्) गजः, द्विपः ।

दँतुला, वि. (सं. दंतुल) दंतुर, दंतुरित, उन्नतदंत ।

दंतोष्ठ्य, वि. (सं.) दन्तौष्ठैरुच्चार्यवर्णः (उ, व्) ।

दंत्य, वि. (सं.) रदनविषयक २. दंतोच्चार्य (तवर्गादि) ।

दंदनाना, क्रि. अ. (अनु.)दनदनायते(ना. धा.), रम् (भ्वा. आ. अ.), नंद् (भ्वा. प. से.) ।

दंदान, सं. पुं. (फ़ा.) दन्तः, दशनः, रदनः ।

—साज़, सं. पुं., दन्तकारः, दन्तचिकित्सकः ।

दंदाना, सं. पुं. (फ़ा.) दंतः, छेदः ।

दंदानेदार, वि. (फ़ा.) दंतुर, दंतुरित, अनुक्रकच ।

दंपती–ति, सं. पुं. (सं. दंपती पुं. द्वि.) जं-जाया-भार्या,-पती (पुं. द्वि.) ।

दंभ, सं. पुं. (सं.) कपटः-टं, कापट्यं, आर्य-रूपता, लिंगवृत्तिः (स्त्री.), आडंबरः, वक्रव्रतं, धर्मोपधा, दांभिकता, छाद्मिकता २. अभि-मानः, दर्पः ।

दंभी, वि. (सं.-भिन्) कपटिन्, कापटिक-छाद्मिक-दांभिक [-की (स्त्री.)], कपट-, छद्म-२. अभिमानिन्, साडंबर ।

दंभोलि, सं. पुं. (सं.) इन्द्रवज्रः-जम् २. हीरः-रम् ।

दंश, सं. पुं. (सं.) दे. 'डाँस'[1] २. दे. 'डंक' (१-२) ३. दंतः, रदनः ।

दई, सं. पुं. (सं. दैवं) ईश्वरः २. अदृष्टं, भाग्यम् ।

—मारा, वि., मंद-हत,-भाग्य ।

दक़ीक़ा, सं. पुं. (अ.) युक्तिः (स्त्री.), उपायः ।

कोई—बाकी न रखना, मु., सर्वोपायान्-समस्त युक्तीः प्रयुज् (रु. आ. अ., चु.) ।

दक्खिन, सं. पुं., दे. 'दक्षिण' ।

दक्ष, वि. (सं.) कुशल, निपुण, चतुर, प्रवीण, विदग्ध, विशेषज्ञ । सं. पुं., ब्रह्मपुत्रः, शिव-श्वशुरः, सतीपितृ ।

दक्षता, सं. स्त्री. (सं.) कौशलं, नैपुण्यं, चातुर्यं, प्रावीण्यं, वैदग्ध्यं, पाटवम् ।

दक्षिण, वि. (सं.) अपसव्य, सव्येतर, वामेतर २. दक्ष, निपुण । सं. पुं., दक्षिण,-आशा-दिशा-दिश् (स्त्री.), दक्षिणा, वैवस्वती, यामी, अवाची २. दक्षिणापथः, दक्षिणः-णं ३. दक्षिण,-पार्श्वः-र्श्वं ४. नायकभेदः ।

—पूर्व, सं. पुं, आग्नेयी, दक्षिणपूर्वा । वि., आग्नेय, दक्षिणपूर्व ।

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

—पश्चिम, सं. पुं., नैर्ऋती, दक्षिणपश्चिमा। वि., नैर्ऋत, दक्षिणपश्चिम।

दक्षिणा, सं. स्त्री. (सं.) यज्ञादिविधिदानं, पोरोहित्यशुल्कः-कं २. दानं, त्यागः, उत्सर्गः।

दक्षिणायन, सं. पुं. (सं. न.) भानोर्दक्षिणा गतिः (स्त्री.)।

—सूर्य, सं. पुं. (सं.) मकरसंक्रांतिः (स्त्री.)।

दक्षिणी, वि. (सं. दक्षिण>) द (दा) क्षिण, दाक्षिणात्य, अवाचीन, अवाच्य, याम्य, आगस्त्य।

दख़ल, सं. पुं. (अ.) अधिकारः, स्वामित्वं २. हस्तक्षेपः, परकार्यचर्चा ३. प्रवेशः, उपगमः।

—देना, क्रि. स., परकार्याणि निरूप् (चु.)-चर्च् (चु. आ. से.), परकर्मसु व्याप् (तु. आ. अ.), मध्ये पत् (भ्वा. प. से)।

दग़ाना, क्रि. अ., ब. 'दागना' के कर्म. के रूप।

दग़ा, सं. स्त्री. (अ.) छलं, कपटं, वंचनं, प्रतारणा २. विश्वासघातः।

—करना या देना, क्रि. स., प्रतॄ-प्रलुभ्-भ्रम्-मुह् (प्रे.), वंच् (चु.)।

—दार,-बाज़, वि. (अ.+फ़ा.) कितवः, प्रतारकः, वंचकः, शठः, विश्वासघातिन्, छलिन्, कापटिक।

—बाज़ी, सं. स्त्री. (फ़ा.) वंचकता, कैतवं २. विश्वासघातकता।

दग्ध, वि. (सं.) ज्वलित, भस्मीभूत, भस्मसात् कृत २. दुःखित, व्यथित।

दढ़ियल, वि., दे. 'डढ़ियल'।

दतवन, दतौन, सं. स्त्री., दे. 'दातुन'।

दत्त, वि. (सं.) विसृष्ट, विश्राणित, अर्पित।

दत्तक, सं. पुं. (सं.) कृतकः पुत्रः, दत्तिमः सुतः, दत्तकपुत्रः।

दत्तचित्त, वि. (सं.) अवहित, समाहित, अभिनिविष्ट, एकाग्र, अनन्यवृत्ति।

ददिहाल, सं. पुं. (हिं. दादा+सं. आलयः) पितामहालयः २. पितामह,-कुलं-वंशः।

ददु, सं. पुं. (सं.) ददुः-द्रुः, दद्रुः, दद्रुरोगः, मंडलकुष्ठम्।

दधि, सं. पुं. (सं. न.) दे. 'दही'।

—ज्ञात, सं. पुं. (सं.) चंद्रः, सोमः।

दधीचि, सं. पुं. (सं.) मुनिविशेषः।

दनदनाना, क्रि. अ. (अनु.) दे. 'दंदनाना'।

दनादन, क्रि. वि. (अनु.) सदनदनशब्दं २. अनुक्रमेण, यथाक्रमम्।

दनुज, सं. पुं. (सं.) असुरः, राक्षसः।

दफ़्ती, सं. स्त्री. (अ. दफ्तीन) दे. 'पत्ता'।

दफ़न, सं. पुं. (अ.) निखननं २. श्मशाने स्थापनम्।

—करना, क्रि. स., श्मशाने-प्रेतभूमौ निधा (जु. उ. अ.)-स्था (प्रे.)-निक्षिप् (तु. प. अ.) २. निखन् (भ्वा. प. से.), निगुह् (भ्वा. उ. से.)।

दफ़ा, सं. स्त्री. (अ. दफ़अः) दे. 'बार' २. विधान-, धारा। वि., अपसारित, दूरीकृत, निष्कासित, वि-, चालित।

दफ़्तर, सं. पुं. (फ़ा.) कार्यालयः २. बृहत्पत्रं ३. सविस्तरवृत्तांतः।

दफ़्तरी, सं. पुं. (फ़ा.) पत्रसंयोजकः २. दे. 'जिल्दसाज़'। वि., कार्यालयसंबंधिन्।

दबंग, वि. (हिं. दबाना) प्रभाव,-वत्-शालिन्, अनुभाववत्, प्रतापिन्, प्रबल।

दबकना, क्रि. अ. (हिं. दबाना) (भयेन) गुप्-गुह् (कर्म.), गुप्त-निलीन (वि.) भू, निली (दि. आ. अ.) २. परावस्कंदनार्थं निभृतं स्था (भ्वा. प. अ.) ३. देहं नम् (प्रे.), नम्रीभू।

दबकाना, क्रि. स. ब. 'दबकना' के प्रे. रूप २. दे. 'डाँटना'।

दबदबा, सं. पुं. (अ.) आतंकः, प्रतापः, अनुभावः, प्रभावः, तेजस् (न.), प्रौढिः (स्त्री.)।

दबना, क्रि. अ. (सं. दमनं>) [भ (भा) रेण] अव-आ-नम् (भ्वा. प. अ.) अथवा नम्री-वक्री,-भू २. संकुच्-संपिंड्-संह (कर्म.) ३. पीड्-क्लिश् (कर्म.) ४. निखन्-निगुह् (कर्म.) ५. प्रच्छन्न-गुप्त-निलीन (वि.) भू ६. वशं इ-या (अ. प. अ.), वशीभू ७. आक्रम्-निष्पिष्-संमृद् (कर्म.) ८. भी (जु. प. अ.), त्रस् (दि. प. से.)।

दबे पाँव (चलना), मु., अपादशब्दं नीरवं-निभृतं चल् (भ्वा. प. से.)।

दबाना, क्रि. स., ब. 'दबना' के प्रे. रूप।

दबा लेना, मु., अन्यायेन ग्रह् (क्र्. प. से.) आत्मसात्कृ।

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

दबाव, सं. पुं. (हिं दबाना) अतिभारः, निर्बंधः, पीडनं २. अनुभावः, प्रतापः ।

दबैल, वि. (हिं. दबना) कातर, भीरु, ससाध्वस, त्रस्त ।

दबोचना, क्रि. स. (हिं. दबाना) बलेन-सहसा अभिद्रु (भ्वा. प. अ.), आक्रम् (भ्वा. प. से., आ. अ.)-ग्रह् (क्र्. प. से.)-धृ (चु.) । सं. पुं., सहसा ग्रहणं-धरणं-आक्रमणं इ. ।

दबौनी, सं. स्त्री. (हिं. दबाना) *पत्रदमनी २. कांस्यकाराणामुपकरणभेदः ।

दभ्र, वि. (सं.) स्वल्प, स्तोक २. सूक्ष्म, कृश । सं. पुं., समुद्रः ।

दम, सं. पुं. (सं.) आत्मसंयमः, इन्द्रिय,-जयः-निग्रहः, दांतिः (स्त्री.), दमथः-थुः (पुं.), २. दंडः, शासनं, निग्रहः ३. गृहं ४. कर्दमः ।

दम, सं. पुं. (फ़ा.), प्र-नि-, श्वासः, उच्छ्वासः, उच्छ्वसितं २. असवः-प्राणाः (पुं. बहु.), जीवनं, जीवितं ३. फूत्कारः, फूत्कृतं, धूमाकर्षः ४. पलं, क्षणः, निमि (मे) षः ५. व्यक्तित्वं ६. अभिमानः, दर्पः ७. छलं, कपटं ८. वाष्पेण पाचनम् ।

—दिलासा, सं. पुं., मोघाशा, सांत्वनं, आश्वासनम् ।

—बदम, क्रि. वि. अनु-प्रति,-क्षणं-पलं-निमिषं, क्षणे क्षणे, पले पले ।

—चढ़ना, मु., कष्टेन-सत्वरं श्वस् (अ. प. से.) कृच्छ्रेण-दीर्घं निःश्वस् ।

—निकलना, मु., दे. 'मरना' ।

—भर में, मु., क्षणेन, क्षण-निमेष,-मात्रेण, झटिति, सद्य एव ।

—में दम आना, मु., चेतनां-संज्ञां लभ् (भ्वा. आ. अ.) ।

—लगाना, मु., तमः खुं-धूमं पा (भ्वा. प. अ.) ।

—लेना, मु., विश्रम् (दि. प. से), उद्योगात् विरम् (भ्वा. प. अ.) ।

—साधना, मु., प्राणान् रुध् (रु. प. अ.) ।

—नाक में आना, अत्यन्तं तप्-क्लिश्-पीड् (कर्म.)-खिद् (दि. आ. अ.) ।

दमक, सं. स्त्री. (हिं. चमक का अनु.) दे. 'चमक' ।

दमकना, क्रि. अ., दे. 'चमकना' ।

दमकल, सं. स्त्री. (हिं. दम+कल) *श्वासयंत्रम् २. अग्नियंत्रं (फ़ायर इंजन) ३. जलोत्तोलनयंत्रम् ।

दमकला, सं. पुं. (हिं. दमकल) *जपासेचनी ।

दमड़ी, सं. स्त्री. (सं. द्रम्मम् >) काकिनी-णी, काकिणिका, वोधी, पण,-पादः-अष्टमभागः ।

दमदमा, सं. पुं. (फ़ा.) सिकतिलप्रसेवगुप्तिः (स्त्री.) (हिं. मोरचा) ।

दमन, सं. पुं. (सं. न.) अभिभवः, वि-, जयः निरोधनं, नियमनं, वशी-स्वायत्ती,-करणं, (२-३) दे. 'दम' (१–२) ।

दमनीय, वि. (सं.) वश्यः-श्या-श्यम्, निग्रहणीयः-या-यम्, संयमनीयः-या-यम् ।

दमयंती, सं. स्त्री. (सं.) भैमी, वैदर्भी, नलपत्नी ।

दमा, सं. पुं. (फ़ा.) श्वासरोगः, कृच्छ्रोच्छ्वासः, तमकः, तमकश्वासः ।

दमादम, क्रि. वि. (अनु०) सदम-दमशब्दम् २. निरन्तरं, सततम् ।

दमामा, सं. पुं. (फ़ा.) दे. 'नक़ारा' ।

दमित, वि. (सं०) संयमितः-ता-तम्, नियमितः-ता-तम्, शासितः-ता-तम्, निरुद्धः-द्धा-द्धम् ।

दया, सं. स्त्री. (सं.) अनुकंपा, अनुग्रहः, कृपा, प्रसादः, करुणा, हितेच्छा ।

—निधान
—निधि
—मय
} वि., परमदयालु, परमकृपालु, परमकारुणिक; सं. पुं., ईश्वरः ।

—पात्र, वि. (सं. न.) दयनीय, अनुकंप्य, करुणार्ह ।

दयानतदार, वि. (अ. दयानत+फा. दार) शुचि, सरल, ऋजु, शुद्धात्मन्, निष्कपट, अर्थशुचि ।

दयानतदारी, सं. स्त्री. (अ.+फ़ा) शुचिता, अर्थशौचं, आर्जवं, सत्यता, निष्कपटता ।

दयालु, वि. (सं.) दयित्नु, दयाशील, दयार्द्र, कृपालु, कारुणिक, अनुकम्पक, सदय, दयावत् ।

दयालुता, सं. स्त्री. (सं.) कृपालुता, दयाशीलता, दे. 'दया' ।

दर[1], सं. स्त्री. पुं., दे. 'निर्झर' ।

दर[2], सं. पुं. (फ़ा.) द्वारं, द्वार् (स्त्री.), प्रति-(ती) हारः ।

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

—बदर, क्रि. वि., गृहाद् गृहं, द्वारे द्वारे, अनुद्वारम् ।
—बदर फिरना, मु०, दारिद्र्येण परिभ्रम् (भ्वा. प. से.)।
दरकना, क्रि. अ. (सं. दरः>) भंज्-विदृ-विभिद् (कर्म.), स्फुट् (तु. प. से.), विदल् (भ्वा. प. से.)।
दरकाना, क्रि. स., ब. 'दरकना' के प्रे. रूप।
दरकार, वि. (फ़ा.) अपेक्षित, आकांक्षित, आवश्यक।
दरकिनार, क्रि. वि., (फ़ा.) दूरे आस्ताम्, पृथक् तिष्ठतु, का कथा।
दरख्त, सं. पुं. (फ़ा.) वृक्षः, तरुः।
दरख्वास्त, सं. स्त्री. (फ़ा.) निवेदनं २. निवेदनपत्रम्।
दरगाह, सं. स्त्री. (फ़ा.) देहली २. न्यायालयः ३. (मृतस्य) समाधिः (पुं.) ४. मन्दिरं, देवालयः।
दरज, सं. स्त्री., दे. 'दरार'।
दरद, सं. पुं., दे. 'दर्द'।
दरदरा, वि. (सं. दरणं>) अर्द्धचूर्णित, सामिपिष्ट।
दरबा, सं. पुं. (फ़ा. दर) विटंकः, कपोतपालिका २. कपोतविलम्।
दरबान, सं. पुं. (फ़ा.। मि. सं., द्वारवान्) द्वारपालः, दौवारिकः।
दरबानी, सं. स्त्री. (फ़ा.) दौवारिकता, द्वारस्थता।
दरबार, सं. पुं. (फ़ा.) राज,-सभा-कुलं, आस्थानं-नी २. अधिकरणं, न्याय-धर्म,-सभा, व्यवहारमंडपः।
दरबारी, सं. पुं. (फ़ा.) राजसभासद् (पुं.), सभ्यः, सभिकः, राजवल्लभः, आस्थानचरः।
दरमियान, स. पुं. तथा क्रि. वि., दे. 'मध्य'।
दरमियानी, वि. (फ़ा.) दे. 'मध्यम'।
दरयाफ़्त, वि., दे. 'दरियाफ़्त'
दरवाज़ा, सं. पुं. (फ़ा.) दे. 'दर' २. दे. 'किवाड़'।
दरवेश, सं. पुं. (फ़ा.) साधुः (पुं.), सन्न्यासिन्, भिक्षुः (पुं.)।
दरस, सं. पुं. (सं. दर्शः) दर्शनं, वीक्षणं २. सं.-आगमः-मिलनं ३. सौन्दर्यम्।
दराँती, सं. स्त्री. (सं. दात्रं) लवित्रं, शस्यकर्तनी, खडगीकम्।
दराज़[1], सं. स्त्री. (अं. ड्राअर) चलसंपुटः, निष्कर्षणी।
दराज़[2], वि. (फ़ा.) दीर्घ, लम्ब।
दरार, सं. स्त्री. (सं. दरः-रं) छेदः, भेदः, स्फोटः, भिदा, भंगः।
दरिंदा, सं. पुं. (फ़ा.) श्वापदः, हिंस्र-घातुक-पिशिताश,-पशुः (पुं.)-जीवः।
दरिद्र-द्री, वि. (सं. दरिद्र) अधन, निर्धन, अकिंचन, निःस्व, अर्थ-धन-द्रव्य-विभव,-हीन, दीन, दुर्गत।
दरिद्रता, सं. स्त्री. (सं.) दारिद्र्यं, निर्धनता, अकिंचनता, दुर्गतिः (स्त्री.) इ.।
दरिया, सं. पुं. (फ़ा.) नदी, सरित् (स्त्री.) २. सागरः।
—दिल, वि. (फ़ा.) उदार, दानशील, वदान्य २. महानुभाव, उदारचेतस्।
दरियाई घोड़ा, सं. पुं. (फ़ा.+हिं.) करियादस् (न.), नदीघोटः-टकः।
दरियाफ़्त, वि. (फ़ा.) ज्ञात, विदित। सं. स्त्री., आविष्कारः।
दरी[1], सं. स्त्री. (सं.) दे. 'गुफा'।
दरी[2], सं. स्त्री. (सं. स्तरः>) कुथः-था, आस्तरणं, परिस्तोमः।
दरीचा, सं. पुं. (फ़ा.) वातायनं २. द्वारकम्।
दरीबा, सं. पुं., (फ़ा.) ताम्बूलापणः, ताम्बूलपर्णहट्टः, २. हट्टः, विपणी-णिः (स्त्री.)।
दरेग़, सं. पुं. (फ़ा.) अरुचिः (स्त्री.), विमुखता।
दर्ज, वि. (फ़ा.) लिखित, लेख्ये निवेशित।
—करना, क्रि. स., लिख् (तु. प. से.), लेख्ये निविश् (प्रे.)।
दर्जन, सं. पुं. (अं. डज़न) द्वादशकं, द्वादशसमूहः।
दर्जा, सं. पुं. (अ.) श्रेणी-णिः (स्त्री.), वर्गः, छात्रगणः २. कोटिः (स्त्री.), काष्ठा ३. पदं, पदवी-विः (स्त्री.) ४. क्रमः, परम्परा ५. भूमिः (स्त्री.) (मकान की मंज़िल)। क्रि. वि.,-गुणं,-वारं,-गुणितम्।
—ब दर्जा, क्रि. वि., क्रमशः, क्रमेण, शनैः शनैः।
दर्ज़िन, सं. स्त्री. (फ़ा. दर्ज़ी) तुन्नवायी, (सौ) चिकी, सूचिकर्मोपजीविनी।
दर्ज़ी, सं. पुं. (फ़ा.) तुन्नवायः, सू (सौ) चिकः, वस्त्रसेवकः, सूचिकर्मोपजीविन्।

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

दर्द, सं. पुं. (फ़ा.) पीडा, व्यथा, दुःखं, वेदना, अ (आ) र्त्तिः (स्त्री.) यातना, क्लेशः, कष्टं, कृच्छ्रं २. करुणा, दया, सहानुभूतिः (स्त्री.) ३. हानि-नाश,-दुःखम् ।

—गुर्दा, सं. पुं. (फ़ा.) वृक्क (क्का) वेदना, गुर्द-शूलः-लम् ।

—नाक, वि. (फ़ा.) दुःखद, कष्टप्रद, क्लेश-कर [-री (स्त्री.)], संतापक ।

—सर, सं. पुं. (फ़ा.) शीर्ष,-शूलं-पीडा-व्यथा, शिरोवेदना ।

दर्दमंद, वि. (फ़ा.) पीडित, व्यथित, दुःखित २. दयालु, दयावत् ।

दर्दशी, सं. स्त्री. (देश.) गृध्रसी (ऊरुरोगभेदः)।

दर्दी, वि (फ़ा. दर्द) दे. 'दर्दमंद' ।

दर्प, सं. पुं. (सं.) अभिमानः, मानः, स्मयः, चित्तोन्नतिः (स्त्री.), गर्वः, अहङ्कारः, अवलेपः, २. उद्दण्डता, उद्धतता ।

दर्पक, सं. पुं. (सं.) दृप्तः, अहंकारिन्, गर्वितः, अवलिप्तः, उद्धतः ।

दर्पण, सं. पुं. (सं. पुं. न.) मुकुरः, आदर्शः, आत्मदर्शः, कर्कः, कर्करः, दर्शनम् ।

दर्पित, वि. (सं.) गर्वितः-ता-तं, दृप्तः-ता-तं, अवलिप्तः-ता-तम् ।

दर्भ, सं. पुं. (सं.) कुशभेदः २. कुशः ३. उल-पतृणं, काशः ।

दर्रा, सं. पुं. (फ़ा.) संकट-संबाध,-पथः-मार्गः, दुर्गसंचरः, गिरिद्वारम् ।

दर्शक, सं. पुं. (सं.) द्रष्टृ (पुं.), प्रेक्षकः, वीक्षकः, दर्शिन् २. (सभा आदि के) पार्षदः, पारिषद्यः, सामाजिकः ३. प्रकाशकः, प्रदर्शकः ।

दर्शन, सं. पुं. (सं. न.) वि-आ-अव,-लोकनं, वि-, ईक्षणं, साक्षात्करणं, चाक्षुषज्ञानं, निर्वर्णनं, निभालनं २. सं-, मिलनं, समागमः, संगतिः (स्त्री.) ३. तत्त्व,-विद्या-शास्त्रं-ज्ञानं ४. नेत्रं ५. दर्पणः ।

दर्शनीय, वि. (सं.) अव-आ-वि,-लोकनीय, ईक्षणीय, निभालनीय २. मनोहर, अभिराम ।

दर्शनी हुंडी, सं. स्त्री., सद्यःशोध्यं धनार्पणा-देशपत्रम् ।

दल, सं. पुं. (सं. पुं. न.) सेना, सैन्यं २ संघः, गणः, समूहः ३. पत्रं, पलाशं, पर्णं, छदः, छदनं ४. अर्द्धखण्डः-डं ५. चक्रं, मण्डली

—पति, सं. पुं. (सं.) सेना,-नीः (पुं.)-नायकः, चमूपतिः (पुं.) २. अग्रणीः (पुं.), अध्यक्षः, प्रमुखः, नायकः ।

दलकना, क्रि.अ.,दे. 'दरकना' २. दे. 'थर्राना' ।

दलदल, सं. स्त्री. (सं. दलाढ्यं) कर्दमः, पंकः-कं, जंबालः-लं २. अनूपः, कच्छ,-भूः-भूमिः (स्त्री.), कच्छः ।

दलदली, वि. (हिं. दलदल) पंकदूषित, पंकिल, सकर्दम, कर्दममय [-यी (स्त्री.)] २. आनूप, [-पी (स्त्री.)], जल,-आढ्य-पूर्ण-मय ।

दलन, सं. पुं. (सं. न.) पेषणं, खंडनं, चूर्णनं, निष्पेषः, मर्दनं २. वि-, नाशः-ध्वंसः, संहारः ।

दलना, क्रि. स. (सं. दलनं) स्थूलस्थूलं पिष् क्षुद् (रु. प. अ.)-मृद् (क्र्. प. से.)-चूर्ण्-खण्ड् (चु.), निर्दल् (भ्वा. प. से.) २. संपीड् (चु.), पादतलेन मृद् ३. (पेषण्यादिभिः), द्विधा खण्ड् (चु.)-शकलीकृ ४. नश्-ध्वंस् (प्रे.)। सं. पुं. दे. 'दलन' ।

दलनेवाला, सं. पुं., स्थूल,-पेषकः-मर्दकः-चूर्णकः।

दलबादल, सं. पुं. (सं. दलं+हिं. बादल) मेघमाला, कादंबिनी, घनपटली २. महती चमूः (स्त्री.) ३. बृहत्पटमंडपः ।

दलवाना, क्रि. प्रे., व. 'दलना' के प्रे. रूप ।

दलहन, सं. पुं. (हिं. दाल) दाली-द्विदला-वैदल,-मूलान्नं-उपयुक्तान्नम् ।

दलहरा, सं. पुं. (हिं. दाल) दाली-वैदल,-विक्रेतृ-विक्रयिन्-विक्रायकः ।

दलादली, सं. स्त्री. (सं. दलः-लं >) दल-गण-संघ-वर्ग,-स्पर्द्धा-विजिगीषा-प्रतियोगिता ।

दलाल, सं. पुं. (अ.) परार्थे क्रयविक्रयायोजकः, क्रयविक्रयसहायकः, मध्यस्थः ।

दलाली, सं. स्त्री. (अ. दलाल) क्रयविक्रय-सहायकत्वं २. क्रयविक्रयसहायकत्ववेतनम् ।

दलित, वि. (सं.) खंडित, चूर्णित, मर्दित, शकलीकृत २. अव(ना)मित, अवपीडित ३. अस्पृश्य, अंत्यज ४. नाशित, ध्वंसित । सं. पुं., अस्पृश्यः, नीचः, अंत्यजः, *हरिजनः ।

—उद्धार, सं. पुं. (सं.) अस्पृश्य-अन्त्यज-हरि-जन,-उन्नतिः (स्त्री.)-उन्नयनं-उद्धारः ।

—वर्ग, सं. पुं. (सं.) अस्पृश्य-अन्त्यज-नीच,-वर्गः-समुदायः ।

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

दलिया, सं. पुं. (हिं. दलना) *दलितकः, दलित खंडित-मर्दित,-अन्नम् ।

दलील, सं. स्त्री. (अ.) तर्कः, युक्तिः (स्त्री.), हेतुः (पुं.) २. वादः, वाद,-संवादः-विवादः, शास्त्रार्थः ।

दव, सं. पुं. (सं.) दे. 'दावानल' ।

दवा, सं. स्त्री. (फ़ा.) औषधिः (स्त्री.), औषधं, भेषजं २. उपचारः, चिकित्सा ३. प्रति-(ती)कारः, प्रतिविधानम् ।

—ख़ाना, सं. पुं. (फ़ा.) औषधालयः, भेषजालयः ।

—दारू, सं. स्त्री. (फ़ा.+सं.) उपक्रमः, उपचारः, चिकित्सा ।

दवाग्नि, सं. स्त्री. **दवानल**, सं. पुं. } सं. पुं., दे. 'दावानल' ।

दवात, सं. स्त्री. (अ. दावात) मसी,-कूपी-धानी-धानं-पात्रं-भाजनं, सेला,-नंदः-नंदा-अंधुकः ।

दवामी बंदोबस्त, सं. पुं. (फ़ा.) भूमिकरस्य स्थायिप्रबंधः ।

दश, वि. दे. 'दस' ।

—आनन, —आस्य, —कंठ, —कंधर, —ग्रीव,—मुख, सं. पुं, (सं.) रावणः ।

दशन, सं. पुं. (सं. पुं. न.) दे. 'दाँत' ।

दशम, वि. (सं.) दे. 'दसवाँ' ।

दशमलव, सं. पुं. (सं.) दशमबिन्दुः (बीज-गणित) ।

दशमी, सं. स्त्री. (सं.) चांद्रमासस्य शुक्ला कृष्णा वा दशमी तिथिः (पुं., स्त्री.) २. मरणा-वस्था ३. विमुक्तावस्था ।

दशमूल, सं. पुं. (सं. न.) पाचनभेदः (वैद्यक) ।

दशरथ, सं. पुं. (सं.) अवधेशो नृपविशेषः, श्रीरामचन्द्रस्य पिता ।

दशहरा, सं. पुं. (सं. स्त्री.) गंगा, भागीरथी २. गंगाया अवतरणतिथिः, ज्येष्ठशुक्लदशमी ३. उक्ततिथौ गंगावतरणोत्सवः ४. विजया-दशमी, रावणवधतिथिः (पुं., स्त्री.), आश्विन-शुक्लदशमी ।

दशांश, सं. पुं. (सं. दशांशः >) दशम,-अंशः-भागः ।

दशा, सं. स्त्री. (सं.) अवस्था, स्थितिः-वृत्तिः-गतिः (स्त्री.), भावः ।

दस, वि. (सं. दशन्) । सं. पुं., उक्ता संख्या, तदंकौ (१०) च ।

—गुना, वि., दश,-गुण-गुणित ।

—प्रकार से, क्रि. वि., दशधा (अव्य.) ।

—बार, क्रि. वि., दशकृत्वः (अव्य.) ।

दसवाँ, वि. (सं, दशमः-मी-मम्) ।

दस्तंदाज़ी, सं. स्त्री. (फ़ा.) हस्तक्षेपः, पर-कार्यचर्चा ।

दस्त, सं. पुं. (फ़ा.) अति(ती)सारः, द्रवमलं २. हस्तः, करः ।

आँव-लहू वाले—, सं. पुं., आमरक्तातिसारः ।

आँववाले—, सं. पुं., आमातिसारः ।

लहूवाले—, सं. पुं., रक्तातिसारः ।

—कार, सं. पुं. (फ़ा.) शिल्पिन्, शिल्पकारः ।

—कारी, सं. स्त्री. (फ़ा.) शिल्पं, शिल्पविद्या, हस्त,-शिल्पं-कर्मन् (न.)-क्रिया ।

—ख़त, सं. पुं. (फ़ा.) नाम-हस्त,-अक्षरम् ।

—ख़त करना, क्रि. स., स्वनामन् (न.) लिख् (तु. प. से.), हस्ताक्षरं कृ ।

—बस्ता, क्रि. वि. (फ़ा.) साञ्जलि, अञ्जलिं बद्ध्वा ।

दस्तक, सं. स्त्री. (फ़ा.) द्वार,-आघातः-ताडनं-प्रहारः ।

दस्तरख़ान, सं. पुं. (फ़ा.) मञ्चकवस्त्रं, फल-कपटः ।

दस्ता, सं. पुं. (फ़ा. दस्तः) मुष्टिः (स्त्री.), वारंगः । (खड्ग का) सरुः-त्सरुः (पुं.) २. मुसलः-लं ३. पत्रचतुर्विंशतिः (स्त्री.) ४. सैनिकसंघकः ५. दे. 'गुलदस्ता' ।

दस्ताना, सं. पुं. (फ़ा.) *हस्तत्राणः, करच्छदः ।

दस्तावर, वि. (फ़ा.) वि-, रेचक-रेचन, शोधन, सारक ।

दस्तावेज़, सं. स्त्री. (फ़ा.) व्यवहार-समय,-पत्रं-लेखः ।

दस्ती, वि. (फ़ा. दस्त) हस्त्य, कर-, हस्त-२. वारंगकः, लघुमुष्टिः (स्त्री.) ।

दस्तूर, सं. पुं. (फ़ा.) प्रथा, रीतिः (स्त्री.) २. नियमः, विधिः (पुं.) ।

दस्तूरी, सं. स्त्री., (फ़ा. दस्तूर >) (वणि-ग्भिर्धनिकदासेभ्यो देयं) प्रथाशुल्कम् ।

दस्यु, सं. पुं. (सं.) चौरः, लुंठकः, २. अनार्यः, म्लेच्छः ।

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

दह, सं. पुं. (सं. ह्रदः>) *सरिद्गर्तः २. कुंडं ३. जलावर्तः।

दहक, सं. स्त्री. दे. 'धधक'।

दहकना, क्रि. अ. (सं. दह्) दे. 'धधकना'।

दहक्कान, सं. पुं. (फ़ा.) कृषाणः, कृष (पि)-कः, कृषीवलः। वि., अज्ञ, मूढ, अशिष्ट।

दहक्काना, क्रि. स. (हिं. दहकना) दे. 'धधकाना'।

दहन, सं. पुं. (सं. न.) ज्वलनं, दाहः, प्लोषः २. (सं. पुं.) अग्निः (पुं.)।

दहलना, क्रि. अ.(सं. दरः=डर>) भयेन कंप्-वेप् (भ्वा. आ. से.), वि-,त्रस् (भ्वा. दि. प. से.)।

दहलाना, क्रि. प्रे., व. 'दहलना' के प्रे. रूप।

दहलीज़, सं. स्त्री. (फ़ा.) देहली, गृहावग्रहणी।

दहशत, सं. स्त्री. (फ़ा.) त्रासः, आतंकः, भीतिः (स्त्री.)।

दहसेरी, सं. स्त्री. (सं. दशसेरी) दशसेटकी।

दहाई, सं. स्त्री. (फ़ा. दह) दशत्वं २. दशकं, दशतिः (स्त्री.) ३. अंकगणनायां द्वितीयस्थानं ४. दशमांशः।

दहाड़, सं. स्त्री. (अनु.) गर्जितं, गर्जनं-ना, महत्-दीर्घ-गंभीर,-नादः-शब्दः २. आ-वि,-क्रोशः-आर्त्तनादः।

दहाड़ना, क्रि. अ. (हिं. दहाड़) गर्ज्-रस्-नद्-नर्द् (भ्वा. प. से.) २. आ-उत्-वि-व्या,-क्रुश् (भ्वा. प. अ.), सचीत्कारं रुद् (अ. प. से.)।

दहाना, सं. पुं. (फ़ा.) विस्तीर्णमुखं २. द्वारं ३. भस्त्रामुखं ४. नदीमुखम्।

दहिना, वि. (सं. दक्षिण) अपसव्य, वामेतर, सव्येतर २. तुष्ट, कृपालु।

दहिने, क्रि. वि. (हिं. दहिना) दक्षिणेन, दक्षिणतः, दक्षिणा-णात्-णाहि।

दही, सं. पुं. [सं. दधि (न.)] क्षीरजं, विरलं, मंगल्यं, प्रयस्यं, द्रप्सः-सं, श्रीधनम्।

दहेज, सं. पुं. (अ. जहेज़) युतकं, यौतुकं, स्त्रीधनं, शुल्कं, वाहनिकम्।

दाँ, सं. पुं., (सं.-दा)-वारं,-कृत्वः (दोनों अव्य.)। (फ़ा.) वि., (समासान्त में)-ज्ञ, (हिसाबदाँ=गणितज्ञः इ.)।

दाँए-बाँए, क्रि. वि. (सं. दक्षिण+वाम>) दक्षिणतो वामतश्च, दक्षिणवामपार्श्वयोः, इतस्ततः, अत्र तत्र।

दाँत, सं पुं. (सं. दंतः) दशनः, रदनः, खादनः, रदः, द्विजः, खरुः (पुं.), दंशः। (सामने के आठ=छेदक-कर्तनक,-दन्ताः, साथ के चार=भेदक-रदनक,-दन्ताः, उनसे पिछले आठ=अग्रचर्वणकदन्ताः; पिछले बारह=चर्वणकदन्ताः)।

—उगना, क्रि. अ., दंताः उद्गम् (भ्वा. प. अ.)-उद्भिद् (कर्म.)। सं. पुं., दंतोद्गमः।

—किचकिचाना, —किटकिटाना, } क्रि. अ., (क्रोधेन) दंतैर्दंतान् घृष् (भ्वा. प. से.)-निष्पिष्

—चबाना, —पीसना, } (रु. प. अ.)-विघट्ट् (प्रे.)। सं. पुं., दंत,-घर्षणं-निष्पेषः।

—का दर्द, सं. पुं., दंत,-पीडा-शूलम्।

—का पेस्ट, सं. पुं., *दंतलेपः।

—का बुरश, सं. पुं., दंतकूर्चकः,-कम्।

—का मंजन, सं. पुं., निश्चुक्कणम्, दंतमार्जनं, रदक्षोदः।

—खोदनी, सं. स्त्री., दंतोल्लेखनी, दंतशोधनी।

—बनानेवाला, सं. पुं., दंत,-वैद्यः-चिकित्सकः।

—खट्टे करना या तोड़ना, मु., वि-परा-जि (भ्वा. आ. अ.), अभि-परा-भू (भ्वा. प. से.)।

—तले उँगली दबाना, मु., अत्यर्थं वि-स्मि (भ्वा. आ. अ.), विस्मित-चकित (वि.) भू।

—निकालना, मु., हस् (भ्वा. प. से.) २. स्वायोग्यतां प्रकाश् (प्रे.)।

—रखना, लगाना या होना, मु., अत्यंतं अभिलष्-वांछ् (भ्वा. प. से.)।

दाँता, सं. पुं. (हिं. दाँत) दे. 'झंदाना'।

—किटकिट, —किलकिल, } सं. स्त्री., कलहः, वाग्युद्धं २. दे. 'गालीगलौज'।

दाँती, सं. स्त्री., दे. 'दराँती'।

दांपत्य, वि. (सं.) पतिपत्नी-जायापति-विषयक, वैवाहिक, जांपत्य। सं. पुं. (सं. न.) दाम्पत्य,-संबंधः-व्यवहारः, जांपत्यम्।

दांभिक, वि. (सं.) दे. 'दंभी'।

दाइज-जा, सं. पुं., दे. 'दहेज'।

दाई, वि. स्त्री., दे. 'दहिनी'।

दाई, सं. स्त्री. (सं. धात्री, फ़ा. दायः) मातृका,

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

उपमातृ (स्त्री,-), अंकपाली २. सावित्रका, प्रसवकारिणी ।

—गीरी, सं. स्त्री., गर्भमोचनविद्या, प्रसव-सूति-, कार्य-कर्मन् (न.) ।

—से पेट छिपाना, मु., रहस्यविदो रहस्यं गुह् (भ्वा. उ. वे.) ।

दाऊ, सं. पुं., (सं. देवः>) अग्रजः, ज्येष्ठभ्रातृ २. बल,-देवः-रामः, श्रीकृष्णाग्रजः ।

दाक्षायण, सं. पुं. (सं.) दक्षप्रजापतिकृतयज्ञः २. सुवर्णम् ३. आभूषणम् । वि. दक्षगोत्रीय ।

दाक्षायणी, सं. स्त्री. (सं.) अश्विन्यादिनक्षत्रम् २. सती ३. दुर्गा ४. अदितिः (स्त्री.) ५. दक्षगोत्रकन्या ।

—पति, सं. पुं. (सं.) शिवः २. चन्द्रः ।

दाक्षिणात्य, सं. पुं. (सं.) दक्षिणप्रदेश,-निवासिन्-वास्तव्यः २. नारिकेलः, अप्-कौशिक,-फलम् । वि. दक्षिण,-सम्बन्धिन्-प्रदेशीय ।

दाख, सं. स्त्री. (सं. द्राक्षा) गोस्तनी, स्वाद्वी, मृद्वीका, रसाला, गुच्छफला २. शुष्कद्राक्षा ३. दे. 'मुनक्का' ।

दाख़िल, वि. (फ़ा.) प्रविष्ट, निविष्ट २. संमिलित, समाविष्ट ३. न्यस्त, निक्षिप्त ।

—ख़ारिज, सं. पुं. (फ़ा.) स्वत्व-स्वामित्व,-परिवर्तः ।

—दफ़्तर, वि. (फ़ा.) लेखागारे निक्षिप्त ।

दाख़िला, सं. पुं. (फ़ा.) प्रवेशः-शनम् ।

दाग़, सं. पुं. (फ़ा.) अंकः, चिह्नं २. कलंकः, लांछनं, दोषः ३. तप्तलोहमुद्रांकः ४. बिंदुः (पुं.), तिलकः-कम् ।

—दार, वि. (फ़ा.) अंकित चिह्नित २. सतिलक, बिंदुमत्, कलुषित, दूषित, कलंकित ।

—लगना, क्रि. अ., कलंकित-दूषित-लांछित- (वि.) भू २. तप्तलोहमुद्रांकित (वि.) भू ।

—लगाना, क्रि. स., दुष् (प्रे.), कलंकयति (ना. धा.) २. (तप्तलोहमुद्रया) अंकयति-चिह्नयति (ना. धा.) ।

दाग़ना, क्रि. स. (फ़ा. दाग़) दे. 'दाग़ लगाना' २. लोहादिगोलान् प्रक्षिप् (तु. प. अ.)-प्रास् (दि. प. से.) ।

दाग़ी, वि. (फ़ा. दाग़) दे. 'दाग़दार' ।

दाघ, सं. पुं. (सं.) तापः, दाहः, ऊष्मन् (पुं.) ।

दाड़िम, सं. पुं. (सं.) दे. 'अनार' ।

दाढ़[1], सं. स्त्री, (सं. दाढ़ा) द्रंष्ट्रा, जंभः, स्वर्णदंतः ।

दाढ़[2], सं. स्त्री. (अनु.) गर्जितं, गर्जनं-ना २. चीत्कारः ।

दाढ़ी, सं. स्त्री. (दाढ़िका) कूर्चः-र्चं, श्मश्रु (न.), व्यंजनं, कोटः ।

—जार, सं. पुं., दग्ध,-कूर्च-श्मश्रु (गालीभेदः) ।

—बनवाना या मुड़ाना, क्रि. प्रे., कूर्चं मुंड् (चु.)-आवप् (प्रे.) ।

दाता, सं. पुं. (सं. दातृ) दानकर्तृ (पुं.) वदान्यः, दानशीलः, दारुः (पुं.), मुचिरः । [दात्री (स्त्री.) = दानकर्त्री] ।

दातु(तौ)न, सं. स्त्री. (हिं. दाँत) दंत,-काष्ठ-धावनम् ।

दाद[1], सं. स्त्री., दे. 'दद्रु' ।

दाद , सं. स्त्री, (फ़ा.) न्यायः, न्याय्यता ।

—देना, क्रि. स., गुणावगुणान् विविच्य प्रशंस् (भ्वा. प. से.) ।

दादा, सं. पुं. (सं. तातः>) पितामहः, पितृ-जनकः २. अग्रजः ।

दादी, सं. स्त्री. (हिं. दादा) पितामही, पितृ-जननी ।

दादुर, सं. पुं, (सं. दर्दुरः) मंडूकः, भेकः ।

दान, सं. पुं. (सं. न.) त्यागः, उत्-वि,-सर्जनं-सर्गः, विश्राणनं, वितरणं, भिक्षादानं २. प्रदानं ददनं, दत्तिः (स्त्री.), अतिसर्जनं ३. गजमदः ।

—करना या देना, क्रि. स., सत्कार्येषु-पुण्यार्थे वित्तं विसृज् (तु. प. अ.)-व्यय् (चु., भ्वा. उ. से.) ।

—धर्म, सं. पुं. (सं.) भिक्षा-,दानं, (पुण्यार्थे) त्यागः ।

—पत्र, सं. पुं. (सं. न.) दानलेखः ।

—पात्र, सं. पुं. (सं. न.) दान,-भाजनं-मंजूषा २. दानग्रहणाधिकारिन् ।

—पुण्य, सं. पुं. (सं. न.) दे. 'दानधर्म' ।

—शील, वि. (सं.) उदार, त्यागिन्, वदान्य, त्यागशील, दानशौंड ।

दानव, सं. पुं. (सं.) राक्षसः, रक्षस् (न.) ।

—इन्द्र, सं. (पुं.) बलिः ।

दानवी, वि. (सं.) दानवीय, दानव,-उचित-सम्बन्धिन् । सं. स्त्री. (सं.) दानव,-पत्नी-भार्या ।

दाना[1], सं. पुं. (फ़ा. दानह) अन्नकणः-णिका

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

२. अन्नं, धान्यं ३. गुलिका ४. पिटिका, रक्तवटी, स्फोटकः ।

—पानी, सं. पुं. (फ़ा.+हिं.) अन्नजलं, जलान्नम्, भक्ष्यपेयम् ।

—पानी उठना, मु., व्यवसाय-आजीविका,-समाप्तिः (स्त्री.)-अवसानम् ।

—(ने) दाने को तरसना, मु., क्षुधया बुभुक्षया मृ (तु. आ. अ.) ।

दाना[२], वि. (फ़ा.) प्राज्ञ, बुद्धिमत् ।

दानाई, सं. स्त्री. (फ़ा.) बुद्धिमत्ता, विद्वत्ता ।

दानी, वि. (सं.-निन्) दे. 'दानशील' तथा 'दाता' ।

दानेदार, वि., कण-कणिका,-मय [-यी (स्त्री.)] ।

दाब, सं. स्त्री., दे. 'दबाव' ।

दाबना, क्रि. स., दे. 'दबाना' ।

दाम[१], सं. पुं. (सं. दामन् न. स्त्री.) रज्जुः (स्त्री.), गुणः, संदानं २. माला, हारः ३. समूहः ४. संसारः ।

दाम[२], सं. पुं. (फ़ा. । मि. सं. 'दाम'[१]) पाशः, जालं, वागुरा ।

दाम[३], सं. पुं. (हिं. दमड़ी) पणचतुर्विंशभागः २. मूल्यं, अर्घः, वस्नं ३. धनं ४. राजनीतिः (स्त्री., राजनीति) ।

दामन, सं. पुं. (फ़ा.) चोलादीनां निम्नभागः, वस्त्रांचलः, वसनांतः २. उपत्यका ।

—पकड़ना, मु., शरणं प्रपद् (दि. आ. अ.), आ-उपा-सं,-श्रि (भ्वा. उ. से.) ।

—फैलाना, मु., याच् (भ्वा. उ. से.) ।

दामाद, सं. पुं. (फ़ा.) जामातृ (पुं.), पुत्री-पतिः (पुं.), कन्यावेदिन्, दुहितृधवः ।

दामिनी, सं. स्त्री. (सं.) तडित्-विद्युत् (स्त्री.), चञ्चला ।

दामोदर, सं.पुं. (सं.) श्रीकृष्णचन्द्रः २. विष्णुः ।

दाय, सं. पुं. (सं.) पैतृकं, पैतृक,-रिक्थं-धनं, गोत्रधनं २. यौतुकादिदेयधनम् ।

—भाग, सं. पुं. (सं.) दाय-रिक्थ,-विभागः-बंटनं-व्यंशनम् ।

दायक, सं. पुं. (सं.) दे. 'दाता' [दायिका (स्त्री.)] ।

दायजा, सं. पुं. (सं दायः>) दे. 'दहेज़' ।

दायर, वि. (फ़ा.) चलत् (शत्रंत), वर्तमान ।

दावा—करना, क्रि. स., अभियुज् (रु. आ. अ., चु.), राजकुले निविद् (प्रे.), अभियोगं प्रवृत् (प्रे.) ।

दायरा, सं. पुं. (अ.) चक्रं, मंडलं, वृत्तम् ।

दायाँ, वि. (सं. दक्षिण) दे. 'दहिना' ।

दायित्व, सं. पुं. (सं. न.) उत्तरदायित्वं २. दातृत्वम् ।

दायें, क्रि. वि. (हिं. दायाँ) दे. 'दहिने' ।

दार, सं. स्त्री. [सं. दाराः (नित्य पुं. बहुः)] कलत्रं, पत्नी, भार्या ।

—कर्म, सं. पुं. [सं.-मन् (न.)] विवाहः, पाणि-ग्रहणम् ।

दारक, सं. पुं. (सं.) शिशुः (पुं.), बालः, बालकः २. पुत्रः, तनयः ।

दार(ल)चीनी, सं. स्त्री. (सं. दारु+चीन = देशविशेष>) दे. 'तज' ।

दारा, सं. स्त्री., दे. 'दार' ।

दारिद,-द्र,-द्र्य, सं. पुं. (सं. दारिद्र्यं) निर्धनता, अकिंचनता, दरिद्रता ।

दारु, सं. पुं. (सं. न., कहीं-कहीं पुं.) काष्ठं २. देवदारु (पुं. न.) ।

दारुण, वि. (सं.) घोर, विषम, विकट, दुःसह, कठोर, २. भीषण, भयङ्कर ।

दारुहलदी, सं. स्त्री. (सं. दारुहरिद्रा) दार्वी, पीता, पीतिका ।

दारू, सं. स्त्री. (फ़ा.) औषधं, भेषजं २. मद्यं, सुरा ३. दे. 'बारूद' ।

—दरपन,
—दवा, } सं. स्त्री., चिकित्सा, उपचारः ।

दारोग़ा, सं. पुं. (फ़ा.) अध्यक्षः, अधिष्ठातृ (पुं.) निरीक्षकः २. दे. 'थानेदार' ।

दार्शनिक, सं. पुं. (सं.) तत्त्व,-विद्-वेत्तृ-ज्ञः (सब पुं.), दर्शनशास्त्रपण्डितः ।

दाल, सं. स्त्री. (सं. दालः = कोदों>) दाली, द्विदला-लं, वैदलः, शिंबा-बिका, हरेणुः (पुं.), हरेणुकः, शमी-शिम्बी,-धान्यम् ।

—दलिया, मु., रूक्षभोजनम् ।

—न गलना, मु., असमर्थ-अशक्त (वि.) स्था (भ्वा. प. अ.) ।

—में काला, मु., संदिग्धवार्ता २. कुरहस्यं ३. कुलक्षणम् ।

—रोटी, सं. स्त्री., सामान्याहारः ।

दालचीनी, सं. स्त्री., दे. 'तज' ।

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

दालन, सं. पुं. (सं. दलन>) दन्तरोगभेदः, दन्तक्षयः ।
दालमोठ, सं. स्त्री. (हिं. द्राल+मोठ) स्नेह-भर्जितदाली, सलवणः ।
दालान, सं. पुं. (फ़ा) दे. 'बरामदा' ।
दालिम, सं. पुं. (सं. दालि (डि) मः-मा) (वृक्ष) कुचफलः, शुकवल्लभः । (फल) कुचफलं, रक्तबीजं, दालि (डि) मम् ।
दावँ, सं. पुं. (सं. प्रत्य. दा>, उ. एकदा) पर्यायः, परिवृत्तिः (स्त्री.), वारः २. अवसरः, वेला, कार्यकालः, प्रसंगः ३. उपायः, युक्तिः (स्त्री.) ४. छलं, कपटं ५. मल्लयुद्धकूटयुक्तिः (स्त्री.) ६ निभृतावस्थितिः (स्त्री.) ।
—पर लगाना, मु., पण् (भ्वा. आ. से., षष्ठी के साथ; उ. 'रूप्यकस्य पणते') ।
—लगना, मु., अवसरः लभ् (कर्म.) ।
दाव, सं. पुं. (सं.) वनं २. दावानलः ३. अग्निः (पुं.) ४. दाहः, तापः ।
दावत, सं. स्त्री. (अ.) भोजनं-, निमंत्रणं २. विशिष्टभोजनम् ।
दावा, सं. पुं. (अ.) स्वत्वप्रतिपादनं, स्वामित्वप्रकाशनं २. स्वत्वं, अधिकारः ३. अभियोग-भाषा,-पत्रं ४. अभियोगः, पूर्वपक्षः, भाषा, भाषापादः ५. प्रतापः, प्रभुत्वं ६. दृढोक्तिः (स्त्री.) ७. प्रतिज्ञा, पक्षः, पूर्वपक्षः ।
पूर्वपक्षः स्मृतः पादो, द्विपादश्चोत्तरः स्मृतः ।
क्रियापादस्तथा चान्यः चतुर्थो निर्णयः स्मृतः ॥
—करना, क्रि. स., अभियुज् (रु. आ. अ., चु.) दे. 'दायर' के नीचे २. स्वत्वं प्रतिपद् (प्रे.) ।
—ख़ारिज करना, क्रि. स., अभियोगं अपास् (दि. प. से.)-निराकृ ।
—गीर, —दार, } सं. पुं. (अ.+फ़ा.) अभियोक्तृ (पुं.), अर्थिन्, वादिन्, अभियोगिन्, सूचकः, कार्यार्थिन् २. स्वत्वप्रतिपादकः, स्वामित्वप्रकाशकः ।
दावानल, सं. पुं. (सं.) दा(द)वाग्निः (पुं.), वनवह्निः (पुं.), द(दा)वः ।
दास, सं. पुं. (सं.) किंकरः, भृत्यः, भुजिष्यः, दासेयः, दासेरः, दे. 'नौकर' ।
दासत्ता, सं. स्त्री. (सं.) दासत्वं, दास,-भावः-वृत्तिः (स्त्री.) ।
दासानुदास, सं. पुं. (सं.) अतिनम्रः किंकरः, तुच्छसेवकः ।
दासी, सं. स्त्री. (सं.) चेटी, भुजिष्या, दे. 'नौकरानी' ।
दासेय, सं. पुं. (सं.), दासीपुत्रः २. दासः ।
दास्तान, सं. स्त्री. (फ़ा.) कथा २. वृत्तान्तः ३. वर्णनम् ।
दास्य, सं. पुं. (सं. न.) दे. 'दासता' ।
दाह, सं. पुं. (सं.) दाहनं, ज्वालनं, भस्मीकरणं २. शवदाहः, अन्त्येष्टि-मृतक,-संस्कारः-क्रिया ३. तापः, प्लोषः, शोकः, सन्तापः ४. ईर्षा-र्ष्या ।
—कर्म, सं. पुं. [सं.-र्मन् (न.)] दे. 'दाह'(२) ।
दाहक, वि. (सं.) तापक, दीपक, प्लोषक ।
दाहना, क्रि. सं., दे. 'जलाना' ।
दाहिना, वि., दे, 'दहिना' ।
दाहिने, क्रि. वि., दे. 'दहिने' ।
दिक्, सं. स्त्री. [सं. दिश् (स्त्री.)] दिशा ।
—पाल, सं. पुं. (सं.) आशापालाः, इन्द्रादयो दश देवाः ।
दिक्, सं. पुं. (अ.) क्षयरोगः । वि., व्यथित, संतापित २. अस्वस्थ, रुग्ण ।
—करना, क्रि. स., तप्-व्यथ् (प्रे.), पीड् (चु.), बाध् (भ्वा. आ. से.) ।
आँतों का—, सं. पुं., अन्त्रक्षयः ।
दिक्कत, सं. स्त्री. (अ.) काठिन्यं, बाधा, कष्टम् ।
दिखलाना, क्रि. स., व. 'देखना' के प्रे. रूप ।
दिखलावा, सं. पुं., दे. 'दिखावा' ।
दिखाई, सं. स्त्री. (हिं. दिखाना) प्रदर्शनं, व्यञ्जनं, निर्देशनं, प्रकाशनं, प्रकटी-व्यक्ती,-करणं २. प्रदर्शन,-अर्घः-मूल्यम् । (हिं. देखना) अव-आ-वि,-लोकनं, वि., ईक्षणं, निभालनं २. अवलोकन,-शुल्कः-कम् ।
—देना, क्रि. अ., लक्ष्-दृश् (कर्म.), अवभास् (भ्वा. आ. से.), प्रतिभा (अ. प. अ.) ।
दिखाना, क्रि. प्रे., व. 'देखना' के प्रे. रूप ।
दिखावट, सं. स्त्री. (हिं. दिखाना) दे. 'दिखाई' में 'प्रदर्शन' इ. २. आडंबरः, बाह्य,-शोभा-श्रीः (स्त्री.) ।
दिखावटी, वि. (हिं. दिखावट) दृष्टिहारिन्, सुभगालोक, कृतक, कृत्रिम; अनुपयोगिन्, साडंबर ।

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

दिखावा, सं. पुं. (हिं. दिखाना) आडंबरः, दंभः, आपातरमणीयता, बाह्यशोभा ।

दिगंत, सं. पुं. (सं.) दिशांतः, दिक्सीमा २. क्षितिजं, दिक्-तटं-चक्रं-मण्डलं ३. चतस्रो दश वा दिशः ।

दिगंतर, सं. पुं. (सं. न.) अन्या दिशा २. दिङ्मध्यं, दिक्कोणः ३. आकाशः-शं, अन्तरिक्षं ४. विदेशः ।

दिगंबर, सं. स्त्री. (सं.पुं.) जैनसंप्रदायविशेषः २. शिवः । वि., नग्न, अवसन ।

दिग्गज, सं. पुं. (सं.) दिग्घस्तिन् २. ऐरावतादयोऽष्ट दिग्रक्षका गजाः ।

दिग्दर्शक यंत्र, सं. पुं. (सं. न.) दिङ्निरूपकयन्त्रम्, दिग्दर्शनम् ।

दिग्दर्शन, सं. पुं. (सं. न.) सामान्य-साधारण,-परिचयः-ज्ञानम् २. दिग्ज्ञापनं, दिशानिर्देशः ३. दिग्दर्शकयन्त्रम् ।

दिग्विजय, सं. स्त्री. (सं. पुं.) विधया युद्धेन वा जगज्जयः ।

दिठौना, सं. पुं. (हिं. दीठ) *कुदृष्टिनिवारणः (कज्जलबिंदुः) ।

दिति, सं. स्त्री. (सं.) कश्यपपत्नी, दैत्यजननी ।

दिन, सं. पुं. (सं. न.) अहन् (न.) दिवसः, वारः, वासरः घस्रः, अंशकं, दिव् (स्त्री.), द्यु (न.) २. समयः, कालः ।

—चढ़ना या निकलना, क्रि. अ., रजनी प्रभा (अ. प. अ.), अरुणः-सूर्यः उद्-इ (अ. प. अ.), प्रभातं-विभातं-अरुणोदयः जन् (दि. आ. से.) ।

—ढलना, क्रि. अ., दिनं-दिवसः परिणम् अथवा आ-अव-नम् (भ्वा. प. अ.), अपराह्णो वृत् (भ्वा. आ. से.) ।

—डूबना, क्रि. अ., सूर्यः-दिवसः अस्तं,-गम् (भ्वा. प. अ.)-अवलंब् (भ्वा. आ. से.) ।

—कर,
—नाथ,
—पति,
—मणि,
—राज,
} सं. पुं. (सं.) दिनेशः, दे. 'सूर्य' ।

—चढ़े, क्रि. वि., उदिते सूर्ये, प्रातः (अव्य.) ।

—चर्या, सं. स्त्री. (सं.) आह्निकं २. नित्यकर्मन् (न.) ।

—ढले, क्रि. वि., (अ-)पराह्णे, दिवसस्य तृतीययामे ।

—दिन, क्रि. वि., दिने दिने, अनु-प्रति,-दिनं-दिवसम् ।

—दहाड़े, क्रि. वि., दिन,-काले-समये एव, दिवैव ।

—बदिन, क्रि. वि., अन्वहं, प्रत्यहं, प्रतिदिनम् ।

—भर, क्रि. वि., सर्वं दिनम् ।

—में, क्रि. वि., दिवा, दिवसे ।

—रात, क्रि. वि., अहर्निशं, दिवानिशं, अहोरात्रं, रात्रिं-नक्तं,-दिवम् ।

अगले—, क्रि. वि., परेद्युः, परस्मिन् दिने ।

दूसरे—, क्रि. वि., अन्येद्युः, पराह्णे ।

पहले या पिछले—, क्रि. वि., पूर्वेद्युः, पूर्वस्मिन् दिने ।

—काटना, मु., यथाकथंचित्-कृच्छ्रेण जीवनं या (प्रे. यापयति) ।

—दूना रात चौगुना होना, मु., अहर्निशं समृध् (दि. प. से)-प्र-उप,-चि (कर्म.) ।

—फिरना, मु., भाग्यं उद्-इ (अ. प. अ.) ।

दिनेश, सं. पुं. (सं.) सूर्यः, भानुः (पुं.) ।

दिनौंधी, सं. स्त्री. (सं. दिनांधः>) दिनांधता, दिवांधता, नेत्ररोगभेदः ।

दिमाग़, सं. पुं. (अ.) मस्तकस्नेहः, मस्तिष्कं, मस्तु,-लुंगः-लुङ्गकः (—गं,,गकं), गोर्दं २. मतिः-धीः-बुद्धिः (स्त्री.) ३. दर्पः, अभिमानः ।

—चट, सं. पुं., वाचालः, वाचाटः, बहुभाषिन् ।

—दार, वि. (अ.+फ़ा.) धीमत्, बुद्धिमत् २. दृप्त, अभिमानिन् ।

—आसमान पर होना या चढ़ना, मु., अतिशयेन दृप्त-अवलिप्त (वि.) वृत् (भ्वा.आ.से.) ।

—में खलल होना, मु., विक्षिप्त-वातुल-भ्रांतचित्त (वि.) विद् (दि. आ. अ.) ।

—सातवें आसमान पर होना, मु., अति-दृप्त-दर्पित-गर्वित भू ।

दिमाग़ी, वि. (अ.) मानसिक, बौद्धिक, मस्तिष्कसंबन्धिन् २-३. दे. 'दिमाग़दार'(१-२)।

दिया, सं. पुं. (सं. दीपः) दीपकः, प्रदीपः, स्नेहाशः, कज्जलध्वजः, गृहमणिः (पुं.) दोषास्यः, दोष तिलकः, नयनोत्सवः ।

—सलाई, सं. स्त्री., दीपशलाका ।

दिये का काजल, सं. पुं., दीप,-कज्जलं-किट्टं-ध्वजः ।

दिये की ज्वाला, सं. स्त्री., दीप,-कलिका-शिखा ।

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

दिये की बत्ती, सं. स्त्री., दीप-वर्तिः (स्त्री)-खोरी-कूपी, विदाहिका।

दियानतदार, वि., दे., 'दयानतदार'।

दिल, सं. पुं. (फ़ा.) हृदयं, हृद् (न.), अग्र-मांसं, बुक्का, बुक्काग्रमांसं। २. मनस्-चेतस् (न.), मानसं, चित्तं, अंतःकरणं, हृदयं, स्वांतं, आत्मन्-अंतरात्मन् (पुं.) ३. साहसं, शौर्यं ४. प्रवृत्तिः (स्त्री.), इच्छा।

—**गीर**, वि. (फ़ा.) खिन्न, विषण्ण, दुःखित।

—**चस्प**, वि. (फ़ा.) रोचक, रुचिकर, मनोहर।

—**चस्पी**, सं. स्त्री. (फ़ा.) रुचिः (स्त्री.) २. मनोरंजनम्।

—**चोर**, वि. (फ़ा + हिं.) कार्यत्यागिन्, कर्मचौरः।

—**जमई**, सं. स्त्री. (फ़ा+अ. जमअः) संतोषः, निर्भयत्वं, शंकाभावः।

—**दरिया**, वि., दे. 'दरिया दिल'।

—**दार**, सं. पुं. (फ़ा.) दयितः, वल्लभः, प्रियः प्रेम-स्नेह-प्रीति,-भाजनम्।

—**पसंद**, वि. (फ़ा.) चित्ताकर्षक, रुचिकर, इष्ट।

—**बर**, सं. पुं. (फ़ा.) दे. 'दिलदार' २. वाद्य-भेदः (टि. दिल के बहुत से मुहाविरे 'कलेजा' और 'जी' के नीचे मिलेंगे, कुछ यहाँ दिये जाते हैं)।

—**रुबा**, (सं. पुं. (फा.) दे. 'दिलदार'।)

—**का कमल (या कली) खिलना**, मु., आनंद् (भ्वा. प. से.), प्रसद् (भ्वा. प. अ.), मुद् (भ्वा. आ. से.)।

—**तोड़ना**, मु., उत्साहं भंज् (रु. प. अ.)-हन् अ. प. अ.), साहसं धैर्यं ध्वंस् (प्रे.), अव-वि-सद् (प्रे.)।

—**में रखना**[1], मु., गोप्यं-रहस्यं गुह् (भ्वा. उ. से.)-छद् (चु.)।

—**रखना**[2], मु., प्री (क्र. प. अ., चु.प्रीणयति), तुष्-प्रसद्-अनुरंज् (प्रे.)।

—**ही दिल में**, मु., तूष्णीं, निःशब्दं, मौनं, जोषम्।

दिलवाना, दिलाना, क्रि. प्रे., ब. 'देना' के प्रे. रूप।

दिलावर, वि. (फ़ा.) शूर, वीर २. साहसिन्।

दिलावरी, सं. स्त्री. (फ़ा.) शौर्यं, वीरता, पराक्रमः, विक्रमः।

दिलासा, सं. पुं. (फ़ा. दिल) धैर्यं, आ-समा,-श्वासनम्।

दिली, वि. (फ़ा. दिल) हार्दिक, मानसिक २. अभिन्नहृदय, हृदयंगम।

दिलेर, वि. (फ़ा.) दे. 'दिलावर'।

दिलेरी, सं. स्त्री. (फ़ा.) शौर्यं, वीरता, साहसम्।

दिल्लगी, सं. स्त्री. (फ़ा. दिल+हिं लगना) परि (री) हासः, हास्यं, नर्मालापः, परिहासोक्तिः (स्त्री.)।

—**बाज़**, सं. पुं., विनोद-परिहास,-शीलः, वैहासिकः।

दिल्ली, सं. स्त्री. (हिं. **दिल्ली**) इन्द्रप्रस्थं, भारत राजधानी, दिल्ली।

—**वाल**, वि., इन्द्रप्रस्थ—दिल्ली,-वासिन्-सम्बन्धिन्।

दिवंगत, वि. (सं.) प्रेत, मृत, स्वर्यात, स्वर्गत, स्वर्गीय।

दिवस, सं. पुं. (सं.) दे. 'दिन'।

दिवांध, वि. (सं.) दिनांध। सं. पुं., उलूकः २. दिनांधता।

दिवाकर, सं. पुं. (सं.) दे. 'दिनकर'।

दिवाला, सं. पुं. (हिं. दीया+बालना) ऋण-शोधनासामर्थ्यं, ऋणदानाक्षमता।

—**निकलना**, क्रि. अ., परिक्षि (कर्म.), ऋण-शोधनाक्षमत्वं ख्या (प्रे.)।

दिवालिया, वि. (हिं. दिवाला) ऋणशोधना-समर्थ, ऋणदानाक्षम, क्षीणसर्वस्व, परिक्षीण।

दिवाली, सं. स्त्री., दे. 'दीवाली'।

दिव्य, वि. (सं.) दैव (-वी स्त्री.), अमानुष (-षी स्त्री.), ऐश्वर (-री स्त्री.), अपार्थिव-(-वी स्त्री.), अलौकिक (-की स्त्री.), स्वर्गीय २. भास्वर, प्रकाशमान ३. अति,-स्वच्छ-सुंदर-मनोहर।

—**चक्षु**, सं. पुं. [सं.-क्षुस् (न.)] अपौरुषेय-अलौकिक,-दृष्टिः (स्त्री.) २. अंधः ३. उपनेत्रम्।

—**ज्ञान**, सं. पुं. (सं. न.) अतिमानुष-अपौरुषेय, मानुषातिग,-ज्ञानम्।

दिशा, सं. स्त्री.-(सं.) आशा, काष्ठा, ककुभ-हरित-दिश् (स्त्री.), ककुभा।

—**शूल**, सं. पुं. (सं. न.) दिग्विशेषगमने निषिद्धवारः (पुं.)।

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

—जाना या फिरना, मु., पुरीषमुत्स्रष्टुं या (अ. प. अ.) मलोत्सर्गाय गम् ।
दिसावर, सं. पुं. (सं. देशापर>) वि-पर्-देशः, देशांतरम् ।
दिसावरी, वि. (हिं. दिसावर) वैदेशिक, वि-पर्,-देशीय, दे. 'विदेशी' ।
दिहात, सं. स्त्री., दे. 'देहात' ।
दीक्षक, सं. पुं. (सं.) मंत्रोपदेशकः, गुरुः (पुं.), आचार्यः ।
दीक्षांत, सं. पुं. (सं.) अवभृथयज्ञः ।
दीक्षा, सं. स्त्री. (सं.) गुरुमुखात् यथाविधि मंत्रग्रहणं २. यजनं, पूजनं ३. प्रथम,-उपदेशः-शिक्षा, उपनयः, विद्याप्रवेशः ।
दीक्षित, वि. (सं.) उपनीत, यथाविधि उपदिष्ट, संस्कारानंतरं प्रवेशित ।
दीखना, क्रि. अ., दे. 'दिखाई देना' ।
दीठ, सं. स्त्री. (सं. दृष्टिः, दे.) ।
दीदा, सं. पुं. (फ़ा.) दृष्टिः (स्त्री.) २. अवलोकनं ३. नेत्रं ४. धृष्टता ।
—दानिस्ता, क्रि. वि., ज्ञान-बुद्धि-मति,-पूर्वकं, कामतः (अव्य.) ।
दीदार, सं. पुं. (फ़ा.) दर्शनं, साक्षात्कारः ।
दीदी, सं. स्त्री. (हिं. दादा) अग्रजा, ज्यायसी, भगिनी ।
दीधिति, सं. स्त्री. (सं. पुं.) किरणः, मयूखः, अंशुः, मरीचिः ।
दीन, वि. (सं.) दरिद्र, निर्धन २. खिन्न, विषण्ण ३. अति-,नम्र-विनीत ४. संतप्त, दुःखित ।
—दयाल, वि. (सं.-लु) दरिद्रवत्सल । सं. पुं., ईश्वरः ।
—बंधु, वि. (सं.) दरिद्रमित्रं, दीनानुकंपिन् । सं. पुं., परमेश्वरः ।
—दीन, सं. पुं. (अ.) धर्मः ।
दार, वि. (अ.+फ़ा.) धार्मिक, पुण्यात्मन् ।
—दुनिया, सं. पुं. (अ.) लोकपरलोकौ (द्वि.) ।
दीनता, सं. स्त्री. (सं.) दरिद्रता, निर्धनता, अकिंचनता २. आर्त्तता, कातरता ३. खेदः, विषादः ४. अति,-नम्रत्वं-विनयः ।
दीनानाथ, सं. पुं. (सं. दीन+नाथ) दीन-, दयालुः-वत्सलः-बन्धुः, परमेश्वरः ।
दीनार, सं. पु. (सं.) स्वर्णमुद्रा २. स्वर्णाभूषणं ३. निष्क,-तोलः-भारः ।
दीप, सं. पुं. (सं.) दीपकः, दे. 'दिया' ।
—माला, सं. स्त्री. (सं.) दीप,-आलिः (स्त्री.)-आली-आवली-उत्सवः-मालिका २. दीपपंक्तिः (स्त्री.) ।
—शिखा, सं. स्त्री. (सं.) दीप-कलिका-ज्वाला ।
दीपक, सं. पुं. (सं.) प्र,-दीपः, दे. 'दिया' २-४. अर्थालंकार-राग-ताल,-भेदः ५. अग्नि-क्रीडनकभेदः । वि., प्रकाशक, दीप्तिकर २. पाचक, अग्निवर्द्धक ३. उत्तेजक ।
दीपन, सं. पुं. (सं. न.) प्रकाशनं, ज्वालनं २. जठराग्निवर्द्धनं, क्षुधोत्पादनं ३. उत्तेजनं-ना, आवेगजननम् ।
दीपावलि-ली-, सं. स्त्री. (सं.) दे. 'दीपमाला' ।
दीप्त, वि. (सं.) प्रकाशित, प्रकाशमान २. प्रज्वलित, प्रज्वलत् (शत्रंत) ।
दीप्ति, सं. स्त्री. (सं.) आलोकः, प्रकाशः २. आभा, प्रभा, द्युतिः(स्त्री.) ३. कांतिः (स्त्री.), शोभा ।
दीमक, सं. स्त्री. (फ़ा.) उप,-दीका-देहिका ।
—लगना, क्रि. अ., उपदेहिकाभिः भक्ष्-निष्कुष् (कर्म.) ।
दीया, दे. 'दिया' ।
दीर्घ, वि. (सं.) लंब, आयत, आयामवत् ।
—काल, सं. पुं. (सं.) सुमहान् समयः ।
—जंघ, सं. पुं. (सं.) उष्ट्रः २. वकः । वि., लंबटंग ।
—जीवी, वि. (सं.-विन्) दीर्घ-चिर,-आयु-आयुस्-आयुष्य-जीविन्, आयुष्मत् ।
—दर्शिता, सं. स्त्री. (सं.) दे. 'दूरदर्शिता' ।
—दर्शी, वि. (सं.-र्शिन्) दे., 'दूरदर्शी' ।
—निद्रा, सं. स्त्री. (सं.) लंबस्वापः २. मृत्युः (पुं.) ।
—सूत्री, वि. (सं.-त्रिन्) दीर्घसूत्र, चिरक्रिय, विलंबिन् ।
दीर्घायु, सं. स्त्री. (सं. न.) चिर-दीर्घ,-जीवनं-आयुस् (न.) । वि., दे. 'दीर्घजीवी' ।
दीर्घायुध, सं. पुं. (सं. न.) भल्लः—लम्, कुन्तः, प्रासः २. शूकरः, वराहः, कोलः ३. शल्यः, छेदारः । वि. दीर्घ-लम्ब-बृहद्,-अस्त्र-आयुध ।
दीवट, सं. स्त्री. (हिं. दीवा) दीप-दीपक,-ध्वजः-वृक्षः-आधारः, शिखातरुः ।

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

दीवान, सं. पुं. (अ.) राजसभा, आस्थानं-नी, राजकुलं २.अमात्यः,सचिवः ३. कवितासंग्रहः ।
—आम, सं. पुं. (अ.) *सामान्यास्थानम् ।
—ख़ास, सं. पुं. (अ.) *विशेषास्थानम् ।
दीवाना, वि. (फ़ा.) उन्मादिन्, विक्षिप्त, दे. 'पागल' ।
दीवार, सं. स्त्री. (फ़ा.) कुड्यं, भित्तिः (स्त्री.) ।
—गीर, सं. स्त्री. (फ़ा.) भित्तिदीपः २. भित्तिस्थो दीपाधारः ।
दीवाली, सं. स्त्री. (सं. दीपाली)दे. 'दीपमाला'।
दुंदुभ, सं. पुं.] सं. पुं., दे. 'नक्कारा'
दुंदुभि, सं. स्त्री.]
दुंबा, सं. पुं. (फ़ा. दुंबालः) गोलपुच्छो मेषः-मेढः ।
दुःख, सं. पुं. (सं. न.) कष्टं, क्लेशः, पीडा, बाधा, व्यथा, अ (आ) त्तिः (स्त्री.), कृच्छ्रं, वेदना, परि-सं-, तापः २. आपद्-विपद् (स्त्री.), संकटं ३. रोगः, व्याधिः (पुं.) ।
—उठाना या पाना, क्रि. अ., दुःखयति (ना. धा.), दुखं सह् (भ्वा. आ. से.)-अनुभू-उपभुज् (रु. आ. अ.)-प्राप् (स्वा. उ. अ.) ।
—देना या पहुँचाना, क्रि. स., दुःखयति (ना. धा.), तप्-व्यथ्-अर्द् (प्रे.), पीड् (चु.), क्लिश् (क्र्. प. से.) ।
—दाई, वि. (सं.-दायिन्) दुःख-कष्ट-क्लेश,-कर-द-दातृ-दायक-प्रद-जनक-उत्पादक ।
—मय, वि. (सं.) क्लेशमय, दुःखपूर्ण ।
—हर्त्ता, वि. (सं.-र्तृ) दुःख-क्लेश-कष्ट,-नाशक-निवारक-हारिन् ।
दुःखित, वि. (सं.) क्लेशित, पीडित, व्यथित, दुःखभाज्, दून, तापित, सं-परि,-तप्त, दुःख,-आर्त्त, कृच्छ्रगत, सन्यथ, दुःखिन् ।
दुःखिनी, वि. स्त्री. (सं.) विपन्ना, पीड़िता, व्यथिता; सं-परि,-तप्ता, आर्ता ।
दुःखी, वि. (सं.-खिन्) दे. 'दुःखित' (दुःखिनी स्त्री.) ।
दुःशासन, वि. (सं.) उच्छृङ्खल, उद्दाम, दुर्निग्रह ! सं. पुं., धृतराष्ट्रस्य पुत्रविशेषः २. कुशासनम् ।
दुःशील, वि. (सं.) दुःस्वभाव, कुशील, कुत्सभाव, दुष्प्रकृति, दुर्वृत्त २. पुं., नटत ।
दुःश्रव, वि. (सं.) कर्ण-श्रुति,-कटु । सं. पुं., दुःश्रवत्व-श्रुतिकटुत्व,-दोषः (सा०) ।
दुःसंग, सं. पुं. (सं.) कुसंगः, कु-दुस् ,-संगतिः (स्त्री.) ।
दुःसाध्य, वि. (सं.) कठिन, दुष्कर, कष्टसाध्य २. असाध्य, दुरुपचार, अशमनीय, अचिकित्स्य, निरुपाय ।
दुआ, सं. स्त्री. (अ.) प्रार्थना २. आशीर्वादः ।
दुआबा, सं. पुं. (फ़ा.) दे. 'दोआबा' ।
दुकड़ा, सं. पुं. (सं. द्विकं) द्वयं, द्वितयं, युगं, युगलं, २. दे. 'छदाम' ।
दुकान, सं. स्त्री. (फ़ा.) पण्य,-शाला-अगारं, आपणः, विपणिः (स्त्री.), निषद्या, *हट्टी ।
—दार, सं. पुं. (फ़ा.) आपणिकः, पण्याजीवः, विपणिन्, क्रयविक्रयिकः, वणिज् (पुं.) ।
—बढ़ाना, मु., पण्यशालां (अ)पिधा (जु. उ. अ.) ।
दुखड़ा, सं. पुं. (सं. दुःखं) दुःखवृत्तांतः, करुणकथा २. कष्टं, विपद् (स्त्री.) ।
दुखना, क्रि. अ. (सं. दुःखं>) पीड्-क्लिश्-तप् (कर्म.)-व्यथ् (भ्वा. आ. से.) ।
दुखाना, क्रि. स. (हिं. दुखना) पीड्-अर्द् (चु.), व्यथ् (प्रे.), दु (स्वा. प. अ.), क्लिश् (क्र्. प. से.), उप-परि-सं-, तप् (प्रे.) ।
दुखिया-यारा, वि. (सं. दुःखं>) दे. 'दुःखित' ।
दुगना, वि. (सं. द्विगुण) द्विगुणित ।
दुग्ध, सं. पुं. (सं. न.) क्षीरं, पयस् (न.) ।
—फेन, सं. पुं. (सं.) क्षीरडिंडि (डी)रः, शार्करः ।
दुचित्ता, वि. (सं. द्विचित्त) दोलायमान, संशयान, संदेहिन्, संदिग्ध,-बुद्धि-मति ।
दुचित्ती, सं. स्त्री. (हिं. दुचित्ता) दोलावृत्तिः (स्त्री.), द्वैधीभावः, निश्चयाभावः, संशयः ।
दुत, अव्य. (अनु.) अपसर-अपेहि (लोट्) ।
—कार, सं. स्त्री. (अनु.+सं. कारः) धिक्कारः, तिरस्कारः, भर्त्सना, वाग्दंडः २. अपसारणम् ।
दुतकारना, क्रि. स. (हिं. दुत्कार) धिक्-तिरस् कृ, निर्, भर्त्स् (चु. आ. से.) २. सापमानं निस्-अप,-सृ (प्रे.) ।
दुतरफ़ा, वि. (फ़ा. दो+अ. तरफ़) द्वि(द्वै)-पक्ष, द्वि(द्वै)पार्श्व, द्वि,-पक्ष्य-पक्षीय ।
दुधार, वि. (हिं. दूध) क्षीरिणी, दुग्धवती, पयस्वती, पीनोध्नी (यौ.) ।

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

दुधारा, वि. (सं. द्विधार) उभयतः तीक्ष्ण-निशित । सं. पुं., खड्गभेदः, *द्विधारः ।
दुनिया, सं. स्त्री. (अ.-या) जगत् (न.), संसारः २. लोकः, जनता ३. जगत्प्रपंचः ।
—दार, सं. पुं. (अ.+फ़ा.) गृहस्थः, गृहिन्, संसारिन्, २. व्यवहार,-कुशलः-पटुः ।
—दारी, सं. स्त्री. (अ.+फ़ा.) ऐहिकता-त्वं, प्रपंचानुरागः, संसारासक्तिः (स्त्री.) २. लोक,-आचारः-मार्गः, रूढिः (स्त्री.) ३. व्यवहार-कौशलम् ।
दुनियावी, वि. (अ.) लौकिक, सांसारिक, ऐहिक ।
दुपट्टा, सं. पुं. (हिं. दो+सं.-पट्टः>) द्विपट्टः, द्विपटी २. उष्णीषः-षम् ।
दुपहर, सं. स्त्री., दे. 'दोपहर' ।
दुपहरिया, सं. स्त्री. (हिं. दुपहर) बंधु(धू)-कः, रक्तकः, बंधुजीवकः २. दे. 'दोपहर' ।
दुब(वि)धा, सं. स्त्री. (सं. द्विविधा>) संशयः, संदेहः २. निर्णय-निश्चय,-अभावः ३. संकोचः ४. आशंका, विचिकित्सा ।
दुबला, वि. (सं. दुर्बल दे.) ।
दुबलापन, सं. पुं., दे. 'दुर्बलता' ।
दुबारा, क्रि. वि., दे. 'दोबारा' ।
दुबे, सं. पुं. (सं. द्विवेदिन्) द्विवेदः, ब्राह्मणभेदः ।
दुभाषिया, सं. पुं. (सं. द्विभाषिन्) भाषाद्वयज्ञः, द्विभाषाविद् (पुं.) २. व्याख्यातृ, अर्थबोधकः ।
दुमंज़िला, वि. (फ़ा.) द्वि.,-भूम-भूमिक-(प्रासादः इ.) ।
दुम, सं. स्त्री. (फा.) पुच्छः-च्छं, लांगु(गू)-लं, लूमं २. अनुयायिन्, अनुगः ३. अंतिम-भागः ।
—दार, वि. (फ़ा.) सपुच्छ, लांगूलिन् ।
—दार सितारा, सं. पुं., उल्का, धूमकेतुः (पुं.), उत्पातः, केतुः (पुं.) । वि., सपुच्छ, लांगूलिन् ।
—दबाकर भागना, मु., कापुरुषवत्-सकातर्यं पलाय् (भ्वा. आ. से.)-विद्रु (भ्वा. प. अ.)-अपधाव् (भ्वा. प. से.), कांदिशीक (वि.) भू ।
दुमन, वि. (सं. दुर्मनस्) खिन्न, विषण्ण, म्लान, अवसन्न ।
दुरंगा, वि., दे. दो के 'नीचे' ।
दुरंत, वि. (सं.) दुष्परिणाम, दुःखद, दुष्फल, दुरवसान २. दुर्गम, दुरतिक्रम ३. प्रचंड, उग्र ४. दुर्ज्ञेय, दुर्बोधः ।
दुर, अव्य. (हिं. दूर) अपसर-अपेहि (लोट्) ।
—दुर करना, मु., सन्यक्कारं अपस् (प्रे.) ।
दुराग्रह, सं. पुं. (सं.) दे. 'हठ' ।
दुराग्रही, वि. (सं.-हिन्) दे. 'हठी' ।
दुराचरण, सं. पुं. (सं. न.) दे. 'दुराचार' ।
दुराचार, सं. पुं. (सं.) कद्,-आचारः-आचरणं, दुर्,-वृत्तं-व्यवहारः-आचरणं, दुस्,-चरितं-चेष्टितं-चारित्र्यं-शीलं, अनार्यत्वम् ।
दुराचारी, वि. (सं.-रिन्) दुष्ट, दुरात्मन्, पापात्मन्, पापकर्मन्, दुर्वृत्त, दुश्चरित्र, अधार्मिक, पाप, खल, शठ, लंपट, विषयासक्त ।
दुराज, सं. पुं. (सं. द्विराज्यं) द्विशासनं, द्विराजकता ।
दुरात्मा, वि. (सं.-त्मन्) दुष्ट, पापात्मन्, दे. 'दुराचारी' ।
दुरुस्त, वि. (फ़ा.) दे. 'ठीक' ।
दुरूह, वि. (सं.) दुर्बोध, दुर्ज्ञेय, गूढार्थ, गहन, क्लिष्ट ।
दुर्गंध, सं. पुं. (सं.) पूतिः (स्त्री.), पूतिगंधः, कु-दुर्-वासः ।
—युक्त, वि. (सं.) दुर्-पूति,-गंधि, दुर्-कुत्सित-, पूति, गंध ।
दुर्ग, सं. पुं. (सं. न.) कोटः-टिः (स्त्री.), दे. 'किला' । वि. दे. 'दुर्गम' (१) ।
अगम्य, गहन, विषमस्थ, दुर्ग २. दुर्बोध ३. विकट ।
—अधिपति, सं. पुं. (सं.) दुर्ग,-पति-पालः-ईशः-अध्यक्षः ।
दुर्गति, सं. स्त्री. (सं:) दुर्दशा, दुरवस्था, २. नरक,-वासः-भोगः ।
दुर्गम, वि. (सं.) दुष्प्राप, दुरासद, दुरारोह ।
दुर्गा, सं. स्त्री. (सं.) रुद्राणी, चंडी, दे. 'पार्वती' ।
दुर्गुण, सं. पुं. (सं.) अवगुणः, दोषः, व्यसनं, दुर्लक्षणं, कुलक्षणम् ।
दुर्घट, वि. (सं.) दुष्कर, दुस्साध्य ।
दुर्घटना, सं. स्त्री. (सं.) अशुभ-अमंगल,-घटना-आपातः-समापत्तिः (स्त्री.) २. विपद्-आपद् (स्त्री.) ।
दुर्जन, सं. पुं. (सं.) खलः, पापः, शठः, ब. 'दुराचारी' के पर्यायों के पुं. रूप ।
दुर्जनता, सं. स्त्री. (सं.) दुष्टता, खलता, शठता ।

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

दुर्जय, वि. (सं.) अधृष्य, अजय्य, अदम्य, दुरासद, अ-दुर्-जेय ।

दुर्ज्ञेय, वि. (सं.) दे. 'दुरूह' ।

दुर्दमनीय, वि. (सं.) दुर्दम्य, दुर्दान्त, अवश्य, दे. 'दुर्जय' ।

दुर्दशा, सं. स्त्री. (सं.) दु :तिः (स्त्री.), दुरवस्था ।

दुर्दिन, सं. पुं. (सं. न.) मेघ-च्छन्नो दिवसः २. कु-विपत्-काल:, कष्टमयः समयः ।

दुर्दैव, सं. पुं. (सं. न.) दे. 'दुर्भाग्य' ।

दुर्धर्ष, वि. (सं.) दे. 'दुर्जय' २. उग्र, प्रचंड ।

दुर्नीति, सं. स्त्री. (सं.) कुनीतिः (स्त्री.), अन्यायः, अनाचारः ।

दुर्बल, वि. (सं.) अबल, निर्बल, अशक्त, क्षीण-अल्प-बल-शक्ति, निस्-तेजस्-सत्त्व २. कृश, क्षाम, क्षीण, अमांस, छात, शात ।

दुर्बलता, सं. स्त्री. (सं.) निर्बलता, अशक्तता, अबलता २. कृशता, क्षामता ।

दुर्बुद्धि, सं. स्त्री. (सं.) कुमतिः-मंदधीः (स्त्री.) । वि., अज्ञ, मूर्ख, मंदमति ।

दुर्बोध, वि. (सं.) दे. 'दुरूह' ।

दुर्भाग्य, सं. पुं. (सं. न.) दुर्दैवं, दौर्-मंद-भाग्यं, दुर्जातं, दुर्गतिः (स्त्री.), दैव-दुर्विपाकः-विपर्ययः-विपर्यासः ।

दुर्भावना, सं. स्त्री. (सं.) दुर्भावः, दुष्ट-बुद्धि-भावः, असूया, द्रोहः, द्वेषः, दौरात्म्यम् ।

दुर्भिक्ष, सं. पुं. (सं. न.) अकालः, दुष्कालः, अनशनं, प्रयामः, आहाराभावः, नीवाकः ।

दुर्मट, सं. पुं. (सं.दुर्+मुट् =कूटना) *भूकुट्टनं, *दुर्मुटम् ।

दुर्मति, सं. स्त्री. तथा वि. (सं.) दे. 'दुर्बुद्धि' ।

दुर्मुख, वि. (सं.)कटुभाषिन् २. कुदर्शन,कुरूप ।

दुर्योध, वि. (सं.) अजेय, अजय्य, अधृष्य, अदम्य ।

दुर्योधन, सं. पुं. (सं.) धृतराष्ट्रस्य ज्येष्ठपुत्रः ।

दुर्योनि, वि. (सं.) हीन-नीच,-जाति-वर्ण-कुल ।

दुर्र, सं. पुं. (अ०), दे० 'मोती' ।

दुर्लंघ्य, वि. (सं.) दुस्तरः, दुःखतार्य, दुर्लंघनीय, दुरतिक्रम ।

दुर्लभ, वि. (सं.) अप्राप्य, दुष्प्राप, विरल, दुरधिगम २. अत्युत्तम, अत्युत्कृष्ट ।

दुर्वचन, सं. पुं. (सं.) दे. 'गाली' ।

दुर्विनीत, वि. (सं.) अविनय, अविनीत, उद्धत, धृष्ट, अशिष्ट, असभ्य, वियात ।

दुर्विपाक, सं. पुं. (सं.) कुपरिणामः, कुफलम् ।

दुर्वृत्त, वि. (सं.) दे. 'दुराचारी' ।

दुर्व्यवस्था, सं. स्त्री. (सं.) कुव्यवस्था, कुनीतिः (स्त्री.), दुर्णयः, कुप्रणयनं, कुप्रबंधः, दुर्निर्वाहः ।

दुर्व्यवहार, सं. पुं. (सं.) दुर्वृत्तिः (स्त्री.), असद्व्यवहारः, अप-कारः-क्रिया, कुचेष्टितं, कुचरितम् ।

दुर्व्यसन, सं. पुं. (सं. न.) दुर्गुणः, दोषः, *कदासक्तिः (स्त्री.) ।

दुर्व्यसनी, वि. (सं.-निन्) दुर्गुण, दोषिन्, दुराचारिन्, पाप ।

दुलकी, सं. स्त्री. (हिं. दलकना) धौ (धौ)-रितं-तकम् ।

—**चलना**, क्रि. अ., धोरितेन गम् ।

दुलत्ती, सं. स्त्री (हिं. दो+सं. लत्ता>)(पशूनां) द्विलत्ता-द्विखुर-द्विपाद,-आघातः-प्रहारः-क्षेपः ।

—**मारना**, क्रि. स., लत्ताभ्यां प्रहृ (भ्वा.प.अ.) आहन् (अ. प. अ.) ।

दुलह(हि)न, सं. स्त्री. (हिं. दुलहा) नव-वधूः (स्त्री.), वधूटी, नवोढा, नवपरिणीता ।

दुलहा, सं. पुं., दे. 'दूल्हा' ।

दुलाई, सं. स्त्री. (हिं तुलाई) दे. 'रजाई' ।

दुलार, सं. पुं. (हिं. दुलारना) उप-,लालनं, चुंबनं, आलिंगनम् ।

दुलारना, क्रि. स. (सं. दुर्लालनं>) उप-; लल् (चु.), आलिंग् (भ्वा. प. से.), स्नेहेन परामृश् (तु. प. अ.) ।

दुश्चरित-त्र, सं. पुं. (सं. न.) दे. 'दुराचार' । वि., दे. 'दुराचारी' ।

दुलारा, वि. (हिं. दुलार) दे. 'लाडला' ।

दुशाला, सं. पुं. (फ़ा.) द्विशाटः ।

दुश्मन, सं. पुं. (फ़ा.) शत्रुः, अरिः (पुं.) ।

दुश्मनी, सं. स्त्री. (फ़ा.) शत्रुता, वैरम् ।

दुष्कर, वि. (सं.) दुस्साध्य, कठिन, विकट, कष्टसाध्य ।

दुष्कर्म, सं. पुं. [सं.-मन् (न.)] कु,-कार्य-कृत्यं, पापं, अधर्मः, दुष्कृतिः (स्त्री.) ।

दुष्काल, सं. पुं. (सं.) कु,-कालः-समयः २. दे. 'दुर्भिक्ष' ।

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

दुष्कुल,सं.पुं. (सं. न.) नीच-हीन-कु,-कुल-वंशः।
दुष्कृत, सं. पुं. (सं. न.) दे. 'दुष्कर्मक'।
दुष्ट, वि. (सं) खल, शठ, पाप, दुर्जात, अभद्र, नीच, दुर्वृत्त, दे. 'दुराचारी'।
दुष्टता, सं. स्त्री. (सं.) दौर्जन्यं, दौरात्म्यं, कुचेष्टा, पापं, दुर्वृत्तं, दे. 'दुराचार'।
दुष्प्रकृति, सं.स्त्री. (सं.) दुस्स्वभावः, दुश्शीलम्। वि., कुशील, दुष्टस्वभाव।
दुष्प्राप्य, वि. (सं.) दे. 'दुर्लभ'।
दुष्यंत, सं. पुं. (सं.) पुरुवंशीयनृपविशेषः, शकुंतलापतिः।
दुस्तर, वि.(सं.)दुःखतार्य, दुर्लंघनीय २. कठिन, दुष्कर, विकट।
दुस्सह, वि. (सं.) दुर्विषह, असह्य, असहनीय।
दुस्साध्य, वि. (सं.), दे. 'दुःसाध्य'।
दुहना, क्रि. स. (सं. दोहनं) दे. 'दोहना'।
दुहरा, वि., दे. 'दोहरा'।
दुहाई[1], सं. स्त्री. (हिं. दुहना) दोहन,-भृतिः (स्त्री)-भृत्या।
दुहाई[2], सं. स्त्री. (सं. द्वि+आह्वायः>) दे. 'डौंडी' २. आत्मत्राणार्थं आह्वानं-आकारणं-संबोधनं ३. शपथः।
—देना, मु., स्वरक्षार्थं आ-ह्वे (भ्वा. प. अ.)-आ-कृ (प्रे.)।
दुहाना, क्रि. प्रे., ब. 'दोहना' के प्रे. रूप।
दुहिता, सं. स्त्री. [सं. दुहितृ (स्त्री.)] दे. 'पुत्री'।
दूकान, सं. स्त्री., दे. 'दुकान'।
दूज, सं. स्त्री. (सं. द्वितीया) शुक्ला कृष्णा वा द्वितीया तिथिः (स्त्री.)।
—का चाँद, मु., दिवाप्रदीप, दुर्लभदर्शन।
दूत, सं. पुं. (सं.) वार्ता-संदेश,-हरः, संदिष्ट-कथकः, राज,-दूतः-प्रतिनिधिः २. प्रणिधिः, च (चा) रः, गूढदूतः।
दूती, सं. स्त्री. (सं.) संचारिका, दूति (ती) का, शंभली, कुट्ट (ट्टि) नी, सारिका २. वार्ता-संदेश,-हरी।
दूध, सं. पुं. (सं. दुग्धं) क्षीरं, पयस् (न.), स्तन्यं, ऊधस्यं, ऊधन्यं, बालजीवनं २. वृक्ष,-क्षीरं-रसः ३. (गौ का) गो,-दुग्ध-रसः, गव्यम्।
—का पानी, सं. पुं., आमिक्षामस्तु (न.), मोरटः।
—की झाग, सं. स्त्री., दुग्धफेनः, शार्करः, शार्कंकः।
—पिलाई, सं. स्त्री., दे. 'दाई'।
—पूत, सं. पुं., संपद्संतती-धनसंतानौ (द्वि.)।
—बहन, सं. स्त्री., *सस्तन्या, धात्रीपुत्री, धात्रेयी, स्तनंधयी।
—भाई, सं. पुं., *सस्तन्यः, धात्रीपुत्रः, धात्रेयः।
—मुँहा, वि. पुं., स्तनंधयः, शिशुः। स्तन-क्षीर,-पायिन्-पः [—मुँही (स्त्री.)]।
—उगलना या डालना, मु., (शिशुः) दुग्धं उद्गृ (तु. प. से.)-उद्-वम् (भ्वा. प. से.)।
—का दूध, पानी का पानी, मु., न्यायः, नयः, धर्मः।
—की मक्खी की तरह निकाल फेंकना, मु., दुग्धमक्षिकावत् निस्सृ (प्रे.), अविमृश्यैव निष्कस् (प्रे.)।
—के दाँत न टूटना, मु., शैशवे वर्तमान।
—छुड़ाना या बढ़ाना, मु., स्तन्यं हा (प्रे., हापयति)-त्यज् (प्रे.)।
दूधों नहाना पूतों फलना, मु.,धनसंतानैः वर्ध् (भ्वा. आ. से.)।
—पिलाना, मु., स्तनं-स्तन्यं पा-धे-(प्रे., पाय-यति, धापयति) दा।
—फटना, मु., (अम्लादियोगेन) दुग्धं विकृ (कर्म.) अथवा नीरक्षीरे वि-श्लिष् (दि. प. अ.)।
दूधिया, वि. (हिं. दूध) शुक्ल, श्वेत, दुग्धवर्ण।
—पत्थर, सं. पुं. (सं.) *दौग्धप्रस्तरः, श्वेत-प्रस्तरभेदः।
दूना, वि. (सं. द्विगुण) द्विगुणित।
दूब, सं. स्त्री. (सं. दूर्वा) भार्गवी, हरिता, अनंता।
दूबदू, क्रि. वि., (हिं. दो या फ़ा. रूबरू) मुखामुखि (अव्य.), संमुखम्।
दूबे, सं. पुं., दे. 'दुबे'।
दूभर, वि. (सं. दुर्भर>) कठिन, दुस्साध्य।
दूरंदेश, वि. (फ़ा.) दे. 'दूरदर्शी'।
दूरंदेशी, सं. स्त्री. (फ़ा.) 'दूरदर्शिता'।
दूर, क्रि. वि. (सं. दूरं) दूरे, आरात् (अव्य.),

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

वि., दूरतः । वि., दूर, दूरस्थ, विप्रकृष्ट, अंतरवर्तिन्, दवीयस् ।
—दराज, वि. (फा.) सु-अति,-दूर-दूरस्थ ।
—दर्शक, वि. (सं.) दे. 'दूरदर्शी' ।
—दर्शन, सं. पुं. (सं.) पण्डितः, धीमत्, बुद्धिमत्, प्राज्ञः २. गृध्रः, वज्रतुंडः ३. दूरवीक्षणं, दूर–दर्शक–यन्त्रम् ।
—दर्शिता, सं.स्त्री., (सं.) दूर-दीर्घ,-दृष्टिः (स्त्री.)-दर्शित्वं, बुद्धिमत्ता, अग्रनिरूपणं, दूरदर्शनम् ।
—दर्शी, वि. (सं.-र्शिन्) दूर-दीर्घ-अग्र,-दृष्टि-दर्शिन्-दर्शक, बुद्धिमत् ।
—दृष्टि, सं. स्त्री. (सं.) दे. 'दूरदर्शिता' ।
—बीन, सं. स्त्री. (फा.) दूरवीक्षणं, दूरदर्शकयंत्रम् ।
—वर्ती, वि. (सं. तिन्) दे. 'दूर' वि. ।
—वासी, वि. (सं.-सिन्) दूरदेशीय २. विदेशीय ।
—वीक्षण, सं. पुं. (सं. न.) दे. 'दूरबीन' ।
—स्थ, वि. (सं.) दे. 'दूर' वि. ।
—करना, मु., दूरी-पृथक् कृ २. पदात्-अधिकारात् अवरुह्-च्यु-भ्रंश् (प्रे.) ।
—भागना या रहना, मु., दूरे-पृथक् स्था (भ्वा. प. अ.), संगतिं परि-हृ (भ्वा. प. अ.) ।
—हो, अव्य. अपेहि-अपगच्छ (लोट्) ।
—होना, मु., दूरी-पृथक् भू २.नश् (दि.प.वे.)।
दूरी, सं. स्त्री. (सं. दूरं>) दूरता-त्वं, विप्रकर्षः, दूरं २. (स्थान) अंतरं, अंतरालं, अध्वन् (पुं.) भूमिः (स्त्री.) ।
दूर्वा, सं. स्त्री., दे. 'दूब' ।
दूल्हा, सं., पुं. (सं. दुर्लभः>) वरः, परिणेतृ, पाणिग्राहकः, परिग्रहीतृ (पुं.) ।
—दुल्हन, सं. पुं., वधूवरौ (द्वि.) ।
दूषक, सं. पुं. (सं.) अपवादकः, परिवादकः, अभियोगिन्, अभियोक्तृ, दोषारोपकः २. दृष्टः, दुर्वृत्तः । वि. दोष–पाप,–जनक २. अपराधिन्, दोषिन् ३. निन्द्य, कुत्सित ।
दूषण, सं. पुं. (सं. न.) दोषः, अवगुणः, दुर्व्यसनं (सं. पुं.) रावणभ्रातृविशेषः ।
दूषित, वि. (सं.) सदोष, दोषिन्, कलंकवत् २. (मिथ्या) निंदित-कलंकित-अभियुक्त ।
दूसरा, वि. (हिं. दो) द्वितीय [-या (स्त्री.)] २. अन्य, पर, अपर, अपरिचित ।
दूसरे दिन, क्रि. वि., पराह्णे, परेद्युः-अन्येद्युः (अव्य.) ।
दूसरी माँ, सं. स्त्री., विमातृ (स्त्री.) ।
दृक्, दृग, सं. स्त्री. (सं. दृश्) दे. 'आँख' २. दृष्टिः (स्त्री.) ।
दृग्विषः, सं. पुं. (सं.) विषाक्त,-नेत्रः-नयनः, सर्पभेदः ।
दृग्वृत्त, सं. पुं. (सं. न.), क्षितिजं, दिगन्तः ।
दृढ, वि. (सं.) प्रगाढ, शैथिल्यशून्य २. कर्कर, कीकस, कक्खट ३. सबल, बलवत् ४. स्थायिन्, स्थिर ५. ध्रुव, अनिचल ६. आग्रहिन्, सनिर्बंध ।
—प्रतिज्ञ, वि. (सं.) प्रतिज्ञापालक, स्थिरप्रतिज्ञ, सत्य,-संध-अभिसंध-संगर ।
—मुष्टि, वि. (सं.) कृपण, मितंपच ।
दृढता, सं. स्त्री. (सं.) प्रगाढता, शैथिल्याभावः २. स्थैर्यं, अचलत्वं, स्थिरता ३. आग्रहः निर्बंधः ।
दृढांग, वि. (सं.) बलवत्, शक्तिमत्, दृढदेह, हृष्टपुष्ट । [–गी (स्त्री.)=शक्तिमर्ता] ।
दृश्य, वि. (सं.) दृग्गोचर, नेत्र-दृष्टि,-विषयग्राह्य २. दर्शनीय, अवलोकनीय, सुंदर । सं. पुं. (सं. न.) दृष्टि,-गोचरः-पथः-विषयः २. रूपकं, नाटकं ३. दे. 'तमाशा' ।
दृश्यमान, वि. (सं.) ईक्ष्यमाण, अवलोक्यमान ।
दृष्ट, वि. (सं.) वि-अव-, लोकित, वि-, ईक्षित, निरूपित, लक्षित २. ज्ञात, प्रकट ।
दृष्टांत, सं. पुं. (सं.) उदाहरणं, निदर्शनं २. अर्थालङ्कारभेदः ।
दृष्टि, सं. स्त्री. (सं.) दृक्शक्तिः (स्त्री.), नेत्र,-नयन,-ज्योतिस् (न.) २. दृक्पातः, अवलोकनं ३. आशा ४. विचारः ५. आशयः, अभिप्रायः ।
—कूट, सं. पुं. (सं. दृष्टकूटं) प्रहेलिका २. गूढार्थकविता ।
देखना, क्रि. सं. (सं. दृश्) दृश् (भ्वा. प. अ.) वि–प्र-, ईक्ष् (भ्वा. आ. से.), अव-आ-वि-लोक् (भ्वा. आ. से., चु.), आलोच् (भ्वा. आ. से., चु.), निरूप्-निर्वर्ण्-लक्ष् (चु.), भल् (चु. आ. से.), २. अव-निर्-परि-ईक्ष् ३. अन्विष् (दि. प. से.), ४. रक्ष् (भ्वा. प. से.), रक्षां कृ ५. विचर् (भ्वा. प. से.) ६. अनुभू, पठ् (भ्वा. प. से.)

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

८. सशुध् (प्रे.)। सं. पुं., दर्शनं, विलोकनं, वीक्षणं, निरूपणं इ.।

—भालना, मु., निरीक्षणं, परीक्षणं, निभालनं, निर्वर्णनम्।

—सुनना, मु., बोधनं, वेदनं परि-वि-ज्ञानम्।

देखते देखते, मु., समक्षं-क्षे २. सपदि, झटिति।

देखने में, मु., आपाततः, बाह्यतः, प्रत्यक्षतः २. आकृत्या, आकारेण।

देखने योग्य, वि., दे० 'दर्शनीय'।

देखनेवाला, सं. पुं., दर्शकः, द्रष्टृ (पुं.), वीक्षकः, निरूपकः इ.।

देखभाल, देखाभाली, सं. स्त्री. (हिं. देखना + भालना) कार्यदर्शनं, अवेक्षणं, निरीक्षणं, पर्यवेक्षणं २. दर्शनं, साक्षात्कारः।

देखरेख, सं. स्त्री. (हिं. देखना + सं. प्रेक्षणं >) दे. 'देखभाल' (१)।

देखादेखी, सं. स्त्री. (हिं. देखना) दर्शनं, विलोकनम्। क्रि. वि., अनुकृत्या, अनुसृत्या, गतानुगतिकतया (सब तृतीया एकवचन)।

देखा हुआ, वि., दृष्ट, निरूपित, निर्वर्णित, निभालित।

देग, सं. स्त्री. (फ़ा.) पिठरः-रं, बृहत्स्थाली।

देगचा, सं. पुं. (फ़ा.) स्थाली, पिठरकः-कम्।

देगची, सं. स्त्री. (फा. देगचा) उरवा, पिठरी, लघुस्थाली।

देदीप्यमान, वि. (सं.) अत्यंतं-सततं भासमान-भ्राजमान-द्योतमान, अति,-तेजस्विन्-भासुर।

देन, सं. स्त्री. (हिं. देना.) दानं, वितरणं २. प्रीति-,दानं, उपहारः, उपायनं, प्रदत्तवस्तु(न.)।

—दार, सं. पुं. (हिं.+फ़ा.) दे. 'ऋणी'

—लेन, सं. पुं., कुसीदं, कौसीद्यं, वृद्धिजीवनं २. दानादानं-ने (द्वि.)।

देना, क्रि. सं. (सं. दानं) दा (जु. उ. अ.), दा (भ्वा. प. अ., यच्छति), उत्-वि-सृज् (तु. प. अ.) विश्रण् (चु.), दद् (भ्वा. आ. से.) ऋ (प्रे., अर्पयति) २. (थप्पड़ आदि) प्रह् (भ्वा. प. अ.), आ-हन् (अ. प. अ.) ३. (किवाड़ आदि) (अ)पि-धा (जु. उ. अ.)। सं. पुं., अर्पणं, प्रतिपादनं, विश्राणनं, ददनं, उत्-वि-सर्जनं। दे. 'दान' (१-२)।

देने योग्य, वि., देय, दानीय, दातव्य, विश्राणनीय, अर्पणीय, दानार्ह।

देनेवाला, सं. पुं., दातृ (पुं.), त्यागिन्,-द,-प्रद-दायक-दायिन् (उ. सुख,-द-दायक-इ.) २. दे. 'दाता'।

दिया हुआ, वि., दत्त, अर्पित, विसृष्ट, विश्राणित।

दे मारना, मु., दे. 'पटकना'।

देय, वि. (सं.) दे. 'देने योग्य'।

देर, सं. स्त्री. (फ़ा.) विलम्बः, अतिकालः, काल,-अतिपातः-क्षेपः-यापनं-व्याक्षेपः २. समयः, कालः।

—करना या लगाना, क्रि. अ., वि-लम्ब् (भ्वा. आ. से.), काल अतिपत् (प्रे.)-व्याक्षिप् (तु. प. अ.)।

—तक, क्रि. वि., चिराय, चिरं यावत्, चिरकालान्तम्।

—से, क्रि. वि., चिरात्, चिरेण, विलम्बेन, विलम्बात्, चिर,-कालेन-कालात्।

—होना, क्रि. अ., विलंब्-व्याक्षिप् (कर्म.) वेला अतिक्रम् (भ्वा. प. से.), विलंबो जन् (दि. आ. से.)।

देरी, सं. स्त्री., दे. 'देर' (१-२)।

देव[1], सं. पुं. (फ़ा.) दैत्यः, दानवः, राक्षसः।

देव[2], सं. पुं (सं.) देवता, दैवतं, अमरः, अमर्त्यः, सुरः, अस्वप्नः, दिविषद्-दिवौकस् (पुं.) निर्जरः, विबुधः, वृंदारकः, सुमनस् (पुं.) २. ईश्वरः ३. मिश्रः, आर्यः, पूज्यपुरुषः ४. मेघः ५. ज्ञानेंद्रियं ६. ब्राह्मणः।

—गिरि, सं. पुं. (सं.) रैवतकपर्वतः २. नगरविशेषः।

—दारु, सं. पुं., (सं. पुं. न.) दे. 'दियार'।

—दासी, सं. स्त्री. (सं.) वेश्या, वेशवनिता २. मंदिर-देव,-नर्तकी।

—देव, सं. पुं. (सं.) ईश्वरः २. इन्द्रः।

—नागरी, सं. स्त्री. (सं.) लिपिविशेषः ('अ' से 'ह' तक अक्षर)।

—पूजा, सं. स्त्री. (सं.) प्रतिमापूजनं २. ईश्वरार्चनम्।

—भूमि, सं. स्त्री. (सं.) स्वर्गः, नाकः।

—मंदिर, सं. पुं. (सं. न.) देव,-गृह-भवन-स्थानं-आलयः।

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

—लोक, सं. पुं. (सं.) स्वर्गः ।
—वाणी, सं. स्त्री. (सं.) देवभाषा, संस्कृतम् ।
देवकी, सं. स्त्री. (सं.) श्रीकृष्णचन्द्रजननी, देवकात्मजा ।
—नन्दन, सं. पुं. (सं.) श्रीकृष्णः ।
देवता, सं. पुं. (सं. स्त्री.) दे. 'देव' (१-३,५,६) ।
देवत्व, सं. पुं. (सं.) सुरत्व, अमरत्व ।
देवन, सं. पुं. (सं.) अक्षः, सारः, शारः, पाशकः । (सं. न.) कान्तिः-दीप्तिः (स्त्री.) २. अक्ष-द्यूत,-क्रीडा ३, क्रीडा, विनोदः ४. प्रमोदवाटिका ।
देवना, सं. स्त्री. (सं.) द्यूतम् २. क्रीडा ३. शोकः ।
देवर, सं. पुं. (सं.) देवृ (पुं.), देवलः, देवारः, देवानः, तुरागावः, पत्युरनुजः २. पतिभ्रातृ (पुं. छोटा या बड़ा) ।
देवरानी, सं. स्त्री. (सं. देवरः>) यातृ (स्त्री.), देवरपत्नी, जा ।
देवल, सं. पुं. (सं.) देवाजीवः, देवपूजोपजीविन् २. नारदः ३. स्मृतिकारमुनिविशेषः । हिं., देवालयः, मन्दिरम् ।
देवांगना, सं. स्त्री. (सं.) दे. 'अमरांगना' ।
देवालय, सं. पुं. (सं.) स्वर्गः २. मंदिरम् ।
देवी, सं. स्त्री. (सं.) देवपत्नी, सुरांगना २. दुर्गा, पार्वती ३. ब्राह्मणी ४. पतिव्रता ५. पट्ट,-महिषी-राज्ञी ।
देश, सं. पुं. (सं.) जनपदः, विषयः, भूभागः, नीवृत्, उपवर्तनं, प्रदेशः २. राष्ट्रं ३. स्थानं, स्थलं ४. रागभेदः ।
—निकाला, सं. पुं., (स्वदेशात्) प्र-निर्-वि,-वासनं-वासः, प्रव्राजनम् ।
—भाषा, सं. स्त्री. (सं.) उप-प्राकृत-प्रादेशिक,-भाषा ।
देशांतर, सं. पुं. (सं. न.) अन्य-वि-पर देशः २. लम्बांशः, देशांतरं (तूलवल्द) ।
देशाचार, सं. पुं. (सं.) देश,-धर्मः-व्यवहारः-रीतिः (स्त्री.) ।
देशाटन, सं. पुं. (सं. न.) भू,-यात्रा-भ्रमण-पर्यटनम् ।
देशी, सं. स्त्री. (सं. देशीय) देश्य, देशिक, स्वदेश,-ज-उत्पन्न ।
देस, देसी, सं. पुं. तथा वि., दे. 'देश' तथा 'देशी' ।
देसावर, सं. पुं., दे. 'दिसावर' ।
देह, सं. पुं. (सं.) कायः, दे. 'शरीर' २. अवयवः, अंगं ३. जीवनम् ।
—पात, सं. पुं. (सं.) मृत्युः (पुं.) ।
देहरा, सं. पुं. (सं. देवः+हिं. घर) देवालयः, मंदिरम् ।
देहली, सं. स्त्री. (सं.) दे. 'दहलीज' २. इन्द्रप्रस्थं, देहली, दिल्ली ।
देहवंत, देहवान्, वि. (सं. देहवत्) दे. 'देही' ।
देहांत, सं. पुं. (सं.) मृत्युः (पुं.), निधनं, मरणम् ।
देहात, सं. पुं. (फ़ा.) दे. 'ग्राम' ।
देहाती, वि. (फा. देहात) दे. 'ग्रामीण' ।
देही, वि. (सं. देहिन्) प्राणिन्, देहवत्, शरीरिन्, तनु,-धारिन्-भृत् । सं. पुं., (सं.) जीव-, आत्मन् (पुं.), जीवः, प्रत्यगात्मन् (पुं.)।
दैत्य, सं. पुं. (सं.) राक्षसः, दानवः, निशाचरः ।
—गुरु, सं. पुं. (सं) शुक्राचार्यः ।
—पति, सं. पुं. (सं.) हिरण्यकशिपुः ।
—माता, सं. पुं. (सं.-तृ) दितिः (स्त्री.) ।
दैत्यारि, सं. पुं. (सं.) विष्णुः २. देवः ।
दैनिक, वि. (सं.) प्रात्यहिक-आह्निक [–की (स्त्री.)], दैनंदिन [–नी (स्त्री.)] २. नैत्यक-नैत्यिक [–की (स्त्री.)] । सं. पुं., दे. 'दैनिकी' ।
दैनिकी, सं. स्त्री. (सं.) दिन,-वेतनं-भृतिः (स्त्री.) ।
दैव, सं. पुं. (सं. न.) भाग्यं, अदृष्टं, नियतिः (स्त्री.), भागधेयं, भवितव्यता, दिष्टं, प्राक्तनं, विधिः (पुं.), प्रारब्धं २. ईश्वरः ३. आकाशः-शम् । वि., दिव्य, सौर, अमानुष, अपौरुष, ऐश्वर, अलौकिक (स्त्री., दे. 'दैवी') ।
—गति, सं. स्त्री. (सं.) दैवघटना, भाग्यचक्रं २. दे. 'दैव' (१) ।
—दुर्विपाक, सं. पुं. (सं.) दैवदोषः, दौर्भाग्योदयः ।
—योग, सं. पुं. (सं.) यदृच्छा, दैव,-गतिः (स्त्री.)-घटना ।
—वश, क्रि. वि. (सं.-शं) दैवात, दैववशात, दैवयोगात्, अकस्मात्, यदृच्छया ।

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

दैवी, वि. स्त्री. (सं.) आकस्मिकी, यादृच्छिकी, अलौकिकी, अमानुषी, नश्वरी, अपार्थिवी ।
दैहिक, वि. (सं.) शारीरिक-कायिक-वैग्रहिक- [-की (स्त्री.)] ।
दो, वि. (सं. द्वि.) द्वौ (पुं.), द्वे (स्त्री., न.), द्वयं,-द्वितयं,-युग्मं (उ. दो मास=मासद्वयं इ.) ।
—अन्नी, सं. स्त्री., द्वयाणी ।
—अर्थी, वि., द्वयर्थ, द्वयर्थक, श्लिष्ट २. संदिग्ध ।
—आब, सं. पुं. (फ़ा.) *द्वयापम् ।
—गला, सं. पुं. (फ़ा.) संकरजः, मिश्रजः, विजातः, सांकरिकः, वर्णसंकरः ।
—चंद, वि. (फ़ा.) द्विगुण, द्विगुणित ।
—चित्ता, वि., दे. 'दुचित्ता' ।
—तल्ला, वि., दे. 'दुमंज़िला' ।
—तारा, सं. पुं., *द्वितारः, वाद्यभेदः ।
—धारा, वि., दे. 'दुधारा' ।
—नाली, वि., द्विनाली (भुशुंडी आदि) ।
—पहर, सं. स्त्री., मध्याह्नः, मध्याह्नकालः, मध्य (ध्यं)दिनं, उद्दिनं ।
—पर्ता, वि., द्विरावृत्त, द्विरावर्तित, द्विगुण, द्विगुणित ।
—पहर का, वि., माध्याह्निक [-की (स्त्री.)] माध्यंदिनं [-नी (स्त्री.)] ।
—पहर पहिले, क्रि. वि., अर्वाङ् मध्याह्नात् (अ. म.=A. M.) प्राह्णे, पूर्वाह्णे ।
—पहर ढले, क्रि, वि., पश्चान्मध्याह्नात् (प. म. =P. M.), अपराह्णे, विकाले ।
—पाया, वि., द्विप(पा)दः,द्विपाद्(पुं.)(मनुष्य) ।
—बारा, क्रि. वि. (फ़ा.) द्विः, द्विवारं, पुनः (सब अव्य.) ।
—भाषिया, सं. पुं., दे. 'दुभाषिया' ।
—मंज़ला, मंज़िला, वि., दे. 'दुमंज़िला' ।
—मानी, वि., दे. 'दोअर्थी' ।
—मुँहा, वि., द्विमुख, द्विवदन, २. छलिन्, दांभिक । सं. पुं., द्विमुखः सर्पः, सर्पभेदः ।
—रंगा, वि., द्विरंग, द्विवर्ण २. दांभिक ।
—रंगी, सं. स्त्री., दम्भः, द्वैधं, प्रतारणा ।
—राहा, सं. पुं., द्विपथं, चारुपथः ।
—लड़ा, सं. पुं., *द्विसूत्रकः ।
—साला, वि., द्विवार्षिक-द्वैवार्षिक (-की स्त्री.) द्विवर्षीण, द्विवर्ष ।
—सूती, सं. स्त्री., *द्विसूत्री ।
—सेरी, सं. स्त्री., द्विसेटकी, द्विसेरी ।
—हत्थड़, सं.पुं., करयुगलाघातः, द्विहस्तप्रहारः।
—हत्था, क्रि. वि., कराभ्यां-हस्तद्वयेन (तृ.) ।
—एक,—चार, मु., कतिपय, कति,-चित्-चन ।
—करना, मु., द्विधा-द्विखण्डी कृ, समांशद्वयेन वि-भज् (भ्वा. प. अ.) ।
—कौड़ी की चीज, मु., तुच्छ-क्षुद्र-अल्पमूल्य, पदार्थः ।
—घड़ी, मु., कञ्चित्,-कालं-समयं, अल्पसमयं यावत् ।
दोज़ख़, सं. पुं. (फ़ा.) न(ना)रकः, निरयः ।
दोज़ख़ी, वि. (फ़ा.) नारकिन्, नारकीय, नारकिक-नारक [-की (स्त्री.)] ।
दोना, सं. पुं. (सं. द्रोणं>) *द्रोणः, पत्र-पर्ण,-पुटः-पुटकः ।
दोनों, वि. (हिं. दो) उभौ (पुं.), उभे (स्त्री. न.), उभय (प्रायः एक. या बहु. में; कभी द्विवचन में भी), द्वौ अपि (पुं.), द्वे अपि (स्त्री. न.) ।
दोला, सं. स्त्री. (सं.) दोली, हिंदोला, प्रेंखः-खं-खा ।
—यंत्र, सं. पुं. (सं. न.) दे. 'दोला' २. वक-संधान,-यन्त्रम् ।
—युद्ध, सं. पुं, (सं. न.) सन्दिग्ध-परिणामं युद्धम् ।
दोलायमान, वि. (सं.) इतस्ततः विचलत् (शत्रंत), प्रेंखत् (शत्रन्त) ।
दोष, सं. पुं. (सं.) न्यूनता, विकलता, छिद्रं, विकारः २. पापं, पातकं ३. लांछनं, कलंकः, अभियोगः ४. अपराधः, दोषः ५. रसदोषाद्यः काव्यदोषाः (सा.) ६. प्रदोषः, रजनीमुखम् ।
—लगाना, क्रि. सं. दुष् (प्रे., दूषयति), अभि-युज् (रु. आ. अ., चु.), कलंकयति (ना. धा.), दोषं क्षिप् (तु. प. अ.)-आरुह् (प्रे., आरोपयति), निंद् (भ्वा. प. से.) ।
—कर, वि. (सं.) अनिष्ट-अहित-हानि,-कर-कारिन्-कार ।
—ग्राही, वि. (सं.-हिन्) दुष्ट, खल, दुर्जन ।
—घ्न, सं. पुं. (सं. न.) वातपित्तकफ-नाशक-मौषधम् ।
—ज्ञ, वि. (सं.) प्राज्ञ, विद्वस् ।
—त्रय, सं. पुं. (सं. न.) वातपित्तकफदोषाः, दोष,-त्रिक-त्रयी ।

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

—दृष्टि, वि. (सं.) दोषैकदृश् , निंदक, पुरोभागिन्, छिद्रान्वेषिन् ।

दोषी, वि. (सं. दोषिन्) सदोष, दोषवत्, अपराधिन्, प्रमादिन् २. पाप, पापिन् ३. अभियुक्त, दंड्य, कृतापराध ४. व्यसनिन्, कुमार्गगामिन् ।

दोस्त, सं. पुं. (फ़ा.) सखि (पुं.), दे. 'मित्र' ।

दोस्ताना, सं. पुं. } (फ़ा.) सखित्वं, दे.
दोस्ती, सं. स्त्री. } 'मित्रता' ।

दोहता, सं. पुं., दे. 'दौहित्र' ।

दोहती, सं. स्त्री., दे. 'दौहित्री' ।

दोहद, सं. पुं. (सं. पुं. न.) गर्भिण्यभिलाषः, लालसा, श्रद्धा, दौर्हृदं, दौहृदम् ।

—वती, सं. स्त्री., लालसावती गर्भिणी, श्रद्धालुः (स्त्री.) ।

दोहन, सं. पुं. (सं. न.) स्तन्य-ऊधस्य-ऊधन्य, निःस्रावणं,-निष्कर्षणं-निस्सारणं २.दे. 'दोहनी'।

दोहना, क्रि. स. (सं. दोहनं) दुह् (अ. प. अ., द्विकर्मक), स्तन्यं निस्स्रु (प्रे.) । सं. पुं., दे. 'दोहन' ।

दोहनी, सं. स्त्री. (सं.) दोहन-दुग्ध,-पात्रं, दोहनं, दोहः, पारी, लेपनम् ।

दोहने योग्य, वि. दोग्धव्य, दोह्य ।

दोहनेवाला, सं. पुं., दोग्धृ (पुं.), दोहक ।

दोहर, सं. स्त्री. (हिं. दो) *द्विस्तरी ।

दोहरा, वि. पुं. (हिं. दो) द्विरावृत्त, द्विरावर्तित २. द्विगुण, द्विगुणित ।

—करना, क्रि. स., द्विपुटी कृ,द्विः व्यावृत् (प्रे.), द्विपुटयति (ना. धा.) २. द्विगुणी कृ, द्विगुणयति (ना. धा.) ।

दोहराना, क्रि. स. (हिं. दोहरा) पुनः-द्विः कथ् (चु.)-गद्-वद् (भ्वा. प. से.)-व्याह् (भ्वा. प. अ.) २. मुहुः-द्विः कृ या अनुस्था (भ्वा. प. अ.)-आ-चर् (भ्वा. प. से.), अभ्यस् (दि. प. से.) ३. पुनः-द्विः ईक्ष् (भ्वा. आ. से.)-विचर् (प्रे.), संशुध् (प्रे.) ।

दोहराव, सं. पुं. (हिं. दोहराना) पुनरीक्षणं, संशोधनं २. पुनरुक्तिः (स्त्री.), पौनरुक्त्यं, पुनर्,-वचनं-वादः ।

दोहा, सं. पुं. (हिं. दो) हिंदीछन्दोभेदः ।

दौड़, सं. स्त्री. (हिं. दौड़ना) धावनं-पलायनं, द्रवणं, विद्रवः, द्रुत,-गमनं-गतिः (स्त्री.), २. आक्रमणं (ई-प) गति-उद्योग-बुद्धि,-सीमा ।

—धूप, सं. स्त्री., घोर-कठोर,-प्रयासः-परिश्रमः-उद्योगः-उद्यमः ।

—धूप करना, मु., अत्यंतं आयस्-परिश्रम् (दि. प. से.)-प्र-यत् (भ्वा. आ. से.) ।

दौड़ना, क्रि. अ. (सं. धोरणं) धोर् (भ्वा. प. से.), द्रु (भ्वा. प. अ.), धाव् (भ्वा. प. से.), द्रुतं-सवेगं-शीघ्रं गम् २. सततं-अत्यधिकं प्रयत् (भ्वा.आ. से.)-परि-श्रम् (दि. प. से.) ३. सहसा प्र-वृत् (भ्वा. आ. से.) ४. पलाय् (भ्वा. आ. से.) । सं. पुं., दे. 'दौड़' ।

दौड़नेवाला, सं. पुं., धावकः, धोरकः, शीघ्रगामिन् ।

दौड़ाना, क्रि. स., व. 'दौड़ना' के प्रे. रूप ।

दौर दौरा, सं. पुं. (अ+हिं.) आधिपत्यं, शासनं, प्रभुत्वं, स्वामित्वं, ईक्षत्वं. वशः-शम् ।

दौरा, सं. पुं. (अ. दौर) पर्यटनं, परिभ्रमणं २. इतस्ततः अटनं-भ्रमणं-गमनं ३. अधिकारिणो निरीक्षणार्थं भ्रमणं ४. रोगादेः आवृत्तिः-आवर्तनं-सामयिकाक्रमणम् ।

—करना, क्रि. अ., परिभ्रम्-पर्यट् (भ्वा. प.से.), स्वमंडलं निरीक्षितुं परिभ्रम् ।

—सुपुर्द करना, मु., अभियोगं दंडाधिकरणिकपार्श्वं प्रेष् (प्रे.) ।

दौरात्म्य, सं. पुं. (सं. न.) दुष्टता, खलत्वम् ।

दौर्जन्य, सं. पुं. (सं. न.) दुर्जनता, दुष्टता ।

दौर्बल्य, सं. पुं. (सं. न.) दुर्बलता, क्षामता ।

दौर्भाग्य, सं. पुं. (सं. न.) दे. 'दुर्भाग्य' ।

दौलत, सं. स्त्री. (अ.) धनं, संपद् (स्त्री.) ।

—खाना, सं. पुं. (अ.+फ़ा.) गृहं, आनि,-वासः ।

—मंद, वि. (अ.+फ़ा.) धनिक, संपन्न ।

—मंदी, सं. स्त्री. (अ.+फ़ा.) धनाढ्यता, समृद्धिः (स्त्री.) ।

दौवारिक, सं. पुं. (सं.) दे. 'द्वारपाल' ।

दौष्कुल, वि. (सं.) हीन-नीच-क्षुद्र-, कुलवर्ण-जातीय ।

दौष्ट्य, सं. पुं. (सं. न.) दुष्टता, खलता, दुर्जनता ।

दौष्यंति, सं. पुं. (सं.) दुष्यन्तपुत्रो भरतः ।

दौहित्र, सं. पुं. (सं.) दुहितृ,-पुत्रः-तनयः ।

दौहित्री, सं. स्त्री. (सं.) दुहितृ,-पुत्री-तनया ।

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

द्यु, सं. पुं. (सं. न.) दिनं २. आकाशः-शं ३. स्वर्गः । सं. पुं., अग्निः ।

—लोक, सं. पुं. (सं.) स्वर्गः ।

द्युति, सं. स्त्री. (सं.) कांतिः-दीप्तिः (स्त्री.), आभा, प्रभा ३. लावण्यं, सौन्दर्यं, शोभा, छविः (स्त्री.) ३. किरणः, रश्मिः (पुं.) ।

द्युतिमन्त, वि. (सं.-मत्) कांतिमत्, दीप्तिमत्, भासुर, भास्वर ।

द्यूत, सं. पुं. (सं. पुं. न.) अक्षवती, कैतवं, पणः ।

—कर, सं. पुं. (सं.) कितवः, धूर्त्तः, दुरोदरः, अक्षदेविन्, द्यूतकृत् ।

—कार, सं. पुं. (सं.) सभि (भी) कः २. दे. 'द्यूतकर' ।

द्योतक, वि. (सं.) प्रकाशक, द्योतकार, उद्भासक २. ज्ञापक, ख्यापक ।

द्रव, स. पुं. (सं.) द्रवणं, स्रवणं, क्षरणं, गलनं, वहनं, अभि-नि,-स्यं (ष्यं) दनं २. स्र (स्रा) वः, प्रवाहः, प्रस्रवः, धारः-रा ३. धावनं, पलायनं ४. वेगः, जवः ५. आसवः ६. रसः ७. परिहासः ८. द्रवत्वं ९. द्रव,-द्रव्यं-पदार्थः । वि., तरल, द्रव, प्रवाहिन्, २. आर्द्र, विलिन्न, उन्न, ३. विलीन, विद्रुत, द्रवीकृत ।

द्रवीभूत, वि. (सं.) दयादिभिः आर्द्रीभूत-अभिष्यंदित, दयालु, कृपालु । २. विलीन, विद्रुत ।

द्रवत्व, सं. पुं. (सं. न.) द्रवता, द्रवभावः, प्रवाहधर्मः, रसता, तरलत्वम् ।

द्रव्य, सं. पुं. (सं. न.) पदार्थः, वस्तु (न.) २. भूम्यादयो नव पदार्थाः ३. उपादानकारणं, सामग्री ४. धनं, वित्तम् ।

—संचय, सं. पुं. (सं.) धनसंग्रहः ।

द्रव्यार्जन, सं.पुं. (सं.) धनोपार्जनं,वित्तार्जनम् ।

द्राक्षा, सं. स्त्री. (सं.) रसाला, प्रियाला, गुच्छफला, दे. 'दाख' ।

द्रुत, वि. (सं.) विलीन, विद्रुत, द्रवी,-कृत-भूत, अवदीर्ण २. शीघ्र, सिघ्र, त्वरित, सत्वर ३. पलायित । क्रि. वि., आशु, झटिति ।

—गामी, वि. (सं.-मिन्) आशुग, शीघ्रगामिन्, द्रुतगति ।

द्रुम, सं. पुं. (सं.) पादपः, तरुः (पुं.), वृक्षः ।

द्रोण, सं. पुं. (सं. पुं. न.) प्राचीनपरिमाण-भेदः (४ सेर, १६ सेर या २२ सेर) मानः कलशः, उन्मानं, अर्म्मणः, उल्वणः । सं. पुं. द्रोणाचार्यः २. काष्ठकलशः ३. द्रुममयो रथः ४. काकोलः, कृष्ण-द्रोण-वृक्ष,-काकः ५. दे. 'दोना' ६. नौका ।

द्रोह, सं. पुं. (सं) अहित-अनिष्ट,-चिंतनं वैरं, वि., द्वेषः, अपचिकीर्षा, जिघांसा, छद्म-वधः, अहित-अनर्थ,-इच्छा ।

द्रोही, वि. (सं. द्रोहिन्) अहित-अनिष्ट-अनर्थ,-चिंतक-चिकीर्षक, मत्सरिन्, अभ्यसूयकः ।

द्वंद, सं. पुं. (सं. न.) मिथुनम् ।

द्वंद, द्वंद्व, सं. पुं. (सं. द्वंद्वं) द्वयं, द्वितयं, युगलं, युग्मं, युगं, यमकं, युतकं २. मिथुनं, जाया-पती, दंपती ३. परस्परविरोधिपदार्थौ (उ. शीत-उष्ण, सुख-दुःख इ.) ४. रहस्यं ५. कलहः, उद्वेगः ६. द्वंद्वयुद्धं ७. संशयः ८. संभ्रमः, संमोहः ९. कष्टं । सं. पुं., समासभेदः (व्या.) ।

—चारी, सं. पुं. (सं.-चारिन्) दे. 'चकवा' ।

—युद्ध, सं. पुं. (सं. न.) मल्ल-द्वयोर्,-युद्धम् ।

द्वादशी, सं. स्त्री. (सं.) शुक्ला कृष्णा वा द्वादशी तिथिः (स्त्री.) ।

द्वापर, सं. पुं. (सं. पुं. न.) तृतीययुगं (८६४००० वर्ष) २. संदेहः ।

द्वार, सं. पुं. (सं. न.) द्वार् (स्त्री.) प्रति-(ती) हारः २. उपायः, साधनम् ।

—चार, सं. पुं. (सं. द्वाराचारः) वधूगृहद्वारे करणीया विशिष्टरीतिः (स्त्री.) ।

—पाल, सं. पुं. (सं.) द्वा(:)स्थः, द्वारस्थः, द्वारिकः, दौवारिकः, प्रति(-ती)हारः(–री स्त्री.) ।

द्वार(रि)का, सं. स्त्री. (सं.) द्वारा(र)वती, तीर्थविशेषः ।

द्वारा, अव्य. (सं.) द्वारेण, साधनेन, कारणेन, हेतुना । (हिं. प्रायः इसका अनुवाद तृतीया से करते हैं) ।

द्वि, वि. (सं.) दे. 'दो' ।

—ककार, सं. पुं. (सं.) काकः, वायसः २. कोकः, चक्रः ।

—गुण, वि. (सं.) द्विगुणित ।

—पद, वि. (सं.) द्विपाद, द्विचरण ।

द्विज, वि. (सं.) द्विर्जात, द्विरुत्पन्न, द्विजन्मन् । सं. पुं., ब्राह्मणक्षत्रियवैश्याः २. खगः, अंडजः ३. दंतः ४. शाखापः ५. चंद्रः ।

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

—दास, सं. पुं. (सं.) शूद्रः, दे० ।
—पति, सं. पुं. (सं.) ब्राह्मणः २. गरुड़ः ३. चन्द्रः ।
—प्रिया, सं. स्त्री. (सं.) सोमलता ।
—बंधु, सं. पुं. (सं.) कर्महीनो द्विजः ।
—राज, सं. पुं. (सं.) ब्राह्मणः २. चंद्रः ।

द्वितीय, वि. (सं.) द्वितीयः-र्यं-र्या (पुं. न. स्त्री.) २. गौण, अवर ।

द्वितीया, सं. स्त्री. (सं.) शुक्ला कृष्णा वा द्वितीया तिथिः (स्त्री.) ।

द्विधा, अव्य. (सं.) प्रकारद्वयेन, द्विप्रकारं २. द्विभागशः (अव्य.), दिखंडयोः (सप्तमी) ।

द्विविध, वि. (सं.) द्विप्रकारक । क्रि. वि. दे. 'द्विधा' ।

द्वीप, सं. पुं. (सं. पुं. न.) जलवेष्टितभूमिः (स्त्री.) ।

द्वेष, सं. पुं. (सं.) वैरं, शत्रुता, सापत्न्यं, विरोधः, द्वंद्वभावः ।

द्वेषी, वि. (सं.-षिन्) विरोधिन्, वैरिन्, अहित, विपक्ष । सं. पुं., अरिः, शत्रुः, रिपुः, द्वेष्टृ ।

द्वैत, सं. पुं. (सं. न.) द्वित्वं, द्विता, द्वैतं, द्वैधं २. द्वैतवादः (दर्शन.) ३. भेदभावः ।

—वाद, सं. पुं. (सं.) जीवब्रह्मपृथक्त्ववादः २. देहदेहिपृथक्त्वसिद्धांतः ।

—वादी, सं. पुं. (सं.-दिन्) द्वैतिन् ।

द्वैधीभाव, सं. पुं. (सं.) संशयः, निश्चयाभावः २. दंभः ३. उपायविशेषः (राजनीतिः) ।

द्वैपायन, सं. पुं. (सं.) श्रीवेदव्यासः ।

द्व्यणुक, सं. पुं. (न.) परमाणुद्वयात्मकं द्रव्यम् ।

ध

ध, देवनागरीवर्णमालाया एकोनविंशो व्यंजनवर्णः, धकारः ।

धंधला, सं. पुं. (हिं. धंधा) दंभः, कपटं, माया ।

धंधा, सं. पुं. (सं. धनधान्यं>) आजीवः, आ-उप,-जीविका, जीवसाधनं, वृत्तिः (स्त्री.) २. उद्यमः, व्यवसावः ।

काम—, सं. पुं., दे. 'धंधा' ।

गोरख—, सं. पुं., मोहकर-भ्रांतिजनक,-व्यापारः ।

धँसना, क्रि. अ. (सं. दंशनं>) आ-प्र,-विश् (तु. प. अ.) निविश् (तु. आ. अ.), निर्-, भिद् (रु. प. अ.), व्यध् (दि. प. अ.), दे. 'गड़ना' ।

धँसाना, क्रि. स., ब. 'धँसना' के प्रे. रूप ।

धँसाव, सं. पुं. (हिं. धँसना) नि-प्र,-वेशः-वेशनं, वेधः-धनम् ।

धक[1], सं. स्त्री. (अनु.) हृदय-हृत्,-कंपः, स्पंदः-स्फुरणं २. हृत्कंपशब्दः ।

धक[2], सं. स्त्री. (देश.) बृहल्लिक्षा, लघुयूका ।

धकधकाना, क्रि. अ. (अनु.) दे. 'धड़कना' ।

धकेलना, क्रि. स. (हिं. धक्का) (करादिभिः) प्रणुद्-प्रेर्-प्रचल्-प्रसृ (प्रे.) प्रचुद् (चु.) ।

धकेलू, सं. पुं. (हिं. धकेलना) प्रणोदकः, प्रचोदकः, प्रेरकः, प्रचालकः, अप-प्र,-सारकः ।

धक्कमधक्का, सं. पुं. (हिं. धक्का) अन्योन्य-परस्पर,-संमर्दः,समाघातः-संघर्षणं, अभिसंपातः ।

धक्का, सं. पुं. (अनु. धक् अथवा सं. धक्क=नाश करना>) अपसारणं-णा, प्रचालनं-ना, प्रेरणा, प्रचोदना, संघर्षः, आघातः, संमर्दः २. संतापः, क्लेशः ३. आपद्-विपद् (स्त्री.) ।

—खाना, क्रि. अ., अपसार्-प्रेर्-प्रचाल्-प्रचोद् (कर्म.) ।

—देना, क्रि. स. दे. 'धकेलना' ।

—लगना, मु., विपदा अभि-उप-हन् (कर्म.) ।

धचका, सं. पुं. (अनु.) लघु,-प्रहारः-आघातः, दे. 'धक्का' ।

धज, सं. स्त्री. (सं. ध्वजः>) अलंक्रिया, सज्जा, भूषा २. आकारः, आकृतिः (स्त्री.), छविः (स्त्री.) ३. हावभावौ (द्वि.) ४. वर्तनं, शीलम् ।

धजीला, वि. (हिं. धज) दे. 'सजीला' ।

धज्जी, सं. स्त्री. (सं. धटी) पट-वस्त्र,-खंडः-पट्टी २. पट्टचरं, चीरम् ।

—धज्जियाँ उड़ाना, मु. विद् (प्रे.), खंड् (चु.) २. निर्दयं-निष्ठुरं-तीव्रं प्रहृ (भ्वा. प. अ.), हन् (अ. प. अ.) ।

धडंग, वि. (हिं. धड़+अंग) नग्न, दे. 'नंगा' ।

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

धड़, सं. पुं. (सं. धरः>) कबंधः, अपमूर्धकलेवरं, आशीर्षशरीरं २. आकटिग्रीवं शरीरम् ।

धड़क-कन, सं. स्त्री. (अनु. धड़) हृदय-हृत्,-स्पंदनं-स्फुरणं-कंपनं २. हृत्स्पंदध्वनिः (पुं.) ३. आशंका, भयम् ।

—बेधड़क, क्रि. वि., निःशंकं, निर्भयं, निस्संकोचम् ।

धड़कना, क्रि. अ. (हिं धड़क) कंप्-वेप्-स्पंद् (भ्वा. आ. से.), स्फुर् (तु. प. से.) ।

धड़का, सं. पुं., दे. 'धड़कन' ।

धड़काना, क्रि. स., व. 'धड़कना' के प्रे. रूप ।

धड़धड़, सं. स्त्री. (अनु.) धड़धड़ात्,-कारः-कृतिः-कृतं । क्रि. वि., सधड़धड़शब्दं २. निःसंकोचम् ।

—जलना, क्रि. अ., अत्युग्रं-प्रचंडं ज्वल् (भ्वा. प. से.)-दह् (कर्म.)-दीप् (दि. आ. से.)।

धड़धड़ाना, क्रि. अ. (अनु. धड़धड़)धड़धड़ायते (ना. धा.) धड़धड़शब्दं जन् (प्रे.) ।

धड़ल्ला, सं. पुं. (अनु. धड़) धड़धड़ात्कारः २. जनसंमर्दः ।

धड़ल्लेदार, वि. (अनु.+फ़ा.) निर्भय, निःसंकोच ।

धड़ल्ले से, मु., निर्भयं, निस्संकोचम् ।

धड़वाई, सं. पुं. (हिं. धड़ा) तोलकः, *धटधरः ।

धड़ा, सं. पुं. (सं. धटः) तुला २. तोलः, भारः ३. पक्षः, दलम् ।

धड़ाका, सं. पुं. (अनु०) धड़ाक् इति शब्दः—खः—ध्वनिः (पुं.) गुरुद्रव्यपतनध्वनिः ।

धड़ाधड़, क्रि. वि. (अनु. धड़) सततं, निरंतरं, अविच्छिन्नं, अनवच्छिन्नं २. निरंतरं सधड़धड़शब्दं च ।

धड़ाम से, सं. पुं. (अनु.) सशब्दम् ।

धड़ी, सं. स्त्री. (सं. धटः>) धटी, चतुःसेरी-सेटकी, पंच,-सेरी-सेटकी ।

धड़ेबंदी, सं. स्त्री. (हिं. फ़ा.) दलबंधः, पक्ष,-पातः-ग्रहणं-अवलंबनम् ।

धत, सं. स्त्री., दे. 'लत' ।

धतकारना, क्रि.स. (अनु. धत्) दे. 'दुतकारना' ।

धता, सं. पुं. (अनु. धत्) निस्सारित,अपगत ।

—बताना, मु., छलेन अप-निस्-सृ (प्रे.), सव्याजं परिहृ (भ्वा. प. अ.) ।

धतूरिया, सं. पुं. (हिं धतूरा) धत्तूर—मोहन,-प्रयोजको वंचकः ।

धत्तू (त्)रा, सं पुं. (सं. धत्तूरः) धुस्तूरः, शिवप्रियः, मोहनः, कनकः ।

धधक, सं. स्त्री. (अनु.] ज्वाला, झलका, आर्चिस् (न.) ।

धधकना, क्रि. अ., (हिं. धधक) उत्-प्र-संदीप् (दि. आ. अ.) उत्-प्र-ज्वल् (भ्वा. प. से.), प्रचंडं दह् (कर्म.) ।

धधकाना, क्रि. स., व. 'धधकना' के प्रे. रूप ।

धनंजय, सं. पुं. (सं.) अर्जुनः २. अग्निः ।

धन, सं. पुं. (सं. न.) वित्तं, द्रव्यं ऋ(रि)क्थं, वसु (न.), अर्थः, हिरण्यं, द्रविणं, विभवः, श्रीः-लक्ष्मीः (स्त्री.), भोग्यं, सम्पद्-सम्पत्तिः (स्त्री.) कांचनं, रै (पुं., राः, रायौ, रायः) २. गोधनं ३ प्रेमपात्रं ४.योगचिह्नं (+,गणित) ५. मूलद्रव्यम् ।

—कुबेर, सं. पुं. (सं.) लक्षपतिः (पुं.), कोटीशः, सुसमृद्धजनः ।

—धान्य, सं. पुं. (सं. न.) धनधान्ये,अर्थान्ने ।

—पति, सं. पुं. (सं.) कुबेरः, दे. ।

—हीन, वि. (सं.) दरिद्र, अकिंचन ।

धनक, सं. पुं. (सं.) धनाया, धनैषणा ।

धनद, वि. (सं.) दानशील, वदान्य । सं. पुं. (सं.), कुबेरः ।

धनाढ्य, वि. (सं.) अर्थ-धन-वित्त-द्रव्य,-वत् । धनिन्, धनिक, स-बहु-महा,-धन, वित्त-विभव-धन,-शालिन्, सम्पन्न, समृद्ध, श्रीमत्, लक्ष्मीश, धनेश्वर ।

धनार्जन, सं. पुं. (सं. न.) वित्तोपार्जनं, धन-संग्रहः ।

धनिक, वि. (सं.) दे. 'धनाढ्य' ।

धनिया, सं. पुं. (सं. धनिका) धन्या, वितुन्नकं, सुगंधि (न.) कुस्तुम्बरी ।

धनिष्ठा, सं. स्त्री. (सं.) श्रविष्ठा, नक्षत्रविशेषः ।

धनी, वि. (सं.-निन्) दे. 'धनाढ्य' २. दक्ष, कुशल । सं. पुं., स्वामिन्, अधिपतिः २. पतिः (पुं.) धनाढ्यः ।

—मानी, वि.. (सं. धनिमानिन्) धनमान,-वत्-युक्त ।

बात का—, वि., प्रतिज्ञापक, स्थिर-दृढ़,-प्रतिज्ञ, सत्य-संगर-संधः-व्रत ।

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

धनु, सं. पुं. (सं.) दे. 'धनुष' ।
धनुआ, सं. पुं. [सं. धन्वं (वेद में)] दे. 'धनुष' २. दे. 'धुनकी' ।
धनुक, सं. पुं. (सं. धनुस् न.) धनुः, धनूः (स्त्री.), धनु (न.) इन्द्र,—चापः—आयुधं—धनुस् (न.) ।
धनुकी, सं. स्त्री., दे. 'धुनकी' ।
धनुर्धारी, सं. पुं. (सं.-रिन्) धनुर्द्धरः, धन्विन्, इषुधरः, धानुष्कः, निषंगिन्, धनुर्भृत्-धनुष्मत् (पुं.), तूणिन् ।
धनुर्विद्या, सं. स्त्री. (सं.) शराभ्यासः, इषुक्षिप्तिः (स्त्री.) ।
धनुर्वेद, सं. पुं. (सं.) धनुर्विद्यानिरूपकशास्त्रम् ।
धनुष, सं. पुं. [सं. धनुस् (न.)] चापः-पं, इष्वासः, आसः, कार्मुकं, कोदण्डं, शरासनं, शारंगः, धनूः (स्त्री.) ।
धनेश-श्वर, सं. पुं. (सं.) धनपतिः २. कुबेरः ३. खगभेदः ।
धनैषणा, सं. स्त्री. (सं.) वित्तैषणा, धनाया ।
धनैषी, वि. (सं.-षिन्) धनेच्छुक, वित्तार्थिन् (पुं.)
धन्ना, सं. पुं., दे. 'धरना' सं. पुं. ४ ।
धन्य, वि. (सं.) सौ,-भाग्यवत्, पुण्य,-वत्-भाज्, सु-,कृतिन्, सु,-भग-भाग्य, महाभाग २. श्लाघ्य, स्तुत्य । क्रि. वि., साधु, सुष्ठु, सम्यक् ।
—वाद, सं. पुं. (सं.) कृतज्ञता,-दर्शनं-प्रकाशनं, उपकारप्रशंसा २. साधुवादः, प्रशंसावचनानि (बहु.), श्लाघा ।
धन्वन्तरि, सं. पुं. (सं.) सुरचिकित्सकः, सुश्रुतकारः ।
धन्वा, सं. पुं. (सं. धन्वन्) धनुस् (न.), चापः २. मरुः. ३. स्थलम् ।
धन्वी, सं. पुं. (सं.-विन्) दे. 'धनुर्धारी' ।
धप्पा, सं. पुं. (अनु. धप) चपेटः-टिका २. क्षतिः-हानिः (स्त्री.) ।
धब्बा, सं. पुं. (देश.) दे. 'दाग' ।
धम, सं. स्त्री. (अनु.) पतनशब्दः, धमिति ध्वनिः (पुं.) ।
—से, क्रि. वि. धमितिशब्देन सह २. अकस्मात् ।
धमक, सं. स्त्री. (अनु.) अवपतन-आघात,—शब्दः, धमिति ध्वनिः (पुं.) २. पादन्यास-शब्दः-३. आघातः, प्रहारः ४. क्रमः ।
धमकना, क्रि. अ. (हिं. धमक) धमिति शब्देन सह पत् (भ्वा.प.से.) २. व्यथ् (भ्वा.आ.से.) । आ—, मु., अकस्मात् सहसा आया (अ. प. अ.) ।
धमकाना, क्रि. स. (हिं. धमकना) भी (प्रे. भाययति, भापयते, भीषयते), त्रस् (प्रे.) २. निर-, भर्त्स् (चु. आ. से.), तर्ज् (भ्वा. प. से., चु. आ. से.) ।
धमकी, सं. स्त्री. (हिं. धमक) विभीषिका, भयदर्शनं २. तर्जना, भर्त्सना, अपकारगिर् (स्त्री.) ।
—में आना, मु., विभीषिकाप्रभावेण कार्यं कृ ।
धमधमाना, क्रि. अ. (अनु.) धमधमायते (ना. धा.), धमधमशब्दं जन् (प्रे.) ।
धमनी, सं. स्त्री. (सं.) धमनिः (स्त्री.), रक्तवाहिनी नाडी ।
धमाका, सं. पुं. (अनु.) भुंशुंडथादिशब्दः, महाशब्दः, धमिति ध्वनिः (पुं.) २. पतन-कूर्दन,-शब्दः ।
धमाचौकड़ी, सं. स्त्री. (अनु. धम+हिं. चौकड़ी) कलकलः, कोलाहलः, तुमुलः-लं, डमरः, संक्षोभः, विप्लवः ।
धमाधम, क्रि. वि. (अनु. धम) सधमधमशब्दम् ।
सं. स्त्री., धमधमध्वनिः (पुं.) २. आघात-प्रतिघातौ, उपद्रवः, उत्पातः ।
धर, वि. (सं.) धारक, धारिन्, धर्तृ, ग्रहीतृ । (प्रायः समासांत में, उ. चक्रधर इ.) ।
धरणि-णी, सं. स्त्री. (सं.) धरा, भूमिः (स्त्री.) दे. 'पृथिवी' ।
—धर, सं. पुं. (सं.) पर्वतः २. कच्छपः ३. शेषनागः ४. विष्णुः (पुं.) ५. शिवः ।
—सुता, सं. स्त्री. (सं.) सीता, जानकी ।
धरती, सं. स्त्री. (सं. धरित्री) दे. 'धरणि' ।
धरना, क्रि. स. (सं. धरणं) आ-नि-धा (जु. उ. अ.), स्था (प्रे.), न्यस् (दि. प. से.), नि-क्षिप् (तु.प.अ.), आ-रुह् (प्रे.आरोपयति), धृ (चु.) २. ग्रह् (क्र्. प. से.), (हस्तेन) अव-लम्ब् (भ्वा. आ. से.)-धृ ३. परिधा (जु. उ. अ.), वस् (अ. आ. से.) । सं. पुं., धरणं, आ-नि,-धानं-न्यसनं २. ग्रहणं ३. परिधानं ४. साम्यं उपवेशः स्थानं वा ।

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

—देना, मु., (उद्देश्यसिद्धये) साग्रहं स्थाः (भ्वा. प. अ.)।
धरवाना, क्रि. प्रे., व. 'धरना' के प्रे. रूप।
धरहरा, सं. पुं. (हिं. धुर+घर) ससोपानं गृहशिखरं २. अंतः-सोपानः स्तम्भः।
धरा, सं. स्त्री. (सं.) भूः-भूमिः (स्त्री.)।
—तल, सं. पुं. (सं. न.) भूतलं, पृथिवीतलं २. भूमिः (स्त्री.)।
—धर, सं. पुं. (सं.) दे. 'धरणीधर'।
धराऊ, वि. (हिं. धरना) महार्घं, बहुमूल्य २. विशिष्ट, उत्कृष्ट।
धरात्मज, सं. पुं. (सं.) मंगलग्रहः २. नरकासुरः।
धराधिप, सं. पुं. (सं.) धरा,-अधिपतिः-अधीशः, नृपः।
धरामर, सं. पुं. (सं.) विप्रः, ब्राह्मणः, भूसुरः।
धरित्री, सं. स्त्री. (सं.) पृथिवी, दे.।
धरोहर, सं. स्त्री. (हिं. धरना) निक्षेपः, न्यासः, दे. 'अमानत'।
धर्ता, सं. पुं. (सं. धर्तृ) धारकः, धारयितृ २. ग्राहकः।
धर्म, सं. पुं. (सं.) अभ्युदयनिःश्रेयससाधको गुणकर्मसमूहः (अहिंसा, सत्य, अग्निहोत्रादि) २. ईश्वर,-निष्ठा-सेवा-भक्तिः (स्त्री.), आस्तिक्य-बुद्धिः (स्त्री.) ३. पुण्यं, परोपकारः ४. सदाचारः, साधुता, सुकृतं, सत्कर्मन् (न.) ५. नयः, न्यायः, नीतिः (स्त्री.), न्यायिता, ऋजुता ६. पक्षपातराहित्यं, समदर्शित्वं ७. श्रद्धा, भक्तिः, निष्ठा ८. मतं, सम्प्रदायः, पथिन् (पुं.) ९. शास्त्रविहित,-कर्तव्यं-कृत्यं १०. आचारः, व्यवहारः ११. रीतिः-रूढिः (स्त्री.) १२. प्रकृतिः (स्त्री.), स्वभावः, नित्यगुणः १३. विधिः (पुं.), व्यवस्था, राजाज्ञा, कार्याकार्य-नियमः।
—अध्यक्ष, सं. पुं. (सं.) प्राड्विवाकः, अक्षदर्शकः, धर्माधिकरणिन्, न्यायाधीशः, धर्माधिकारिन्।
—अनुसार, क्रि. वि. (सं.-रं) यथाधर्मं, धर्मोत्तरीत्या, धर्मपूर्वकम्।
—अर्थ, क्रि. वि, (सं.-र्थं) धर्माय, पुण्याय।
प्रतिभाशाली, वि. (.सं.-लिन्) प्रतिभावत्, प्रतिभान्वित, सप्रतिभ २. धीमत्, बुद्धिमत् ।

प्रतिभू, सं. पुं. (सं.) लग्नकः, दे. 'जामिन' ।

प्रतिभा, सं. स्त्री. (सं.) अनुकृतिः-मूर्तिः (स्त्री.), चित्रं, प्रति,-कृतिः(स्त्री.)-मानं-रूपं-च्छन्दकं २. प्रति,-बिंबं-च्छाया ३. माङः, मात्रं, तोल-भार,-मानं ४. अलंकारभेदः (सा.) ।

प्रतियोगिता, सं. स्त्री. (सं.) प्रतिद्वंद्विता, प्रतिस्पर्द्धा, अहमहमिका, विजिगीषा २.विरोधः, शत्रुता ।

प्रतियोगी, सं. पुं. (सं.-गिन्) प्रतिद्वंद्विन्, प्रतिस्पर्द्धिन्, विजिगीषुः २. शत्रुः, वैरिन् ३. सहायकः ३. अंशिन्, अंशभाज् ।

प्रतिरूप, सं. पुं. (सं. न.) मूर्तिः (स्त्री.), प्रतिमा २. चित्रं, आलेख्यं ३. प्रतिनिधिः ।

प्रतिरोध, सं. पुं. (सं.) विरोधः, प्रातिकूल्यं, वैपरीत्यं २. बाधः-धा, व्याघातः, प्रतिबंधः ।

प्रतिलिपि, सं. स्त्री. (सं.) अनुलिपिः (स्त्री.), प्रतिलेखः ।

प्रतिलोम, वि. (सं.) प्रतिकूल, विपरीत, विरुद्ध २. तुच्छ, नीच ३. विलोम, विपर्यस्त, व्यत्यस्त ।

प्रतिलोमज, सं. पुं. (सं.) वर्णसंकरः २. उत्तमवर्णायां नार्यां अधमवर्णात् पुरुषात् जातः ।

प्रतिवचन, सं. पुं. (सं. न.) उत्तरं, प्रतिवचस (न.) २. प्रतिध्वनिः ।

प्रतिवत्सर, अव्य. (सं.) प्रति-अनु,-वर्षं-वत्सरं-अब्दं, वर्षे-वर्षे, वत्सरे-वत्सरे ।

प्रतिवनिता, सं. स्त्री. (सं.) सपत्नी, सभार्या, समानपतिका ।

प्रतिवस्तु, सं. स्त्री. (सं.) सदृश-समान-तुल्य,-वस्तु (न.), पदार्थः २. प्रतिदत्तपदार्थः ३. उपमानम् ।

प्रतिवस्तूपमा, सं. स्त्री. (सं.) अर्थालंकारभेदः ।

प्रतिवाद, सं. पुं. (सं.) प्रत्याख्यानं, निराकरणं, निरासः, दे. 'खंडन' २. विवादः ३. उत्तरम् ।

प्रतिवादी, सं. पुं. (सं.-दिन्) प्रत्यर्थिन्, अभियुक्तः २. विपक्षिन्, प्रतिपक्षिन्, प्रत्याख्यातृ ।

प्रतिवासी, सं. पुं. (सं. सिन्) दे. 'पड़ोसी' ।

प्रतिवेशी, सं. पुं. (सं-शिन्) दे. 'पड़ोसी' ।

प्रतिशोध, सं. पुं. (सं.>) निर्यातनं, प्रति,-अपकारः-द्रोहः ।

प्रतिश्याय, सं. पुं. (सं.) दे. 'जुकाम' २. पीनसरोगः ।

प्रतिषिद्ध, वि. (सं.) दे. 'निषिद्ध' ।

प्रतिषेध, सं. पुं. (सं.) दे. 'निषेध' २. खंडनं, निरसनं ३. अर्थालंकारभेदः (सा.) ।

प्रतिष्ठा, सं. स्त्री. (सं.) संस्कारः, अर्हणा, सं-,मानः, आदरः, गौरवं २. यशस् (न.), कीर्तिः-विख्यातिः-प्रसिद्धिः (स्त्री.) ३. स्थापनं-ना, निधानम् ।

प्रतिष्ठित, वि. (सं.) सत्कृत, सं-,मानित, अभ्यर्चित २. विश्रुत, प्रसिद्ध, विख्यात २.स्थापित, प्रतिष्ठापित ।

प्रतिस्पर्द्धा, सं. स्त्री. (सं.) प्रत्यर्थिता, प्रतिद्वंद्विता, विजिगीषा, अहमहमिका २. कलहः ।

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

प्रतिस्पर्द्धी, सं. पुं. (सं.-र्द्धिन्) प्रत्यर्थिन्, प्रति द्वंद्विन्, विजिगीषुः।

प्रतिहत, वि. (सं.) अव-प्रति,-रुद्ध, प्रतिबाधित २. पराणुन्न, परावर्तित ३. अपास्त, क्षिप्त ४. पतित ५. निराश ६. पराजित, परास्त।

प्रति(ती)हार, सं. पुं. (सं.) द्वार् (स्त्री.), द्वारं २. द्वारपालः, द्वाःस्थः।

प्रति(ती)हारी, सं. पुं. (सं.-रिन्) द्वारपालः, द्वाःस्थः, दौवारिकः। सं. स्त्री. (सं.) द्वार-पालिका।

प्रतिहिंसा, सं. स्त्री. (सं.) प्रत्यपकारः, प्रत्यप-क्रिया, प्रतिद्रोहः, प्रति-,निर्यातनम्।

प्रतीक, सं. पुं. (सं. न.) प्रतिमा, मूर्तिः २. मुखं, आननं ३. अग्रं, अग्रभागः ४. श्लोकादेः प्रथमशब्दः ५. अंगं, अवयवः ६. चिह्नं, लक्षणं ७. आकारः, रूपं ८. प्रतिरूपं, स्थानापन्न-वस्तु (न.)।

प्रतीकार, सं. पुं. (सं.) दे. 'प्रतिकार'।

प्रतीक्षा, सं. स्त्री. (सं.) प्रतीक्षणं, उदीक्षा, प्रत्याशा, अपेक्षा।

—**करना**, क्रि. अ., अप-उद्-प्रति-ईक्ष् (भ्वा. आ. से.), अनु-प्रति-पा (प्रे. पालयति)।

प्रतीची, सं. स्त्री. (सं.) दे. 'पश्चिम'।

प्रतीत, वि. (सं.) ज्ञात, विदित, अवगत, बुद्ध २. प्रसिद्ध ३. प्रसन्न।

—**होना**, क्रि. अ., ज्ञा-अवगम्-बुध्-प्रती (=प्रति-इ) (सब कर्म.)।

प्रतीति, सं. स्त्री. (सं.) ज्ञानं, बोधः, अवगमः २. ख्यातिः (स्त्री.) ३. विश्वासः ४. आनंदः ५. आदरः।

प्रतीप, वि. (सं.) विरुद्ध, विपरीत, प्रतिकूल।

प्रतीहार, सं. पुं. (सं.) दे. 'प्रतिहार'।

प्रत्यंचा, सं. स्त्री. (सं.) मौर्वी, शिंजिनी, ज्या, धनुर्गुणः।

प्रत्यक्ष, वि. (सं.) दृश्य, दृग्गोचर, पुरःस्थित २. इन्द्रियग्राह्य, इन्द्रियगोचर, ऐन्द्रियक ३. प्रकट, स्पष्ट। सं. पुं. (सं. न.) प्रमाणभेदः (न्याय.), अनुभवभेदः। क्रि. वि., नयनयोः पुरतः २. स्पष्टं. व्यक्तम्।

—**दर्शी**, सं. पुं. (सं.-र्शिन्) (प्रत्यक्ष-) साक्षिन् (

—**प्रमाण**, सं. पुं. (सं. न.) प्रमाणभेदः (न्या.)।

प्रत्यय, सं. पुं. (सं.) विश्वासः, विश्रंभः २. शब्दांत्यभागः, प्रकृत्युत्तरं जायमानः आगमः (सुप् तिङ् आदि, व्या.) ३. प्रमाणं, साधनं ४. ज्ञानं ५. विचारः ६. व्याख्या ७. कारणं ८. आवश्यकता ९. प्रसिद्धिः (स्त्री.) १०. चिह्नं ११. निर्णयः १२. सम्मतिः (स्त्री.) १३. सहायकः १४. स्वादः।

प्रत्याख्यान, सं. पुं. (सं. न.) निराकरणं, निरसनं, खंडनम्।

प्रत्याशा, सं. स्त्री. (सं.) आशा, आशंसा, आकांक्षा २. उदीक्षा, प्रतीक्षा, अपेक्षा।

प्रत्याशी, वि. (सं.-शिन्) परीक्षार्थिन् २. पदान्वेषिन् ३. आशावत्, आशान्वित।

प्रत्याहार, सं. पुं. (सं.) प्रत्याहरणं, उपादानं, इन्द्रियनिग्रहः २. अल्पेन बहूनां ग्रहणं (उ. अच्=सब स्वरवर्ण, व्या.) (

प्रत्युक्ति, सं. स्त्री. (सं.) उत्तरं, प्रतिवचनम्।

प्रत्युत, अव्य. (सं.) दे. 'बल्कि'।

प्रत्युत्तर, सं. पुं. (सं. न.) उत्तरस्योत्तरं, उत्तरप्रतिवचनम्।

प्रत्युत्थान, सं. पुं. (सं. न.) स्वागतार्थं उत्थानं-अभ्युत्थानम् २. शत्रुसाम्मुख्यार्थम् उत्थितिः (स्त्री.) ३. कार्यविशेषाय सज्जी भू, सन्नह् (दि. उ. अ.)।

प्रत्युत्पन्न, वि. (सं.) पुनरुत्पन्न २. स्वावसरे उत्पन्न।

—**मति**, वि. (सं.) तत्कालधी, कुशाग्रीय-मति, सूक्ष्मदर्शिन् २. प्रतिभान्वित। सं. स्त्री. (सं.) तत्कालधीः (स्त्री.), कुशाग्रबुद्धिः (स्त्री.) २. प्रतिभा।

प्रत्युद्गमन, सं. पुं. (सं. न.) प्रत्युत्थानं, प्रत्युद्गमः।

प्रत्युपकार, सं. पुं. (सं.) प्रति,-उपकृतिः (स्त्री.)-साहाय्यम्।

प्रत्येक, वि. (सं.) एकैक, सर्व, सकल।

प्रथन, सं. पुं. (सं. न.) विस्तारः, विततिः-व्याप्तिः (स्त्री.) २. यशः-प्रसरणं-प्रसारणम् ३. क्षेपणम् ४. प्रदर्शनम्।

प्रथम, वि. (सं.) आद्य, आदिम, अग्रिम २. श्रेष्ठ, उत्तम ३. प्रधान, मुख्य। क्रि. वि. (सं. न.) अग्रे, आदौ, पूर्वं, प्रथमतः।

—**कल्प**, सं. पुं. (सं.) सर्वोत्तम-,उपायः-युक्तिः (स्त्री.) २. मुख्यनियमः।

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

—पुरुष, सं. पुं. (सं.) अन्यपुरुषः (व्या०)।
—वय, स. पुं. (सं.-यस् न.) यौवनं, तारुण्यम्, नववयस् (न.)।
प्रथमा, सं. स्त्री. (सं.) विभक्तिविशेषः (व्या.) २. मदिरा।
प्रथा, सं. स्त्री. (सं.) रीतिः-रूढिः (स्त्री.), अनुसारः, आचारः, व्यवहारः २. दे. 'प्रसिद्धि'।
प्रथित, वि. (सं.) दे. 'प्रसिद्ध'।
प्रदक्षिणा, सं. स्त्री. (सं.) प्रदक्षिणः-णं, परिक्रमः।
प्रदत्त, वि. (सं.) अर्पित, विश्राणित, उत्-वि,-सृष्ट, संक्रामित।
प्रदर, सं. पुं. (सं.) नारीरोगभेदः, असृग्दरः (द्वौ भेदौ—श्वेतप्रदरः, रक्तप्रदरः)।
प्रदर्शक, सं. पुं. (सं.) प्र-,दर्शयितृ, दर्शनकारयितृ २. दर्शकः, द्रष्टृ, प्रेक्षकः ३. गुरुः।
प्रदर्शन, सं. पुं. (सं. न.) प्रकटनं, प्रकाशनं, व्यंजनं, विजृम्भणं, प्रकटी-आविष्-करणं २. दे. 'नुमाइश'।
प्रदर्शनी, सं. स्त्री. (सं.) दे. 'नुमाइश'।
प्रदर्शित, वि. (सं.) प्रकटीकृत, प्रकटित, प्रकाशित।
प्रदान, सं. पुं. (सं. न.) दानं, विश्राणनं, अर्पणं, संक्रामणं २. विवाहः।
प्रदिशा, सं. स्त्री. (सं.) प्रदिश्-विदिश् (स्त्री.) विदिशा, दिक्कोणः।
प्रदीप, सं. पुं. (सं.) दीपः, कज्जलध्वजः, नयनोत्सवः दीपास्यः २. प्रकाशः।
प्रदीपन, सं. पुं. (सं. न.) उद्-सं,-दीपनं, प्रज्वलनं २. प्र-,द्योतनं, प्रकाशनं, ३. उत्तेजनं, प्रोत्साहनम्।
प्रदीप्त, वि. (सं.) प्रज्वलित, उद्-सं,-दीप्त, समिद्ध २. प्रकाशित, प्रकाशमान ३. उज्ज्वल, भासुर।
प्रदेश, सं. पुं. (सं.) चक्रं, मंडलं, प्रांतः, देशविभागः, भूभागः २. स्थानं, स्थलं ३. अंगं, अवयवः।
प्रदोष, सं. पुं. (सं.) संध्यासमयः, संध्या, सायंकालः, दिनावसानं, रजनीमुखं २. संध्यांधकारः।
प्रधान, वि. (सं.) मुख्य, श्रेष्ठ, अग्र्य, अग्रिम, परम, उत्तम, प्रमुख, विशिष्ट। सं. पुं., नेतृ, नायकः, पुरोगः, अग्रणीः २. मंत्रिन्, सचिवः ३. प्रकृतिः (स्त्री.), जगतः उपादानकारणं, प्रधानं ४. सभा,-पतिः-अध्यक्षः ५. ईश्वरः।
—मंत्री, सं. पुं. (सं.-त्रिन्) महामंत्रिन्, प्रधान,-अमात्यः-सचिवः।
प्रधानता, सं. स्त्री. (सं.) उत्तमता, श्रेष्ठता, मुख्यता २. नेतृत्वं, नायकत्वं ३. अध्यक्षता, सभापतित्वं ४. मंत्रिपदं, मंत्रित्वम्।
प्रध्वंस, सं. पुं. (सं.) वि-,नाशः, प्रणाशः, विध्वंसः, उच्छेदः संहारः।
प्रपंच, सं. पुं. (सं.) सृष्टिः (स्त्री.), संसारः, जगज्जालं २. विस्तरः, विस्तारः, ३. छलं, आडंबरः, कपटं ४. दे. 'बखेड़ा'।
प्रपंची, वि. (सं.-ञ्चिन्) कापटिक, मायाविन्, छलिन् २. चतुर, धूर्त ३. कलहप्रियः।
प्रपन्न, वि. (सं.) प्राप्त, आगत २. शरणागत।
प्रपात, सं. पुं. (सं.) दे. 'झरना' २. अतट., भृगुः, निरवलंबः पर्वतादिपार्श्वः ३. अव,-पातः-पतनम्।
प्रपितामह, सं. पुं. (सं.) दे. 'पड़दादा'।
प्रपितामही, सं. स्त्री. (सं.) दे. 'पड़दादी'।
प्रपौत्र, सं. पुं. (सं.) दे. 'परपोता'।
प्रपौत्री, सं. स्त्री. (सं.) दे. 'परपोती'।
प्रफुल्ल, वि. (स.) विकसित, स्फुटित, उत्-सं,-फुल्ल, प्रबुद्ध, भिन्न, विकच २. कुसुमित, पुष्पित ३. उन्मीलित, उन्मिषित (नेत्र) ४. स्मित, आनंदित।
—नयन, वि. (सं.) विकचनेत्र [-त्रा,-त्री (स्त्री.)]।
—वदन, वि. (सं.) स्मितानन, प्रसन्नमुख [-नी (स्त्री.) = स्मिताननी-नी, प्रसन्नमुखा स्त्री.]।
प्रफुल्लित, वि. (सं.) दे. 'प्रफुल्ल'।
प्रबंध, सं. पुं. (सं.) संविधा, उपायः, आयोजनं, प्रयोगः, युक्तिः (स्त्री.) २. अवेक्षा-क्षणं, निर्वाहः-हणं, प्रवर्तनं, अधिष्ठानं, व्यवस्थापनं, चालनं, व्यवस्था ३. निबंधः, लेखः, प्रस्तावः ४. महाकाव्यं, संग्रथितकविता।
—कर्ता, सं. पुं. (सं.-र्तृ) प्रबंधकः, आयोजकः, व्यवस्थापकः, निर्वाहकः, चालकः, अध्यक्षः, अधिष्ठातृ, अवेक्षकः।

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

—कल्पना, सं. स्त्री. (सं.) स्तोकसत्या कल्पनाबहुला कथा ।
—कारिणी, सं. स्त्री. (सं.) प्रबन्ध-व्यवस्था,-कर्त्री समितिः (स्त्री.) ।
—काव्य, सं. पुं. (सं. न.) क्रमबद्धकाव्यम्, श्रव्यकाव्यभेदः (सा०) ।
प्रबंधक, सं. पुं. (सं.) दे. 'प्रबंधकर्ता' ।
प्रबल, वि. (सं.) बलवत्, सबल, बलिन्, शक्तिमत्, ऊर्जस्विन्, प्रभविष्णु २. उग्र, घोर, तीव्र, प्र-,चंड ।
प्रबुद्ध, वि. (सं.) जागरित, उन्निद्र, जाग्रत् (शब्दांत) २. विकसित ३. ज्ञानिन् ।
प्रबोध, सं. पुं. (सं.) जागरणं, प्रबोधनं, निद्रा,-भंगः-त्यागः २. यथार्थ-पूर्ण,-ज्ञानं ३.सांत्वनं-ना ४. विकासः ५. पूर्वनिवेदनं ६. चेतनालाभः, मूर्च्छाभंगः ।
प्रबोधन, सं. पुं. (सं. न.) (निद्रातः) उत्थानं, निद्राभंजनं २. जागरणं ३. उद्बोधः, उपदेशः, ज्ञापनं ४. सांत्वनम् ।
प्रभंजन, सं. पुं. (सं.) वायुः, पवनः २.वात्या, झंझावातः, प्रकंपनः । (सं. न.) उत्पाटनं, उन्मूलनं, वि-, नाशनम् ।
प्रभव, सं. पुं. (सं.) जन्महेतुः (पुं.) उत्पत्ति-कारणं २.उत्पत्तिस्थानं, आकरः ३. सृष्टिः(स्त्री.) ४. (नद्यादीनां) उद्गमः, उद्भवः, मूलम् ।
प्रभा, सं. स्त्री. (सं.) दीप्तिः-द्युतिः-कांतिः-रुचिः-शोचिः (स्त्री.), आभा, विभा, प्रकाशः, त्विषा ।
—कीट, सं. पुं. (सं.) खद्योतः, दे. 'जुगनू' ।
प्रभाकर, सं. पुं. (सं.) दिवाकरः, दे. 'सूर्य' ।
प्रभात, सं. पुं. (सं. न.) विभातं, प्रातःकालः, उषा, ऊषा, उषः, ऊषः, अहर्मुखं, क(का)ल्यं, व्युष्टं, प्रत्यु(त्यू)षः-षं, अरुणोदयः, विहानः-नं, उषस् (स्त्री.) ।
प्रभाव, सं. पुं. (सं.)सामर्थ्यं,शक्तिः (स्त्री.), बलं २. माहात्म्यं, महत्त्वं ३. वशः-शं, प्राबल्यं ४. परिणामः, फलम् ।
प्रभु, सं. पुं. (सं.) जगदीशः, परमेश्वरः २. स्वामिन्, भर्तृ ३. अधिपतिः, नायकः ३. श्रेष्ठजनोपाधिः ।
—भक्त, वि. (सं.) स्वामिभक्त, कर्तव्यपर, सत्सेवक २. प्रभूपासक, भगवद्भक्त ।
प्रभुता, सं. स्त्री. (सं.) महत्त्वं, माहात्म्यं २. शासकता, अधिकारित्वं ३. वैभवं ४. स्वामित्वं, प्रभुत्वम् ।
प्रभूत, वि. (सं.) दे. 'प्रचुर' २. उत्पन्न, उद्भूत, उद्गत ।
प्रभृति, क्रि. वि. (सं.) तदारभ्य, ततोऽनन्तरं, आदि,-इत्यादि । सं. स्त्री., आरंभः ।
प्रभेद, सं. पुं. (सं.) प्रकारः, वर्गः, जातिः (स्त्री.) २. अंतरं, भेदः, भिदा ।
प्रमत्त, वि. (सं.) उन्मद, मदोन्मत्त, मत्त, क्षीब २. उन्मत्त, वातुल, उन्मादिन् ।
प्रमथन, सं. पुं. (सं. न.) विलोडनं २. क्लेशनं ३. हननम् ।
प्रमद, सं. पुं. (सं.) आनंदः, हर्षः २. क्षीबता । वि., क्षीब ।
प्रमदा, सं.स्त्री.(सं.) सुंदरी, उत्तमयोषित् (स्त्री.)।
प्रमा, सं. स्त्री. (सं.) यथार्थज्ञानं, शुद्धबोधः २. दे. 'माप' ।
प्रमाण, सं. पुं. (सं. न.) निदर्शनं, साधनं, उपपत्तिः (स्त्री.) मुख्यहेतुः २. साक्ष्यं, प्रामाण्यं ३. सत्यता ४. इयत्ता, निर्दिष्टपरिमाणं ५. शास्त्रम् । वि.,सत्य, सिद्ध २. मान्य, स्वीकार्य ।
—पत्र, सं. पुं. (सं. न.) आगम-निर्णय-निदर्शन,-पत्रम् ।
प्रमाणित, वि. (सं.) साधित, उपपादित, स्थापित, प्रमाणी-सत्या,-कृत, सत्यापित ।
प्रमाता, सं. पुं. (सं.-तृ) प्रमाणैःज्ञातृ-बोद्धृ ।
प्रमातामह, सं. पुं. (सं.) मातामहपितृ ।
प्रमातामही, सं. स्त्री. (सं.) प्रमातामहपत्नी ।
प्रमाद, सं. पुं. (सं.) अनवधानं-नता, उपेक्षा, सावधानताऽभावः २. भ्रांतिः-भ्रुटिः (स्त्री.), भ्रमः ।
—करना, क्रि. अ., प्रमद् (दि. प. से.), प्रमादं कृ ।
प्रमादिका, सं. स्त्री. (सं.) क्षतयोनिकन्या २. प्रमादिनी नारी ।
प्रमादी, वि. (सं.-दिन्) अनवधान, प्रमत्त, अनवहित ।
प्रमापण, सं. पुं. (सं. न.) वधः, हत्या, हननम् ।
प्रमित, वि. (सं.) (यथार्थ) ज्ञात, अवगत २. परिमित, स्तोक ३. प्रमाणित ।
प्रमिति, सं. स्त्री. (सं.) प्रमा, प्रमाणैः प्राप्तं सत्यज्ञानम् २. मानं, परिमाणम् ।

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

प्रमुख, वि. (सं.) प्रधान, श्रेष्ठ, मुख्य २. प्रथम, आदिम ३. प्रतिष्ठित, मान्य ।

प्रमुदित, वि. (सं.) प्रहृष्ट, प्रसन्न, आनंदित ।

प्रमेह, सं. पुं. (सं.) मेहः, मूत्रदोषः, बहुमूत्रता ।

प्रमोद, सं. पुं. (सं.) हर्षः, आनंदः, प्रसन्नता २. सुखम् ।

प्रयत्न, सं. पुं. (सं.) उद्यमः, अध्यवसायः, आयासः, चेष्टा, चेष्टितं २. जीवव्यापारः(न्या.)। —शील, वि. (सं.) प्रयत्नवत्, सयत्न, उद्यमिन्, अध्यवसायिन्, सचेष्ट ।

प्रयाग, सं. पुं. (सं.) तीर्थविशेषः २. महायज्ञः ।

प्रयाण, सं. पुं. (सं. न.) प्रस्थानं, गमनं, व्रज्या, यात्रा २. युद्धयात्रा । —काल, सं.पुं.(सं.)गमनकालः २. मृत्युसमयः ।

प्रयास, सं. पुं. (सं.) उद्योगः, प्र,-यत्नः, परि-,श्रमः ।

प्रयुक्त, वि. (सं.) व्यवहृत, व्यापृत, उपयुक्त, सेवित, उपभुक्त ।

प्रयोग, सं. पुं. (सं.) उपयोगः, उपभोगः, सेवनं, व्यवहारः २. अनुष्ठानं, साधनं ३. प्रक्रिया, विधानं ४. तांत्रिकोपचारः ५.अभिनयः ६. कुसीदाय ऋणदानम् । —करना, उप-प्र-युज् (रु. आ. अ.), व्यापृ (प्रे.), सेव् (भ्वा. आ. से.), उपभुज् (रु. आ. अ.) ।

प्रयोजक, सं. पुं. (सं.) अनुष्ठातृ, उपयोक्तृ २. प्रेरकः ३. व्यवस्थापकः ।

प्रयोजन, सं. पुं. (सं. न.) अर्थः, कार्यं २. उद्देश्यं, अभिप्रायः, आशयः ।

प्रलयंकर, वि. (सं.) प्रलय-विनाश-संहार,-कर-कारिन् ।

प्रलय, सं. पुं. (सं.) कल्पांतः, प्रतिसंचयः, ब्रह्मांडनाशः, विलयः, संक्षयः ।

प्रलाप, सं. पुं. (सं.) निरर्थकवचनानि (बहु.), प्र-, जल्पः-ल्पनम् ।

प्रलोभन, सं. पुं. (सं. न.) विलोभनं, लोभेन प्रवर्तनं २. प्रलोभकपदार्थः, विकारहेतुः ।

प्रवंचना, सं. स्त्री. (सं.) धूर्तता, कैतवं,छलम् ।

प्रवचन, सं. पुं. (सं. न.) व्याख्यानं, विवरणं, प्रकाशनं, स्पष्टीकरणं २. व्याख्या ३. वेदांगम् ।

प्रवर, वि. (सं.) श्रेष्ठ, प्रधान, मुख्य (सं. न.) गोत्रम् । (सं. पुं.) संततिः (स्त्री.) २. गोत्रप्रवर्तकमुनिव्यावर्तको मुनिगणः ।

प्रवर्तक, सं. पुं, (सं.) आरम्भकः, संस्थापकः, प्रवर्तयितृ २. संचालकः, निर्वाहकः ३. प्रेरकः, नियोजकः ४. उत्तेजकः ५. आविष्कारकः ।

प्रवर्तन, सं. पुं. (सं. न.) कार्योपक्रमणं, २. कार्य,-संचालनं-निर्वहणं ३. प्रचारणं ४. उत्तेजनम् ।

प्रवाद, सं. पुं. (सं.) जनश्रुतिः (स्त्री.), किंवदंती, लोक,-वादः-वार्त्ता २. अपवादः, मिथ्याकलंकः ।

प्रवाल, सं. पुं. (सं. पुं. न.) विद्रुमः २. किश-(स)लयः ३. वीणादण्डः ।

प्रवास, सं. पुं. (सं.) विदेशवासः २. विदेशः ।

प्रवासी, वि. (सं.-सिन्) प्रोषित, विदेशस्थ, विदेशवासिन् ।

प्रवाह, सं. न. (सं.) स्रवः, स्रवणं, स्रुतिः (स्त्री.), स्रावः २. (जल-) धारा, वेगः, ओघः, स्रोतस् (न.) ३. कार्यनिर्वाहः ४. व्यवहारः ५. प्रवृत्तिः (स्त्री.) ६. क्रमः, सततगतिः (स्त्री.) ।

प्रविष्ट, वि. (सं.) कृतप्रवेश, अन्तर्गत ।

प्रवीण, वि. (सं.) निपुण, कुशल, दक्ष, पटु, चतुर, निष्णात, विज्ञ २. वीणावादनकुशल ।

प्रवीणता, सं. स्त्री. (सं.) नैपुण्यं, दाक्ष्यं, कौशलं, पाटवं, चातुर्यम् ।

प्रवृत्त, वि. (सं.) रत, मग्न, -पर, -परायण २. उद्यत ३. नियुक्त । —करना, क्रि. स., प्रवृत् (प्रे.), नि-उद्-युज् (रु.) प्रवणी कृ, प्रेर् (प्रे.) । —होना, क्रि. अ., प्रवृत् (भ्वा. आ. से.), रत मग्न-तत्पर (वि.) भू ।

प्रवृत्ति, सं. स्त्री. (सं.) रुचिः (स्त्री.), छंदः, अभिलाषः, भावः २. वृत्तांतः ३. कार्यनिर्वाहः ४. विषयासंगः ५. उत्पत्तिः (स्त्री.) ।

प्रवेश, सं. पुं. (सं.) अन्तर्,-विगाहनं-गमनं २. गतिः (स्त्री.), उपगमः ३. बोधः, ज्ञानं, परिचयः । —पत्र, सं. पुं. (सं. न.) प्रविष्टि,-पंत्रं-पत्रकम् । —शुल्क, सं. पुं. (सं.) प्रविष्टि,-शुल्कः-कम् ।

प्रवेशिका, सं. स्त्री. (सं.) परीक्षाभेदः २. प्रवेष्ट्री ।

प्रव्रजित, वि. (सं.) सन्न्यासिन्, चतुर्थाश्रमिन्, परिव्राजक-

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

प्रव्रज्या, सं. स्त्री. (सं.) *सन्न्यासः, वैराग्यम्, चतुर्थाश्रमः।

प्रशंसक, सं. पुं. (सं.) स्तोतृ, स्तावकः, नावकः, श्लाघकः २. चाटुकारः।

प्रशंसनीय, वि. (सं.) प्रशंस्य, श्लाघ्य, स्तुत्य, नुत्य. प्रशंसार्ह।

प्रशंसा, सं. स्त्री. (सं.) श्लाघा, स्तुतिः-नुतिः-नुः (स्त्री.), स्तवः, कीर्तनं, ईडा।

—**करना**, क्रि. स., प्रशंस् (भ्वा. प. से.); श्लाघ् (भ्वा. आ. से.), नु (अ. प. से.), स्तु (अ. प. अ.); ईड् (अ. आ. से.)।

—**होना**, क्रि. अ., प्रशंस-स्तु-नु श्लाघ् (कर्म.)।

प्रशंसित, वि. (सं.) दे. 'प्रशस्त'।

प्रशमन, सं. पुं. (सं. न.) शमनं, शांतिः (स्त्री.) २. नाशनं ३. मारणं ४. वशीकरणम्।

प्रशस्त, वि. (सं.) नुत, नून, स्तुत, श्लाघित, प्रशंसित २. दे. 'प्रशंसनीय' ३. उत्तम, श्रेष्ठ।

—**पाद**, सं. पुं. (सं.) दर्शनाचार्यविशेषः।

प्रशस्ति, सं. स्त्री. (सं.) दे. 'प्रशंसा' २. पत्रारंभे प्रशंसावाक्यं ३. राज्ञां कीर्तिलेखः ४. प्राचीन-ग्रन्थानां लेखकादिपरिचायकानि आद्यंत-वाक्यानि।

प्रशस्य, वि. (सं.) दे. 'प्रशंसनीय' २. उत्तम।

प्रशांत, वि. (सं.) स्थिर, क्षोभहीन, निश्चल, स्तिमित, निष्कंप २. शांतचित्त, क्षोभ, उद्वेग-शून्य।

प्रशाखा, सं. स्त्री. (सं.) लघु-तनु,-शाखा, प्रशाखिका।

प्रश्न, सं. पुं. (सं.) पृच्छा, अनुयोगः, २. विकल्प-विवाद-जिज्ञासा,-विषयः।

—**उत्तर**, सं. पुं. (सं. रं-रे) अनुयोगप्रतिवचनं-ने (द्वि.), संवादः।

—**करना**, या **पूछना**, क्रि. स., प्रश्नं प्रच्छ् (तु. प. अ.), प्रश्नयति (ना. धा.), अनुयुज् (रु. आ. अ.)।

प्रश्वास, सं. पुं. (सं.) उच्छ्वासः २. उच्छ्वसनम्।

प्रष्टव्य, वि. (सं.) प्रश्नार्ह २. पृच्छाविषयः।

प्रसंग, सं. पुं. (सं.) विषयानुक्रमः, प्रकरणं, अर्थसंगतिः (स्त्री.) २. मैथुनं ३. संबंधः, संगतिः (स्त्री.) ४. अनुरक्तिः (स्त्री.) ५. वार्ता, विषयः ६. सदवसरः ७. विस्तारः।

प्रसक्त, वि. (सं.) संलग्न, संश्लिष्ट २. आसक्त ३. प्रस्तावित।

प्रसन्न, वि. (सं.) सं-,तुष्ट, प्र-,हृष्ट, सानंद, आनंदित, प्र-,मुदित, प्रफुल्ल २. निर्मल।

—**करना**, क्रि. स., आनंद्-आह्लाद्-तुष्-प्रसद्-प्रमुद्-प्रहृष् (प्रे.)।

—**होना**, क्रि. अ., प्रसद् (भ्वा. प. अ.), आह्लाद्-प्रमुद् (भ्वा. आ. से.), प्र-,हृष् (दि. प. से.)।

प्रसन्नता, सं. स्त्री. (सं.) आनंदः, आह्लादः, प्र-,हर्षः,सं.-तोषः, प्र-,मोदः,उल्लासः २.अनुग्रहः ३. स्वच्छता।

प्रसव, सं. पुं. (सं.) जननं, प्रसूतिः (स्त्री.), गर्भमोचनं २. जन्मन् (न.), उत्पत्तिः (स्त्री.) ३. संतानः ४. फलं ५. कुसुमम्।

प्रसविनी, वि. (स्त्री.) उत्पादयित्री, जनयित्री, प्रसवित्री।

प्रसाद, सं. पुं. (सं.) कृपा, दया., अनुग्रहः २. प्रसन्नता ३. स्वच्छता ४. काव्यगुणविशेषः (सा.) ५. देवाद्यवशिष्टपदार्थः, शेषः ६. भोजनं ७. नैवेद्यं, वायनं-नकम्।

प्रसादी, सं. स्त्री. (सं. प्रसादः>) देवार्पित-पदार्थः २. नैवेद्यं ३. गुरुजनदत्तवस्तु (न.)।

प्रसाधन, सं. पुं. (सं. न.) वेशः-षः २. भूषणं, मंडनं, शृंगारः ३. निष्-सं,-पादनं, करणम्।

प्रसाधित, वि. (सं.) परिष्-संस्,-कृत २. सु-सम्पादित।

प्रसार, सं. पुं. (सं.) प्रसरः, विस्तारः, विततिः (स्त्री.)।

प्रसिद्ध, वि. (सं.) प्र-वि-,ख्यात, यशस्विन्, कीर्तिमत्, लोकविश्रुत, यशोधर, सुयश, लब्धकीर्ति।

प्रसिद्धि, सं. स्त्री. (सं.) ख्यातिः-कीर्तिः-विश्रुतिः (स्त्री.), यशस् (न.), श्लोकः, विश्रावः।

प्रसू, सं. स्त्री. (सं.) जननी, मातृ (स्त्री.)। वि., प्रसवित्री, जनयित्री।

प्रसूता, सं. स्त्री. (सं.) जातापत्या, प्रजाता, प्रसूतिका।

—**का बुख़ार**, सं. पुं., सूतिकाज्वरः।

प्रसूति, सं. स्त्री. (सं.) प्रसवः, जननं २. उद्-भवः ३. उत्पत्तिस्थानं ४. संततिः (स्त्री.) ५. प्रजनना।

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

प्रसून, सं. पुं. (सं. न.) कुसुमं, पुष्पं २.फलम् । वि., जात, उत्पन्न ।

—वर्ष, सं. पुं. (सं.) पुष्पवृष्टिः (स्त्री.) ।

—वाण, सं. पुं. (सं.) पुष्प-,शरः-वाणः, कामः, मदनः ।

प्रसृत, वि. (सं.) प्रगत, प्रचलित २. विस्तृत, विस्तीर्ण ३. लंब, दीर्घ, आयत ४. व्यस्त, संलग्न ५. सुशील, विनम्र ६. गत, यात ७. स्फूर्तिमत्

प्रसृता, सं. स्त्री. (सं.) जंघा, टक्किका ।

प्रसेक, सं. पुं. (सं.) आ-अव-, सेकः-सेचनम्, अभिवर्षणं, अभ्युक्षणं, प्रोक्षणम् क्षरणं, गलनं, स्रवणम् ३. वमनं, वयः, वयिः (स्त्री.) ४. दर्विका,-कटोरिका-अग्रभागः ।

प्रस्तर, सं. पुं. (सं.) शिला, पाषाणः, दे. 'पत्थर' ।

प्रस्ताव, सं. पं. (सं.) अवसरः, उचितकालः २. प्रसंगः, विषयः ३. प्रकरणं ४. उपक्षेपः, उपन्यासः ५. प्र-नि,-बंधः, लेखः ६. दे. 'प्रस्तावना' ।

प्रस्तावना, सं. स्त्री. (सं.) भूमिका, उपोद्घातः, प्राक्कथनं, आमुखं, अवतरणिका २. आरम्भः, उपक्रमः ।

प्रस्तुत, वि. (सं.) नु(नू)त, श्लाघित । २. उक्त, कथित ३. प्रासंगिक, प्रसंगप्राप्त ४. उपस्थित, प्रतिपन्न ५. उद्यत, सज्ज ६. निष्पन्न, संपादित ।

प्रस्थान, सं. पुं. (सं. न.) प्रयाणं, अपक्रमः, गमनं, यात्रा २. विजिगीषुसेनायाः प्रयाणम् ।

प्रस्वेद, सं. पुं. (सं.) दे. 'पसीना' ।

प्रहर, सं. पुं. (सं.) यामः, दे. 'पहर' ।

प्रहरी, वि. (सं.-रिन्) दे. 'पहरा' सं. पुं. २ ।

प्रहसन, सं. पुं. (सं. न.) रूपक-नाटक,-भेदः, २. परिहासः, विनोदः ३. अव-उप,-हासः ।

प्रहार, सं. पुं. (सं.) आघातः, ताडः, निर्घातः, हथः ।

—करना, क्रि. सं. आहन् (अ. प. अ.), प्रह् (भ्वा. प. अ.), तड् (चु.), प्रहारं कृ ।

प्रहृष्ट, वि. (सं.) प्रमुदित, सुप्रसन्न, अत्यानंदित ।

प्रहेलिका, सं. स्त्री. (सं.) प्रश्नदूती, दे. 'पहेली' ।

प्रांगण, सं.पुं. (सं. न.)अजिरं, अंगनं, चत्वरम् ।

प्रांजल, वि. (सं.) सरल, ऋजु, २. सत्य, यथार्थ ३. सम्, समतल ।

प्रांत, सं. पुं. (सं.) देशभागः, राष्ट्रविभागः २. भूखंडः, प्रदेशः ३. सीमा, समंतः ४. अग्रं, कोटिः (स्त्री.) ५. दिश् (स्त्री.) ।

प्रांतीय, वि. (सं.) प्रांतिक, प्रांत,संबंधिन्-विषयक ।

प्राइवेट, वि. (अं.) स्वकीय, आत्मीय २. विशिष्ट, असार्वजनिक ३. गुप्त, संवरणीय ।

—सेक्रेटरी, सं. पुं. (अं.) *स्वकीयसचिवः ।

प्राकार, सं. पुं. (सं.) वप्रः-प्रं, शा(सा)लः, वरणः ।

प्राकृत, वि. (सं.) प्रकृतिज, प्राकृतिक २. स्वाभाविक, नैसर्गिक ३. साधारण ४. लौकिक ५. तुच्छ, नीच ६. भौतिक । सं. स्त्री. (सं. न.) व्यवहारभाषा २. प्राचीन-भाषाविशेषः ।

प्राकृतिक, वि. (सं.) दे. 'प्राकृत' ।

प्राची, सं. स्त्री. (सं.) पूर्वदिशा, पूर्वदिश् (स्त्री.) २. पूजकपूज्ययोः पुरोवर्तिदिशा ।

प्राचीन, वि. (सं.) पुराण, प्राक्तन, पुरातन, पूर्व, प्राक्कालीन २. पूर्वदेशीय, प्राच्य, पौरस्त्य, पूर्वदिक्स्थ, प्रांच् ।

प्राचीनता, सं. स्त्री. (सं.) पुराणता, पुरातनता इ. ।

प्राचीर, सं. पुं. (सं. न.) प्रांततो वृत्तिः (स्त्री.) प्रावरः, प्रावृतिः (स्त्री.), दे. 'प्रकार' ।

प्राचुर्य, सं. पुं. (सं. न.) 'प्रचुरता' ।

प्राच्य, वि. (सं.) दे. 'प्राचीन' (१-२) ।

प्राज्ञ, वि. तथा सं. पुं. (सं.) पंडित(:), विज्ञ (:), धीमत्, बुद्धिमत्, विद्वस् ।

प्राज्ञी, सं. स्त्री. तथा वि. (सं.) पंडिता, बुद्धिमती, विदुषी (नारी) ।

प्राण, सं. पुं. (सं. प्राणाः बहु.) असवः (बहु.) हृन्मारुतः २. श्वासः, उच्छ्वासः, श्वसितं, ३. पवनः, अनिलः ४. बलं, शक्तिः (स्त्री.) ५. जीवनं, चैतन्यं ६. आत्मन् ७. प्रियो मनुष्यः पदार्थो वा ।

—त्याग, सं. पुं. (सं.) मृत्युः, निधनं २.आत्म,-हत्या-घातः ।

—दंड, सं. पुं. (सं.) देह-मृत्यु,-दंडः, उत्तमसाहसम् ।

—धारण, सं. पुं. (सं. नः) जीवनं, प्राणनं, देहधारणम् ।

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

—नाथ, सं. पुं. (सं.) प्राणपतिः, प्राणेश्वरः, पतिः, भर्तृ २. दयितः, वल्लभः ।
—प्रतिष्ठा, सं. स्त्री. (सं.) देवप्रतिमायां प्राण-स्थापनविधिः ।
—प्रिय, वि. (सं.) प्रियतम, अत्यंतप्रिय । सं. पुं., भर्तृ, पतिः ।
—हर, वि. (सं.) प्राणहारिन्, मारक, घातक ।
—उड़ जाना, मु., अत्यंतं त्रस् (दि. प. से.) भी (जु. प. अ.), भयविह्वल(वि.)भू ।
—गले तक आना, मु., आसन्नमृत्यु (वि.) भू, कंठगतप्राण (वि.) जन् (दि. आ. से.) ।
—त्यागना, देना या निकालना, मु., प्राणान् त्यज् (भ्वा. प. अ.) दे. 'मरना' ।
—लेना, मु., हन् (अ. प. अ.), मृ-व्यापद् (प्रे.) नि् (रु. प. से. नु.) ।

प्राणांत, सं. पुं. (सं.) निधनं, मरणम् ।
प्राणांतक, वि. (सं.) प्राण,-हर-हारिन्, घातक, मारक ।
प्राणात्यय, सं. पुं. (सं.) मृत्युः, निधनम् २. प्राणान्त-देहान्त-समयः-कालः ३. प्राण,-भय-संशयः-संकटम् ।
प्राणाधार, सं. पुं. (सं.) पतिः, भर्तृ । वि., जीवनाश्रय, अतिप्रिय ।
प्राणायाम, सं. पुं. (सं.) योगांगभेदः, श्वास-प्रश्वासगतिनिरोधः ।
प्राणाहुति, सं. स्त्री. (सं.) जीवनोत्सर्गः, आत्मबलिः, भोजनारम्भे पंचप्राणेभ्यो भक्षणम् ।
प्राणी, वि. (सं.-णिन्) सप्राण, प्राणधरिन्, संजीव, जीवत् (शत्रंत) । सं. पुं. जीवः, जंतुः २. मनुष्यः ३. व्यक्ति (स्त्री.) ।
प्राणेश-श्वर, सं. पुं. (सं.) दे. 'प्राण' के नीचे 'प्राणनाथ' ।
प्राणोपहार, सं. पुं. (सं.) आहारः, भोजनं, खाद्यम्, भक्ष्यम् ।
प्रातः, अव्य. } प्रातःकाल, सं. पुं. } (सं.) दे. 'प्रभात' ।
प्रातः-स्मरणीय, वि. (सं.) पुण्य,-श्लोक-शील-चरित, महात्मन्, पुण्यात्मन् ।
प्रात, क्रि. वि. (सं. प्रातर् अव्य.) प्रातःकाले, प्रभातसमये ।
—नाथ, सं. पुं. (सं.) सूर्यः, भानुः ।
—भोजन, सं. पुं., दे. 'कलेवा' ।

प्राथमिक, वि. (सं.) आद्य, आदिम, प्रारंभिक २. पूर्व, प्रावेशिक, प्रास्ताविक ३. मौल, मौलिक ।
प्रादुर्भाव, सं. पुं. (सं.) आविर्भावः, प्राकट्यं, प्राकाश्यं, व्यक्तता २. उत्पत्तिः (स्त्री.), जन्मन् (न.) ।
प्रादुर्भूत, वि. (सं.) आविर्भूत, प्रकटित, प्रकटीभूत, व्यक्त २. जात, उत्पन्न ।
प्राधान्य, सं. पुं. (सं. न.) दे. 'प्रधानता' ।
प्राप्त, वि. (सं.) लब्ध, अधिगत, आसादित, प्रतिपन्न, वित्त, विन्न ।
—करना, क्रि. स., प्र-,आप् (स्वा. प. अ.), अधिगम्, लभ् (भ्वा. आ. अ.) आसद् (प्रे.), विद् (तु. उ. वे.) ।
—होना, क्रि. अ. आप्-लभ्-अभिगम् (कर्म.) ।
प्राप्ति, सं. स्त्री. (सं.) लाभः, प्रतिपत्तिः-उप-लब्धिः (स्त्री.) अधिगमः, प्रापणं २. गतिः (स्त्री.) ३. अर्जनं ४. आयः, अर्थागमः ।
प्राप्य, वि. (सं.) लभ्य, अधिगंतव्य, प्राप्तव्य २. समासादनीय, गम्य ।
प्रामाणिक, वि. (सं.) सप्रमाण, प्रमाणसिद्ध, २. विश्वसनीय, विश्वास्य ३. सत्य, तथ्य ४. शास्त्रसिद्ध ५. हैतुक, युक्तियुक्त ।
प्रामाण्य, सं. पुं. (सं. न.) प्रमाणता-त्वं २. प्रतिष्ठा ।
प्रायः, क्रि. वि. (सं.) प्रायशः बहुशः,-धा, प्रायेण, मुहुर्मुहुः, भूयोभूयः, अनेकशः, अभीक्ष्णं २.-कल्प,-भूयिष्ठ,-प्राय, (उ. दे. 'प्राय' की टि.), उप-(उ. उपविंशाः छात्राः) ।
प्राय, सं. पुं. (सं.) प्रस्थानं, प्रयाणं २. मरणं ३. मरणार्थमनशनं, दे. 'धरना' ।
—द्वीप, सं. पुं., द्वीपकल्पः-पम् ।
(टि. जब 'प्राय' समासांत में हो तब १.-तुल्य, सदृश (उ. अमृतप्राय वचन = अमृत,तुल्य-सदृशं वचनं) २.-भूयिष्ठ,-कल्प (उ. मृतप्रायो मनुष्यः, मृत,-कल्पः-भूयिष्ठः मानवः) ।
प्रायश्चित्त, सं. पुं. (सं. न.) पाप,-निष्कृतिः-विशुद्धिः (दोनों स्त्री.), अघ,-नाशनं-क्षालनं-मार्जनं, पापनाशकृत्यम् ।
प्रारंभ, सं. पुं. (सं.) उपक्रमः २. आदिः ।
प्रारंभिक, वि. (सं.) औपक्रमिक, आरंभिक २. आद्य, आदिम ३. प्राथमिक, प्रावेशिक ।

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

प्रारब्ध, सं. स्त्री. (सं. न.) भाग्यं, दैवं, अदृष्टं, प्राक्तनं, नियतिः (स्त्री.) । वि., कृतारंभ, उपक्रांत ।

प्रार्थना, सं. स्त्री. (सं.) याचना, याच्ञा, अभिशस्तिः (स्त्री.), आ-नि,-वेदनं, अभि-, अथना ।

—करना, क्रि. स. अभि-प्र-, अर्थ (चु.आ.से.), याच् (भ्वा. उ. से.), सविनयं आ-नि-विद् (प्रे.) ।

—पत्र, सं. पुं. (सं.) आवेदनपत्रम् ।

प्रार्थनीय, वि. (सं.) याचनीय, अभ्यर्थनीय ।

प्रार्थित, वि. (सं.) याचितं, अभ्यर्थित, निवेदित ।

प्रार्थी, सं. पुं. (सं.-र्थिन्) प्रार्थयितृ, याचकः-निवेदकः ।

प्रालब्ध, सं. स्त्री., दे. 'प्रारब्ध' सं. स्त्री. ।

प्रासंगिक, वि. (सं.) प्रसंग,-आगत-प्राप्त-उचित, अनुरूप, प्रस्तुत, प्रास्ताविक [-की (स्त्री.) = प्रास्ताविकी]

प्रासाद, सं. पुं. (सं.) राज-नृप,-गृहं-भवनं-मंदिरं, हर्म्यं, सौधः-धम् ।

प्रिज्म, सं. पुं. (अं.) त्रिपार्श्वकाचः ।

प्रिय, वि. (सं.) दे. 'प्यारा' २. मनोहर, अभिराम । सं. पुं., पतिः २. कांतः, दयितः ३. जामातृ ४. हितम् ।

—तम, वि. (सं.) प्रेष्ठ, प्राण प्रिय । सं. पुं., पतिः, भर्तृ । २. वल्लभः, कांतः ।

—तमा, वि. (सं.) प्रेष्ठा, प्राणप्रिया । सं. स्त्री., पत्नी २. कांता ।

—दर्शन, वि. (सं.) सु-शुभ,-दर्शन, चक्षुष्य, सुरूप, शोभन, सुंदर ।

—भाषी, वि. (सं.-षिन्) मधुरभाषिन्, प्रिय,-वादिन्-वचन ।

—वर, वि. (सं.) प्रेष्ठ, प्रियतम ।

प्रिया, सं. स्त्री. (सं.) नारी, रमणी २. पत्नी, भार्या ३. प्रेयसी, प्रेमवती, कांता ।

प्रीतम, सं. पुं., दे. 'प्रियतम' ।

प्रीत, प्रीति, } सं. स्त्री. [सं. प्रीतिः (स्त्री.)] दे. 'प्यार' २. तृप्तिः(स्त्री.) ३. आनंदः, हर्षः ।

—पूर्वक, क्रि. वि. (सं.-कं) प्रेम्णा, स्नेहेन ।

—भोज, सं. पुं. (सं.-भोगः) प्रीतिभोजनं, भोजनोत्सवः ।

प्रेक्षक, सं. पुं. (सं.) दर्शकः, द्रष्टृ २. (नाटकादि में) पार्षदः, सामाजिकः ।

प्रेक्षण, सं. पुं. (सं. न.) नेत्रं २. अवलोकनं, दर्शनम् ।

प्रेत, सं. पुं. (सं.) नरकस्थप्राणिन् २. भूतभेदः, वेतालः ३. मृतमानवः, शवः ।

—कर्म, सं. पुं. [सं.-कर्मन् (न.)] प्रेत,-कार्य-क्रिया-कृत्यं, आमृत्योः सपिंडीकरणपर्यंतः क्रियाकलापः ।

—गृह, सं. पुं. (सं. न.) प्रेतभूमिः (स्त्री.) श्मशानम् ।

—दाह, सं. पुं. (सं.) अन्त्येष्टि-मृतक,-संस्कारः ।

—पक्ष, सं.पुं.(सं.) पितृपक्षः, गौण-चांद्राश्विन-कृष्णपक्षः ।

—पति, सं. पुं. (सं.) यमराजः ।

प्रेतनी, सं. स्त्री. (सं. प्रेतः) पिशाची-चिका, प्रेतपत्नी ।

प्रेम, सं. पुं. [सं. प्रेमन् (पुं. न.)] स्नेहः, अनु,-रागः, प्रणयः, दे. 'प्यार' २. कामः, शृङ्गारः, रतिः (स्त्री.) ३. ईश्वरभक्तिः (स्त्री.) ।

—कहानी, सं. स्त्री.,प्रेमकथा, शृंगाराख्यायिका ।

—पात्र, सं. पुं. (सं. न.) स्नेहभाजनं (मानव वा पदार्थ) ।

—पाश, सं. पुं. (सं.) स्नेह-अनुराग-प्रेम,-बन्धनं-रज्जुः (स्त्री.)-शृंखला-जालम् ।

—पुत्तलिका, सं. स्त्री. (सं.) पत्नी, भार्या, कलत्रम् ।

—वारि, सं. पुं. (सं. न.) प्रेमाश्रु (न.), स्नेहाम्बु(म्) ।

प्रेमालाप, सं. पुं. (सं.)स्नेहसंभाषणं ३.शृंगार-संवादः ।

प्रेमाश्रु, सं. पुं. (सं. न.) प्रेम,-जलं-वारि(न.), अनुरागवाष्पम् ।

प्रेमिक, सं. पुं., दे. 'प्रेमी' ।

प्रेमिका, सं. स्त्री., दे. 'प्रेयसी' ।

प्रेमी, सं. पुं. (सं.-मिन्) प्रणयिन्, अनुरागिन्, स्नेहिन्, अनुराग-प्रणय,-वत् २. कामिन्, कामुकः, रमणः, वल्लभः । वि.,-प्रिय,-आसक्त-निरत, सेवी (उ., संगीत का प्रेमी = संगीत,-प्रिय-आसक्त इ.) ।

प्रेय, वि. (सं. प्रेयस्) प्रियतर, अतिप्रिय

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

२. लौकिक-सांसारिक,-सुखानि-भोगाः ३. अलंकारभेदः (सा०)।

प्रेयसी, सं. स्त्री. (सं.) प्रेमवती, प्रेमिणी, प्रिया, वल्लभा, कांता, दयिता।

प्रेरक, सं. पुं. (सं.) प्रचोदयितृ, प्रवर्तयितृ, प्रोत्साहकः, उत्तेजकः।

प्रेरणा, सं. स्त्री. (सं.) प्रचोदना, प्रोत्साहनं-ना, उत्तेजनं-ना, प्रवर्तनं २. दे. 'धक्का'।

—**करना**, क्रि. स., उत्तिज्-प्रवृत्-प्रेर्-प्रचुद्-प्रोत्सह् (प्रे.)।

प्रेरित, वि. (सं.) प्रचोदित, प्रोत्साहित, उत्तेजित, प्रवर्तित।

प्रेस, सं. पुं. (अं.) संपीडनयंत्रं २. मुद्रणयंत्रं ३. मुद्रणयंत्रालयः।

प्रेसिडेंट, सं. पुं. (अं.) सभा,-पतिः-अध्यक्षः, प्रधानः।

प्रोग्राम, सं. पुं. (अं.) कार्यक्रमः २. कार्यक्रमपत्रम्।

प्रोटीन, सं. पुं. (अं.) प्रोभूजिनं, भोजनतत्त्वभेदः।

प्रोत, वि. (सं.) खचित, निहित २. स्यूत, ग्रथित, गुंफित।

प्रोत्साहन, सं. पुं. (सं. न.) धैर्य-उत्साह,-वर्द्धनं, उत्तेजनं, आश्वासनम्।

प्रोत्साहित, वि. (सं.) उत्तेजित, आश्वासित, वर्द्धितोत्साह, प्रेरित।

प्रोथ, वि. (सं.) विश्रुत, प्रख्यात २. प्रचलित, प्रस्थित ३. स्थापित, स्थिरीकृत (सं. पुं. न.) १-२ अश्व,-नासा-नासारन्ध्रम् ३. शूकर-लंबास्थम्।

प्रोदक, वि. (सं.) उक्त, उन्न, आर्द्र २. निर्जल, निर्गतजल, शुष्क।

प्रोनोट, सं. पुं. (अं.) ऋणनिस्तारप्रतिज्ञा-लेखः, ऋणपत्रम्।

प्रोपगेंडा, सं. पुं. (सं.) प्रचारः, प्रचारकार्यम्।

प्रोप्राईटर, सं. पुं. (अं.) स्वामिन्, प्रभुः, इनः।

प्रोफ़ेसर, सं. पुं. (अं.) (महाविद्यालयस्य विश्वविद्यालयस्य वा) उपाध्यायः।

प्रोषित, वि. (सं.) विदेशस्थ, प्रवासिन्।

—**पतिका**, सं. स्त्री. (सं.) प्रोषितभर्तृका, नायिकाभेदः।

प्रौढ़, वि. (सं.) प्रवृद्ध, एधित, प्रोपचित २. सं-परि,-पूर्ण, संपन्न, सिद्ध ३. परिणत, परिपक्व ४. पुष्ट, दृढ़ ५. निपुण, चतुर।

प्रौढ़ता, सं. स्त्री. (सं.) प्रौढ़त्वं, प्रवृद्धिः (स्त्री.) २. परिपूर्णता ३. परिपक्वता ४. पुष्टिः (स्त्री.) ५. निपुणता।

प्रौढ़ा, सं. स्त्री. (सं.) चिरिंटी, श्यामा, सुवयाः, वृष्टरजाः (स्त्री. एक.) (३० से ५५ वर्ष तक की नारी) २. नायिकाभेदः। वि., पुष्टा, परिपक्वा, दृढ़ा।

प्लग, सं. पुं. (अं.) निगम्।

प्लवग, सं. पुं. (सं.) कपिः, वानरः २.हरिणः ३. मंडूकः।

प्लवन, सं. पुं. (सं. न.) कूर्दनं २. तरणम्।

प्लाटिनम, सं. पुं. (अं.) महातु।

प्लावन, सं. पुं. (सं. न.) महाप्रवाहः, जल,-प्रलयः-बृंहणं-विप्लवः।

प्लावित, वि. (सं.) जलमग्न।

प्लास्टर, सं. पुं. (अं.) दे. 'पलस्तर'।

—**आव पेरिस**, सं. पुं., दग्धचूर्णम्, पेरिसप्रलेपः।

प्लीहा, सं. स्त्री. (सं.) प्ली(प्लि)हन् (पुं.), गुल्मः, प्लिहा।

प्लुत, सं. पुं. (सं.) त्रिमात्रवर्णः। वि., झंपगति-युत २. प्लावित ३. सिक्त ४. त्रिमात्र।

प्लूरिसी, सं. स्त्री. (अं.) फुफ्फुसवेष्टनपाकः, फुफ्फुसावरणप्रदाहः।

प्लेग, सं. पुं. (अं.) महा,-मारी, मारिका २. मूषिकरोगः अग्निरोहिणी।

प्लेट, सं. स्त्री. (अं.) दे. 'तश्तरी' २. (धात्वादिकस्य) पट्टः-टं, फलकः-कम्।

—**फ़ार्म**, सं. पुं. (अं.) वेदी, वेदिका, मञ्चः, पीठिका।

फ

फ, देवनागरीवर्णमालायाः द्वाविंशतितमो व्यंजनवर्णः, फकारः।

फंका, सं. पुं. (हिं. फाँकना) मुष्टिः (पुं. स्त्री.), अंजलिः (पुं.), मुष्टि-अंजलि,-मात्रं अन्नादिकं २. खंडः-डं, शकलः-लम्।

फंकी, सं. स्त्री. (हिं. फंका) चूर्णं, चूर्णौषधम्।

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

फंद, सं. पुं. (सं. बंधः) बंधनं २. दे. 'फंदा' ३. छलं, कपटं ४. रहस्यं, गूढवार्ता ५. दुःखम् ।

फंदा, सं. पुं. (सं. बंधः) पाशः, बन्धनं, वागुरा, पातिली, मृगबंधनी २. जालं ३. दुःखं, कष्टम् ।

—लगाना, मु., छल् (चु.), विप्रलभ् (भ्वा. आ. अ.) वंच्-प्रतु (प्रे.) २. जालं निक्षिप् (तु. प. अ.)-निधा (जु. उ. अ.) ।

फंदे में पड़ना, मु., पाशे बंध्-ग्रह् (कर्म.), वशी भू, २. विप्रलभ्-प्रतार् (कर्म.) ।

फंसना, क्रि. अ. (हिं. फांसना) संग्रंथ्-संश्लिष्-संवंध् (कर्म.), आकुली-संकीर्णी-भू, संशक्त-संलग्न-संश्लिष्ट (वि.) भू २. जाले पाशे वा धृ-बंध् (कर्म.), जालबद्ध (वि.) भू ।

फंसवाना, क्रि. प्रे., व. 'फंसाना' के प्रे. रूप ।

फंसाना, क्रि. स. (हिं. फंसना) संश्लिष् (प्रे.), संग्रंथ् (क्रू. प. से.), आकुली-संलग्नी-संकीर्णी-कृ २. पाशेन बंध् (क्रू. प. अ.) जाले धृ (चु.), पाशे पत् (प्रे.) ।

फंसाव, सं. पुं. } (हिं. फंसना) संश्लिष्टता,
फंसावट, सं. स्त्री. } ग्रंथिलंत्वं २. संकुलता, व्यतिकरः, संकरः ।

फ़क़, वि. (अ. फ़क़) श्वेत, शुक्ल, स्वच्छ २. विवर्ण, मंदप्रभ ।

रंग—होना या पड़ जाना, मु., पांडुच्छाय-विवर्ण (वि.) भू, मंद-म्लान-मलिन,प्रभ(वि.) जन् (दि. आ. से.) २. आकुली भू, मुह् (दि. प. से.) ।

फ़क़त, वि. (अ.) अलं, पर्याप्त २. एकाकिन् । क्रि. वि., केवलम् ।

फ़क़ीर, सं. पुं. (अ.) भिक्षुः, भिक्षुकः २. साधुः, सन्न्यासिन् ३. निर्धनः ।

फ़क़ीरनी, सं. स्त्री. (अ. फकीर>) भिक्षुकी, भिक्षोपजीविनी, भिक्षाचरी २. परिव्राजिका, सन्न्यासिनी, वैरागिणी ।

फ़क़ीरी, सं. स्त्री. (अ. फ़कीरी) भिक्षुकता, याचकता २. सन्न्यासः ३. दारिद्र्यम् ।

फक्कड़, वि. (अ. फकीर) निश्चित २. निर्धनं, ३. निश्चितदरिद्र । सं. पुं., गाली, अश्लील-वचनम्, अश्लील-ग्राम्य-अवाच्य,-वचनं २. मिथ्यावचनम् ।

—बाज, सं. पुं., अवाच्यवाचकः अश्लील-भाषिन् २. मिथ्याभाषिन् ।

—बाज़ी, सं. स्त्री., अश्लीलभाषिता, अवाच्य-वाचकता ।

फक्किका, सं. स्त्री. (सं.) तत्त्वनिर्णयार्थमुपस्थापितः पूर्वपक्षः २. छलं, कपटम्, दंभः ।

फ़ख़र, सं. पुं. (फ़ा. फ़ख़्र) गर्वः, अभिमानः ।

फगुआ, सं. पुं. (हिं. फागुन) होलिकोत्सवः २. होलिकागीतानि (न. बहु.) ।

फ़ज़ीलत, सं. स्त्री. (अ.), गौरवं, महत्ता ।

—की पगड़ी, मु., विद्वत्ताप्रमाणम्, वैदुष्योष्णीषम् ।

फ़ज़ीहत, सं. स्त्री. (अ.) दुर्गतिः (स्त्री.) दुर्दशा, २. कलहः ।

फ़ज़ूल, वि. (अ.) निरर्थक, व्यर्थ ।

—ख़र्च, वि. (अ.+फ़ा) मुक्तहस्त, अप-व्यर्थं,-व्ययिन् ।

—ख़र्ची, सं. स्त्री., अति-अप-अमित,-व्ययः, मुक्तहस्तता ।

फ़ज़्ल, सं. पुं. (अ.) कृपा, अनुग्रहः ।

फट, सं. स्त्री. (अनु.) फटिति शब्दः-ध्वनि ।

—फट, सं. स्त्री., फट-फटाशब्दः २. प्रजल्पः ।

—से, क्रि. वि., झटिति, सपदि ।

फटक[1], सं. पुं. दे. 'स्फटिक' ।

फटक[2], क्रि. वि. (अनु.) तत्क्षणे, झटिति ।

फटकन, सं. स्त्री. (हिं. फटकना) बुषं-सं, तुषः, असारद्रव्यम् ।

फटकना, क्रि. स., (अनु. फट) प्रस्फुट् (प्रे.), प्रस्फोटनेन-शूर्पेण विशुध् (प्रे.) २. दे. 'पींजना' ३. दे. 'फटफटाना' । ४. रेणुं अपमृज् (अ. प. से.), निर्धूली कृ ५. क्षिप् (तु. प. अ.), अस् (दि. प. से) । क्रि. अ., या (अ. प. अ.), गम् २. दूरी-पृथग्-भू ३. 'तड़फड़ाना' ४. श्रम् (दि. प. से.) ।

फटकरी, सं. स्त्री., दे. 'फिटकरी' ।

फटकार, सं. स्त्री. (अनु. फट्+सं. कारः>) निर्भर्त्सना, वाग्दंडः, उपालंभः, निंदा, आक्रोशः, गर्हा ।

फटकारना, क्रि. स. (पूर्व.) शिलायां आहत्य आहत्य वस्त्राणि प्रक्षल् (चु.) २. दूरी-पृथक्-कृ ३. निर्भर्त्स्-तर्ज् (चु. आ. से.) वाचा दंड् (चु.), निंद् (भ्वा. प. से.) ४. सफटफट-शब्दं एज्-कंप् (प्रे.) ।

फटकारने योग्य, वि., निर्भर्त्सनीय, तर्जनीय ।

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

फटकारने वाला, सं. पुं., निर्भर्त्सकः, तर्जकः ।
फटकी, सं. स्त्री. (हिं. फटक[२]>) शाकुनिक-पंजरः-रम् ।
फटना, क्रि. अ. (हिं. फाड़ना) विदृ-विभिद्-विश् (कर्म.) २. स्फुट् (तु. प. से.), दल् (भ्वा. प. से.) ३. खंडशो भिद् (कर्म.) शकली भू ४. अप-वि कृ (तु. प. से.) इतस्ततः विद्रु (भ्वा. प. अ.) ५. अत्यंतं व्यथ् (भ्वा. आ. से.) ६. अम्ली भू ।
फट पड़ना, मु. सहसा आपत् (भ्वा. प. से.)-उपस्था (भ्वा. आ. अ.) ।
छाती—, (शोकातिशयेन) हृदयं विदृ-द्विधा भिद् (कर्म.) ।
फटफटाना, क्रि. स. (अनु. फटफट) प्र-, जल्प् (भ्वा. प. से.) अपार्थकं वद् (भ्वा. प. से.) २. दे. 'फड़फड़ाना' ३. प्रयस्-परिश्रम् (दि. प. से.) ४. फटफटायते (ना. धा.), फटफटाशब्दं कृ ५. आजीविकायै भृशं चेष्ट (भ्वा. आ. से.) ।
फटा, वि. (हिं. फटना) विदीर्ण, विशीर्ण २. स्फुटित, विदलित ३. शकलीभूत । सं. पुं., छिद्रं, छेदः, भेदः ।
—दूध, सं. पुं., अम्लीभूतं क्षीरम् ।
—पुराना, सं. पुं., चीरं, चीवरं, कर्पटः ।
फटे में पाँव देना, मु.. अव्यापारेषु व्यापारं कृ, परकार्येषु व्याप्रृ (तु. आ. अ.) ।
फटिक, सं. पुं. दे. 'स्फटिक' ।
फट्टा, सं. पुं. (हिं. फटना>) विदीर्णवेणुदंडः ।
फड़, सं. स्त्री. (सं. पणः) ग्लहः २. द्यूत,-शाला-सभा ३. क्रयविक्रयस्थानं ४. पंक्तिः (स्त्री.), समूहः ।
—बाज़, सं. पुं. (हिं.+फा.) सभिकः, द्यूत-कारकः २. वाचालः, वावदूकः ।
फड़क, सं. स्त्री. (अनु.) प्र-,स्पंदः, स्फुरणं, कंपः २. पक्ष,-चालनं-आस्फालनम् ।
—उठना, मु., प्रसद् (दि. प. अ.) ।
—जाना,मु.,अनुरंज् (कर्म.), स्निह् (दि.प.से) ।
फड़कना, क्रि. अ. (पूर्व.) स्फुर् (तु. प. से.), वेप्-कंप्-स्पंद् (भ्वा. आ. से.) २. क्षुभ् (दि. प. से.), आकुली भू २. पक्षाः विचल् (भ्वा. प. से.), विधू (कर्म.) ।
फड़काना, क्रि. स., व. 'फड़कना' के प्रे. रूप ।
फड़फड़ाना, क्रि. स. (अनु. फड़फड़>) फट-फटायते (ना. धा.), फटफटाशब्दं जन् (प्रे.) २. पक्षौ विधू (स्वा. उ. से.; क्र्. उ. से., भ्वा. उ. से., चु.), आस्फल्-विचल् (प्रे.), दे. 'फटफटाना' । क्रि. अ., क्षुभ् (दि.प.से.), आकुली भू २. उत्सुकः वृत् (भ्वा. आ. से.) ।
फड़फड़ाहट, सं. स्त्री. (हिं. फड़फड़ाना) पक्ष,-आस्फालनं-विधुवनं-विचालनं २. स्फुरणं, स्पंदनं, विकंपः ३. आकुलता, चित्त,वेगः-भ्रमः, सं-,क्षोभः ४. प्रयासः,अति-प्र,-यत्नः, चेष्टितम् ।
फड़वाना, फड़ाना, } क्रि. प्रे., व. 'फाड़ना' के प्रे.रूप ।
फड़िया, सं. पुं. (हिं. फड़) द्यूतकारकः, सभिकः २. दे. 'परचूनिया' ।
फण, सं. पुं. (सं.) फणा, फणं, कटः,-टा-टी, स्फटः-टा, भोगः, स्फुटः-टा, दर्वी-दर्विः (स्त्री.) ।
—कर, सं. पुं. (सं.) सर्पः, अहिः ।
—धर, सं. पुं. (सं.) नागः, सर्पः २. शिवः ।
—मणि, सं. स्त्री. (सं. पुं.) सर्प-मणिः-रत्नम् ।
फणा, सं. स्त्री. (सं.) दे. 'फण' ।
फणी, सं. पुं. (सं.-णिन्) फणधरः, फणकरः, दे. 'सर्प' ।
फणीन्द्र, फणीश, } सं. पुं. (सं.) अनंतः, शेषः, भुजगेशः, सर्पराजः ।
फ़ैसला, सं. पुं. (अ.) व्यवस्था, निर्णयः (इस्लाम) ।
फ़तह, सं. स्त्री. (अ.) विजयः २. साफल्यम् ।
—मंद, —याब, (अ.+फ़ा.) विजयिन्, विजेतृ ।
फतिंगा, सं. पुं. (सं. पतंगः) शलभः, पतंगमः ।
फतूर, सं. पुं. (अ.) दोषः, विकारः,२. हानिः (स्त्री.) ३. विघ्नः ४. उपद्रवः ।
फन, सं. पुं., दे. 'फण' ।
फ़न, सं. पुं. (फ़ा.) गुणः, वैशिष्ट्यं २. विद्या, ज्ञानं ३. कलाकौशलं, शिल्पं ४. व्याजः, छद्मन् (न.) ।
फ़ना, सं. स्त्री. (अ.) प्रलयः, वि-,नाशः, प्र-,ध्वंसः ।
फनी, सं. पुं., दे. 'फणी' ।
फफोला, सं. पुं. (सं. प्रस्फोटः) त्वक्-,स्फोटः, शोफः । दे. 'छाला' ।
दिल के फफोले फोड़ना, मु., वैर,-साधनं-

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

शोधनं-निर्यातनं कृ (ना. धा.), प्रतिहिंस् (रु. प. से.), क्रोधं प्रकटयति (ना. धा.),

फब, सं. स्त्री., दे. 'फबन'।

फबती, सं. स्त्री. (हिं. फबना) श्लेषोक्ति-लिका, नर्मन् (न.), नर्मोक्तिः (स्त्री.), व्यंग्यवचनं २. समयोचितयुक्तिः (स्त्री.)।

—उड़ाना, मु., अव-उप-हस् (भ्वा. प. से.), वक्रोक्त्या आक्षिप (तु. प. अ.)।

—कहना, मु., सहास्यं उपालभ् (भ्वा. आ. अ.), सहासं व्यंग्यवचनं प्रयुज् (रु.आ.अ.)।

फबन, सं. स्त्री. (हिं. फबना) शोभा, छविः (स्त्री.), सौन्दर्यं २. मंडनं, प्रसाधनं,परिष्कारः।

फबना, क्रि. अ., (सं. प्रभवनं>) शुभ् (भ्वा. आ. से.), युज् (कर्म.) उपपद् (दि. आ. अ.), उचित-उपपन्न-अनुरूप-युक्त-सदृश (वि.) भू (भ्वा. आ. से.)।

फबनेवाला, वि., शोभन, उचित, युक्त, अनुरूप, सदृश।

फबीला, वि. (हिं. फब) शोभन, सुन्दर, २. उचित, अनुरूप।

फरक, **फरकन**, सं. स्त्री., दे. 'फड़क'।

फ़रक़, सं. पुं., दे. 'फ़र्क'।

फरकना, क्रि. अ., दे. 'फड़कना'।

फ़रज़ंद, सं. पुं. (फ़ा.) पुत्रः, तनुजः।

फरजी, सं. पुं., दे. 'फ़र्ज़ी'।

फ़रद, सं. स्त्री., दे. 'फ़र्द'।

फरफंद, सं. पुं. (अनु. फर+हिं. फंदा) माया, कपटं, छलं, छद्मन् (न.); व्याजः २. भावः, हावः।

फरफर, सं. पुं. (अनु.) पक्ष,-स्फुरणं-आस्फालनम्। क्रि. वि., सवेगं, शीघ्रं, द्रुतं २. अप्रतिहतम्।

फरफराना, क्रि. स., क्रि.अ., दे. 'फड़फड़ाना'।

फ़रमा[1], सं. पुं. (अं. फ्रेम) घटना, रचना २. दे. 'कालबूत' ३. आकारसाधनम्।

फ़रमा[2], सं. पुं. (अं. फार्म) सकृन्मुद्रणार्हं पूर्णपत्रम्।

फ़रमान, सं. पुं. (फ़ा.) राजकीयं आज्ञापत्रं, अनुशासनपत्रं २. आज्ञा, आदेशः।

फ़रमाना, क्रि. स. (फ़ा.) आज्ञा (प्रे.), आदिश् (तु. प. अ.) शास् (अ. प. से.) २. कथ् (चु.)।

फ़रयाद, सं. स्त्री. (फ़ा.) दुःखनिवेदनं २. प्रार्थना, अभ्यर्थना ३. अभियोगः।

फ़रयादी, सं. पुं. (फ़ा.) दुःखनिवेदकः २. अभियोक्तृ २. प्रार्थिन्।

फ़रलांग, सं. पुं. (अं.) क्रोशस्य षोडशो भागः, अध्वमानभेदः।

फ़रलो, सं. स्त्री. (अं.) सार्द्धवेतनो दीर्घावकाशः, अवकाशभेदः।

फ़रवरी, सं. स्त्री. (अं. फेब्रुअरी) आंग्लसंवत्सरस्य द्वितीयो मासः।

फरसा, सं. पुं. (सं. परशुः) दे. 'कुल्हाड़ा'।

फ़रहंग, सं. पुं. (फ़ा.) कोशः-पः, अभिधानं, शब्दसंग्रहः २. टीका, कुंचिका, व्याख्या।

फ़रहत, सं. स्त्री. (अ.) मोदः, हर्षः, प्रसन्नता।

फरहरा, सं. पुं. (हिं. फहराना) पताका, केतुः।

फ़राख़, वि. (फ़ा.) आयत, विस्तृत, विशाल।

—दिल, वि. (फ़ा.) विशालहृदय, उदार।

फ़राग़त, सं. स्त्री. (अ.) व्यवसाय-विश्रामः, उद्योगविश्रांतिः (स्त्री.), अवकाशः। २. निश्चितता ३. मलत्यागः।

फ़रामोश, वि. (फ़ा.) विस्मृत।

फ़रामोशी, सं. स्त्री. (फ़ा.), विस्मृतिः (स्त्री.), विस्मरणम् २. स्खलनं, स्खलितम्।

फ़रार, वि. (अ.) (दंडभयात्) पलायित, अपक्रांत।

फ़रिश्ता, सं. पुं. (फा., मि. सं. प्रेषितः) दिव्य-ईश,-दूतः २. देवता।

फ़रीक़, सं. पुं. (अ.) प्रतिद्वंद्विन्, विपक्षिन् २. वादिन्, अर्थिन्, प्रतिवादिन्, प्रत्यर्थिन् ३. पक्षः; प्रतिपक्षः ४. पक्ष्यः, सपक्षः ५. श्रेणी, वर्गः।

—सानी, (सं. पुं. अ.) प्रतिवादिन्।

फ़रीकैन, सं. पुं. (अ.) (व्यवहारे) पक्षप्रतिपक्षौ, वादिप्रतिवादिनौ, अभियोग्यभियुक्तौ।

फरुहा, सं. पुं., दे. 'फावड़ा'।

फरेंद-दा, सं. पुं. (सं. फलेन्द्रः) राज-महा,-द्रुः, नंदः।

फ़रेब, सं. पुं. (फ़ा.) छलं, कपटं, प्रतारणा।

फ़रेबी, वि. (फ़ा.) छलिन्, कापटिक, प्रतारक।

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

फ़रोख्त, सं. स्त्री. (फ़ा.) विक्रयः-यणम् ।
फ़र्क़, सं. पुं. (अ.) पृथक्ता-त्वं, भिन्नत्वं, इतरत्वं २. अंतरं, भेदः, विशेषः ३. दूरता-त्वं, अंतरं ४. न्यूनता, विकलता ।
फ़र्ज़, सं. पुं. (अ.) धार्मिककृत्यं (इस्लाम) २. कर्तव्यकर्मन् (न.) ३. कल्पना ४. उत्तरदायित्वम् ।
—करना, क्रि. अ., क्लृप् (प्रे.), उत्प्रेक्ष् (भ्वा. आ. से.); (प्रमाणं विना) सिद्धं मन् (दि. आ. अ.) ।
फ़र्ज़ी, सं. पुं. (फ़ा.) कल्पित, काल्पनिक, २. सत्ताहीन, वितथ ।
फ़र्द, सं. स्त्री. (अ.) सूची-चिः (स्त्री.) नामावली-लिः (स्त्री.), अनुक्रमणिका २. पृथक्स्थितः पत्रवस्त्रादिखंडः २. प्रच्छदपट-स्योर्ध्वपुटः । वि., अनुपम, अतुल्य ।
फ़रयाद, सं. स्त्री., दे. 'फरयाद' ।
फ़राटा, सं. पुं. (अनु.) त्वरा, वेगः २. दे. 'खर्राटा' ।
फ़राँश, सं. पुं. (अ.) कुथप्रसारकः २. किंकरः ।
फ़र्श, सं. पुं. (अ.) कुट्टिमः-मं, शिलास्तरः २. गृहभूमिः (स्त्री.) आस्तरणं, कुथः-था, नमतं, परिस्तोमः ।
फल, सं. पुं. (सं. न.) शस्यं, प्रसवः, उत्पन्नं २. लाभः, प्राप्तिः (स्त्री.) ३. परिणामः, ४. गुणः, प्रभावः ५. कर्मभोगः ६. प्रतिफलं, प्रतीकारः ७. धारा, पत्रं, फलं (खड्गादिकस्य) ८. फालः, कुशी, कूपकः ९. फलकः-कं १०. ढालं, फरं, चर्मन् (न.) ११. उद्देश्यसिद्धिः (स्त्री.) १२. गुण्यः (गतिः) १३. गणित-क्रियापरिणामः (उ. योग-गुणन,-फलं) १४. क्षेत्रफलं १५. ग्रहयोगपरिणामः (ज्यो.) १६. प्रयोजनं, अर्थः १७. वृद्धिः (स्त्री.), दे. 'सूद' .
—आना, या लगना, क्रि. अ., फल् (भ्वा. प. से.), सफलीभू , फलवत् जन् (दि. आ. से.), फलित (वि.) भू ।
—दार, वि.(सं.+फ़ा.) फलवत्, फलदायक, फलद, फलप्रद, फलित, फलिन्, सफल २. अमोघ, अवंध्य ।
—पाक, सं. पुं. (सं.) कारमर्दकः २. जला-मलकं ३. फलपरिणतिः (स्त्री.) ।
—पाना, क्रि. स., (स्वकर्मणाम्) फलं भुज् (रु. आ. अ.)-लभ् (भ्वा. आ. अ.) प्राप् (स्वा. प. अ.) ।
—प्राप्ति, सं. स्त्री. (सं.) कृतकार्यता, मनो-रथसिद्धिः (स्त्री.) ।
—भोग, सं. पुं. (सं.) उदर्कानुभवः, परि-णामोपभोगः ।
—राज, सं. पुं. (सं.) दे. 'तरबूज़' २. दे. 'खरबूज़ा' ।
फलक, सं. पुं. (सं. पुं. न.) (काष्ठादिकस्य) पट्टः-टं २. शिला ३. ढालं, चर्मन् (न.) ४. रजकपट्टं ५. आस्तरणं ६. पत्रं,पृष्ठं ७. हस्त-तलं ८. फलं ९. पीठं, पीठिका ।
फ़लक, सं. पुं. (अ.) आकाशः-शं, गगनं २. स्वर्गः ।
फलतः, अव्य. (सं.) परिणामतः, अतः, इति हेतोः, अस्मात् कारणात् ।
फलद, वि. (सं.) फल,-दायक-प्रद-जनक ।
फलना, क्रि. अ. (सं. फलनं) दे. 'फल आना' ('फल' के नीचे) २. फलं आवह् (भ्वा. प. अ.), लाभं जन् (प्रे.) ।
—फूलना, मु., समृध् (दि. प. से.), संवृध् (भ्वा. आ. से.), उत्कर्षं या (अ. प. अ.) ।
फ़लसफ़ी, सं. पुं. (अ.) दर्शनशास्त्रं, तर्क,-विद्याशास्त्रम् ।
फ़लसफ़ा, सं. पुं. (अ.) दार्शनिकः, तत्त्वज्ञः, दर्शनशास्त्रज्ञः ।
फलां, वि. (फ़ा.) अमुक ।
—फलाँ, वि. अमुकामुक, विशिष्ट, निर्दिष्ट ।
फलांग, सं. स्त्री., दे. 'कुदान' ।
फलांगना, क्रि. अ. (सं. प्रलंघनम्) दे. 'कूदना' ।
फलाकांक्षी, वि. (सं.-क्षिन्) फलेच्छुक, फला-भिलाषिन् ।
फलाना, वि., दे. 'फलां' ।
फलार्थी, वि. (सं.-र्थिन्) फलेच्छुक, फलाभि-लाषिन् २. परिणामोत्सुक ।
फलाहार, सं. पुं. (सं.) फलभक्षणं, फलैर्निर्व-हणम् ।
फलाहारी, वि. (सं.-रिन्) फलभक्षक ।
फलित, वि. (सं.) फलवत्, फलिन्, प्राप्तफल २. संपन्न, पूर्ण ।

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

—ज्योतिष, सं. पुं. (सं. न.) दैवज्ञविद्या ।
फली, सं. स्त्री. (हिं. फल) बीजपुटं, बीजकोषः ।
फलीता, सं. पुं. (अ. फतीलह्) वर्तिका, वर्तिः (स्त्री.) २. नालीकास्त्रवर्तिः, फली ।
फलीभूत, वि. (सं.>) सफल, फलप्रद ।
फलोदय, सं. पुं. (सं.) फलोत्पत्तिः (स्त्री.) २. लाभः ३. हर्षः ४. स्वर्गः ।
फ़सल, सं. स्त्री. (अ. फस्ल) शस्यं, धान्यं, अन्नम् २. ऋतुः ३. कालः ।
फ़साद, सं. पुं. (अ.) संक्षोभः, विप्लवः २. कलहः, उपद्रवः २. विकारः, विक्रिया ।
फ़सादी, वि. (फ़ा.) विद्रोहिन्, विप्लवकारिन् २. उपद्रविन्, कलहप्रिय ।
फ़साना, सं. पुं. (फ़ा.) आख्यायिका, लघु-, कथा ।
फ़साहत, सं. स्त्री. (अ.) भाषा-,सौष्ठवं-परिष्कृतिः (स्त्री.) ।
फ़सील, सं. स्त्री. (अ.) प्राकारः, वरणः, वप्रः, वप्रम् ।
फहरना, क्रि. अ. (सं. प्रसरणम्) प्रसृ (भ्वा. प. अ.), उद्ड्डी (भ्वा. आ. से.) ।
फहराना, क्रि. स., 'फहराना' के धातुओं के प्रेरणार्थक रूप ।
फाँक, सं. स्त्री. (सं. फलकम्>) खण्डं-ड्डः, शकलं-लः २. छुरिका ३. रेखा ।
फाँकना, क्रि. स. (हिं. फंकी) हस्ततलेन मुखे निक्षिप् (तु. प. अ.) । सं. पुं., चूर्णस्य मुखे निक्षेपणम् ।
फाँदना, क्रि. अ. (सं. फणनं>) कुद् (भ्वा. आ. से.) उत्प्लु (भ्वा. आ. अ.) २. उल्लंघ् (भ्वा. आ. से.) । सं. पुं., उत्प्लवनं, कूर्दनं, उल्लंघनम् ।
फाँस, सं. स्त्री. (सं. पाशः) बंधनम्, दे. 'फंदा' ।
फाँसना, क्रि. स. (हिं. फाँस) पाशयति (ना. धा.) २. वंच्-प्रतृ (प्रे.) ।
फाँसी, सं. स्त्री. (हिं. फाँस) उद्बंधनम् २. मृत्युदण्डः २. पाशः, बंधनम् ।
—देना, क्रि. स., उद्बध्य हन् (अ. प. अ.) ।
फ़ाइल, सं. स्त्री. (अं.) पत्रसंग्रहः २. पंक्तिः (स्त्री.) ३. सूत्रं, गुणः ।
फाका, सं. पुं. (अ. फाकह्) उपवासः, लंघितं, लंघनम् ।
फाग, सं. पुं. (हिं. फागुन) होलिकोत्सवः २. रक्तचूर्णभेदः ३. होलिकागीतम् ।
फागुन, सं. पुं. (सं. फाल्गुनः दे.) ।
फाटक, सं. पुं. (सं. कपाटः) अंगनद्वारं, बृहद्-द्वारम् २. लौहद्वारम् ३. दे. 'काँजी हौद' ।
फाड़ना, क्रि. स. (सं. स्फाटनम्) त्रश्च् (तु. प. से.), भिद्-छिद् (रु. प. अ.), विद् (प्रे.) २. खण्ड् (चु.), भंज् (रु. प. अ.) । सं. पुं., त्रश्चनं, भेदनं, छेदनं, विदारणं, विपाटनं २. खंडनं., भंजनम् ।
फानूस, सं. पुं. (फ़ा.) *दीप,-कोषः-पुटः ।
फ़ायदा, सं. पुं. (अ. फ़ाइदह्) लाभः, धना-गमः, आयः २. प्रयोजनसिद्धिः-ईप्सितप्राप्तिः (स्त्री.) ३. सुफलं, सुपरिणामः ४. नीरोगता ।
—मंद, वि., लाभदायक, उपकारक ।
फारखती, सं. स्त्री. (अ. फ़ारिग़+ख़ती) दायित्वत्यागः २. दायित्वत्यागपत्रम् ।
फारम, सं. पुं. (अं. फ़ार्म) प्रपत्रम् ।
फ़ारमूला, सं. पुं. (अं.) सूत्रम् ।
फ़ारस, सं. पुं. (फ़ा.) पारसि(सी)कः ।
फ़ारसी, सं. स्त्री. (फ़ा.) पारसी ।
—दाँ, वि. पारसीविद्, पारसीपंडित ।
फ़ारिग़, वि. (फ़ा.) लब्धावकाश, निर्वर्तित-व्यापारः, निवृत्त ।
—होना, मु., कार्यमुक्त-, लब्धावकाश भू २. शौचाय गम् ।
फ़ारेन, वि. (अं.) विदेशीय, परदेशीय, वै-पार,-देशिक ।
—आफ़िस, सं. पुं. (अं.) विदेश-परराष्ट्र,-कार्यालयः ।
—सेक्रेटरी, सं. पुं., विदेश-परराष्ट्र-,सचिवः ।
फ़ारेनर, सं. पुं. (अं.) विदेशीयः, परदेशीयः, वैदेशिकः, पारदेशिकः ।
फ़ारेनहाइट, सं. पुं., जर्मनवैज्ञानिकविशेषः ।
—थर्मामीटर, सं. पुं. (अं.) फ़ारेनहाइट-तापमापकम् ।
फ़ारेस्ट, सं. पुं. (अं.) वनं, जंगलम् ।
—डिपार्टमेंट, सं. पुं. (अं.) वन-जंगल,-विभागः ।
फाल, सं. स्त्री. (सं. पुं. न.) कुशिलं, कृषिका, हलोपकरणम् ।
फ़ालतू, वि. (हिं. फाल=टुकड़ा) उपयुक्तावः

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

शिष्ट, अतिरिक्त २. अनुपयोगिन्, निरर्थक ३. अकर्मण्य ।

फ़ालसा, सं. पुं. (फ़ा.) गिरिपीलु (न.), नीलमंडलं, परावतम्, परुषकम् ।

फ़ालिज, सं. पुं. (अ.) पक्षाघातः, गात्रसादः ।

फाल्गुन, सं. पुं. (सं.) फल्गुनः, तपस्यः, वत्सरान्तकः, फाल्गुनिकः २. अर्जुनः ३. अर्जुनवृक्षः ।

फावड़ा, सं. पुं. (सं. फालः>) आखानः-नं, टंग-गः ।

फ़ासफ़ोरस, सं. पुं. (अं.) स्फुरं., स्फूरकं, भास्वरम् ।

फ़ासला, सं. पुं. (अ. फ़ासलह्) अन्तरं, दूरता, विप्रकर्षः ।

फाहा, सं. पुं. (सं. फालम्>) स्नेहाक्त,-नूल-खंडः, पटखंडः ।

फिंकवाना, क्रि. प्रे., 'फेंकना' के प्रे. रूप ।

फिक्र, सं. स्त्री. (अ. फ़िक्र) चिन्ता, दुःखं, खेदः २. ध्यानं, विचारः ३. उपायचिन्ता ।

फिट, अव्य. (अनु.) धिक्, धिग्धिक् ।

—**कार**, सं. स्त्री. (अनु. फिट+सं. कारः) धिक्कारः, धिक्क्रिया २. अभिशापः, अभिशपनम् ।

फ़िट, वि. (अं.) यथार्ह, उपपन्न । सं. पुं., मूर्च्छा, भ्रमिः (स्त्री.) ।

फिटाकरी, सं. स्त्री. (सं. स्फटिकी) स्फटी, श्वेता, शुभ्रा, फाटकी, तुवरी, स्फटिका ।

फिटन, सं. स्त्री. (अं.) चतुश्चक्रोऽश्वयानभेदः ।

फिरंग, सं. पुं. ((अं. फ्रांक>) युरोप-गौरांग,-देशः २. विदेशः ३. उपदंशरोगः ।

फिरंगी, सं. पुं. (हिं. फिरंग) फिरंग-युरोप-वास्तव्यः-वासिन्, गौरांगः ।

फिर, क्रि. वि. (हिं. फिरना) पुनर्, भूयस्, द्विः (दोनों अव्य.) २. अनन्तरं, ततः, तत्पश्चात् ३. अतिरिक्तम् ।

—**फिर**, क्रि. वि., पुनः पुनः, वारं वारं, असकृत्, उभयोभयः ।

फिरका, सं. पुं. (अ.) जातिः (स्त्री.), सम्प्रदायः ।

फिरना, क्रि. अ. (हिं. फेरना) इतस्ततः अट्-विचर्-भ्रम् (भ्वा. प. से.) २. वायुं सेव् (भ्वा. आ. से.) ३. प्रत्यागम्, निवृत् (भ्वा. आ. से.) । सं. पुं., भ्रमणं, विचरणं ४. वायु-सेवनम् ३. प्रत्यागमनं, निवर्तनम् ।

फिरनी, सं. स्त्री. (फा. फ़ीरीनी) पायसभेदः ।

फिराना, क्रि. स. (हिं. फिरना) इतस्ततः प्रेर् (प्रे.) २. प्रत्यावृत् (प्रे.) ३. चक्रवत् भ्रम् (प्रे.) ।

फिल्टर, सं. पुं. (अं.) पावम् ।

—**पेपर**, सं. पुं. (अं.) पावपत्रम् ।

फिल्टरेशन, सं. पुं. (अं.) पावपत्रम् ।

फिसलन, सं. स्त्री. (हिं. फिसलना) निपत्या, चिक्कणस्थानं, पिच्छिलपथः ।

फिसलना, क्रि. अ. (सं. प्रस्खलनम्) (पिच्छिलभूमौ) प्रस्खल् (भ्वा. प. से.) । सं. पुं., प्रस्खलनम् ।

फीका, वि. (सं. अपक्व>?) निस्स्वाद, नीरस २. धूमिल, मलिन, ३. निश्रम ४. व्यर्थ, निष्फल ।

फ़ीता, सं. पुं. (पुर्त.) पट्टिका ३. बंधन-सूत्रम् ।

फ़ीरोजा, सं. पुं. (फ़ा.) वैदूर्यं, हरिन्नीलरत्नम् ।

फ़ीरोज़ी, वि. (फ़ा.) हरिन्नील ।

फीस, सं. स्त्री. (अं. बहु.) शुल्कः-कम्, दक्षिणा ।

फुँकना, क्रि. अ. (हिं. फूंकना) दह्, भस्मसात् भू ।

फुँकनी, सं. स्त्री. (हिं. फूंकना) धमनी २. भस्त्रा ।

फुंकार, सं, पुं. (अनु. फुं.+सं. कारः) फूत्कारः २. सर्पनिःश्वासः ३. सक्रोधं निःश्वसनम् ।

फुँकारना, क्रि. अ. (हिं. फुंकार) फूत्कृ, सर्पवत् श्वस् (अ. प. से.) ।

फुंसी, सं. स्त्री. (सं. पनसिका>) पिटि(ट)का, वरंडः, वरंडकः ।

फ़ुट, सं. पुं (अं.) गजतृतीयांशः, चरणमानम् । २. चरणम्, पादः ।

फुटकर, वि. (सं. स्फुट>) अयुग्म, विषम २. पृथक् स्थित, संबंधरहित ३. विविध, बहुप्रकार ४. अल्पाल्प, स्तोकस्तोक ।

फ़ुटनोट, सं. पुं. (अं.) पादटिप्पणी ।

फ़ुटपाथ, सं. पुं. (अं.) पदपथः ।

फ़ुटबाल, सं. पुं. (अं.) पदकन्दुकः २. पदकन्दुक-क्रीडा ।

फुदकना, क्रि. अ. (अनु.) उप्लुत्य गम्

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

(भ्वा. प. अ.) २. नृत् (दि. प. सें.)। सं. पुं. उत्प्लवनं, नर्तनम्।

फुनगी, सं. स्त्री. (सं. स्फुटनम्)-शाखा-विटप,-अग्रपल्लवः-अग्रांकुरः (बहु०)।

फुप्फुस, सं. पुं. (सं.) दे. 'फेफड़ा'।

फुफकार, सं. पुं. (अनु.) दे. 'फुंकार'।

फुफेरा, वि., (हिं. फूफा) पैतृष्वसेय, पि (पै) तृष्वस्रीय।

फ़ुरकत, सं. स्त्री. (अ.). वियोगः, विरहः।

फुरती, सं. स्त्री. (सं. स्फूर्तिः) शीघ्रता, क्षिप्रकारिता।

फुरतीला, वि. (हिं. फुरती) शीघ्र-क्षिप्र,-कारिन्, स्फूर्तिमत्।

फुरना, क्रि. अ. (सं. स्फुर्) प्रादुर्भू, प्रकटीभू २. कंप्-वेप् (भ्वा. आ. से.) ३. प्रकाश् (भ्वा. आ. से.) ४. फुरफुरायते (ना. धा.)।

फुरसत, सं. स्त्री. (अ.) अवकाशः, रिक्तसमयः २. अवसरः, समयः।

फुलका, सं. पुं. (हिं. फूलना) लघु-तनु,-रोटिका २. विस्फोटः, पिटिका।

फुलझड़ी, सं. स्त्री. (हिं. फूल+झड़ना) फुल्लक्षोरेणी २. कलहकारिणी वार्ता।

फुलवाड़ी, सं. स्त्री. (सं. फुल्लवाटी) पुष्प-कुसुम,-वाटी-वाटिका, उद्यानम् २. वरयात्रायाः कर्णल-निर्मिता फुल्लवाटी ३. पुत्रकलत्रादयः।

फुलाना, क्रि. स., व. 'फूलना' के प्रे. रूप।

फुलेल, सं. पुं. (हिं. फूल+तेल) सुगन्धितैलम्।

फुल्ल, वि. (सं.) विकसित, स्फुटित, उद्भिद्।

फुसफुसा, वि. (अनु. फुंस) शिथिल, श्लथ २. भंगुर, भिदुर ३. अशक्त, दुर्बल।

फुसलाना, क्रि. स. (हिं. फिसलाना) प्रतृ-वंच् (प्रे.), विप्रलभ् (भ्वा. आ. अ.)।

फुहार, सं. स्त्री. (सं. फूत्कारः>) शीकरवर्षः, मन्दवृष्टिः (स्त्री.)।

फुहारा, सं. पुं. (हिं. फुहार) जल-धारा,-यन्त्रम् २. जलोत्क्षेपः।

फूँक, सं. स्त्री. (अनु. फू) फूत्कारः, ध्मानम् २. मुखमारुतः, श्वासः।

—मारना, क्रि. स., फूत्कृ, ध्मा (भ्वा. प. अ.)।

फूँकना, क्रि. स. (हिं. फूँक) दह् (भ्वा. प. अ.), भस्मसात् कृ २. फूत्कृ।

फूँकनी, सं. स्त्री., दे. 'फुंकनी'।

भुलावा, सं. पुं. (हिं. भुलाना) प्र-,वंचना, प्रतारणा, छलम्।
—देना, क्रि. स., प्रतृ (प्रे.), वंच् (चु.)।
भुवः, अव्य. (सं.) आकाशः-शं, अंतरिक्ष-लोकः, द्वितीयलोकः २. द्वितीयमहाव्याहृतिः (स्त्री.)।
भुवन, सं. पुं. (सं. न.) जगत् (न.), जगती, सृष्टिः (स्त्री.), संसारः २. जलं ३. जनः, लोकः ४. चतुर्दश-भुवनानि (न. बहु.)-लोकाः।
त्रि—, सं. पुं. (सं. न.) त्रिलोकी, लोकत्रयम्।
भुशुंडि, सं. पुं. (सं.) काकभुशुंडिः। (सं. स्त्री.) भुशुंडी, अस्त्रभेदः।
भुस, सं. पुं., दे. 'भूसा'।
भुसी, सं. स्त्री., दे. 'भूसी'।
भूँकना, क्रि. अ. (अनु.) दे. 'भौंकना' (१-२)।
भूँचाल, (सं. भूचालः) मही-, भू-कंपः-प्रकंपः-चलनं, क्ष्मायितम्।
भूँजना, क्रि. स., दे. 'भूनना' (१-२)।
भूँडोल, सं. पुं. दे. 'भूँचाल'।
भू, सं. स्त्री. (सं.) धरणी, धरा, दे. 'पृथिवी' २. स्थानं, स्थलम्।
—कंप, सं. पुं. (सं.) दे. 'भूँचाल'।
—चाल, —डोल, } दे. 'भूँचाल'।
—तल, सं. पुं. (सं. न.) धरातलं २. पृथिवी।
भूख, सं. स्त्री. (सं. बुभुक्षा) क्षुधा,क्षुध् (स्त्री.), जिघत्सा, अश्नाया, अश्नायितं २. आवश्यकता ३. अभिलाषः।
—का अभाव, सं. पुं., अरुचिः (स्त्री.), भक्त,-उपघातः-द्वेषः।
—प्यास, सं. स्त्री., क्षुधापिपासे, क्षुत्तृषे।
भूखों मरना, मु., आहाराभावात् मृ (तु. आ. अ.)-अवसद् (भ्वा. प. अ.)-नश् (दि. प. वे.)।
—लगना, क्रि. अ., क्षुध् (दि. प. अ., चतुर्थी के साथ), बुभुक्ष् (सन्नंत, बुभुक्षति-ते) क्षुधया अद्-पीड् (कर्म.)।

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

भूखा, वि. (हिं. भूख) क्षुधा,-आविष्ट-आतुर-आर्त्त-अन्वित-पीडित, क्षुधित, जिघत्सु, बुभुक्षु, अन्नार्थिन्, अश्नायित २. इच्छुक ३. दरिद्र।

—नंगा, वि., दीन, दरिद्र, निर्धन, अकिंचन।

—प्यासा, वि., क्षुत्पिपासित, क्षुत्तृषार्त्त।

भूखे प्यासे, मु., *निरन्नपानं, अन्नपानं विना।

भूगर्भ, सं. पुं. (सं.) धरा,-अंतरं-अभ्यंतरं-गर्भः।

—गृह, सं. पुं. (सं. न.) भू-गेहं-गृहम्।

—शास्त्र, सं. पुं. (सं. न.) भूतत्त्व,-शास्त्रं-विद्या-विज्ञानम्।

—शास्त्रवेत्ता, सं. पुं. (सं.-तृ) भूतत्त्वज्ञः, भूगर्भशास्त्रज्ञः।

भूगोल, सं. पुं. (सं.) भूमंडलं, भुवनकोषः २. भूगोलः,-विद्या-शास्त्रं, भूपृष्ठविद्या।

—वेत्ता, सं. पुं. (सं.-तृ.) भूगोलशास्त्रज्ञः।

भूचक्र, सं. पुं. (सं. न.) पृथ्वीपरिधिः २. विषुवद्रेखा ३. अयनवृत्तं ४. क्रांतिवृत्तम्।

भूचर, सं. पुं. (सं.) स्थलचरः २. शिवः।

भूत, सं. पुं. (सं. न.) पृथ्व्यप्तेजोवाय्वाकाश-पंचकं २. जड़चेतनपदार्थः, चराचरवस्तु (न.) ३. प्राणिन्, जीवः ४. भूत-अतीत,-कालः ५. शवः ६. क्रियारूपभेदः (व्या.) ७. रुद्रानुचराः, पिशाचाः ८. मृतस्य आत्मन् (पुं.) ९. पिशाचः, प्रेतः, रक्षस् (न.), राक्षसः। वि. (सं.) गत, वि-,अतीत, २. युक्त ३. सदृश ४. परिणत (अब प्रायः समासांत में)।

—उतारना, क्रि. स., भूतान् निष्कस् (प्रे.)-अपनुद् (तु. प. अ.)-अपस् (प्रे.)।

—काल, सं. पुं. (सं.) पूर्वभूत-अतीत-, काल:-समयः।

—नाथ, —भावन, } सं. पुं. (सं.) शिवः।

—पूर्व, वि. (सं.) प्राक्तन, पूर्वतन, पौर्वेक।

—संचार, सं. पुं. (सं.) भूतावेशः।

—चढ़ना या सवार होना, मु., अतिनिर्बंधेन अव-स्था (भ्वा. आ. अ.) २. अत्यर्थं कुप् (दि. प. से.)।

भूतत्त्वविद्या, सं. स्त्री. (सं.) दे. 'भूगर्भविद्या'।

भूतात्मा, सं. पुं. (सं.-त्मन्) जीवात्मन्, देहिन् २. शरीरं ३. परमेश्वरः ४. विष्णुः ५. शिवः।

भूतानुकंपा, सं. स्त्री. (सं.) जीव-भूत-प्राणि-, दया-कृपा-अनुकम्पा।

भूताविष्ट, वि. (सं.) पिशाच-भूत,-ग्रस्त-पीडित-आक्रांत।

भूतावेश, सं. पुं. (सं.) भूत,-संचारः-क्रांतिः (स्त्री.), पिशाचावेशः।

भूति(त)नी, सं. स्त्रीं. (हिं. भूत) शाकिनी, डाकिनी, राक्षसी, पिशाची-चिका।

भूदेव, सं. पुं. (सं.) ब्राह्मणः, भूसुरः।

भूधर, सं. पुं. (सं.) गिरिः, पर्वतः।

भूनना, क्रि. स. (सं. भर्जनं>) भृज् (भ्वा. आ. से.), भ्रस्ज् (तु. उ. अ.), ईषत्तापेन प्लुष् (भ्वा. प. से.)-शुष् (प्रे.)।

भूप, सं. पुं. (सं.) भूपतिः, भूपालः, नृपः, राजन् (पुं.)।

भूपति, भूपाल, } सं. पुं. (सं.) नृपः, दे. 'राजा'

भूभल, सं. स्त्री. (सं. भूः+हिं. बलना, उष्ण,-भासितं-भस्मन् (न.)-बालुका।

भूमंडल, सं. पुं. (सं. न.) पृथिवी, धरा, धरित्री।

भूमिका, सं. स्त्री. (सं.) प्रस्तावना, उपोद्घातः, अवतरणिका, आमुखं, मुखबंधः २. वेशांतर-परिग्रहः।

भूमि, सं. स्त्री. (सं.) धरा, धरित्री, दे. 'पृथिवी'।

—ज, वि. (सं.) भूमिजात।

—जा, सं. स्त्री. (सं.) जानकी, सीता।

—पुत्र, सं. पुं. (सं.) मंगलग्रहः, भूसुतः।

—सुता, सं. स्त्री. (सं.) सीता, वैदेही।

भूय, अव्य. (सं. भूयस्) पुनः, पुनरपि।

भूरा, वि. (सं. बभ्रु) धूलि-मृद्,-वर्ण-रंग २. कपिल-श, पिंग, पिंगल। सं. पुं., १-२ बभ्रु-पिंगल,-वर्णः-रंगः ३. शर्करा, सिता।

भूरि, वि. (सं.) अधिक, बहु, प्रचुर २. महत्, गुरु।

भूल, सं. स्त्री. (हिं. भूलना) विस्मरणं, विस्मृतिः (स्त्री.) २. दोषः, अपराधः ३. अशुद्धिः (स्त्री.), स्खलितं, स्खलनं २. मोहः, भ्रमः।

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

—चूक, सं. स्त्री., प्रमादः, अपराधः, त्रुटिः (स्त्री.), स्खलितम्।
—भुलैयाँ, सं. स्त्री., सुगहनस्थानं, भ्रांतिचक्रं २. संशय-संदेह,-आस्पदम्।
भूलना, क्रि. स. (प्रा. मुल्लइ) विस्मृ (भ्वा. प. अ.) २. स्खल् (भ्वा. प. से.), प्रमद् (दि. प. से.) ३. त्यज् (भ्वा. प. अ.), हा (जु. प. अ.)। क्रि. अ., विस्मृ (कर्म.) २. भ्रंश्-नश् (दि. प. से.), च्यु (भ्वा. आ. अ.) ३. गर्वित-अवलिप्त (वि.) भू ४. कम् (भ्वा. आ. से.), स्निह् (दि. प. से., सप्तमी के साथ)। सं. पुं., विस्मरणं, विस्मृतिः (स्त्री.) २. प्रमादः, स्खलितं ३. भ्रंशः, नाशः।
भूलने योग्य, वि., विस्मर्तव्य, विस्मरणीय।
भूलनेवाला, सं. पुं., दे. 'भुलक्कड़'।
भूला-भटका, वि., पथ-मार्ग,-भ्रष्ट।
भूला हुआ, वि., विस्मृत, स्मृतिपथात् अपेत।
भूलोक, सं. पुं. (सं.) मर्त्यलोकः, भूमिः (स्त्री.)।
भूशायी, वि. (सं.-यिन्) धराशायिन्, मृत, २. भूमिशयन ३. भूमौ पतित।
भूषण, सं. पुं. (सं. न.) आभरणं, अलंकारः, आ-वि-,भूषणं, दे. 'गहना'।
भूषणीय, वि. (सं.) भूष्य, अलंकार्य, मंडनीय।
भूषा, सं. स्त्री. (सं.) अलंक्रिया, परिष्-,कारः-क्रिया, प्रसाधनं, नेपथ्यम्।
भूषित, वि. (सं.) अलंकृत, परिष्कृत, प्रसाधित, मण्डित।
भूसा, सं. पुं. (सं. बुसं>) पलालः-लं, यवसं, धान्यतृणं, पलः।
भूसी, सं. स्त्री. (हिं. भूसा) दे. 'भूसा' २. बुषं, बुसं, तुषः-सः, कडंगरः, धान्यत्वच् (स्त्री.)।
भू सुर, सं. पुं. (सं.) विप्रः, ब्राह्मणः।
भृंग, सं. पुं. (सं.) भ्रमरः, षट्पदः २. कीटभेदः।
—राज, सं. पुं. (सं.) पक्षिभेदः २. केशरंजनः, केश्यः, कुंतलवर्द्धनः, क्षुपभेदः।
भृकुटी, सं. स्त्री. (सं.) दे. 'भौंह'।
भृगु, सं. पुं. (सं.) मुनिविशेषः २. परशुरामः।
—नाथ, सं. पुं. (सं.) परशुरामः, भृगुरामः।
भृत, वि. (सं.) पूरित, पूर्ण, निचित २. पालित, पोषित।
भृतक, सं. पुं. (सं.) वैतनिकः, कर्मकरः।
भृतकाध्यापक, सं. पुं. (सं.) सवेतनः शिक्षकः।
भृति, सं. स्त्री. (सं.) वेतनं, भृत्या २. कर्मण्या, तुलिका, भरण्यं, भर्मण्या ३. मूल्यं ४. पूरणं, भरणं ५. पालनं ६. वैतनिकता।
भृत्य, सं. पुं. (सं.) सेवकः, दे. 'नौकर'।
भृत्या, सं. स्त्री. (सं) सेविका, दासी २. दे. 'भृति'।
भृश, क्रि. वि. (सं. भृशं) अत्यंतं, अत्यधिकम्।
भेंगा, वि. (देश.) केकर, केदर,टेर,टगर, वलिर।
—पन, सं. पुं., तिर्यग्दृष्टिः (स्त्री.), टेरता इ.।
भेंट, सं. स्त्री. (सं. भिद्>) सं(समा)गमः, संमिलनं, साक्षात्कारः २. उपहारः, उपायनं, प्राभृतं-तकं, प्रदेशनम्।
—करना, क्रि. स., संमिल् (तु. प. से.), अभि-सं-मुखीभू, सं-इ (अ. प. अ.) २. उत्सृज् (तु. प. अ.), उपह (भ्वा. प. अ.), उपढौक् (प्रे.), ऋ (प्रे. अर्पयति)।
भेक, सं. पुं. (सं.) दे. 'मेंढक'।
भेख, सं. पुं. दे. 'वेष'।
भेजना, क्रि. स. (सं. व्रजनं>) सं.-,प्रेष् (प्रे.), प्र-हि (स्वा. प. अ.), प्रस्था (प्रे.), विसृज् (तु. प. अ.), सं-,प्रेर् (प्रे.)। सं. पुं., सं-, प्रेषणं-प्रेरणं, विसर्जनं, प्रस्थापनं,प्रहितिः (स्त्री.)।
भेजने योग्य, वि., प्रेषयितव्य, प्रस्थाप्य, प्रहयणीय।
भेजनेवाला, सं. पुं., प्रेषकः, प्रहेतृ।
भेजा हुआ, वि., प्रेषित, विसृष्ट, प्रहित।
भे(भि)जवाना, क्रि. प्रे., ब. 'भेजना' के प्रे. रूप।
भेजा, सं. पुं. (देश.) दे. 'मग़ज़'।
भेड़, सं. स्त्री. (सं. मेडकः>) मेषी, एडका, अविला, उरणी, उरा, कुररी, जालकिनी, अविः (स्त्री.), रुजा (पुं., दे. 'भेड़ा') २. मूढः, मूढधीः, ऋजुः।
भेड़ना, क्रि. स., दे. 'बंद करना'।
भेड़ा, सं. पुं. (सं. मेड़ः) अविः, उरणः, उरभ्रः, ऊर्णायुः, एडकः, मेढ्रः, हुडः, रो(लो)मशः, मेडुः, मेडकः।
भेड़िया, सं. पुं. (हिं. भेड़) वृकः, कोकः, ईहामृगः।
—धसान, सं. पुं., अंध,-अनुकरणं-अनुसरण-अनुवर्तनम्।

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

भेड़ी, सं. स्त्री., दे. 'भेड़'।
भेद, सं. पुं. (सं.) छेदः, दे. 'भेदन' २. शत्रु-वशीकरणोपायभेदः, उपजापः ३. रहस्यं, गूढाशयः ४.अन्तरं, विशेषः ५. प्रकारः, जातिः (स्त्री.)।
—खोलना, क्रि. स., रहस्यं विवृ (स्वा.उ.से.)।
—पाना, क्रि. स., गुह्यं बुध् (भ्वा. प. से.)।
—बुद्धि, सं. स्त्री. (सं.) विश्लेषः, विच्छेदः, ऐक्याभावः।
—भाव, सं. पुं. (सं.) अंतरं, विशेषः।
—लेना, क्रि. स., गोप्यं ज्ञा (सन्नंत, जिज्ञासते)।
भेदक, वि. (सं.) भेत्तृ, छेत्तृ २. रेचक।
भेदन, सं. पुं. (सं. न.) विदारणं, छेदनं, वेधनं, व्यधः-धनं, त्रोटनम्। वि., भेदक २. रेचक।
भेदिया, भेदी,[1] सं. पुं. (सं. भेदः>) दे.'जासूस' २. रहस्यविद् (पुं.)।
भेदी[2], वि. (सं. भेदिन्) छेदक, विदारक।
भेद्य, वि. (सं.) छेद्य, विदारणीय।
—रोग, सं. पुं. (सं.) शल्यचिकित्स्यो रोगः।
भेरी, सं. स्त्री. (सं.) भेरिः (स्त्री.), दुंदुभिः, डिंडिमः, पटहः, ढक्का।
भेली, सं. स्त्री. (देश.) गुडपिंडः-डम्।
भेष, स. पुं., दे. 'वेष'।
भेषज, सं. पुं. (सं. न.) औषधं, अगदः, भैषज्यम्।
भेस, सं. पुं., दे. 'वेष'।
भैंस, सं. स्त्री. (सं. महिषी) मंदगमना, महा-क्षीरा, पयस्विनी, कलुषा।
भैंसा, सं. पुं. (सं. महिषः) अश्वारिः, कलुषः, कासरः, कृष्णशृंगः, गद्गदस्वरः, जर(रं)तः, यमरथः, लुलापः (दः), वीरस्कंधः, सैरिभः, हेरंबः।
भैया, सं. पुं., दे. 'भाई'।
भैरव, सं. पुं. (सं.) शंकरः, शिवः २. शिवगण-भेदः ३. रागभेदः। वि., भीम, भीषण, भयङ्कर।
भैरवी, सं. स्त्री. (सं.) चामुंडा, देवीविशेषः २. रागिणीभेदः।
भैरों, सं. पुं., दे. 'भैरव'।
भोंकना, क्रि. स. (अनु. भक) सहसा शस्त्रा-दिकं निविश् (प्रे.) व्यध् (दि. प. अ.) २. अकस्मात् आहन् (अ. प. अ.)।
भोंडा, वि., दे. 'भद्दा'।
भोंदू, वि. दे., 'बुद्धू'।
भोंपा, सं. पुं. (अनु. भों) दे. 'भोंपू' २. मूर्खः, अज्ञः।
भोंपू, सं. पुं. (अनु. भों) काहलः-लं-ला, मुख-वाद्यभेदः।
भो, अ० (सं.) हे, अरे, अयि।
भोक्तव्य, वि. (सं.) दे० 'भोग्य'।
भोक्ता, वि. (सं. भोक्तृ) खादक, भक्षक २. विलासिन्, विषयिन् ३. प्र-उप,-योक्तृ। सं. पुं., पतिः।
भोग, सं. पुं. (सं.) सुख-दुःखादीनामनुभवः-२. सुखं ३. दुःखं ४. रतिः (स्त्री.), संभोगः ५. सर्पफणः-णं-णा ६. सर्पः ७. धनं ८. गृहं ९. भक्षणं १०. शरीरं ११. परिमाणं १२. विपाकः, कर्मफलं १३. भुक्तिः (स्त्री.) (क्रम्ज्ञा) १४. नैवेद्यं १५. भाटकः-कम्।
—लगाना, क्रि. स., देवाय नैवेद्यं ऋ (प्रे. अर्पयति) २. भक्ष् (चु.)।
—विलास, सं. पुं. (सं.) आमोदप्रमोदाः (पुं. बहु.), सुखं, हर्षः।
भोगना, क्रि. सं. (सं. भोगः>) दे. 'भुगता' (१-२)।
भोगी, वि. (सं-गिन्) भोग-विषय,-आसक्त-लंपट, विलासिन् २. भक्षक।
भोग्य, वि. (सं.) उपयोक्तव्य, उपयोगिन् २. भोगार्ह, उपभोक्तव्य ३. भक्ष्य। सं. पुं. (सं. न.) धनं २. धान्यम्।
भोज[1], सं. पुं. (सं.) धारानगरस्य नृपविशेषः।
भोज[2], सं. पुं. (सं. भोजनं) भक्ष्यं, आहारः २. सह-सं.,-भोजनं, सन्निधः (स्त्री.)।
भोजन, सं. पुं. (सं. न.) भक्षणं, खादनं, अशनं, आस्वादनं २. खाद्यं, भोज्यं, भक्ष्यम्।
—करना, क्रि. स., भुज् ((रु. आ. अ.), भक्ष् (चु.)।
—भट्ट, सं. पुं. (सं. भोजनभटः) अत्याहारिन्, अक्षरः, घस्मरः।
—शाला, सं. स्त्री. (सं.) भोजन,-आलयः-आगारः(रं.) २. पाकशाला, महानसः-सम्।
भोजनाच्छादन, सं. पुं. (सं. न.) अन्नवस्त्रं, अशनवसनम्।
भोजपत्र, सं. पुं. (सं.) भूर्जवृक्षः, बहुलवल्कलः, छत्रपत्रः, मृदु-बहु,-त्वच् (पुं.)।

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

भोज्यं, वि. (सं.) भक्ष्य, खाद्य, अभ्यवहार्य । सं. पुं., भक्ष्यपदार्थः ।

भोर, सं. पुं. (सं. विभावरी>) उषा, उषस् (स्त्री.) वि-प्र,-भातं, विहानः-नम् ।

भोला, वि. (हिं. भूलना) सरल, ऋजु, निष्कपट, निश्छल २. मूर्ख, जड ।

—नाथ, सं. पुं. (हिं.+सं.) शिवः ।

—पन, सं. पुं., आर्जवं, सरलता, निर्व्याजता २. मौर्ख्यं, अज्ञता ।

—भाला, वि., निष्कपट, सरल, ऋजु ।

भौं, सं. स्त्री., दे. 'भौंह' ।

भौंकना, क्रि. अ. (अनु. भौं भौं) वुक्क् (भ्वा. प. से., चु.), भष् (भ्वा. प. से.) २. प्र-,जल्प् (भ्वा. प. से.) । सं. पुं., वुक्कनं, भषणं २. जल्पः-पनम् ।

भौंतुवा, (हिं. भौंना=घूमना) तैलिक-तैलकार,-वृषः-वृषभः । २. कीटभेदः ३. हस्तरोगभेदः ।

भौंर, सं. पुं. (सं. भ्रमरः) दे. 'भ्रमर' २. जलावर्तः, भ्रमिः (स्त्री.) ।

भौंरा, सं. पुं. (सं. भ्रमरः) दे. 'भ्रमर' २. भ्रमरकः-कं, क्रीडनकभेदः ३. भू,-गोहं-गृहम् ।

भौंरी, सं. स्त्री. (सं. भ्रमरी) षट्पदी, मधुकरी २. घोटकादिशरीरस्थं रोम,-चक्रं-मंडलं-वर्तुलं ३. वैवाहिक,-परिक्रमः-प्रदक्षिणा ४. आवर्तः, जलगुल्मः ।

भौंह, सं. स्त्री. [सं. भ्रूः (स्त्री.)] चिल्लिका, भ्रूलता, नयनोद्ध्ववर्ति रोमराजी ।

—चढ़ाना या तानना, मु., कुप् (दि. प. से.), क्रुध् (दि. प. अ.) २. भ्रू(भ्रू)कुटीं बंध् (क्र्. प. अ.)-रच् (चु.) ।

भौगोलिक, वि. (सं.) भूगोल,-विषयक-सम्बन्धिन् ।

भौंचक, भौचक्का, वि. (सं. भयचकित>) विस्मयापन्न, विस्मित, ससाध्वस, भयाभिभूत, स्तंभित ।

भौजाई, भौजी, सं. स्त्री. (सं. भ्रातृजाया) दे. 'भाभी'(२) ।

भौत, वि. (सं.) भौतिक, भूतनिर्मित २. पैशाचिक ३. भूताविष्ट । (सं. पुं.) भूतपूजकः २. भूतयज्ञः ।

भौतिक, वि. (सं.) भूतात्मक, भूतमय, आधिपांच,-भौतिक २. पार्थिव ३. शारीरिक, दैहिक, दैव्य ।

भौम, वि. (सं.) पार्थिव, भौमिक २. भूमिज । सं. पुं., मंगलग्रहः, कुजः ।

—वार, सं. पुं. (सं.) मंगलवासरः ।

भौमिक, वि., दे. 'भौम' वि. । सं. पुं., क्षेत्र,-पतिः-स्वामिन् ।

भौमी, सं. स्त्री. (सं.) जानकी, सीता, वैदेही ।

भ्रंश, सं. पुं. (सं.) अधः-अव,-पतनं-पातः २. वि-,नाशः = ध्वंसः ३. पलायनम् ।

भ्रंशित, वि. (सं.) अधःपातित २. वंचित ।

भ्रम, सं. पुं. (सं.) भ्रांतिः (स्त्री.), माया,-मिथ्या,-मतिः (स्त्री.) ज्ञानं, आभासः, अविद्या २. संशयः, संदेहः ३. मूर्च्छाभेदः ४. मूर्च्छा ५. कुलालचक्रं ६. भ्रमणं ७. भ्रमद्वस्तु (न.) ।

भ्रमण, सं. पुं. (सं. न.) पर्यटनं, विचरणं, परिभ्रमणं २. गतागतं ३. यात्रा ।

—करना, क्रि. अ., पर्यट्-विचर् (भ्वा. प. से.), परिक्रम् (भ्वा. दि. प. से.) ।

भ्रमात्मक, वि. (सं.) भ्रमोत्पादक २. संदिग्ध ।

भ्रमर, सं. पुं. (सं.) षट्पदः, द्विरेफः, मधु,-करः-पः-लिह् (पुं.), अलिः, अलिन्, भृङ्गः, शिलीमुखः, पुष्पंधयः, चंचरीकः २. कामुकः ।

भ्रमरी, सं. स्त्री. (सं.) षट्पदी, मधुकरी, शिलीमुखी २. जतुकालता, पुत्रदात्री ३. पार्वती ४. मृगीरोगः, भ्रामरम् ।

भ्रमी, वि. (सं.-मिन्) भ्रांत, भ्रमविशिष्ट, मिथ्याज्ञानिन् २. चकित, विस्मित ३. शंकाशील, साशंक ।

भ्रष्ट, वि. (सं.) अधः-अव,-पतित, अव-,गलित-स्रस्त, च्युत २. विकृत,दूषित, सदोष ३. दुर्वृत्त, दुराचार-रिन् ।

—करना, क्रि. स., भ्रंश्-दुष्-आधृष् (प्रे.) च्यु (प्रे.) २. सतीत्वं नश् (प्रे.) ३. मलिनी-कलुषी-कृ ।

—होना, क्रि. अ., भ्रश् (दि. प. से.), भ्रंश् (भ्वा. आ. से.) २. दुष् (दि. प. अ.), विकारं आपद् (दि. आ. अ.) ३. मलिनी-कलुषी-भू ४. क्षीणवृत्त (वि.) भू ।

भ्रष्टा, सं. स्त्री. (सं.) कुलटा, पुंश्चली ।

भ्रांत, वि. (सं.) भ्रांति-भ्रम,-विशिष्ट २. व्याकुल, विह्वल ३. उन्मत्त ४. पथभ्रष्ट ५. आवर्तित, चक्रवत् चालित ।

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

भ्रांति, सं. स्त्री. (सं.) भ्रमः, मोहः, आभासः, मिथ्याज्ञानं, मतिभ्रमः, माया २. संदेहः, संशयः ३. स्खलितं, प्रमादः, त्रुटिः (स्त्री.) ४. भ्रमणं ५. मंडलाकारगतिः (स्त्री.) ६. अलंकारभेदः ।

भ्राता, सं. पुं. (सं. भ्रातृ) सोदरः, दे. 'भाई' ।

भ्रातृभाव, सं. पुं.(सं.) भ्रातृत्वं, दे. 'भाईचारा' ।

भ्रात्रीय, वि. (सं.) भ्रातृक, भ्रात्रेय ।

भ्रुकुटि-टी, सं. स्त्री. (सं.) भ्रूकुटी-टिः, भृकुटी-टिः (सब स्त्री.), भ्रू,-विक्षेपः-भंगः-बंधः-संकोचः २. दे. 'भौंह' ।

भ्रू, सं. स्त्री. (सं.) दे. 'भौंह' ।

—**भंग**, सं. पुं. (सं.) दे. 'भ्रुकुटि' (१) ।

भ्रूण, सं. पुं. (सं.) गर्भः, गर्भस्थशिशुः ।

—**हत्या**, सं. स्त्री. (सं.) गर्भ,-पातनं-स्रावणं, गर्भस्थशिशुघातः ।

म

म, देवनागरीवर्णमालायाः पंचविंशो व्यंजनवर्णः, मकारः ।

मंगता, सं. पुं. (हिं. मांगना) दे. 'भिखारी' ।

मंगन, मंगनी, } सं. स्त्री. (हिं. मांगना) वाग्दानं, विवाहप्रतिज्ञा । २. याच्ञा, याचनं-ना ।

मंगल, सं. पुं. (स. न.) कल्याणं, कुशलं,भद्रं, हितं, क्षेमं, भव्यं, प्र-,शस्तं, अरिष्टं, शिवं, भद्रं ३. अभीष्टसिद्धिः (स्त्री.) ३. ग्रहविशेषः, कुजः, भौमः, अंगारकः, महीसुतः, वक्रः, लोहितांगः, आवनेयः ४. मंगलवारः । वि., (सं.) शुभ,, शिव; भद्र, मंगल्य, शिवं-शुभं,-कर, मांगलिक ।

—**काम**, वि. (सं.) शुभ-हित-मंगल,-चिन्तक-इच्छुक-कामिन् ।

—**कामना**, सं. स्त्री. (सं.) हितचिन्तनम्, शुभ,-इच्छा-कामना ।

—**कारक**, वि. (सं.) कल्याण-मंगल,-कारिन्-प्रद, दे. 'मंगल' वि. ।

—**क्षौम**, सं. पुं. (सं. न.) उत्सवोचित-कौशेयवस्त्रम् ।

—**गान**, सं. पुं. (न.) मांगल्य-शुभ,- गीत-गीतिः (स्त्री.)-गानम् ।

—**वार**, सं. पुं. (सं.) मंगल-भौम,-वासरः ।

—**सूत्र**, सं. पुं. (न.) हरिद्रारंजितवैवाहिक-सूत्रम् ।

मंगलाचरण, सं. पुं. (सं. न.) ग्रंथारम्भे कल्याणप्रार्थना ।

मंगलाचार, सं. पुं. (सं.) मांगलिक,-संस्कार:-कृत्यं २. आशीर्वादः ३. स्तवः ।

मंगलामुखी, सं. स्त्री. (सं.) दे. 'वेश्या' ।

मंगली, वि. (सं. मंगलः) अमांगलिक,-कन्या-वरः (फलित ज्योतिष)

मँगवाना, क्रि. प्रे., ब. 'माँगना' के प्रे. रूप ।

मंगेतर, वि. (हिं. मंगनी) वाग्दत्त ।

मंच, मंचक, सं. पुं. (सं.) खट्वा २. पीठिका ३. उच्चासनं, इन्द्रकोशः-षः-पकः, वेदिका, ५. रंगः, रंग,-भूमिः(स्त्री.)-पीठं ६. मंच-मंडपः ।

मंजन, सं. पुं. (सं. न.) दंतधावन-दंत्य,-चूर्ण २. (पेस्ट) *दंतपिष्टं, दंतोदपेषः ।

मँजना, क्रि. अ., ब. 'माँजना' के कर्म. के रूप ।

मँजवाना, क्रि. प्रे., ब. 'माँजना' के प्रे. रूप ।

मंजरी, सं. स्त्री. (सं.) मंजरिः-वल्लरी-रिः (सब स्त्री.), मंजी-जिः (स्त्री.) मंजरं, वल्लरं, वल्लिः (स्त्री.) २. पल्लवः, किसलयः ३. लता ४. मुक्ता ।

मंज़िल, सं. स्त्री. (अं.) दे. 'पड़ाव' २. कोष्ठः, भूमिः (उ. दोमंज़िला = द्विभूमिकं गृहं) ३. गंतव्य-निर्दिष्ट,-स्थानम् ।

मंजीर,रा, सं. पुं. (सं. पुं. न.) नूपुरः-रं २. झल्लरीभेदः ।

मंजु, मंजुल, } वि. (सं.) सुंदर, मनोहर, मनोज्ञ, मनोरम, चारु, रम्य, रुचिर, रुच्य, हृद्य ।

मंज़ूर, वि. (अ.) दे. 'स्वीकृत' ।

मंज़ूरी, सं. स्त्री. (अ. मंज़ूर) स्वीकृतिः (स्त्री.) ।

मंजूषा, सं. स्त्री. (सं.) पिटकः, दे. 'पिटारी' ।

मँझला, वि. पुं., दे. 'मझला' ।

मँझा, सं. पुं. 'माँझा' ।

मँझार, क्रि. वि., दे. 'मझदार' ।

मंड, सं. पुं. (सं.) दे. 'माँड़' ।

मंडन, सं. पुं. (सं. न.) अलंकरणं, परिष्करणं, भूषणं, प्रसाधनं २. दृढी-पुष्पी,-करणं, समर्थनं, सत्प्रापनं, प्रामाण्यसाधनम् ।

मंडप, सं. पुं. (सं. पुं. न.) वितानः-नं, उल्लोचः, चंद्र,-उदयः-आतपः २. जनाश्रयः,

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

विश्रामगृहं ३. (संस्कारादिभ्यः) शाला, आच्छादनं २. देवालयोर्ध्वभागः।
मँडराना, क्रि. अ., दे. 'मँडलाना'।
मंडल, सं. पुं. (सं. न.) वृत्तं, वर्तुलं, चक्रं, वलयः-यं २. गोलः-लं ३. परिवेशः-,षः-परिधिः, उपसूर्यकं ४. क्षितिजं, दिक्,-चक्रं-तटं, दिगंतः ५. द्वादशराजकं ६. समाजः, समुदायः ७. व्यूहभेदः ८. चक्रं, दे. 'पहिया' ९. ऋग्वेद-परिच्छेदः १०. गोलचिह्नं ११. ग्रह,-कक्षा-मार्गः १२. भूप्रदेशः।
मंडलाकार, वि. (सं.) गोल, वर्तुल, चक्राकार, वृत्त।
मँडलाना, क्रि. अ. (सं. मंडलं>) चक्राकारं उद्-डी (भ्वा. दि. आ. से.) अथवा खे चर् (भ्वा. प. से.) २. परि,-भ्रम्;अट्-क्रम् (भ्वा. प. से.)। सं. पुं., चक्रवत् उड्डयनं; परि,-क्रमणं-भ्रमणम्।
मंडली,[1] सं. स्त्री. (सं.) समाजः, सभा, समितिः (स्त्री.), गोष्ठी २. संघः, समुदायः ३. दूर्वा ४. गुडूची।
मंडली,[2] सं. पुं. (सं.-लिन्) सर्पः २. सर्पभेदः ३. सूर्यः ४. विडालः ५. मंडलाधिपः ६. वटः, न्यग्रोधः।
मँडवा, सं. पुं. (सं. मंडपः, दे.)।
मंडा, सं. स्त्री. (सं.) सुरा, मद्यं २. दे. 'आँवला'।
मंडित, वि. (सं.) भूषित, अलंकृत, परिष्कृत।
मंडी, सं. स्त्री. (सं. मंडपः>) महाहट्टः, पण्याजिरं, बृहद्-आपणः-विपणी।
मंडूक, सं. पुं. (सं.) दे. 'मेढक'।
मंडूर, सं पुं. (सं. पुं. न.) लौहमलं, शिघाणं, सिंहानं-णम्।
मंतव्य, सं. पुं. (सं.) विचारः, मतम्। वि., स्वीकार्य, विश्वसनीय, अभ्युपगंतव्य २. मननीय, भाव्य।
मंत्र, सं. पुं. (सं.) वेदवाक्यं २. वेदानां संहिताभागः ३. मंत्रणा, परामर्शः, विचारणा ४. गोप्यं, रहस्यं, गुह्यं ५. अभिचारमंत्रः (तंत्र)।
यंत्र—, सं. पुं., दे. 'जादू टोना'।
—कार, सं. पुं. (सं.) मंत्र,-रचयितृ-कर्तृ-द्रष्टृ।
—गृह, सं. पुं. (सं. न.) मंत्रणाभवनम्।
—विद्या, सं. स्त्री., तंत्रं, तंत्रविद्या।
मंत्रणा, सं. स्त्री. (सं.) परामर्शः, विचारणा, संमतिः (स्त्री.) २. उपदेशः, अनुशासनम्।
मंत्रित्व, सं. पुं. (सं. न.) साचिव्यं, मंत्रिता, अमात्यत्वं, मंत्रि-सचिव,-कार्यं-पदम्।
मंत्री, सं. पुं. (सं. मंत्रिन्) अमात्यः, सचिवः, धी,-सचिवः-सखः, सामवायिकः, राज,-अमात्यः-सचिवः।
प्रधान—, सं. पुं. (सं.-त्रिन्) मुख्य-महा,-मंत्रिन्, प्रधानामात्यः, महामात्रः।
मंथन, सं. पुं. (सं. न.) मथनं, विलोडनं, २. अनुसंधानं, अवगाहनं, निरूपणं ३. दे. 'मथनी'।
मंथर, वि. (सं.) मंद, अलस २. जड, मंदमति ३. स्थूल, भारवत् ४. अधम। सं. पुं. (सं.) दे. 'मंथनी' २. ज्वरभेदः।
मंद, वि. (सं.) अलस, तंद्रालु, कार्यविमुख, उद्योगशून्य २. मंथर ३. शिथिल ४. मूर्ख ५. दुष्ट।
—बुद्धि,-मति, वि. (सं.) मूढ, मूर्ख, जड बालिश।
—भाग्य, वि. (सं.) हतभाग्य, दुर्दैव। सं. पुं. (सं. न.) दुर्-दैवं-भाग्यम्।
—मंद, क्रि. वि. (सं.-दं.) शनैः-शनकैः (अव्य.) मंदगत्या, सौम्यतया, गाम्भीर्येण।
मंदता, सं. स्त्री. (सं.) आलस्यं २. मंथरता ३. क्षीणता।
मंदर, सं. पुं. (सं.) मंथशैलः, पर्वतविशेषः २. स्वर्गः ३. मुकुरः। वि., मंद, मंथर।
मँदरा, वि., दे. 'बौना'।
मंदा, वि. (सं. मंद) मंथर, बहल २. शिथिल ३. अल्प,-अर्घ-मूल्य, सुलभ ४. निकृष्ट, हीन ५. विकृत, भ्रष्ट।
मंदाकिनी, सं. स्त्री. (सं.) स्वर्ग-वियद्,-गंगा, स्वर्णदी, सुरदीर्घिका।
मंदाक्रान्ता, सं. स्त्री. (सं.) वर्णवृत्तभेदः।
मंदाग्नि, सं. स्त्री. (सं. पुं.) अजीर्णं, अपचनं अपाकः, अग्निमांद्यम्।
मंदार, सं. पुं. (सं.) स्वर्गवृक्षविशेषः २. अर्कवृक्षः ३. मंदरपर्वतः ४. गजः ५. स्वर्गः ६. दे. 'धत्तूरा'।
मंदिर, सं. पुं. (सं. न.), देवतायतनं, देव,-गृहं-भवनं-निकेतनं-आलयः २. गृहं, गेहं, सद्मन्-वेश्मन् (न.) ३. आ-नि,-वासः, वासस्थानम्।
मंदी, सं. स्त्री. (सं. मंद>) अल्पार्घता, पथसुलभता, मूल्यापकर्षः।

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

मंद्र, सं. पुं. (सं.) गंभीरध्वनिः (पुं.) (संगीत) २. मृदंगकः । वि., मनोहर २. प्रसन्न ३. गंभीर ४. मंद. गंभीर (शब्दादि) ।

मंशा, सं. स्त्री. (अ.) दे. 'मंसा' ।

मंसब, सं. पुं. (अ.) पदं, पदवी, स्थानं २. कर्तव्यं ३. अधिकारः ।

मंसा, सं. स्त्री. (अ. मंशा) इच्छा, कामना २. संकल्पः ३. आशयः ।

मंसूख, वि. (अ.) विलुप्त, अपसृष्ट, निरस्त, निवर्तित, गडित ।

मंसूख़ी, सं. स्त्री. (अ. मंसूख) विलोपः, निरासः, निवर्तनं, खंडनम् ।

मंसूबा, सं. पुं. (फ़ा.) संकल्पः, विचारः २. युक्तिः (स्त्री.), उपायः ।

—बाँधना, मु., निश्चि (स्वा. उ. अ.), संक्लृप् (प्रे.) २. उपायं चिंत् (चु.) ।

मई, सं. स्त्री. (अं. मे) आंग्लवर्षस्य पंचमो मासः, वैशाखज्येष्ठम् ।

मकई, सं. स्त्री. (सं. मकायः) कटिजः ।

मकड़ा, सं. पुं. (सं. मर्कटकः>) बृहल्लूता ।

मकड़ी, सं. स्त्री. (हिं. मकड़ा) लूता, तंतु-वापः-नाभः, ऊर्णनाभः, मर्कटः-टकः, जालिकः, कोषकारः, अष्टापदः ।

—का जाला, सं. पुं., मर्कटकजालम् ।

मकतब, सं. पुं. (अ.) पाठशाला ।

मकतबा, सं. पुं. (अ.) पुस्तकालयः २. ग्रंथविपणिः (स्त्री.) ।

मक़दूर, सं. पुं. (अ.) सामर्थ्यं, शक्तिः (स्त्री.) ।

मक़नातीस, सं. पुं. (अ.) दे. 'चुंबक' ।

मक़बरा, सं. पुं. (अ.) समाधिः (पुं.), *मृतकमंदिरम् ।

मकबूज़ा, वि. (अ.) अधिकृत, हस्तगत ।

मकबूल, वि. (अ.) स्वीकृत, मत २. प्रिय ।

मकरंद, सं. पुं. (सं.) मरंदः, मरंदकः, पुष्प-रसः-सारः-स्वेदः-निर्यासः-निर्यासकः, मधु (न.), पुष्पजं २. किंजलः, किंजल्कः ३. कुंदक्षुपः ।

मकर, सं. पुं. (सं.) नक्रः, ग्राहः, कुंभीरः, अवहारः, जलकुंजरः २. दशमराशिः, आकोकेरः ३. माघमासः ४. व्यूहभेदः ५. दे. 'मछली' ।

—ध्वज, सं. पुं. (सं.) मकर,-केतुः-केतनः, कामदेवः ।

मकर[२], सं. पुं. (फ़ा.) कपटं, छलम् ।

मक़रूज़, वि. (अ.) दे. 'ऋणी' ।

मकरूह, वि. (फ़ा.) कलुष, गलीमस २. घृणोत्पादक ।

मक़सद, सं. पुं. (अ.) मनःकामना २. अभिप्रायः ।

मकान, सं. पुं. (फ़ा.) अ(आ)गारः-रं, भवनं-वेश्मन्-सद्मन् (न.), सदनं, दे. 'घर' ।

—किराये पर देना या लेना, क्रि. स., सदनं भाटकेन दा अथवा आं-दा (जु.आ.अ.) ।

मालिक—, सं. पुं., गृहः,-सदन-स्वामिन्-पतिः ।

मकोड़ा, सं. पुं. (हिं. कीड़ा का अनु०) क्षुद्रकीटः ।

मकोय, सं. स्त्री. (सं. काकमाता से विप०) काकमाची-ची्रका, कुष्ठघ्नी, वायसी, रसायनी, वहुतिक्ता, काका, काकिनी २. काकमाचीफलं इ. ३. दे. 'रसभरी' ।

मक्का, सं. पुं., दे. मकई ।

मक्कार, वि. (अ.) कपटिन्, छलिन् ।

मक्कारी, सं. स्त्री. (अ.) कपटं, छलम् ।

मक्खन, सं. पुं. (सं. भ्रक्षणं>) नवनीतं, मन्थजं, नवोद्धृतं, तक्र-जं-सारं, दधि,-जं-स्नेहः, पीथं, हैयंगवीनम् ।

मक्खी, सं. स्त्री. (सं. मक्षीका) मक्षिका, माचिका, गंधलोलुपा, भंभः, पतंगिका, वमनीया, पलंकषा, नीला, वर्वणा २. मधुमक्षिका ३. *अग्न्यस्त्रमक्षिका ।

—चूस, सं. पुं. (सं. कृपणः, मितंपचः, कदर्यः) जीती मक्खी निगलना मु., जानन्नपि पापं कृ ।

नाक पर मक्खी न बैठने देना, मु., उपकारं न सह् (भ्वा. आ. से.) ।

मक्खी छोड़ना और हाथी निगलना, मु., पापकानि परित्यज्य महापापेषु प्रवृत् (भ्वा. आ. से.) ।

मक्खी पर मक्खी मारना, मु., मक्षिका स्थाने मक्षिका, निर्विवेकप्रतिलिपिः (स्त्री.) ।

मक्खी मारना या उड़ाना, मु., उद्योगहीन (वि.) स्था (भ्वा. प. अ.) ।

मक्षिका, सं. स्त्री. (सं.), दे. 'मक्खी' ।

—मल, सं. पुं., दे. 'मोम' ।

मख, सं. पुं. (सं.) यज्ञः, क्रतुः ।

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

मख़तूल, सं. पुं. (सं. महार्घतूलं>) कृष्ण,-कौशेयं-कीटसूत्रम् ।
मख़मल, सं. स्त्री. (अ.) *मखमलं, श्लक्ष्ण-वस्त्रभेदः ।
मखमली, वि. (अ. मख़मल) मखमल,-मय-निर्मित २. श्लक्ष्ण, स्निग्ध ।
मख़ौल, सं. पुं., (दे. 'ठट्ठा') ।
मग, सं. पुं., दे. 'मार्ग' ।
मग़ज़, सं. पुं. (अ. मग्ज) मस्तिष्कं, मस्तुलुंगकः २. बुद्धिः-मतिः (स्त्री.) ३. दे. 'गिरी' ।
—चट, सं. पुं. (अ.+हिं.) वाचालः, वाचाटः ।
—चट्टी, सं. स्त्री., वाचालता, प्रजल्पः ।
—पच्ची, सं. स्त्री. (अ.+हिं.) बौद्धिकश्रमः ।
—खाना या चाटना, मु. वावदूकतया खिद् (प्रे.) ।
—खाली करना या पचाना, मु., प्र-,जल्प् (भ्वा. प. से.) २. मस्तिष्कं खिद्-आयस् (प्रे.) ।
मगजी, सं. स्त्री, (अ. मग्ज) चीरी-रिः (स्त्री.), दशा ।
मगध, सं. पुं. (सं.) कीकटदेशः, बिहार-प्रांतस्य दक्षिणभागः २. चारणः, वंदिन् ।
मगन, वि., दे. 'मग्न' ।
मगर, अव्य. (फ़ा.) किंतु, परं, परंतु ।
मगर, } सं. पुं. (सं. मकरः)
मगरमच्छ, } दे. 'मकर' (१) २. महा,-मत्स्यः-मीनः ।
मग़रिब, सं. पुं. (अ.) दे. 'पश्चिम' ।
—ज़दा, वि., पाश्चात्यसभ्यतया प्रभावित, पश्चिम,-आकृष्ट-प्रेरित-प्रवर्तित ।
मग़रिबी, वि. (अ.) दे. 'पश्चिमी' ।
—तहज़ीब, स्त्री., पाश्चात्यसभ्यता ।
मग़रूर, वि. (अ.) दे. 'अभिमानी' ।
मग़रूरी, सं. स्त्री. (अ. मग़रूर) दे. 'अभिमान' ।
मग्न, वि. (सं.) जलांतःप्रविष्ट, निमज्जनेन-, मृत-नष्ट २. लीन, निरत, आसक्त,-पर,-परायण ४. मत्त, क्षीव, मदोद्यत ४. प्रसन्न, प्रहृष्ट ।
—होना, क्रि. अ., प्र-,हृष् (दि. प. से.) २. निरत-लीन-आसक्त (वि.) भू ।
मघवा, सं. पुं. (सं.-वन्) इन्द्रः, आखण्डलः ।
मघा, सं. स्त्री. (सं.) नक्षत्रविशेषः, मघाः (स्त्री. बहु. भी.) २.औषधभेदः दे. 'पिप्पली' ।
मचक, सं. स्त्री. (हिं. मचकना) भारः, पीडनं २. अस्थिसंधिपीडा ३. कंपनम् ।
मचकना, क्रि. अ. (अनु. मच मच>) अस्थिसंधिः व्यथ् (भ्वा. आ. से.)-पीड् (कर्म.) २. भारेण समचमचध्वनि कंप् (भ्वा. आ. से.), निमिप् (तु. प. से.), निमील् (भ्वा. प. से.) ।
मचकाना, क्रि. स. (हिं. मचकना) व. 'मचकना' के प्रे. रूप ।
मचकोड़, सं. स्त्री. (हिं. मचकना) सन्धि,-व्यावर्तनं-व्याक्षेपः ।
मचना, क्रि. अ. (अनु. मच) कु-आरभ् (कर्म.), प्रवृत् (भ्वा. आ. से.) ।
मचलना, क्रि. अ. (अनु.) निर्बंधेन वद् (भ्रा. प. से.), साग्रह (वि.) अवस्था (भ्वा. आ. अ.) ।
मचला, वि. (हिं. मचलना) कपटमूढ, अज्ञलक्षण, व्याजजड ।
मचलाना, क्रि. अ. (अनु.) वम् (सन्नंत, विवमिषति), वमनेच्छया पीड् (कर्म.) ३. दे. 'मचलना' ।
मचलापन, सं. पुं. (हिं. मचलना) कपट-मूढता, व्याजजडत्वम् ।
मचलाहट, सं. स्त्री. (हिं. मचलना) निर्बंधः, आग्रहः २. विवमिषा, वमनवांछा ।
मचान, सं. पुं. (सं. मंचः) मंचकः उच्चासनं, वेदिका, इंद्रकोषः ।
मचाना, क्रि. स. (हिं. मचना) व. 'मचना' के. प्रे. रूप ।
मचिया, सं. स्त्री. (सं. मंचः>) मंचिका, पीठी, पीठकं, क्षुद्रासनम् ।
मच्छ-छ, सं. पुं. (सं. मत्स्यः>) महा-बृहत्,-मीनः-मत्स्यः-झषः ।
—अवतार, सं. पुं., दे. 'मत्स्यावतार' ।
मच्छड़-र, सं. पुं. (सं. मशकः) वज्रतुण्डः, मशः, सूच्यास्यः, सूक्ष्ममक्षिकः, रात्रिजागरदः ।
—दानी, सं. स्त्री., मश(शक)हरी, चतुष्की, मसूरिका, नीशारः ।

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

मच्छर पर तोप लगाना, मु., तुच्छशत्रौ बहूद्योगः ।

मच्छी, सं. स्त्री. (हिं. मच्छ) दे. 'मछली' ।

मछंदर, सं. पुं. (सं. मत्स्येन्द्र या बंदर से अनु.) कपिः, वानरः २. आखुः, मूषिकः ३. जडः, मूढः ४. मिथ्यावैधः ५. विदूषकः, वैहासिकः ६. भिक्षुकः ।

मछरायँध, सं. स्त्री. (हिं. मछली+सं. गंधः) मत्स्यगंधः, मीनपूतिः (स्त्री.) ।

मछली, सं. स्त्री. (सं. मत्स्यः) मीनः, झषः, अंडजः, विसारः, पृथुरोमन् (पुं.), शकुलिन्, वैसारिणः, आत्माशिन्, तिमिः, जलपिप्पकः । वि., शंबरः, संघचारिन्, स्थिरजिह्वः, बकुलक्षयः २. मत्स्याकारो भूषणभेदः ।

—वाला, सं. पुं., दे. 'मछुआ' ।

—की तरह तड़पना, मु., जलहीनमीनवद् व्याकुलीभू ।

मछवा, सं. पुं. (हिं. मच्छी) मत्स्यभारिनौका २. दे. 'मछुआ' ।

मछुआ-वा, सं. पुं. (हिं. मच्छी) मत्स्य,-आजीवः-उपजीविन्,मात्स्यिकः, धीवरः, कैवर्तः ।

मज़दूर, सं. पुं. (फ़ा.) भार,-हरः-हारः-वाहकः-वाहः, भारिकः, वोढृ, वाहः, वाहकः २. कार्मः, कर्मिन, श्रमजीविन, कर्म,-करः-कारः ।

मज़दूरी, सं. स्त्री. (फ़ा.) भारवहनं, श्रमः, व्रातं २. कर्मण्या, भृतिः (स्त्री.), भृत्या, भर्मण्या, भर्म, पारिश्रमिकम् ।

मजनूँ, सं. पुं. (अ.) उन्मत्तः, उन्मादिन्, वातुलः २. लयला-वल्लभः, कैसः ३. प्रणयिन्, प्रेमिन्, कामुकः, कामिन् ४. कृशांगः,क्षीणदेहः ।

मज़बूत, वि. (अ.) दृढ, २. स्थिर ३. बलवत् ।

मज़बूती, सं. स्त्री. (अ. मजबूत) दृढता २. स्थिरता ३. बलवत्ता ४. साहसम् ।

मजबूर, वि. (अ.) दे. 'विवश' ।

मजबूरन्, क्रि. वि. (अ.) बलेन, बलात्, हठात्, प्रसह्य, प्रसभम् ।

मजबूरी, सं. स्त्री. (अ. मजबूर) विवशता, अगतिकता, अपरिहार्यता ।

मजमा, सं. पुं. (अ.) जन,-संमर्दः-समुदायः ।

मजमूआ, सं. पुं. (अ.) समुदायः, संग्रहः, समूहः ।

मज़मून, सं. पुं. (अ.) प्रस्तावः, निबंधः, लेखः २. व्याख्यान-लेख,-विषयः ।

—नवीस, सं. पुं., निबन्ध,-कारः-लेखकः ।

मज़मूम, वि. (अ.) निन्दित, दुष्ट २. हीन,-वर्ण-कुल ।

मज़म्मत, सं. स्त्री. (अ.) निन्दा, कुत्सा २. भर्त्सना ।

मजरूह, वि. (अ.) आहत, दे. 'घायल' ।

मजलिस, सं. स्त्री. (अ.) सभा, समाजः, गोष्ठी ।

मीर—सं. पुं. (फ़ा+अ.) सभा,-पतिः अध्यक्षः, प्रधानः ।

मजलिसी, वि. (अ.) सामाजिक ।

मज़हब, सं. पुं. (अ.) धर्मः, संप्रदायः,मतम् ।

मज़हबी, वि. (अ.) धार्मिक, सांप्रदायिक । सं. पुं., खलपूः, शिष्यः, शिष्य(सिक्ख), जाति-विशेषः ।

मज़ा, सं. पुं. (फ़ा.) आ-,स्वादः, रसः २. आनंदः, सुखं ३. विनोदः, हास्यम् ।

—उड़ाना या लूटना, मु., मुद् (भ्वा. आ. से.), रम् (भ्वा. आ. अ.), नंद् (भ्वा. प. से.) ।

—दिखाना या चखाना, मु., दंड् (चु., द्विकर्म) २. प्रतिहिंस् (रु. प. से.), प्रत्यपकृ ।

मजे से, मु., सानंदं, ससुखं, निर्विघ्नम् ।

मज़ाक, सं. पुं. (अ.) दे. 'ठठ्ठा' ।

मज़ार, सं. पुं. (अ.) समाधिः २. दे. 'क़ब्र' ।

मजाल, सं. स्त्री. (अ.) सामर्थ्यं, शक्तिः (स्त्री.) ।

म(मे)जिस्ट्रेट, सं. पुं. (अं.) दंड,-नायकः-अध्यक्षः-अधिकारिन् ।

म(मे)जिस्ट्रेटी, सं. स्त्री. (अं. मेजिस्ट्रेट) दंडनायक-दण्डाध्यक्ष,-पदं-कार्यं २. दंडनायक-सभा ।

मजीठ, सं. स्त्री. (सं. मंजिष्ठा) रक्ता, रोहिणी, रक्तयष्टिका, रागाढ्या, अरुणा, रागांगी, वस्त्र-भूषणा, विकसा, जिगी ।

मजीठी, वि. (हिं. मजीठ) रक्त, लोहित, अरुण ।

मजीरा, सं. पुं., (सं. मञ्जीरः) नूपुरः, पादाङ्गदं (न.) २-विष्कम्भः, कुटरः ।

मजेदार, वि. (फ़ा.) स्वादु, रुच्य, रुचिकर २. उत्कृष्ट, उत्तम ३. आनंद,-दायक-प्रद ।

मज्जन, सं. पुं. (सं. न.) स्नानं, दे. 'नहाना' सं. पुं. ।

मज्जा, सं. स्त्री. (सं.) शुक्रकरः, कौशिकः, अस्थि,-देह-सार-संभवः, अस्थिजम् ।

मझधार, सं. स्त्री. (सं. मध्यधारा) नद्याः

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

मध्य-केन्द्रीय-मध्यस्थ-मध्यम,-धारा-प्रवाहः-मंदाकः-स्रोतस् (न.) २. कार्य,-मध्यः-मध्यम्।

मझ(झो)ला, वि. (सं. मध्य) मध्यम, मध्य,-वर्तिन्-स्थ २. मध्यमाकार, मध्यमपरिमाण।

मटक, मटकन, सं. स्त्री. (हिं. मटकना) हावः, विभ्रमः, विलासः २. गतिः (स्त्री.) संचारः।

मटकना, क्रि. अ. [सं. मट् (सौत्रधातु) = अवसाद] विलस् (भ्वा. प. से.), सविलासं चल् (भ्वा. प. से.) विभ्रम् (भ्वा. दि. प. से.)।

मटका, सं.पुं. (हिं. मिट्टी) मणिकः-कं, अलिंजरः।

मटकाना, क्रि. स. (हिं. मटकना) सविलासं अंगानि चल् (प्रे.), विभ्रम् (प्रे.)।

मटकी, सं. स्त्री. (हिं. मटका) क्षुद्र,-मणिकः-अलिंजरः।

मटमैला, वि. (हिं. मिट्टी+मैला) दे. 'मटियाला'।

मटर, सं. पुं. (सं. मधुर) कलायः, कालपूरः, मुण्डचणकः, रेणुकः, वातुलः, सतीन-(ल)कः, हरेणुः, खंडिकः।

मटरगश्त, सं. पुं. स्त्री. (सं. मंथर+फ़ा. गश्त) सुखाटनं, विहारः, विहरणं, यथेष्टभ्रमणं, सुखसंचरणम्।

मटियामसान, मटियामेट } वि. दे. 'मलियामेट'।

मटियाला, वि. (हिं. मट्टी+वाला) धूलि-रेणु-पांशु,-वर्ण-रंग।

मट्टी, सं. स्त्री., दे. 'मिट्टी'।

मट्ठा, सं. पुं. (सं. मथितं) असरोदक-घोलं, जलनवनीत-शून्यं घोलम्।

मट्ठी, सं. स्त्री. (सं. मठः) पक्वान्नभेदः।

मठ, सं. पुं. (सं. पुं. न.) आ-नि,-वासः, २. आश्रमः, विहारः, मुनिवासः ३. धार्मिक-विद्यालयः ४. मंदिरं, देवालयः।

—**धारी**, सं. पुं. (सं.-रिन्) मठपतिः, मठिन्।

मढ़ना, क्रि. स. (सं. मंडनं>) कोशे निविश् (प्रे.), आवेष्ट् (भ्वा. आ. से.) २. चर्मादिभिर्वाद्यमुखं आच्छद् (प्रे.) ३. बलात् आरुह् (प्रे.), दे. 'थोपना'। सं. पुं., आवेष्टनं, आच्छादनं, आरोपणम्।

मढ़ने योग्य, वि., आवेष्टनीय, आच्छादनीय।

मढ़नेवाला, सं. पुं., आवेष्टकः, आच्छादकः।

मढ़वाना, क्रि. प्रे., व. 'मढ़ना' के प्रे. रूप।

मढ़ा हुआ, वि., आवेष्टित, चर्मादिभिराच्छादित, बलादारोपित।

मढ़ी, सं. स्त्री. (सं. मठः>) क्षुद्रमठः-ठं, लघु-मंदिरं २. कुटी, पर्णशाला ३-४. क्षुद्र,-सदनं-मंडपः।

मणि, सं. स्त्री. (सं. पुं. स्त्री.) रत्नं २. नर,-पुंगवः-कुंजरः-ऋषभः।

—**कांचन योग**, सं. पुं. (सं.) उभयशोभा-वर्द्धकसंयोगः।

—**दीप**, सं. पुं. (सं.) दीपोज्ज्वलमणिः, रत्न-दीपः २. मणिरत्नजटितदीपः।

—**धर**, सं. पुं. (सं.) सर्पः, अहिः।

—**बंध**, सं. पुं. (सं.) मणिः, पाणिमूलं, कलाचिका।

—**माला**, सं. स्त्री. (सं.) रत्नहारः २. रमा, पद्मा, कमला, इन्दिरा ३. वर्णवृत्तभेदः।

मतंग, सं. पुं. (सं.) गजः २. मेघः ३. ऋषि-विशेषः।

मत[1], सं. पुं. (सं. न.) धर्मः, संप्रदायः २. मतिः (स्त्री.), तर्कः ३. आशयः, अभिप्रायः। वि., पूजित।

मत[2], क्रि. वि. (सं. मा) न, नो, मा, अलं (तृतीया के साथ)।

मतलब, सं. पुं. (अ.) आशयः, अभिप्रायः, तात्पर्यं २. शब्द-वाक्य,-अर्थः ३. स्वार्थः ४. उद्देशः, उद्देश्यं ५. संबंधः, संपर्कः।

—**निकालना**, मु., स्वार्थं साध्-सिध् (प्रे.)।

बे—क्रि. वि., व्यर्थं, मोघं, निष्प्रयोजनं, निरर्थकम्।

मतलबी, वि. (अ. मतलब) स्वार्थिन्, निजहित-स्वार्थ,-परः-परायण-निरत।

मतलाना, क्रि. अ., दे. 'मचलाना' (१)।

मतली, सं. स्त्री., दे. 'मचलाहट' (२)।

मतवाला, वि. (सं. मत्त) मदोद्धत, मदोद्यम, क्षीव २. उन्मत्त ३. अभिमानिन्।

मताधिकार, सं.पुं. (सं.) मतप्रकाशनाधिकारः।

मतावलंबी, सं. पुं. (सं.-बिन्) धर्म-मत,-अनुगामिन्-अनुयायिन्-अनुवर्तिन्-अनुसारिन्।

मति, सं. स्त्री. (सं.) धीः (स्त्री.), धि(धी)षणा, प्रज्ञा, बुद्धिः (स्त्री.) २. मत्तं, तर्कः, अभिप्रायः ३. इच्छा ४. स्मृतिः (स्त्री.)।

—**मान्**, वि. (सं.-मत्) प्राज्ञ, चतुर।

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

—हीन, वि. (सं.) जड, मूढ, मूर्ख ।
मतीरा, सं. पुं., दे. 'तरबूज' ।
मत्कुण, सं. पुं. (सं.) रक्तपायिन्, रक्तांगः, मंचकाश्रयः, उद्दंशः ।
मत्त, वि. (सं.) शौंड, उत्कट, क्षीब, उन्मद, मदाढ्य, समद, मदिरोत्कट, मद,-मत्त-उन्मत्त-उद्धत-उद्यग्र २. निर्विवेक ३. वातुल, उन्मत्त ४. प्रसन्न ।
—गयंद, सं. पुं. (सं. मत्तगजेन्द्रः>) सवैयाछन्दोभेदः । (७ भगण+२ गुरु अक्षर) ।
मत्था, सं. पुं., दे. 'मस्तक' (२) ।
मत्सर, सं. पुं. (सं.) मात्सर्य्यं, परोत्कर्षद्वेषः, असूया, ईर्ष्या २. क्रोधः ।
मत्स्य, सं. पुं. (सं.) दे. 'मछली' २. मीनराशिः ३. विराटदेशः (दीनाजपुर-रंगपुर, अथवा प्राचीन पांचाल के अंतर्गत) ४. महापुराणविशेषः ५. विष्णोरवतारविशेषः, मत्स्यावतारः ।
मथन, सं. पुं. (सं. न.) दे. मंथन १-२ ।
मथना, क्रि. स. (सं. मथनं.) दे. 'बिलोना' २. ध्वंस्-नश् (प्रे.) ३.अन्विष् (दि. प. से.) ४. असकृत् अनेकवारं कृ । सं.पुं., दे. 'मथानी' २. मंथनं, मंथः ।
मथनी-नियां, सं. स्त्री. (सं. मंथनी) मंथन-घटी, गर्गरी, मंथिनी २. दे. 'मथानी' ।
मथानी, सं. स्त्री. (सं. मंथानः) मंथ-मंथन,-दंडः, मंथः, मंथनः, खजः, वैशाखः, मथिः, मथिन् (पुं.), तक्राटः ।
मथुरा, सं. स्त्री. (सं.) मधुपुरं-रो ।
मद, सं. पुं. (सं.) मादः, शौंडता, क्षीवता २. वातुलता, उन्मादः, मतिभ्रंशः ३. दर्पः, अभिमानः ४. सुरा, मद्यं ५. हर्षः, मोदः ६. कस्तूरी-रिका, मृग,-मदः-नाभिः ७. गजगंड-जलं, मद,-जलं-वारि (न.), दानं ८. शुक्रं, वीर्यं ९. अज्ञानं, प्रमादः १०. मदनः, कामः ।
—माता[1], वि., दे. 'मत्त' (१) २. कामार्त्त, अनंगपीडित ।
मद[2], सं. स्त्री. (अ.) लिखितपदं २. गणनापदं ३. प्रकरणम् ।
मदक, सं. स्त्री. (सं. मदः>) मद्यं, मादक-द्रव्यभेदः
मदद, सं. स्त्री. (अ.) दे. 'सहायता' ।
—गार, वि. (अ.+फ़ा.) दे. 'सहायक' ।
मदन, सं. पुं. (सं.) मन्मथः, कंदर्पः, अनंगः दे. 'कामदेव' २. कामक्रीडा, मैथुनं ३. पिचुकः, मुचकुंदः, कंटकिन् ४. धुस्तूरः ५. भ्रमरः ६. खंजनः ७. दे. 'मैना' ।
—कदन, सं. पुं. (सं.) शिवः, मदनहननः ।
—गोपाल, सं. पुं. (सं.) मदनमोहनः, कृष्णः ।
—बाण, सं. पुं. (सं.) कामशरः, पुष्पभेदः ।
—सदन, सं. पुं. (सं. न.) मदन,-गृहं-भवनं, भगम् ।
—महोत्सव, सं. पुं. (सं.) मदनोत्सवः, सुवसंतकः, मदनपूजासंगीतरात्रिजागरणादियुक्तः चैत्रे भवः प्राचीनोत्सवभेदः ।
मदनोद्यान, सं. पुं. (सं. न.) प्रमोदवनम् ।
मदर, सं. स्त्री. (अं.) मातृ (स्त्री.), जननी ।
मदरसा, सं. पुं. (अ.) विद्यालयः, पाठशाला ।
मदांध, वि. (सं.) दे. 'मत्त' (१) ।
मंदार, सं. पुं. (सं. मंदारः) दे. 'आक' ।
मदारी, सं. पुं. (अ. मदार) दे. 'कलंदर' २. सौभिकः, दे. 'जादूगर' ।
मदिरा, सं. स्त्री. (सं.) सुरा, हाला, मद्यं, वारुणी, कादंबरी, हलिप्रिया, गंधोत्तमा, इरा, प्रसन्ना, परिश्रुता, कश्यं, गंधमादनी, माधवी, मदः, मत्ता, मदगंधा, मधु, माध्वीकं, अब्धिजा, देवसृष्टा, मदना, शूंडा, मैरेयं, सीधुः,महानंदा, मदनी, मोदिनी, मनोज्ञा, अमृता, आसवः, प्रिया, चपला, मत्ता, कामिनी ।
मदिराक्ष, वि. (सं.) मत्तलोचन (-नी स्त्री.) ।
मदीय, वि. (सं.) मामकीन, मामक(-मिका-स्त्री.), मत् ।
मदीला, वि. (सं. मदः>) दे. 'नशीला' ।
मदोन्मत्त, वि. (सं.) मद,-उत्कट-उद्यग्र-उद्धत ।
मद्धि(द्ध)म, वि., दे. 'मध्यम' ।
मद्य, सं. पुं. (सं. न.) दे. 'मदिरा' ।
—प, वि. (सं.) सुराप, दे 'शराबी' ।
—पान, सं. पुं. (सं. न.) सुरापानं-णम् ।
—भाजन, सं. पुं. (सं. न.) सुरा,-पात्रं-भांडम् ।
मधु, सं. पुं. (सं. न.) क्षौद्रं, माक्षि(क्षी)कं, कुसुम-पुष्प,-आसवः, पित्र्यं, पवित्रं, माध्वीकं, सारघं, पुष्परस,-उद्भवं-आह्वायं, मक्षिका-धरटी-भृंग,-जातं ३. दुग्धं ४. जलं

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

५. मकरंदः, पुष्परसः ६. अमृतं ७. वसंतर्तुः ८. चैत्रमासः९.दैत्यविशेषः। वि., मधुर,स्वादु।
—कंठ, सं. पुं. (सं.) कोकिलः, पिकः।
—कर, सं. पुं. (सं.) भ्रमरः २. कामुकः ३. भृङ्गराजवृक्षः।
—करी, सं. स्त्री. (सं.) षट्पदी, भ्रमरी २. सिद्धान्न-पक्वान्न,-भिक्षा।
—कार, सं. पुं. (सं.) मधुमक्षिका।
—कोषः, सं. पुं. (सं.) मधु,-क्रमः-चक्रं-पटलं-कोशः, करंडः, चषालः।
—प, सं. पुं. (सं.) भ्रमरः २. मधुमक्षिका।
—पर्क, सं. पुं. (सं.) दधिमधुमिश्रं आज्यं, (अतिथ्यादिभ्यः)।
—मक्खी, सं. स्त्री. (सं.-मक्षिका) मधु,-कारः-कारिन्, सरघा।
—मय, वि. (सं.) मधुर, मधुल, मिष्ट, स्वादु, रुचिर।
—मास, सं. पुं. (सं.) चैत्रः।
—मेह, सं. पुं. (सं.) मधुप्रमेहः, मूत्ररोगभेदः।
मधुर, वि. (सं.) मिष्ट, मधुर, मधुल, मधुक, मधुमय २. रुच्य, रुचिकर, स्वादु ३. कर्ण-श्रुति,-मधुर, कल, मंजुल ४. सुंदर, मनोज्ञ।
—भाषी, वि. (सं.-षिन्) प्रियंवद, मधुर-सु,-वाच्, चारुभाषिन्।
मधुरिमा, सं. स्त्री. [सं.-रिमन् (पुं.)] माधुर्यं २. सौन्दर्यम्।
मधूकरी, सं. स्त्री., दे. 'मधुकरी' (२)।
मध्य, वि. (सं.) दे. 'मध्यम'। क्रि. वि., मध्ये, अंतरे,अभ्यंतरे। सं. पुं., मध्यं, मध्य-भागः.-देशः-स्थलं-स्थानं २. गर्भः, अभि-, अंतरम्।
—देश, सं. पुं. (सं.) हिमाचलविंध्याचलकुरु-क्षेत्रप्रयागमध्यस्थो देशः २. मध्यप्रांतः।
—भाग, सं. पुं. (सं.) मध्य,-स्थलं-स्थानं, केन्द्रम्।
—लोक, सं. पुं. (स.) भूमिः (स्त्री.), पृथिवी।
—वर्ती, वि. (सं.-र्तिन्) केन्द्रीय, मध्य, मध्यम, मध्य,-स्थ-स्थित।
मध्यम, वि. (सं.) मध्य, मध्य,-स्थ-स्थित-वर्तिन् २. मध्यपरिमाण ३. सामान्य, साधारण ४. व्यवहित, अंतरालस्थ। सं. पुं. (सं.) चतुर्थस्वरः (संगीत.) २-४ नायक-मृग-राग,-भेदः।
—पुरुष, सं. पुं. (सं.) पदविशेषः (व्या. त्वं पचसि इ.)।
मध्यमा, सं. स्त्री. (सं.) ज्येष्ठांगुली-लिः (स्त्री.), मध्या, ज्येष्ठा २. नायिकाभेदः ३. रजस्वला नारी।
मध्यस्थ, सं. पुं. (सं.) निर्णेतृ, प्रमाणपुरुषः २. उदासीनः, निष्पक्षः, तटस्थः। वि., दे. 'मध्यम'।
मध्यस्थता, सं. स्त्री. (सं.) माध्यस्थ्यं, निर्णयः २. तटस्थता।
मध्याह्न, सं. पुं. (सं.) मध्य(ध्यं)दिनं, मध्याह्न,-कालः-समयः-वेला।
मध्याह्नोत्तर, सं. पुं. (सं. न.) अपराह्णः,पराह्णः, विकालः।
मन[1], सं. पुं. [सं. मनस् (न.)] चित्तं, चेतस् (न.), हृदयं, स्वांतं, हृद् (न.), मानसं, अंगं, अनंगकं, अंतःकरणं २. अंतःकरणस्य संकल्पविकल्पात्मकवृत्तिः (स्त्री.) ३. विचारः, संकल्पः ४. इच्छा, कामना।
—गढ़ंत, वि., मनःकल्पित, काल्पनिक, अवास्तविक, मनःप्रसूत।
—चला, वि., निर्भय २. साहसिक ३. रसिक।
—चाहा,-चीत, वि., अभीष्ट, मनोवांछित।
—जात, सं. पुं., मनोजः, कामदेवः।
—भावता,-भावन, वि., रुच्य, रुचिकर, प्रिय, अभिमत।
—मति, वि., स्वच्छन्द, अनियन्त्रित, स्वेच्छा-चारिन्।
—मथ, सं. पुं., मन्मथः, कंदर्पः।
—माना, वि., रुच्य, रुचिकर २. अभिमत, मनोनीत ३. यथेष्ट, यथेच्छ, यथेप्सित। क्रि. वि., यथेष्टं, यथाभिलाषम्।
—मानी, सं. स्त्री., यथेष्ट,-कार्यं-कर्मन् (न.)।
—मुटाव, सं. पुं., वैमनस्यं, वैमत्यं, दुष्ट,-भावः-बुद्धिः द्वेषः।
—मोदक, सं. पुं., काल्पनिकसुखं, मनः-कल्पिता-नंदः।
—मोहन, सं. पुं., श्रीकृष्णः। वि.,मनोहर,हृद्य।
—मौजी, वि., स्वैरिन्, स्वेच्छाचारिन्।
—रंजन, वि., मनोरंजक। सं. पुं., मनोरंजनम्, चित्तविनोदः।

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

—हर, —हरण, —हारी, } व., मनोहर, मनोहर्तृ, मनोहारिन्, २. सुंदर, मनोज्ञ ३. प्रिय, हृद्य।

(टिप्पणी—मन के बहुत से यौगिक शब्दों और मुहावरों के पर्यायवाची 'जी', 'दिल' और 'कलेजा' के नीचे मिलेंगे; कुछ यहाँ देते हैं)।

—अटकना, मु., स्निह् (दि. प. से.), अनुरंज् (कर्म.)।

—करना, मु., अभिलष्-वांछ् (दि. भ्वा. प. से.)।

—के लड्डू खाना, मु., गगनकुसुमानि चि (स्वा. उ. अ.), मोघाशया हृष् (दि. प. से.)।

—बहलाना, मु., मनो विनुद्-रंज् (प्रे.), विह (भ्वा. प. अ.)।

—बसना, मु., रुच् (भ्वा. आ. से.), दे. 'मनमाना'।

—भर, वि., यथेष्ट, यथेच्छम्। (क्रि. वि.), यथा-रुचि, यथाभिलाषं, यथेष्टम्।

—भरना, मु., परि-सं,-तृप्-तुष् (दि. प. अ.)।

—भाना, मु., इष् (तु. प. से.), अभिलष्, रुच्।

—भाना मुद्दिया हिलाना, मु., मनसि काम-यमानोऽपि शिरःकंपेन (वाचतः) निषिध् (भ्वा. प. से.)।

—माने, वि. तथा क्रि. वि., दे. 'मनभर'।

—मारना, मु., मनः निग्रह् (क्र्. प. से.) २. धैर्येण सह् (भ्वा. आ. से.)।

—मिलना, मु., सामत्यं-ऐकमत्यं वृत् (भ्वा. आ. से.)।

—ललचाना, मु., लुभ् (दि. प. से.), अत्य-धिकं स्पृह् (चु., चतुर्थी के साथ)।

—हरा होना, मु., मुद् (भ्वा. आ. से.)।

मन,[२] सं. पुं. (सं. मणः) चत्वारिंशत्सेरात्मकं भारमानम्।

—भर, वि., मण,-मित-परिमित-मात्र।

मनका,[१] सं. पुं. (सं. मणिकः>) अक्षः, गुटिका २. जपमाला।

मनका[२] सं. स्त्री. (सं. मन्याका) मन्या, अवट्टः, कृकाटिका, शिरःपीठं, घाटः-टा।

—ढकलना, मु., मरणोन्मुख-मुमूर्षु-आसन्नमृत्यु (वि.) वृत (भ्वा. आ. से.)।

मनकूला, वि. (अ.) चर, चल, अस्थिर।

—ग़ैरमनकूला जायदाद, सं. स्त्री. (अ.+फा.) स्थावररिक्थं, स्थिरसंपद् (स्त्री.)।

—जायदाद, सं. स्त्री., (अ.+फ़ा.) उपकर-णरिक्थं, चरसंपद् (स्त्री.)।

मनन, सं. पुं. (सं. न.) अनुचिंतनं, ध्यानं, आलोचनम्।

—शील, वि., विचार,-शील-वत्।

मननीय, वि. (सं.) विचारणीय, चिन्तनीय, विचारास्पद, मननार्ह।

मनवाना, क्रि. प्रे., ब. 'मानना' के प्रे. रूप।

मनशा, सं. स्त्री., दे. 'मंसा'।

मनसब, सं. पुं. (अ.) पदं, पदवी २. अधि-कारः ३. स्तरः ४. सेवा।

मनसा[१] सं. स्त्री., दे, 'मंसा'।

मनसा, अ. (सं.) चित्तेन, हृदयेन। सं. स्त्री. १. जरत्कारु पत्नी २. वासुकिभगिनी।

मनसिज, सं. पुं. (सं.) कामदेवः, पंचशरः।

मनसूख, वि. दे. 'मंसूख'।

मनसूबा, सं. पुं., दे. 'मंसूबा'।

मनस्ताप, सं. पुं. (सं.) मनोवेदना, आधिः २. अनु-पश्चात्,-तापः।

मनस्वी, वि. (सं.-विन्) महाशय, महानुभाव २. बुद्धिमत्, सुबुद्धि ३. स्वेच्छाचारिन्।

मनहुँ, क्रि. वि., दे. 'मानो'।

मनहूस, वि. (अ.) अशुभ, अमंगल २. कुरूप, दुर्दर्शन ३. अलस, मंथर।

मना, वि. (अ.) नि-प्रति,-षिद्ध- वर्जित। सं. पुं., दे. 'मनाही'।

—करना, क्रि. स., नि-प्रति-षिध् (भ्वा. प. से.), निवृ (प्रे.), नि-अव-रुध् (स्वा.उ.अ.)।

मनादी, सं. स्त्री. (अ. मुनादी) उद्घोषणा, प्रख्यापनम्।

—करना, क्रि. स., उद्घुष् (चु.), प्रख्या (प्रे., प्रख्यापयति)।

मनाना, क्रि. स., ब. 'मानना' के प्रे. रूप।

मनाही, सं. स्त्री. (अ. मना) नि-प्रति,-षेधः, निरोधः, निवारणं, प्रत्यादेशः।

मनिहार, सं. पुं. (सं. मणिकारः) रत्नकारः, रत्नाजीविन् २.,-३. काचकंकण,-कारः-विक्रयिन्।

मनिहारी, सं. स्त्री. (हिं. मनिहार) मणि,-व्यव-

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

सायः-वाणिज्यं, रत्नव्यवहारः २. काचद्रव्य-व्यवसायः ।

मनी-आर्डर, सं. पुं. (अं.) धनादेशः ।

—फार्म, सं. पुं. (अं.) धनादेशपत्रम् ।

मनीषा, सं. स्त्री. (सं.) बुद्धिः (स्त्री.) २. स्तुतिः (स्त्री.) ।

मनीषी, वि. (सं.-षिन्) पंडित, बुद्धिमत् ।

मनु, सं. पुं. (सं.) ब्रह्मणः पुत्रः, धर्मशास्त्रकारो-मुनिविशेषः २. मनुष्यः ।

मनुज, सं. पुं. (सं.) मनुष्यः, मानवः ।

मनुष्य, सं. पुं. (सं.) मानुषः, मनुजः, मानवः, मर्त्यः, नरः, द्विपदः, मनुः, पंचजनः, पु(पू)रुषः, पुम्स्-नृ (पुं.), मर्णः, विश् (पुं.) ।

मनुष्यता, सं. स्त्री. (सं.) मनुष्यत्वं, मानवता २. सभ्यता, शिष्टता ३. दया, सौहार्दम् ।

मनुष्यी, सं. स्त्री. (सं.) नारी, मानुषी, मानवी, मर्त्या, मनुजी, नरी ।

मनुहार, सं. स्त्री. (सं. मानहारः>) प्रसादनं, उपशमनं, सांत्वनं २. विनयः, प्रार्थनं-ना ३. आदरः, माननं-ना ।

मनो[1], क्रि. वि., दे. 'मानो' ।

मनो , (सं. मनस् न.) दे. 'मन' ।

—कामना, सं. स्त्री. (सं. मनःकामना) अभिलाषः, वांछा ।

—गत, वि. (सं.) हृदयस्थ, हार्दिक ।

—ज, सं. पुं. (सं.) मदनः, कंदर्पः ।

—ज्ञ, वि. (सं.) सुन्दर, अभिराम ।

—नीत, वि. (सं.) रुच्य, रुचिकर, हृद्य २. वृत ।

—योग, सं. पुं. (सं.) अनन्यमनस्कता, चित्तैकाग्र्यं, अवधानम् ।

—रंजक, वि. (सं.) चित्ताह्लादकः, सुखकर, हर्षावह, हृदयहारिन्, मनोविनोदक ।

—रंजन, सं. पुं. (सं. न.) मनोविनोदः, चित्ताह्लादनं-दः, क्रीडा, कौतुकम् ।

—रथ, सं. पुं. (सं.) स्पृहा, वांछा ।

—रथ सफल होना, क्रि. अ., सफलमनोरथ (वि.) भू, अभिलषितं अधिगम् ।

—रम, वि. (सं.) मनोज्ञ, सुंदर ।

—वांछित, वि. (सं.) अभिलषित, अभीष्ट ।

—विकार, सं. पुं. (सं.) वित्त-विकृतिः (स्त्री.)-विकारः, मनो,-धर्मः-वृत्तिः (स्त्री.)-वेगः ।

—विज्ञान, सं. पुं. (सं. न.) मानसशास्त्रम् ।

—वृत्ति, सं. स्त्री. (सं.) चित्तवृत्तिः (स्त्री.), मनोविकारः, मानसी दशा ।

—हर, वि. (सं.) सुंदर, हृदयहारिन् ।

—हरता, सं. स्त्री. (सं.) सौन्दर्यं, चित्ताकर्षकता, मनोज्ञता ।

मनौती, सं. स्त्री. (हिं. मानना) दे. 'मनुहार'(१) २. दे. 'मन्नत' ।

मन्नत, सं. स्त्री. (हिं. मानना) देवपूजा,-प्रणः-प्रतिज्ञा-शपथः ।

—उतारना या बढ़ाना, मु., देवपूजाप्रतिज्ञां पा (प्रे. पालयति) ।

—मानना, मु., अभीष्टसिद्धये देवपूजां प्रतिज्ञा (क्र. आ. अ.) ।

मन्वंतर, सं. पुं. (सं. न.) एकसप्तति चतुर्युग्यात्मकः कालः, ब्रह्मदिनस्य चतुर्दशो भागः ।

मपना, क्रि. अ., ब. 'मापना' के कर्म. के रूप ।

मपवाना, मपाना, क्रि. प्रे., ब. 'मापना' के प्रे. रूप ।

मफ़रूर, वि. (सं.) पलायित, गुप्त, अन्तर्हित, प्रच्छन्न, व्यपसृत ।

मम, सर्व. (सं.) दे. 'मेरा' ।

ममता, सं. स्त्री. (सं.) }
ममत्व, सं. पुं. (सं. न.) } स्वाम्यं, स्वामित्वं, अधिकारः, स्वत्वं, प्रभुत्वं २. स्नेहः, प्रेमन् (पुं.न.) ३. वात्सल्यं ४. मोहः ५. लोभः ६. अभिमानः, गर्वः ।

ममिया, वि., दे. 'ममेरा' ।

—ससुर, सं. पुं., पति-पत्नी,-मातुलः ।

—सास, सं. स्त्री., पति-पत्नी,-मातुली ।

ममियौरा, सं. पुं. (हिं. मामा) मातुलगृहम् ।

ममीरा, सं. पुं. (अ. मामीरान) नेत्ररोगोपकारकः क्षुपमूलभेदः ।

ममेरा, वि. (हिं. मामा) मातुलीय, मातुलिक ।

—भाई, सं. पुं., मातुलपुत्रः, मातुलेयः (–यी स्त्री.), दे. 'भाई' के नीचे ।

ममोला, सं. पुं., दे. 'खंजन' ।

मयंक, सं. पुं. (सं. मृगांकः) दे. 'चाँद' ।

मयस्सर, वि. (अ.) प्राप्त, लब्ध २. प्राप्य, सुलभ ।

मयूख, सं. पुं. (सं.) किरणः, रश्मिः ।

मयूर, सं. पुं. (सं.) दे. 'मोर' ।

मयूरी, सं. स्त्री. (सं.) दे. 'मोरनी' ।

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

मरक, सं. पुं. (सं.) दे. 'मरी'।

मरकत, सं. पुं. (सं. न.) हरिन्मणिः, अश्मगर्भं, मरक्तं, राजनीलं, गारुडम्।

मरकना, क्रि. अ. (अनु.) भारेण भंज्-भिद्-दृ (कर्म.)।

मरघट, सं. पुं. (हिं. मरना+घाट) शतानकं, श्मशानं, पितृकाननं, प्रेतभूः (स्त्री.)।

मरज़, सं. पुं. (अ. मर्ज़) रोगः, व्याधिः २. दुर्व्यसनं, कुवृत्तिः (स्त्री.)।

मरजिया, वि. (हिं. मरना+जीना) मृत्युमुक्त, *मृतजीवित २. मरण, उन्मुख-आसन्न ३. मृत,-प्राय-कल्प। सं. पुं. (मुक्तार्थं) नियंक्तृ, विगाहकः।

मरण, सं. पुं. (सं. न.) मृत्युः, निधनम्।
—धर्मा, वि. (सं.-धर्मन्) मर्त्य, मरणशील।

मरतबा, सं. पुं. (अ.) पदं, पदवी २. वारः।

मरतबान, सं. पुं., दे. 'अमृतबान'।

मरदूद, वि. (अ.) तिरस्कृत, अपमानित २. क्षुद्र।

मरना, क्रि. अ. (सं. मरणं) मृ (तु.आ.अ.), पंचत्वं इ-या (अ. प. अ.), असून्-प्राणान्-देहं-तनु-जीवितं त्यज् (भ्वा. प. अ.)-उत्सृज् (तु. प. अ.)-हा (जु. प. अ.), प्र-इ (अ. प. अ.), गतासु-परासु (वि.) भू, विपद् (दि. आ. अ.), प्र-मी (कर्म.), २. क्लेशातिशयं सह् (भ्वा. आ. से.) ३. शुष् (दि. प. अ.), म्लै (भ्वा. प. अ.) ४. अत्यन्तं लज् (तु. आ. से.)-ऊर्ज् (भ्वा. आ. से.) ५. परा-परि,-भू, (कर्म.), परा-वि-जि (कर्म.) ६. शम् (दि. प. से.) ७. क्रीडातो बहिष्कृ (कर्म.)। सं. पुं., मरणं, निधनं, दे. 'मृत्यु'।
—जीना, मु., सुखदुःखं-खे, हर्षशोकं-कौ।
किसी पर—, मु., अनुरंज् (कर्म.), भावं-अनुरागं बंध् (क. प. अ.)।
पानी—, मु., कलंकित-दूषित-अपमानित (वि.) भू, अवगण्, अवमन् (कर्म.)।
मर कर, मु., अत्यायासेन, अतिकठिनतया।
मर के बचना, मु., मृत्युमुखात् मुच् (कर्म.), मरणासन्नोऽपि पुनः स्वास्थ्यं लभ् (भ्वा. आ. अ.)।
मर मिटना, मु., श्रमातिशयेन नश् (दि.प.से.)।
मरने तक की फ़ुर्सत न होना, मु., अतिव्याप्त-अनवकाश (वि.) वृत् (भ्वा. आ. से.)।

मरने योग्य, वि., मरणार्हं, व्यर्थजीवित, २. हताक्ष, खल, दुष्ट।

मरनेवाला, सं. वि., मरिष्यमाण, मरणोन्मुख, आसन्नमृत्यु २. मर्त्य, मृत्युवश, नश्वर।

मरा हुआ, वि., मृत, गतासु, पंचत्वं,-गत-प्राप्त-इत, प्रेत, परेत, उपरत,संस्थित, विपन्न, प्रमीत, विचेतन, निष्-गत,-प्राण।

मरभुक्खा, वि. (हिं. मरना+भूखा) क्षुधा-अर्दित-पीडित-आर्त-अवसन्न २. अकिंचन, निर्धन।

मरमर[1], सं. स्त्री. (अनु.) मर्मर-ध्वनिः-शब्दः, मर्मरः, पत्र-वस्त्र,-स्वनः।

मरमर[2], सं. पुं. (यू०) चिक्कणप्रस्तरभेदः, मरमरः।

मरमरा, वि. (अनु०) भिदुर, भंगुर, सुभंग।

मरमराना, क्रि. अ. (हिं. मरमर) मर्मर-रव कृ, मर्मरायते (ना. धा.) २. सममर्मरशब्दं अव-आ-नम् (भ्वा. प. अ.)।

मरम्मत, सं. स्त्री. (अ.) जीर्ण-,उद्धारः, प्रति-, समाधानं, संधानं, संस्कारः, नवीकरणं, पूर्वावस्थाप्रापणम्।
—करना, क्रि. अ., पूर्ववत्-नवी,-कृ, उद्धृ (भ्वा. प. अ.), सं-समा-प्रतिसमा,-धा (जु. उ. अ.) २. तड् (चु.)।

मरवाना, क्रि. प्रे., व. 'मारना' के प्रे. रूप।

मरसा, सं. पुं. (सं. मारिषः) कंधरः, मार्षिकः (शाकभेदः)।

मरसिया, सं. पुं. (अ.) निधनकाव्यं, शोकमयी कविता।

मरहटा-ठा, सं. पुं. (सं. महाराष्ट्रः>) महाराष्ट्रवासिन्, महाराष्ट्राः (बहु.)।

मरहटी-ठी, सं. स्त्री. (सं. महाराष्ट्री)माहाराष्ट्री।

मरहम, सं. पुं. (अ.) अनु,-लेपः, उपदेहः, समालंभः, अभ्यंजनम्।
—पट्टी, सं. स्त्री. (अ.+सं.) लेपपट्टी, व्रणोपचारः।

मरहमत, सं. स्त्री. (अ.) अनुग्रह-, कृपा।
—करना या फ़रमाना, दे. 'देना'।

मरहूम, वि. (अ.) स्वर्,-गत-यात, दिवंगत, मृत।

मराल, सं. पुं. (सं.) राजहंसः २. कारंडवः ३. अश्वः ४. गजः ५. मेघः।

मरिच, सं. स्त्री. (सं. न.) दे. 'मिर्च'।

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

मरियल, वि. (हिं. मरना) मृतकल्प, कृश, निर्बल ।

मरी, सं. स्त्री. (सं. मारी) जन-, मारः, महामारी, मारिका ।

मरीचि[1], सं. स्त्री. (सं. पुं. स्त्री.) किरणः, रश्मिः २. कांतिः (स्त्री.) ३. मरुमरीचिका ।

मरीचि[2], सं. पुं. (सं.) १-४. ऋषि-मरुद्-दानव-दैत्य,-विशेषः ।

मरीज, वि. (अ.) रुग्ण, रोगिन् ।

मरीचिका, सं. स्त्री. (सं.) दे. 'मृगतृष्णा' ।

मरु, सं. पुं. (सं.) धन्वन् (पुं.), मरु,-स्थलं-स्थली, ऊपरः-रं, खिलम् ।

—भूमि, सं. स्त्री. (सं.)
—स्थल, सं. पुं. (सं. न.) } दे. 'मरु' ।

मरुआ, सं. पुं. (सं. मरुवः) गंध-खर,-पत्रः, शीतलकः, बहुवीर्यः (क्षुपभेदः) ।

मरुत, सं. पुं. (सं.) दे. 'वायु' ।

मरोड़, सं. पुं. (हिं. मरोड़ना) आकुंचनं, व्यावर्तनं २. अंत्र-उदर,-वेदना-शूलं-पीडा ३. दर्पः ४. क्रोधः ५. दे. 'पेचिश' ।

—फली, सं. स्त्री., मधूलिका, मूर्वा, मूर्वी, मधुरसा, रंग-दिव्य,-लता ।

मरोड़ना, क्रि. स. (हिं. मोड़ना) कुच्-कुंच् (भ्वा. प. से.), व्यावृत् (प्रे.), कुटिली-वक्री कृ. २. पीड् (चु.), दुःखयति (ना. धा.) ३. मुष्टिना-मुष्टया ग्रह् (क्र्. प. से.)-धृ (भ्वा. प. अ.) ।

मरोड़ा, सं. पुं., (हिं. मरोड़ना) दे. 'मरोड़' (१-२), दे. 'पेचिश' ।

मरोड़ी, सं. स्त्री. (हिं. मरोड़ना) दे. 'मरोड़'(१) २. कुंचित-व्यावर्तित,-वस्तु (न.) ३. ग्रंथिः ।

मर्कट, सं. पुं. (सं.) दे. 'बंदर' ।

मर्ज़, सं. पुं. (अ.) दे. 'मरज़' ।

मर्ज़ी, सं. स्त्री. (अ.) इच्छा, रुचिः (स्त्री.) २. प्रसन्नता ३. स्वीकृतिः (स्त्री.), अनुज्ञा ।

मर्त्य, सं. पुं. (सं.) मनुष्यः, मानवः, २. शरीरम् ।

—लोक, सं. पुं. (सं.) भूमिः (स्त्री.), भूलोकः ।

मर्द, सं. पुं. (फ़ा.) मानवः, मनुजः, २. पुंस् (पुं.), पुरुषः, नरः ३. वीरः साहसिन्, योधः ४. पतिः

—बच्चा, सं. पुं., वीरबालः ।

मर्दन, सं. पुं. (सं. न.) पद्भ्यां पीडनं-क्षोदनं-आक्रमणं २. अभ्यंजनं, संवाहनं, मर्दनं, घर्षणं ३. ध्वंसनं, नाशनं ४. पेषणं, चूर्णनम् ।

मर्दानगी, सं. स्त्री. (फ़ा.) शूरता, वीरता, पुरुषत्वम् ।

मर्दाना, वि. (फ़ा.) पुरुष-वीर-शूर,-उचित २. पुरुष-नर,-सदृश-उपम विक्रांत,-नर-पुंरुष ।

—भेष, सं. पुं. पुरुषवेशः, नरोचितवेषः ।

मर्दित, वि. (सं.) पाद्,-पीडित क्षुण्ण-आक्रांत २. खंडित, चूर्णित ३. नाशित ।

मर्दुम, सं. पुं. (फ़ा.) जनः, मनुष्यः ।

—ख़ोर, सं. पुं., नरभक्षकः, मनुजादः ।

—शिनास, वि., नर-मानव,-अभिज्ञ ।

—शुमारी, स. स्त्री. (फ़ा.) जन,-संख्यान-गणना ।

मर्म, सं. पुं. [सं. मर्मन् (न.)] तत्त्वं, स्वरूपं २. रहस्यं, गोप्यवृत्तं ३. संधिस्थानं ४. जीव-स्थानम् ।

—ज्ञ, वि. (सं.) तत्त्वज्ञ, मर्मवेदिन् २. रहस्यविद् (पुं.) ।

—पीड़ा, सं. स्त्री. (सं.) हृद्यशूलं, मर्मव्यथा ।

—भेदी, वि. (सं.-दिन्) मर्म,-भिद् (पुं.) भेदक-छेदक-विदारकः ।

—स्थान, सं. पुं. (स्त्री.) मर्मस्थलं, जीवन-स्थानम् ।

मर्मर, सं. स्त्री. (अनु.) दे. 'मरमर' ।

मर्यादा, सं. स्त्री. (सं.) स्थितिः (स्त्री.), धारणा, संस्था, नियमः २. सीमा ३. कूलं ४. प्रतिज्ञा, समयः ५. सदाचारः, सद्वृत्तं ६. गौरवं, प्रतिष्ठा ७. धर्मः ।

मलंग, सं. पुं. (फ़ा.) मलंगः, यवनभिक्षुभेदः २. वकभेदः ३. स्वेच्छाचारिन् ।

मल, सं. पुं. (सं. पुं. न.) अव(प)स्करः, कल्कः-कं, किट्टं २. कर्दमः, पंकः ३. उच्चारः, गूथः-थं, पुरीषं, विष् (स्त्री.), विष्ठा, शकृत् (न.), शमलम् ।

मलना, क्रि. स. (सं. मर्दनं) अंज् (रु. प. से.), लिप् (तु. प. अ.), दिह् (अ. उ. अ.), म्रक्ष् (भ्वा. प. से.) २. धृष् (भ्वा. प. से.), घट् (क्र्. प. से.) ३. परि-प्र-मृज् (अ. प. से.), निज् (जु. उ. अ.) ४. करत-

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

लाभ्यां-चूर्ण् (चु.)। सं. पुं., अंजनं, लेपनं, घर्षणं, मर्दनं; मार्जनं; चूर्णनम्।

हाथ—, मु., अनु-पश्चात्,-तप् (दि. आ. अ.), अनुशुच् (भ्वा. प. से.), अनुशी (अ. आ. से.)।

मलबा, सं. पुं. (सं. मलः-लं) दे. 'मल' १-२। २. शकलराशिः।

मलमल, सं. स्त्री. (सं. मलमल्लकः>) *मल-मल्लकं, सूक्ष्मं तूलवस्त्रम्।

मलमास, सं. पुं. (सं.) अधिमासः, मलिम्लुचः, असंक्रांतमासः, नपुंसकः।

मलय, सं. पुं. (सं.) दक्षिणाचलः, चंदनाद्रिः, आषाढ़ः, मलयाचलः २. तैलपर्णिकं, श्वेतचंदनं ३. नंदनवनम्।

मलयज, सं. पुं. (सं. न.) दे. 'चंदनम्'।

मलयाचल, सं. पुं. (सं.) मलय,-अद्रिः-गिरिः-पर्वतः।

मलयानिल, सं. पुं. (सं.) मलय,-पवनः-वातः-समीरः।

मुआमिला, सं. पुं. (अ.) उपजीविका, वृत्तिः (स्त्री.), व्यवसायः २. पारस्परिकव्यवहारः, क्रयविक्रयं, दानादानं ३. वृत्तं, वार्त्ता, विषयः ४. कलहः, विवादः ५. अभियोगः ६. प्रतिज्ञा, समयः।
मुआयना, सं. पुं. (अ.) दे. 'निरीक्षण'।
मुआवज़ा, सं. पुं. (अ.) निष्कृतिः (स्त्री.), निस्तारः, प्रतिफलं २. क्षतिपूरण-हानिपूरण,-मूल्यम्।
मुक़द्दमा, सं. पुं. (अ.) अभियोगः, अक्षः, अर्थः, कार्यं, व्यवहारः, व्यवहारपदम्।
—करना या खड़ा करना, क्रि. स., अभियुज् (रु. आ. अ., चु.), राजकुले निविद् (प्रे.)।
मुक़दमेबाज़, सं. पुं. (अ.+फ़ा.) कार्यार्थिन्, वादिन्, व्यवहर्तृ, अभियोगशीलः।
मुक़दमेबाज़ी, सं.स्त्री. (अ.+फा.), अभियोगशीलता, व्यवहर्तृत्वम्।
मुक़द्दमा, सं. पुं., दे. 'मुकदमा'।
मुक़द्दर, सं. पुं. (अ.) भाग्यं, दैवम्।
मुक़द्दस, वि. (अ.) पवित्र, पुण्य, पावन।
मुकम्मल, वि. (अ.) समाप्त, अवसित २. संपूण, निःशेष।
मुकरना, क्रि. अ. (सं. मा=न+करणं) अप-नि-ह्नु (अ. आ. अ.), अपलप् (भ्वा. प. से.), निरा-कृ।
मुक़रनी, सं. स्त्री., दे. 'मुकरी'।
मुकरी, सं. स्त्री. (हिं. मुकरना) कविताभेदः, अपह्नुतियुता कविता।
मुकर्रर[1], क्रि. वि. (अ.) पुनरपि, द्वितीयवारं, भूयः।
मुक़र्रर, वि. (अ.) नियत, निश्चित २. नियुक्त।
मुक़ाबला, सं. पुं. (अ.) विरोधः, प्रतिद्वंद्विता, प्रातिकूल्यं २. स्पर्द्धा, संघर्षः, अहमहमिका, प्रतियोगिता ३. संग्रामः, युद्धं ४. तुलना, औपम्यं ५. साम्यं, सादृश्यं ६. समी-सदृशी,-करणम्।
—करना, क्रि. स., स्पर्ध् (भ्वा. आ. से.), संघृष् (भ्वा. प. से.) २. प्रतिकृ, विरुध्.

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

(रु. उ. अ.) ३. युध् (दि. आ. अ.) ४. तुल् (चु.), उपमा (जु. आ. अ.) ५. समी-सदृशी,-कृ।

मुक्काम, सं. पुं. (अ.) स्थानं, स्थलं २. विराम-स्थानं, दे. 'पड़ाव' ३. विरामः, निवेशः ४. आनि,-वासः, गृहं ५. अवसरः।

—**करना**, क्रि. अ., विश्रम् (दि. प. से.), निविश् (तु. प. अ.), विरम् (भ्वा. प. अ.)।

मुकुंद, सं. पुं. (सं.) श्रीकृष्णः २. रत्नभेदः ३. पारदः ४. मोक्षदः, परित्राट्।

मुकुट, सं पुं. (सं. न.) किरीटः-टं, मकुटं, कोटीरः, मौलिः, उत्तंसः।

मुकुर, सं. पुं. (सं.) दर्पणः, दे.।

मुकुल, सं. पुं. (सं. पुं. न.) कुड्मलः, दे. 'कली' २. आत्मन् (पुं.) ३. शरीरं ४. पृथिवी।

मुकुलित, वि. (सं.) समुकुल, सकुड्मल २. ईषद्विकसित, अर्द्धोन्मिषित, अर्द्धनिमीलित ३. निमेषोन्मेषयुक्त।

मुक्का, सं. पुं. (सं. मुष्टिका) मुष्टिः (पुं. स्त्री.), मुस्तुः, मुचुटी, सर्पिंडितांगुलिबद्ध-पाणिः २. मुष्टि-मुचुटी,-प्रहारः-घातः-ताडः-हथः।

—**मारना**, क्रि. स., मुचुट्या प्रह्व (भ्वा. प. अ.)।

मुक्केबाज, (हिं.+फ़ा.) मुष्टि,-योधः-योधिन्।

मुक्केबाजी, सं. स्त्री., (हिं.+फ़ा.) मुष्टियुद्धं, मौष्टा, मुष्टिकं, मुष्टी(ष्टा)मुष्टि (अव्य.)।

मुक्त, वि. (सं.) लब्ध-प्राप्त,-मोक्ष-निर्वाण, निस्तीर्ण २. मोचित, स्वाधीन, बन्धन-निरोध-रहित।

—**कंठ**, वि. (सं.) तारस्वर, महास्वन २. अविसृश्यवादिन्, अयतवाच्।

—**हस्त**, वि. (सं.) व्ययशील, अतिव्ययिन्, बहुव्यय।

मुक्ता, सं. स्त्री. (सं.)
—**फल**, सं. पुं. (सं. न.) } दे. 'मोती'।

—**हार**, सं. पुं. (सं.) मुक्तावली।

मुक्तागार, सं. पुं. (सं. न.) शुक्तिः (स्त्री.), शुक्तिका, मौक्तिक,-प्रसः (स्त्री.)-प्रसवा।

मुक्ति, सं. स्त्री. (सं.) मोक्षः, कैवल्यं, निर्वाणं, श्रेयस् (न.), निःश्रेयसं, अमृतं, अपवर्गः, अपुनर्भवः २. मोचनं, निर्यत्रणं-णा, निरोधाभावः ३. स्वच्छंदता, स्वतंत्रता।

—**क्षेत्र**, सं. पुं. (सं. न.) काशी, वाराणसी।

—**धाम**, सं. पुं. (सं. न.) मोक्षदं स्थानम्, तीर्थम्।

—**फौज**, सं. स्त्री. (सं.+अ०) मुक्तिसेना, खिस्तधर्मप्रचारकसंघः।

मुख, सं. पुं. (सं. न.) दे. 'मुँह'।

—**बंध**, सं. पुं. (सं. न.) प्रस्तावना, भूमिका।

मुखड़ा, सं. पुं. (सं. मुखं) दे. 'मुँह' (२)।

मुख़्तार, सं. पुं. (अ.) प्रति,-निधिः-पुरुषः-हस्तकः २. पराभियोगकारिन् ३. उपाभिभाषकः।

—**नामा**, सं. पुं. (अ.+फ़ा.) *प्रातिनिध्य-प्रतिनिधित्व,-पत्रम्।

मुख़्तारी, सं. स्त्री. (अ. मुख़्तार) पराभियोग-कारिता-त्वं २. उपाभिभाषकता-त्वं ३. प्रातिनिध्यम्।

मुख़बिर, सं. पुं. (अ.) दे. 'जासूस'।

मुख़बिरी, सं. स्त्री. (अ. मुख़बिर) दे. 'जासूसी'।

मुखर, वि. (सं.) कटु-अप्रिय,-वादिन्-भाषिन्, दुर्मुख २. वाचाल, वाचाट ३. नेतृ, अग्रयायिन् ४. शब्दायमान।

मुखरित, वि. (सं.) प्रति,-ध्वनित-नादित।

मुखस्थ, वि. (सं.) मुखाग्र, कंठाग्र, कंठस्थ।

मुख़ालिफ़, वि. (अ.) विपक्षिन्, विरोधिन् २. वैरिन् ३. प्रतिद्वंद्विन्।

मुखिया, सं. पुं. (सं. मुख्य) नेतृ, नायकः, पुरो-अग्र,-गः-गामिन्, अग्रणीः, प्रधानः, मुखरः २. ग्रामणीः (पुं.), ग्राममुख्यः।

मुख़्तलिफ़, वि. (अ.) भिन्न, अपर २. बहु-अनेक,-विध।

मुख़्तसर, वि. (अ.) संक्षिप्त २. लघु, क्षुद्र ३. अल्प। सं. पुं., संक्षेपः।

मुख्य, वि. (सं.) प्रधान, अग्रथ, अग्रिम, प्रमुख, परम, उत्तम, श्रेष्ठ, विशिष्ट-,ऋषभ, इंद्र,-पुंगव,-वर।

मुख्यतः, } क्रि. वि., (सं.) प्रधानतः-तया,
मुख्यतया, } विशेष-तया, प्रधान-मुख्य-विशेषेण,-रूपेण।

मुगदर, सं. पुं., दे. 'मुद्गर'।

मुग्ध, वि. (सं.) आसक्त, अनुरक्त, बद्धभाव, सानुराग, कामासक्त २. मूढ, भ्रांत ३. सुन्दर, अभिराम ४. नव, नवीन।

मुग्धता, सं. स्त्री. (सं.) आसक्तिः (स्त्री.), अनुरागः २. मूढता ३. सौन्दर्यम्।

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

मुग्धा, सं. स्त्री. (सं.) नायिकाभेदः २. सुकुमारी तरुणी ।

मुचलका, सं. पुं. (तु.) निस्तारः ।

मुछंदर, सं. पुं. (हिं. मूछ) मह्या,-गुंफ-श्मश्रु-व्यंजन- श्मश्रुल २. कपिः ३. मूषिकः ४. कुरूपमूर्खः, जडः ।

मुज़क्कर, वि. (अ.) पुंल्लिंग (व्या.) ।

मुजरा, सं. पुं. (अ.) उद्धृत-व्यवकलित,-धनं २. अभिवादनं, प्रणिपातः ३. वेश्यायाः सनृत्यमनृत्यं वा गानम् ।

मुजरिम, सं. पुं. (अ.) अपराधिन्, कृतापराधः, दंडयः २. अभियुक्तः ।

मुजस्सिम, वि. (अ.) सशरीर, देहवत्, शरीरिन् ।

मुज़िर, वि. (अ.) हानिं,-कारक,-प्रद ।

मुझ, सर्व. (हिं. मुझे) (अस्मद् के रूप बनेंगे) ।

—को, मां, मा २. मह्यं, मे ।

—से, मया २. मत् ।

—में, मयि ।

मुटाई, सं. स्त्री., दे. 'मोटाई' ।

मुट्ठा, सं. पुं. (हिं. मुट्ठी) मुष्टिः (पुं. स्त्री.), मुष्टिमात्रं द्रव्यं २. वारंगः, दंडः, मुष्टिः (पुं. स्त्री.) ।

मुट्ठी, सं. स्त्री. [सं. मुष्टिः (पुं. स्त्री.)] दे. 'मुक्का' (१) । २. मुष्टिमेयः पदार्थः, मुष्टिः ३. संवाहः-हनं-हना ४. ग्रहः-हणम् ।

—भरना, क्रि. स., संवह् (प्रे.), मृद् (क्र. प. से.) ।

—चाँपी, सं. स्त्री., दे. 'मुट्ठी' (३) । २. सेवा, परिचर्या ।

—भर, वि., मुष्टि,-मात्र-मेय-मित ।

—गरम करना, मु., उत्कोचं दा ।

—में, मु., वशे, अधिकारे ।

मुठभेड़, सं. स्त्री. (हिं. मुट्ठी+भिड़ना)संघट्टः, समाघातः २. संग्रामः, युद्धं ३. सांमुख्यं, संमुखागमनं, सं,-मिलनं-आगमः ।

मुठिया, सं. स्त्री. (सं. मुष्टिका>) (खड्गादि की) त्सरुः, वारंगः, सरुः २. दंडः, कर्णः, मुष्टिः-टिका, तलः-लं ३. *पिंजकदण्डः ।

मुड़ना, क्रि. अ. (सं. मुरणं) वक्रीभू, नम् (भ्वा. प. अ.) २. प्रत्यागम्, प्रतिगम्, प्रतिनिवृत् (भ्वा. आ. से.) ३. व्यावृत् । सं. पुं. वक्रीभावः, नमनं, प्रति,-गमनं-आगमनं, व्यावर्तनम् ।

मुड़ाना, क्रि. प्रे. व. 'मूंडना' के प्रे. रूप ।

मुड्ढा, सं. पुं. (सं. मूर्द्धन्>) स्कंधः २. *सूत्र-पिंडः-डं, तूलपीठी ।

मुड्ढी, सं. स्त्री. (हिं. मुड्ढा) छिन्नतरुमूलम् ।

मुतअल्लिक, वि. (अ.) संबद्ध, संलग्न, संगत । क्रि. वि., विषये, संबंधे ।

मुतफ़र्रिक़, वि. (अ.) बहु-नाना-वि,-विध, प्र-सं,-कीर्ण ।

मुतबन्ना, सं. पुं. (अ.) दे. 'दत्तक' ।

मुतलक, क्रि. वि. (अ.) किंचिद्,मनाग्-ईषद्,-अपि २. केवलं, सर्वथा । वि., केवल,ऐकांतिक ।

मुताबिक, क्रि. वि. (अ.)-अनुसारं-रेण, -अनुरोधेन-धात्, यथा, अनु, वि., अनुकूल, अनुरूप ।

मुतालबा, सं. पुं. (अ.) प्राप्तव्यधनं २. ऋण-देय,-शेषं-शेषः ।

मुदित, वि. (सं.) प्रसन्न, आनंदित, प्रहृष्ट ।

मुद्गर, सं. पुं. (सं.) घनः, द्रुघनः-णः,प्रघणः २. गोपुच्छाकारो व्यायामोपयोगी स्थूलदंडः ३. अतिगंधः, गंधराजः ।

मुद्दआ, सं. पुं. (अ.) अभिप्रायः, तात्पर्यम् ।

मुद्दई, सं. पुं. (अ.) परिवादकः, अभियोगिन्, वादिन्, अर्थिन्, अभियोक्तृ २. शत्रुः, वैरिन् ।

मुद्दत, सं. स्त्री. (अ.) अवधिः, समयसीमा, नियतकालः,२. चिरं, चिरकालः,महान् समयः, युगः-गम् ।

—का, वि., चिर,-कालिक-कालीन, पुराण, पुरातन ।

—तक,—से, क्रि. वि., चिरं, चिरेण, चिराय, चिरात्, चिरस्य, चिरे ।

मुद्दाअलेह, सं. पुं. (अ.) अभियुक्तः, प्रत्यर्थिन्, प्रतिवादिन्, उत्तरवादिन् ।

मुद्रक, सं. पुं. (सं.) मुद्रण,-कारः-कर्तृ ।

मुद्रण, सं. पुं. (सं. न.) मुद्राक्षरैः अंकनं, मुद्रांकनं २. मुद्रानिर्माणम् ।

मुद्रणालय, सं. पुं. (सं.) मुद्रणगृहं, दे. 'प्रेस' ।

मुद्रांकित, वि. (सं.) स-कृत,-मुद्र,मुद्राचिह्नित २. नारायणायुधचिह्नयुक्तः (वैष्णवः) ।

मुद्रा, सं. स्त्री. (सं.) मुद्रिका, प्रत्ययकारिणी, * नामांकनी २. अंगुली(री)यं-यकं, ऊर्मिका ३. नाणकं, टंकः-कं ४. मुद्रित-शब्दः-चिह्नं ५. दे. 'मुँदरा' ६. शरीरस्य तदवयवानां वा

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

स्थितिविशेषः, अंगविन्यासः, संस्थितिः (स्त्री.) ७. मुख,-आकारः-आकृतिः (स्त्री.) ८. भक्त-देहांकितं भगवदायुधचिह्नं ९. अगस्त्यपत्नी, लोपामुद्रा १०. मुद्रा,-लांछनं-चिह्नम् ।

—मार्ग, सं. पुं. (सं.) ब्रह्मरंध्रम् ।

—यंत्र, सं. पुं. (सं.) मुद्रणयंत्रम् ।

—राक्षस, सं. पुं. (सं. न.) विशाखदत्तप्रणीतं संस्कृतनाटकम् ।

—शास्त्र, सं. पुं. (सं. न.) मुद्रातत्त्वम् ।

मुद्राक्षर, सं. पुं. (सं. न.) सीसक-धातुमय-मुद्रण,-अक्षराणि ।

मुद्रिका, सं. स्त्री. (सं.) अंगुलीयकं, ऊर्मिका २. अनामिकाधार्यं कुशांगुलीयकं, पवित्रं ३. नाणकं ४. मुद्रा ।

मुद्रित, वि. (सं.) दे. 'मुद्रांकित' २. मुद्राक्षरैः-सीसकाक्षरैः अंकित ३. पिहित, संवृत, निमीलित, मुकुलित ।

मुधा, अव्य. (सं.) व्यर्थं, वृथा २. असत्यं, मृषा (अव्य.) । वि., व्यर्थ २. असत्य । सं. पुं., असत्यं, अनृतम् ।

मुनक्का, सं. पुं. (अ.) काकलीद्राक्षा, जांबुका, फलोत्तमा, दुग्धी-धिका ।

मुनहसि(स)र, वि. (अ.) आश्रित, अवलंबित ।

मुनाज़रा, सं. पुं. (अ.) शास्त्रार्थः, वादः, तर्कशास्त्रम् ।

मुनादी, सं. स्त्री. (अ.) दे. 'मनादी' ।

मुनाफ़ा, सं. पुं. (अ.) लाभः, आयः, फलम् ।

मुनासिब, वि. (अ.) उचित, युक्त, योग्य ।

मुनि, सं. पुं. (सं.) विचारकः, चिंतकः, तत्त्व,-ज्ञः-दर्शिन्, प्राज्ञः २. मौनिन्, वाचंयमः, ऋषिः, व्रतिन्, तपस्विन् ।

मुनीम, सं. पुं. (अ. मुनीब) सहायः-यकः, उपकारिन्, उप-(उ. उपमंत्रिन् आदि) २. गणकः, कायस्थः, लेखकः ।

मुनीश, सं. पुं. (सं.) मुनीश्वरः, मुनिपुंगवः २. श्रीबुद्धदेवः ।

मुन्ना, मुन्नूँ, सं. पुं. (सं. मुंडः >) शिशुः, बालकः २. (बच्चों को बुलाने में) अंग, तात ।

मुफ़रद, वि. (अ.) एकाकिन्, असहाय २. अमिश्रित (औषधादि), केवलैक ।

मुफ़र्रह, वि. (अ.) आनन्द-मोद,-दायक प्रद ।

मुफ़लिस, वि. (अ.) अधन, अकिंचन, दरिद्र ।

मुफ़लिसी, सं. स्त्री. (अ.) निर्धनता, दरिद्रता ।

मुफ़स्सल, वि. (अ.) स,-विस्तर-प्रपंच । क्रि. वि., सविस्त(स्ता)र,विस्त(स्ता)रेण, विस्तरतः । सं. पुं., नगर,-उपांतः-प्रान्तः, पुरोपकंठः ठं, उप-शाखा,-नगरं-पुरम् ।

मुफ़ीद, वि. (अ.) उपकारिन्, उपयोगिन्,-हितकर[-री (स्त्री.)] ।

मुफ़्त, वि. (अ.) निःशुल्क, निर्मूल्य ।

—ख़ोर-रा, वि., परपिंडाद, परान्नपुष्ट ।

—में, मु., निःशुल्कं, निर्मूल्यं, मूल्यं विना २. व्यर्थं, निष्प्रयोजनम् ।

मुफ़्ती, सं. पुं. (अ.) न्याय,-अधीशः-अधिपतिः, धर्माध्यक्षः (इस्लाम) ।

मुबतिला, वि. (अ.) ग्रस्त, गृहीत, पीडित ।

मुबर्रा, वि. (अ.) मुक्त, अनिरुद्ध २. निर्दोष,-पूत ।

मुबल(लि)ग़, वि. (अ.) सर्व, समस्त । सं. पुं., मात्रा ३. रूप्यकादिसंख्या ।

मुबारक, वि. (अ.) शुभ, भद्र, मंगल । अव्य.,-शुभं-भद्रं भूयात्, स्वस्ति ।

—बाद, सं. पुं.
—बादी, सं. स्त्री. } (फ़ा.) दे. 'बधाई' ।

मुबालिग़ा, सं. पुं. (अ.) अत्युक्तिः (स्त्री.) ।

मुबाहिसा, सं. पुं. (अ.) सं.-वि-,वादः, हेतु-वादः, प्र त-,वादः, ऊहापोहः, विचारः-रणा ।

मुमकिन, वि. (अ.) संभाव्य, संभवनीय, *संभव, शक्य, संभावित, साध्य, संपाद्य ।

मुमानियत, सं. स्त्री. (अ.) दे. 'मनाही' ।

मुमुक्षु, वि (सं.) मोक्षार्थिन्, अपवर्गाभिलाषिन् २. श्रमणः, मुनिः, साधुः, भिक्षुः ।

मुमुर्षु, वि. (सं.) आसन्नमृत्यु २. निधनेच्छुक ।

मुम्तहिन, सं. पुं. (अ.) दे. 'परीक्षक' ।

मुरकना, क्रि. अ. (हिं. मुड़ना) व्यावृत् (भ्वा. आ. से.), आकुंच् (कर्म.) २. वि.-नश् (दि. प. वे.) ३. अभिशंक् (भ्वा. आ. से.) ४. प्रतिगम्-प्रत्यागम्, प्रतिनिवृत् (भ्वा. आ. से.) ५. अकस्मात् त्रुट् (तु. दि. प. से.)-स्फुट् (तु. प. से.) ६. दे. 'मोच आना' ।

मुरकाना, क्रि. स., ब. 'मुरकना' के प्रे. रूप ।

मुरकी, सं. स्त्री. (हिं. मुरकना) कर्णपूरकः, कर्णवलयकः-कम् ।

मुरग़ा, सं. पुं. (फ़ा. मुर्ग) उषाकलः, कुक्कवाकुः, दे. कुक्कुटः २. प्रक्षिन् ।

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

मुरग़ाबी, सं. स्त्री. (सं.) जलकुक्कुटः, यष्टिकः, शुक्लकण्ठः।

मुरज, सं. पुं. (सं.) दे. 'मृदंग'।

मुरझाना, क्रि. अ. (स. मूर्च्छनं>) म्लै-म्लै (भ्वा. प. अ.), विशृ (कर्म.), ग्लान-म्लान-विशीर्ण (वि.) भू, जृ (दि. प. से.) २. अवसद्-विषद् (भ्वा. प. अ.), दुर्मनायते (ना.धा.), विषण्ण-अवसन्न-विच्छाय (वि.) भू। सं. पुं., ग्लानिः-म्लानिः (स्त्री.) ३. विषादः, अवसादः, वै-दौर्,-मनस्यम्।

मुरझाया हुआ, वि., ग्लान, म्लान, जीर्ण, शीर्ण, २. विषण्ण, निर्विण्ण, अवसन्न, दीन।

मुरदा, सं. पुं. (फ़ा.) मृतकः-कं, शवः-वं, कुणपः, प्रेतम्। वि., उपरत, प्रेत, परेत, विपन्न, परासु, मृत, निर्जीव, निष्प्राण, प्रमीत २. दुर्बल २. म्लान।

मुरदार, वि. (फ़ा.) मृत, प्रेत २. दूषित, अपवित्र ३. जड, स्तंभित, स्तब्ध।

मुरब्बा[1], (अ.मुरब्बह्) मिष्टपाकः, फलोपस्करः।

मुरब्बा[2], सं. पुं. (अ. मुरब्बअ) समचतुरस्रः, समचतुर्भुजः २. वर्गः, द्विघातः ३. समचतुरस्र-समचतुर्भुज-वर्गाकार,-भूखंडः(-डम्)। वि., वर्गीकृत, वर्ग-(गज, फुट आदि)।

मुरमुरा, सं. पुं. (अनु. मुरमुर) भिष्मा, भिष्मिका-टा, भिस्स(स्सि)टा।

मुरमुराना, क्रि. अ. (अनु. मुरमुर) मुरमुरायते (ना. धा.)।

मुरली, सं. स्त्री. (सं.) वंशी-शिका, वंशः, वेणुः, वंश-,नालिका, सानिका।

—धर,
—मनोहर, } सं. पुं. (सं.) श्रीकृष्णचंद्रः।

मुरव्वत, सं. स्त्री. (अ.) शीलं २. सज्जनता। बे—, वि., रूक्ष, सहानुभूतिशून्य।

मुराद, सं. स्त्री. (अ.) अभिलाषः, कामना २. आशयः, अभिप्रायः।

मुरादों के दिन, मु., यौवनम्।

मुरारी, सं. पुं. (सं.-रिः) श्रीकृष्णचन्द्रः।

मुरीद, सं. पुं. (अ.) शिष्यः २. अनुयायिन्।

मुर्दनी, सं. स्त्री. (फ़ा. मुर्दन) मृत्यु,-लक्षणानि (न. बहु.)-च्छाया २. अवसादः, विषादः, दौर्मनस्यं, निर्वेदः, उत्साहाभावः। चेहरे पर मुर्दनी छाना या फिरना, मु., मुखे मृत्युलक्षणानि प्रादुर्भू २. अति,-विषण्ण-निराश (वि.) विद् (दि. आ. अ.)।

मुर्दा, सं. पुं., दे. 'मुरदा'।

मुर्रा, सं. पुं. (हिं. मरोड़) दे. 'मरोड़' (२)। २. दे. 'पेचिश'।

मुलज़िम, वि. (अ.) अभियुक्त, दूषित।

मुलतवी, वि. (अ.) विलंबित, व्याक्षिप्त, *स्थगित।

मुलतान, सं. पुं. (सं. मूलत्राणं) प्रह्लादपुरं, साम्बीपुरम्।

मुलतानी, वि. (हिं. मुलतान) मूलत्राण,-विषयक-संबंधिन्, मौलत्राण। सं. स्त्री., रागिणी-भेदः २. *पीतगैरिकं, मौलत्राणीमृत्तिका।

मुलम्मा, वि. (अ.) भासुर, भ्राजमान २. सुवर्ण-रजत,-लिप्त-रंजित। सं. पुं., हेमलेपः, रजतरंजनं २. आडंबरः, आपातरम्यता।

—करना, क्रि. स., रजतेन-स्वर्णेन लिप् (तु. प. अ.)-रंज् (प्रे.)।

—साज़, सं. पुं. (अ.+फ़ा.) *धातु-हेम,-लेपकारः।

मुलहटी-ठी, सं. स्त्री., दे. 'मुलेठी'।

मुलाक़ात, सं. स्त्री. (अ.) दे. 'मिलन' (१)।

—करना, क्रि. स., दे. 'मिलना'।

—करवाना, क्रि. प्रे., परिचय कृ (प्रे.), परिचि (प्रे.)।

मुलाकाती, सं. पुं. (अ. मुलाक़ात) परिचितः २. दर्शकः।

मुलाज़िम, सं. पुं. (अ.) दे. 'नौकर'।

मुलाज़िमत, सं. स्त्री. (अ.) दे, 'नौकरी'।

मुलायम, वि. (अ.) कोमल, सुकुमार २. श्लक्ष्ण, चिक्कण।

—करना, मु., परस्य क्रोधं शम् (प्रे., शमयति)।

मुलाहिज़ा, सं. पुं. (अ.) दे. 'निरीक्षण' २. आदरः ३. अनुग्रहः।

मुलेठी, सं. स्त्री. [सं. मधुयष्टी-टिः (स्त्री.)] यष्टिमधु (न.), मधुयष्टिका, मधुकं, क्लीतकम्।

मुल्क, सं. पुं. (अ.) देशः २. प्रांतः ३. संसारः।

मुल्की, वि. (अ.) स्व-,देशीय २. शासन-संबंधिन्।

मुल्ला, सं. पुं. (अ.) यवनपुरोहितः २. अध्यापकः।

मुवक्किल, सं. पुं. (अ.) *अभिभाषकनियोजकः।

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

मुवा-आ, वि. (सं. मृत) निर्जीव, निष्प्राण २. नीच, तुच्छ ।
मुशाइरा, सं. पुं. (अ.) कविसम्मेलनम् ।
मुशाबहत, सं. स्त्री. (अ.) सादृश्यं, साम्यम् ।
मुश्क[1], सं. पुं. (फ़ा.) कस्तूरी-रिका, मृगमदः २. दुर्-,गंधः ।
मुश्क[2], सं. स्त्री. (देश.) भुजः, बाहुः ।
मुश्कें कसना या बाँधना, मु., बाहू पृष्ठतः नियंत्र् (चु.) ।
मुश्किल, वि. (अ.) कठिन, दुस्साध्य । सं. स्त्री., कठिनता २. विपत्तिः (स्त्री.) ।
—कुशा, वि., संकट-क्लेश-विघ्न,-हर विनाशक ।
—आसान होना, मु., संकटहरणम्, विपद् विनश् (दि. प. से.) ।
मुश्की, वि. (फ़ा.) कृष्ण, श्याम २. मृगमद-मिश्रित २. श्यामाश्वः, खुंगाहः ।
मुश्त, सं. पुं. (फ़ा.) मुष्टिः (पुं. स्त्री.) ।
एक—, क्रि. वि., युगपत् (अव्य.) ।
मुश्तामुश्ती, सं. स्त्री. [सं.-ष्टि (अव्य.)] मुष्टी-मुष्टि (अव्य.), मुष्टियुद्धम् ।
मुष्टि, सं. स्त्री. (सं. पुं. स्त्री.) दे. 'मुक्का' (१) । २. पलपरिमाणं (४ या ८ तोले का) ३. चौर्यं ४. दुर्भिक्षं ५. त्सरुः, सरुः ।
—युद्ध, सं. पुं. (सं. न.) दे. 'मुक्केबाजी' ।
मुष्टिका, सं. स्त्री. (सं.) दे. 'मुक्का' २. दे. 'मुट्ठी' (२) ।
मुसक(कि)राना, क्रि. अ. (सं. स्मयकरणं) स्मि (भ्वा. आ. अ.), ईषत्-मंदं-मृदु हस् (भ्वा. प. से.) मृदुहास्यं कृ । सं. पुं., स्मयनं, ईषद्हसनं, स्मितं, मृदुहासः ।
मुसकराने वाला, सं. पुं., स्मेर, सस्मित, स्मयमान, स्मित,-कारिन्-शालिन् ।
मुसक(कि)राहट, सं. स्त्री. (हिं. मुसकराना) स्मितं-तिः (स्त्री.), मंद-मृदु,-हासः-हसितं-हास्यम् ।
मुसन्निफ़, सं. पुं. (अ.) ग्रंथकारः, पुस्तकप्रणेतृ ।
मुसल, सं. पुं., दे. 'मूसल' ।
मुसलमान, सं. पुं. (फ़ा.) यवनः, मोहम्मदीयः, *मुसलमानः ।
मुसलमानी, सं. स्त्री. (फ़ा.) यवनी, *मुसलमानी २. दे. 'खत्ना' ३. दे. 'इस्लाम' । वि., यावन (-नी स्त्री.), यवनधर्मसंबंधिन् ।
मुसलाधार, —मेंह बरसना, मु. } दे. 'मूसल' के नीचे ।
मुसलामुसलि, सं. स्त्री. (सं.) मुस (श, ष) ल,-युद्धं-संग्रामः ।
मुसलिम, सं. पुं. (अ.) दे. 'मुसलमान' ।
मुसली, सं. स्त्री. (सं.मुश(ष)ली) मुशं(ष)लिका, ताल,-मूलिका-पत्रिका, अशोंन्नी, भूताली, दीर्घ-कंदिका, हेमपुष्पी, गोधापदी ।
मुसल्ला, सं. पुं. (अ.) *आराधनास्तरः, *उपासनासनम् ।
मुसव्विर, सं. पु. (अ.) दे. 'चित्रकार' तथा 'फ़ोटोग्राफ़र' ।
मुसाफ़िर, सं. पुं. (अ.) पथिकः, पांथः, दे. 'यात्री' ।
—ख़ाना, सं. पुं. (अ.+फ़ा.) पथिकाश्रमः, पांथ,-शाला-गृहं, *धर्मशाला ।
मुसाफ़िरी, सं. स्त्री. (अ.) पथिकत्वं २. यात्रा, प्रवासः ।
मुसाहब, सं. पुं. (अ.) परिपार्श्व(र्श्वि)कः, पार्श्वगः ।
मुसीबत, सं. स्त्री. (अ.) कष्टं,क्लेशः २. आपद्-विपद् (स्त्री.) ।
मुस्टंड(ण्ड)ा, वि. (सं. दंडः का अनु.) पुष्टांग, दृढ,-देह-तनु-अंग, बलवत् २. दुर्वृत्त, खल ।
मुस्तक़िल, वि. (अ.) ध्रुव, अचल २. दृढ़, चिरस्थायिन् ।
मुस्तनद, वि. (अ.) प्रामाणिक, विश्वसनीय ।
मुस्तहक़, वि. (अ.) अर्ह, योग्य,-पात्र, अधिकारिन् ।
मुस्तैद, वि. (अ. मुस्तअद) सज्ज, संनद्ध २. आशु-क्षिप्र,-कारिन् ।
मुस्तैदी, सं. स्त्री. (हिं. मुस्तैद) सन्नद्धता, सज्जता २. आशुकारित्वं, क्षिप्रता ।
मुहताज, वि. (अ.) निर्धन, अकिंचन २.दीन, पराश्रित ३. आकांक्षिन् ।
मुहब्बत, सं. स्त्री. (अ.) प्रेमन् (पुं. न.) २. मित्रता ३. अभिलाषः, कामः, प्रणयः ।
मुहम्मद, सं. पुं. (अ.) श्रीमोहम्मदः, यवन-धर्मप्रवर्तकः ।
मुहर्रिर, सं. पुं. (अ.) लेखकः, लिपिकारः ।
मुहल्ला, सं. पुं. दे. 'महल्ला' ।
मुहाना, सं. पुं. (हिं. मुँह) नदीमुखं, सरित्संगमः २. प्रवेशद्वारम् ।

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

मुहाफिज़, वि. (अ.) रक्षक, त्रातृ ।
मुहाल, वि. (अ.) कठिन, दुष्कर २. असंभाव्य, अशक्य, असंभव । सं. पुं., दे. 'महल्ला' ।
मुहावरा, सं. पुं. (अ.) वाग्धारा, वाक्,-रीतिः(खी.)-संप्रदायः २. अभ्यासः ३. शीलम् ।
मुहासिरा, सं. पुं. (अ.) उपरोधः, अवरोधनम् ।
—करना, क्रि. स., अव-उप,-रुध् (रु. उ. अ.) ।
मुहिम, सं. खी. (अ.) दुष्करकार्यं २. आक्रमणं ३. युद्धम् ।
मुहुः, अव्य. (सं.) पुनः ।
—मुहुः, अव्य., पुनः पुनः, असकृत् ।
मुहूर्त, सं. पुं. (सं. पुं. न.) द्वादशक्षणपरिमित-कालः २. घटिकाद्वयं, अहोरात्रस्य त्रिंशो भागः ३. मांगलिकसमयः (ज्यो.) ।
मूँग, सं. खी. पुं. (सं. मुद्गः) सूपश्रेष्ठः, रसोत्तमः, हयानंदः, वाजिभोजनः, सुफलः ।
छाती पर मूँग दलना, मु., दे. 'छाती' के नीचे ।
मूँगफली, सं. खी. (सं. भूमिफली) मंडपी, भूस्था, भूशिंबिका, भूचणकः ।
मूँगा, सं. पुं. (हिं. मूँग) विद्रुमः, प्रवालः-लं, भोमीरा ।
मूँगिया, वि. (हिं. मूँग) मुद्ग-हरित(त)-पलाश,-वर्ण ।
मूँछ, सं. खी. [सं. श्मश्रु (न.)] गुंफः, ओष्ठरो(लो)मन् (न.) ।
—उखाड़ना, मु., कठोरं दंड् (चु.) २. गर्वं चूर्ण् (चु.) ।
—नीची होना, मु., लज्जित (वि.) भू २. अवमन् (कर्म.) ।
—पर ताव देना या हाथ फेरना, मु., शौर्यं प्रदृश् (प्रे.), वीरताभिमानेन श्मश्रुव्यावृत(प्रे.)।
मूँज, सं. खी. (सं. मुंजः) मुंजनकः,दृढ,-तृणः-मूलः, ब्राह्मण्यः, रंजनः, दूरमूलः, शत्रुभंगः ।
मूँड़, सं पुं. (सं. मुंडः-डं) दे. 'मुंड' (१) ।
—मुड़ाना, मु., परिव्रज् (भ्वा. प. से.), संन्यस् (दि. प. से.) ।
मूँडन, सं. पुं., दे. 'मुंडन' ।
मूँडना, क्रि. स. (सं. मुण्डनं) मुण्ड् (भ्वा. प. से.), वप् (भ्वा. उ. अ., प्रे.), खुर्-क्षुर् (तु. प. सै.), केशान् कृत (तु. प. से.)-छिद् (रु. प. अ.)-लू (क्र. उ. से.) २. वंच् (प्रे.), छल् (चु.), प्रतृ (प्रे.), विप्रलभ् (भ्वा. आ. अ.) ३. दीक्ष् (भ्वा. आ. से; प्रे.), उप-नी (भ्वा. प. अ.) । ४. भेडोर्णां कृत् (तु. प. से.) । सं. पुं., मुण्डनं, क्षौरं, वपनं, केश,-छेदनं-लवनं-कर्तनम् ।
मूँडने योग्य, वि., मुण्डनीय, वप्तव्य, वाप्य ।
मूँडनेवाला, सं. पुं., मुण्डकः, नापितः,मुंडिन् ।
मूँडा हुआ, वि., मुण्डित, क्षुरित, उप्त, क्लृप्त —केश-श्मश्रु ।
मूँड़ी, सं. खी., दे. 'मुण्ड'(१) । २. मुण्डाकारः ऊर्ध्वभागः ।
मूँदना, क्रि. स. (सं. मुद्रणं) प्र-आ,-च्छद् (चु.), सं-आ, वृ (स्वा. उ. से.), आ-,स्तृ (स्वा. उ. अ.), स्तृ (क्र. उ. से.) २. अ-, पिधा (जु. उ. अ.) ३. निमील् (भ्वा. प. से.), (प्रे.) मुद्रयति (ना. धा.) । सं. पुं., आ-प्र,-च्छादनं, आ-सं,-वरणं, पिधानं, निमीलनं, मुद्रणम् ।
मूक, वि. (सं.) अवाच्, वाणीहीन, *निर्गिर ।
मूगरी, सं. खी. (सं. मुद्गरः>) * वसन-कुट्टनी, *मुद्गरी ।
मूज़ी, वि. (अ.) दुःख-क्लेश-कष्ट,-द-दायक २. दुष्ट, दुर्जन, खल ।
मूठ, सं. खी., दे. 'मुट्ठी' (१-२) तथा 'मुठिया' (१-२) ।
मूठा, सं. पुं., दे. 'मुट्ठा' ।
मूढ़, वि. (सं.) अज्ञ, मूर्ख, मंदधी, मंद, निर्बुद्धि २. स्तब्ध, निश्चेष्ट ३. व्यामोहित, भ्रष्टसंज्ञ ।
—मति, वि. (सं.) मूढ़-, बुद्धि-चेतस् ।
मूढ़ता, सं. खी. (सं.) अज्ञता, मूर्खता, बुद्धि-हीनता इ. ।
मूत्र, सं. पुं. (सं. न.) स्रवः, प्रस्रावः, मेहः, गुह्यनिस्यंदः ।
—करना, क्रि. अ., मूत्रयति (चु.), मूत्रोत्सर्गं कृ, मिह् (भ्वा. प. अ.), मूत्रं उत्सृज् (तु. प. अ.) ।
—कृच्छ्र, सं. पुं. (सं. न.) अश्मरी २. कृच्छ्रं ३. मूत्ररोधः ।
—स्थान, सं. पुं. (सं. न.) *प्रस्रावागारः-रम्, मूत्रालयः ।
मूर्ख, वि. (सं.) निर्-दुर्, बुद्धि, अ-निर्, बोध, अज्ञ, अनभिज्ञ, अज्ञान-निन्, मंद, मंदधी, विद्या-प्रज्ञा-ज्ञान-बुद्धि,-हीन-शून्य-रहित इ. ।
मूर्खता, सं. खी. (सं.) अज्ञता, अनभिज्ञता,

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

मंदता, दुर्-निर्,-बुद्धित्वं, अज्ञानं, अबोधः, जडता इ.।

मूर्च्छना, सं. स्त्री. (सं.) संगीतांगप्रकारः।

मूर्च्छा, सं. स्त्री. (सं.) सं-,मोहः, कश्मलं, मूर्च्छनं, मूर्च्छायः, चैतन्य-संज्ञा-लोपः-नाशः।

—आना, क्रि. अ. मूर्च्छ् (भ्वा. प. से.), मुह् (दि. प. से.) मोहं-मूर्च्छां प्राप् (स्वा. प. अ.), संज्ञां-चेतनां हा (जु. प. अ.), नष्ट-संज्ञ-लुप्तचेतन (वि.) भू।

मूर्च्छित, वि. (सं.) मूढ, मुग्ध, मोहवश, मूर्च्छापन्न, नष्ट-लुप्त-विगत,-चेतन-चैतन्य-संज्ञ।

मूर्त, वि. (सं.) मूर्तिमत्, साकार, आकृतियुक्त २.कठिन,स्थूल,सुसंहत, घन ३. 'मूर्च्छित' दे.।

मूर्ति, सं. स्त्री. (सं.) चित्रं, आलेख्यं, रेखा-चित्रं २. प्रतिकृतिः (स्त्री.), प्रतिच्छंदः, प्रतिमा ३. आकृतिः (स्त्री.), आकारः, स्वरूपं ४. शरीरं, देहः।

—कार सं. पुं. (सं.) चित्रकारः २. प्रतिमाकारः।

—पूजा, सं. स्त्री. (सं.) प्रतिमापूजनम्।

—विद्या, सं. स्त्री. (सं.) मूर्ति-निर्माण-घटना।

मूर्तिमान्, वि. (सं. मत्) सशरीर, शरीरिन्, काय-देह,-भृत्-धारिन्-वत्, देहिन्, मूर्त २. दृश्य, दृष्टिगोचर, प्रत्यक्ष, साकार।

मूर्द्धज, सं. पुं. (सं.) शिरोरुहः, दे. 'केश'।

मूर्द्धा, सं. पुं. (सं.-र्द्धन्) शीर्ष, दे. 'सिर'।

मूल, सं. पुं. (सं. न.) शिफः-फा, जटा, व्र(ब्नु)ध्नः, अंघ्रिनामकः २. कंदः-दं ३. उपक्रमः, आरंभः, आदिः ४. आदि,-कारण-बीजं-हेतुः, प्रकृतिः (स्त्री.) ५. मूलवित्तं, दे. 'पूंजी' ६. आद्य-आरंभिक,-भागः ७. गृह-मूलं, वास्तु (पुं. न.) ८. मूलग्रंथः, व्याख्येय-वाक्यं ९. नक्षत्रविशेषः १०. समीपं-पे ११. दे. 'पिपलामूल'। वि., मुख्य, प्रधान।

—धन, सं. पुं. (सं. न.) मूलं, मूल,-द्रव्यं-वित्तं, सामकम्।

—मूलक, वि. (सं. समासान्त में) –कारणक, उद्भूत,,–उत्पन्न (उ. अज्ञानमूलक, अज्ञान-कारणक इ.)।

मूली, सं. स्त्री. (सं. मूलकः-कं) राजालुकः, महाकंदः, हस्तिदंतं, कंदमूलं, दीर्घ,-मूलकं-पत्रकं-कंदकम्। (छोटी मूली) मूलकपोतिका, चाणक्यमूलकं, लघुमूलकम्।

किसी को मूली गाजर समझना, मु., तृणाय-तृणं मन् (दि. आ. अ.), अवधीर्-अवगण् (चु.)।

मूल्य, सं. पुं. (सं. न.) वस्नः-नं, अर्घः, अर्हा, अवक्रयः, पण्यः।

—रहित, वि. (सं.) तुच्छ, निस्सार, व्यर्थ, क्षुद्र।

—वृद्धि, सं. स्त्री. (सं.) वस्न-अर्घ,-वृद्धिः-उपचयः-उन्नतिः (स्त्री.)।

मूल्यवान्, वि. (सं.-वत्) बहुमूल्य, महार्घ, अतिमूल्य, अमूल्य।

मूल्यांकन, सं. पुं. (सं. न.) मूल्य-वस्न-अर्घ,-निर्धारणं-निश्चयनम्।

मूष, मूष(षि)क, सं. पुं. (सं.) उंदुरुः, दे. 'चूहा'।

—वाहन, सं. पुं. (सं.) गणेशः।

मूसल-र, सं. पुं. (सं. मुसलः-लं) मुष(श)-लः-लं, अयोऽग्रम्।

—चंद, सं. पुं., अशिष्टः, असभ्यः २. पुष्टदुष्टः।

मूसल(ला)धार बरसना, मु., अतीव-अति-वेगेन धारासारैः वृष् (भ्वा. प. से.)।

मूसलाधार वर्षा, आसारः, धारा,-आसारः-(नि-सं)पातः-वर्षः-वर्षम्।

मूसली, सं, स्त्री., दे. 'मुसली'।

मूसा, सं. पुं. (सं. मूषः) दे. 'चूहा'।

मृग, सं. पुं. (सं.) हरिणः, कुरंगः,-गमः, वातायुः, (अ)जिनयोनिः, एणः-णकः, ऋश्यः-ष्यः, रिष्यः-श्यः, चारुलोचनः, शारंगः, कृष्ण-सारः, पृषतः-त (पुं.), प्लाविन् (पुं.), मरुकः, रुरुः, रोहितः, लिगुः, वननः, शंवरः, रौहिषः, वातप्रमीः (पुं.) २. पशुमात्रं २. वन्यपशुः ४. मार्गशीर्षमासः ५. मकरराशिः ६. पुरुषभेदः।

—छाला, सं. स्त्री. (सं+हिं.) मृग-हरिण,-अजिनं-चर्मन् (न.)।

—तृष्णा, सं. स्त्री. (सं.) मृग,-तृष्-तृषा-तृष्णिः-तृष्णिका-मरीचिका (सब स्त्री.)।

—नयनी, सं. स्त्री. (सं.) कुरंग-मृग,-दृश् (स्त्री.)-लोचना(-नी)-अक्षी-ईक्षणा-नयना।

—राज, सं. पुं. (सं.) मृगेन्द्रः, दे. 'सिंह'।

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

—शिरा, सं. स्त्री. (सं.) मृग-शिरः-शिरस् (न.)-शीर्षम् ।
मृगया, सं. स्त्री. (सं.) दे. 'शिकार' ।
मृगांक, सं. पुं. (सं.) शश,-अंक-लांछन, दे. 'चाँद' ।
मृगी, सं. स्त्री. (सं.) हरिणी, कुरंगी, एणी, पृषती २. अपस्मारः ३. कस्तूरी ।
मृगेन्द्र, सं. पुं. (सं.) मृग,-पतिः-राजः, दे. 'सिंह' ।
मृणाल, सं. पुं. (सं. पुं. न.) विशं-सं, मृणाली, पद्म-कमल,-नालं, पद्मतंतुः ।
मृत, वि. (सं.) दे. 'मुरदा' वि. ।
मृतक, सं. पुं. (सं. पुं. न.) दे. 'मुरदा' सं. पुं. ।
—कर्म, सं. पुं. [सं.-र्मन् (न.)] प्रेतकृत्यं (अंत्येष्टि इ.) ।
मृत्तिका, सं. स्त्री. (सं.) दे. 'मिट्टी' (१) ।
मृत्युंजय, सं. पुं. (सं.) जितमृत्युः २. शिवः ।
मृत्यु, सं. स्त्री. (सं. पुं.) मरणं, निधनः-नं, पंचत्वं-ता, प्राणनाशः, तनु-त्यागः-विच्छेदः, कालधर्मः, दिष्टांतः, संस्थितिः (स्त्री.), प्रलयः, अत्ययः, प्राण,-अंतः, नाशः, मृतिः (स्त्री.), अवसानं, दीर्घनिद्रा ।
—लोक, सं. पुं. (सं.)यमलोकः २. मर्त्यलोकः ।
मृदंग, सं. पुं. (सं.) मुरजः, पटहः, घोषः ।
मृदु, वि. (सं.) श्लक्ष्ण, मसृण, सुखस्पर्श, २. श्रुति-,मधुर, कार्कश्य-शून्य, मंजुल ३. सुकुमार, पेलव, कोमल, मृदुल, सौम्य, ४, मंद, मंथर, विलम्बकारिन् ।
मृदुता, सं. स्त्री. (सं.) श्लक्ष्णता, मसृणता २. मंजुलता, श्रुति-,मधुरता ३. सुकुमारता, कोमलता २. मंदता, मंथरता इ. ।
मृदुल, वि. (सं.) दे. 'मृदु' ।
मृदुलता, सं. स्त्री. (सं.) दे. 'मृदुता' ।
में[1], अव्य. (सं.-मध्ये)-अंतरे, अंतः; प्रायः सप्तमी विभक्ति से (उ. घर में=गृहे) ।
—से, मध्यात् (षष्ठी के साथ), प्रायः षष्ठी तथा सप्तमी विभक्ति द्वारा (उ. खगानां खगेषु वा हंसः श्रेष्ठः) ।
में[2], सं. स्त्री. (अनु.) रेभणं, अजशब्दः ।
मेंगनी, सं. स्त्री. (हिं. मींगी) *गूथगुलिका, *शमलगुली ।
मेंगनीज, सं. पुं. (अं.) लोहकं, मांगलम् ।
मेंडक, सं. पुं., दे. 'मेढक' ।
मेंढा, सं. पुं., दे. 'मेढ़ा' ।
मेंबर, सं. पुं. (अं.) सदस्यः, सभासद् (पुं.) ।
मेंह, सं. पुं. (सं. मेघः>) दे. 'वर्षा' ।
मेंहदी, सं. स्त्री., दे. 'मेहंदी' ।
मेक्सिमम, वि. (अं.) भूयिष्ठ, अधिकतम ।
मेख, सं. पुं., दे. 'मेष' ।
मेख़, सं. स्त्री. (फ़ा.) दे. 'खूँटा' २. दे. 'कील' ३. दे. 'पच्चड़' ।
—मारना, मु., वाध् (भ्वा. आ. से.), विहन् (अ. प. अ.), विघ्न (ना. धा., विघ्नयति) ।
मेखल-ला, सं. स्त्री. (सं. मेखला) कांची-चिः (स्त्री.), रस(श)ना-नं, सारस(श)नं, कक्ष्या । सप्तका-की २. कटिसूत्रं ३. खड्गादि-निबंधनं ४. शैलनितंबः ५. नर्मदा ।
मेगज़ीन, सं. पुं. (अं.) शस्त्रास्त्रकोष्ठः २. सामयिकपत्रिका ।
मेगनेशियम, सं. पुं. (अं.) भ्राजातु, मग्नकं, माग्निषम् ।
मेघ, सं. पुं. (सं.) जल-पयो-धारा-अंभो,-धरः, अभ्रं, अंबु-वारि,-वाहः, स्तनयित्नुः, बलाहकः, अब्दः, नीरदः, वारिदः, जलदः, तोयदः, अंबुदः, अंभोदः, पाथोदः, घनः, जीमूतः, धूम-योनिः, वारि-जल-पयो,-मुच् (पुं.), घनाघनः, पर्जन्यः २. रागभेदः (संगीत) ।
—काल, सं. पुं. (सं.) प्रावृष् (स्त्री.). वर्णाः (स्त्री., बहु.), वर्ष-घन,-कालः-समयः ।
—गर्जन, सं. पुं. (सं. न.) मेघ-दुंदभिः-नादः-स्वनः,.गर्जितं, गर्जनं-ना,स्तनितं, वि,-स्फूर्जथुः ।
—दूत, सं. पुं. (सं. न.) कालिदास-प्रणीतं खंडकाव्यम् ।
—धनु, सं. पुं. [सं.-नुस् (न.)] इन्द्रचापः ।
—नाथ, सं. पुं. (सं.) मेघपतिः, इन्द्रः ।
—नाद, सं. पुं (सं.) इन्द्रजित् २. मेघगर्जनम् ३. वरुणः ।
—मण्डल, सं. पुं. (सं. न.) घनपटली, मेघ-माला, कादंबिनी ।
—वर्ण, वि. (सं.) घनश्याम ।
—वाहन, सं. पुं. (सं.) इन्द्रः, शक्रः ।
मेज़, सं. स्त्री. (फ़ा.) पादफलकः-कम् ।
—पोश, सं. पुं. (फ़ा.) पादफलकाच्छादनम् ।

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

मेज़बान, सं. पुं. (फ़ा.) आतिथ्यकारिन्, अतिथिसेवकः ।
मेटना, क्रि. स., दे. 'मिटाना' ।
मेड़, सं. पुं. (सं. भित्तं) क्षेत्र,-सीमा-पर्यंतः ।
मेढक, सं. पुं. (सं. मंडूक) भेकः, प्लवः, प्लवगः, दर्दुरः, वर्षा,-भूः-घोषः, अंडुकः, कंडुकः, हरिः, शालुः, शा(सा)ल्लूरः ।
मेढ़ा, सं. पुं. (सं. मेढ्रः) दे. 'भेड़ा' ।
मेथिलेटिड स्पिरिट, सं. स्त्री. (अं.) मिथिलितसारः ।
मेथी, सं. स्त्री. (सं.) मेथिः (स्त्री.), मेथिका-मेथिनी, दीपनी, बहुपर्णी, गंध,-फला-बीजा ।
मेद, सं. पुं. [सं. मेदस् (न.)] वपा, वसा, मेदः २. मेदस्विता, स्थौल्यं ३. कस्तूरी ।
मेदा, सं. पुं. (अ.) पक्वाशयः, पिचंडः, फंडः, मलुकः ।
मेदिनी, सं. स्त्री. (सं.) धरा, दे. 'पृथिवी' ।
मेध, सं. पुं. (सं.) यज्ञः, मखः २. हविस्(न.) ।
मेधा, सं. स्त्री. (सं.) धारणावती बुद्धिः (स्त्री.), स्मरणशक्तिः (स्त्री.), धारणा ।
मेधावी, वि. (सं.) पंडित, धीमत्, मेधावत् ।
मेम, सं. स्त्री. (अं. मैडम) गौरांगी, श्वेतांगी (विदेशीय नारी) ।
मेमना, सं. पुं. (अनु. मैं-मैं) अजपोतः, छागशावः २. अविडिंभः, मेषशिशुः ।
मेमार, सं. पुं. (अ.) स्थपतिः, वास्तुशिल्पिन्, गृहसंवेशकः, फलगंडः, *गेहकारः ।
—का काम, सं. पुं., सूत्रकर्मन् (न.) ।
मेरा,री, सर्व. (हिं. मैं) मम, मदीय (–या स्त्री.), मामकीन(–ना स्त्री.), मामक-(–मिका स्त्री.), मत्–।
मेरु, सं. पुं. (सं.) सुमेरुः, हेमाद्रिः, रत्नसानुः, सुरालयः २. जपमालायाः प्रधानगुटिका ।
—दंड, सं. पुं. (सं.) पृष्ठ,-वंशः-अस्थि (न.) २. ध्रुवमध्यरेखा ।
मेल, सं. पुं. (सं.) दे. 'मिलन' (१-२) ३. ऐकमत्यं, सामंत्यं, वैमत्याभावः ४. सख्यं, मित्रत्वं, सौहार्दं ५. आनुकूल्यं, सामंजस्यं ६. साम्यं, सादृश्यम् ।
—जोल, —मिलाप, सं. पुं., सुपरिचयः, अभ्यंतरत्वं, गाढसौहृदम् ।
मेला, सं. पुं. (सं. मेलः) मेलकः, यात्रा, समाजः, उत्सवः २. जनसंमर्दः, संकुलम् ।
—ठेला, सं. पुं., जनौघः, जनसंमर्दः ।
मेवा, सं. पुं. (फ़ा.) शुष्क,-फलम् ।
—फ़रोश, सं. पुं. (फ़ा.) फल,-विक्रेतृ-विक्रयिन् ।
मेष, सं. पुं. (सं.) दे. 'भेड़ा' २. क्रियः, राशिविशेषः ।
मेहंदी, सं. स्त्री. (सं. मेंधी) रागांगी, मेन्धिका, यवनेष्टा, नख-, रंजिनी, रागगर्भा, कोकद्रंता ।
मेह[1], सं. पुं. (सं.) मूत्रं २. प्रमेहः ३. मेषः ।
मेह[2], सं. पुं. (सं. मेघः) जलदः २. वृष्टिः (स्त्री.), दे. 'वर्षा' ।
मेहतर, सं. पुं. (फ़ा., मि. सं. महत्तरः) ज्येष्ठः, प्रधानः २. मलवाहकः, दे. 'भंगी' (मेहतरानी स्त्री.) ।
मेहनत, सं. स्त्री. (अ.) परिश्रमः, प्रयासः ।
—मज़दूरी, सं. स्त्री., शारीरिक-कायिक,-श्रमः-व्रातम् ।
—ठिकाने लगना, मु., श्रमसाफल्यम्, श्रमेण कार्यसिद्धिः (स्त्री.) ।
मेहनताना, सं. पुं. (अ.+फ़ा.) * पारिश्रमिकं, कर्मण्या, भर्मण्या ।
मेहनती, वि. (अ. मेहनत) परिश्रमिन्,उद्योगिन् ।
मेहमान, सं. पुं. (फ़ा.) अतिथिः, दे. ।
—ख़ाना, सं. पुं., अतिथि-प्राघुण,-शाला-गृहम् ।
—नवाज़, वि., अतिथि-प्राघुण,-सेवक-पूजक-सत्कारक ।
—नवाज़ी, सं. स्त्री., दे. 'मेहमानदारी' ।
मेहमानदारी, मेहमानी, सं. स्त्री. (फ़ा.) आतिथ्यं अतिथि-,सेवा-सत्कारः ।
मेहर, सं. स्त्री. (फ़ा.) कृपा, अनुग्रहः ।
मेहरबान, वि. (फ़ा.) कृपालु, अनुग्रहशील ।
मेहरबानी, सं. स्त्री. (फ़ा.) दया, अनुकंपा ।
मेहराब, सं. स्त्री. (अ.) तोरणः-णं, वृत्तखण्डः-डम् ।
—दार, वि. (अ.+फ़ा.) तोरणाकार (द्वारादि) ।
मैं, सर्व. (सं. अस्मद् >) अहम् । सं. स्त्री., अहंमतिः (स्त्री.), अहंकारः ।
मैका, सं. पुं., दे. 'मायका' ।
मैत्री, सं. स्त्री. (सं.) मैत्र्यं, दे. 'मित्रता' ।
मैथिल, वि. (सं.) मिथिलासंबंधिन् । सं. पुं., मिथिलावासिन् २. जनकः ।

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

मैथिली, सं. स्त्री. (सं.) वैदेही, जानकी ।
मैथुन, सं. पुं. (सं. न.) रतं, सुरतं, रति,-क्रिया-क्रीडा, महासुखं, क्रीडारत्नं, अब्रह्मचर्यकं, निधुवनं, धर्षितं, संभोगः ।
—करना, क्रि. स., सुरतं आतन् (त. प. से.), संभोगं-रतिक्रीडां कृ, महासुखं अनुभू ।
मैदा, सं.पुं. (फ़ा.)समिता, अपूप्यः, *अट्टसारः ।
मैदान, सं. पुं. (फ़ा.) सम-भूमिः (स्त्री:)-स्थलं-स्थली-प्रदेशः, उपशल्यं २. क्रीडा,-भूमिः-क्षेत्रं ३. युद्धभूमिः, रणक्षेत्रम् ।
—मारना, मु., वि-परा-जि (भ्वा. आ. अ.), दे. 'जीतना' ।
मैन, सं. पुं. (सं. मदनः) कामदेवः २. दे. 'मोम' ।
मैनफल, सं. पुं. (सं. मदनफलं) श्वसन-छर्दन-शल्य-करहाटक,-फलं २. (वृक्ष) मदनः, श्वासनः, छर्दनः, शल्यः ।
मैनसिल, सं. पुं. (सं. मनःशिला) नैपाली, मनोह्वा, शिला, कुनटी, दिव्यौषधिः (स्त्री.), नागजिह्विका, कल्याणिका ।
मैना, सं. स्त्री. (सं. मदना) शा(सा)रिका, चित्रलोचना, कुणपी, मधुरालापा, मेधाविनी, गो,-किराटा-किराटिका, कलहप्रिया ।
मैनाक, सं. पुं. (सं.) हिमवत्सुतः, सु-हिरण्य,-नाभः ।
मैया, सं. स्त्री. (सं. मातृका) दे. 'माता' ।
मैल, सं. स्त्री. (सं. मलिन>) दे. 'मल' (१-२) । ३. दोषः, विकारः ।
—छोरा, वि. (हिं.+फ़ा.) मल,-गोपिन्-गोप्तृ । सं. पुं., अन्तर्-वस्त्रं-वसनं-वासस् (न.) २. दे. 'साबुन' ।
हाथ की—, मु., तुच्छवस्तु (न.), क्षुद्रद्रव्यम् ।
मैला, वि. (सं. मलिन) दे. 'मलिन' । सं. पुं., दे. 'मल' (१-३) ।
—करना, क्रि. स., आविलयति-मलिनयति (ना. धा.), पंकिली-मलिनीकृ ।
—होना, क्रि. अ., आविली-मलिनीभू, कलुष-पंकिल (वि.) जन् (दि. आ. से.) ।
—कुचैला, वि., अति-आविल-कलुष-मलिन ।
मोंछ, सं. स्त्री., दे. 'मूंछ' ।
मोंढ़ा, सं. पुं. (सं. मूर्धन्>) *शरकांडपीठं २. भुजमूल-स्कंध,-प्रदेशः ।
मोक्ष, सं. पुं. (सं.) दे. 'मुक्ति' ।
—विद्या, सं. स्त्री.-(सं.) वेदांतशास्त्रम् ।
मोगरा, सं. पुं. (सं. मुद्गरः) अतिगन्धः गंध,-राजः-सारः, विट-,प्रियः, जन-मृग,-इष्टः २. दे. 'मुँगरा' ।
मोघ, वि. (सं.) व्यर्थ, निष्फल ।
मोच, सं. स्त्री. (सं. मुच्>) संधि,-व्याक्षेपः-व्यावर्तनं, स्नायुवितानः ।
—आना या निकलना, क्रि. अ., संधिः व्याक्षिप् (कर्म.)-व्यावृत् (भ्वा. आ. से.), स्नायुः वितन् (कर्म.) ।
मोचक, सं. पुं. (सं.) मुक्तिदः २. सन्न्यासिन् ३. कदली ।
मोचन, सं. पुं. (सं. न.) मोक्षणं, मुक्तिदानं, बंधनभंजनं, मुक्तिः (स्त्री.) । वि., मोचक, मोक्षक, मुक्तिप्रद ।
मोचना, सं. पुं. (सं. मोचन>) *मोचनः, *व्रालोत्पाटनः २. मुचुटी, लोहकारोपकरणभेदः ।
मोचरस, सं. पुं. (सं.) मोच,-स्रावः-सारः-निर्यासः, शाल्मलीवेष्टः, सुरसः ।
मोची, सं. पुं. (सं. मुच्>) चर्मकारः, पादू,-कारः-संधायकः ।
मोज़ा, सं. पुं. (फ़ा.) अनुपदीना, *चरणावरणं, दे. 'जुर्राब' ।
मोजिज़ा, सं. पुं. (अ.) चमत्कारः, कौतुकं, आश्चर्यम् ।
मोट, सं. स्त्री., दे. 'गठरी' ।
मोटन, सं. पुं., (सं. न.) पेषणं, चूर्णनं, मर्दनं, खण्डनम् ।
मोटर, सं. पुं. (अं.) चालक-प्रवर्तक,-यंत्रम् ।
—कार, सं. स्त्री. (अं.) चित्र-तैल,-रथः, *मोटरम् ।
—ख़ाना, सं. पुं., मोटरागारम् ।
—ड्राइवर, सं. पुं., मोटरचालकः ।
—बस, सं. स्त्री. *मोटर-,वसम् ।
—बोट, सं. स्त्री. *मोटरनौका ।
—साइकिल, सं. स्त्री. *मोटरसाइकलम्, *फटफटिया ।
मोटा, वि. (सं. मुष्टि> ?) पीन, पीवर, पुष्ट, पुष्टांग (-गी स्त्री.), स्थूल, स्थूलदेह, मेदस्विन् २. घन, निविड़, सांद्र, गाढ, स्थूल ३. कणमय, कुपिष्ट, ४. अप,-नि-कृष्ट, हीन, गर्ह्य ५. कुरूप

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

६. असाधारण, विशिष्ट ७. दृप्त, गर्वित ८. महत्, बृहत् ९. धनाढ्य, धनिक ।

—असामी, सं. पुं., धनिन्, धनशालिन्, श्रीमत् ।

—ताजा, वि., हृष्टपुष्ट, पुष्टांग, मांसल ।

मोटी बात, सं. स्त्री., सामान्य-साधारण-प्राकृत,-वार्त्ता ।

मोटे हिसाब से, क्रि. वि., स्थूलमानेन ।

मोटाई, सं. स्त्री. / मोटापन, मोटापा, सं. पुं. — (हिं. मोटा) पीवरता, मेदोवृद्धिः (स्त्री.), स्थूलता, पीनता २. घनता, गाढ़ता, सांद्रता इ.

मोठ, सं. स्त्री. (सं. मकुष्ठः) राज-अरण्य-वन,-मुद्गः, मुकुष्ठः-ष्ठकः, मय(यु)ष्टः-ष्टकः ।

मोड़, सं. पुं. (हिं. मुड़ना) (नदीमार्ग आदि का) वंकः, आवृत्-त्तिः (स्त्री.) २. वक्रता, वक्रिमन् (पुं.), वक्रीभावः, जिह्मता ३. दे. 'मुड़ना' सं. पुं. ।

मोड़ना, क्रि. स., ब. 'मुड़ना' के प्रे. रूप ।

मोढ़ा, सं. पुं., दे. 'मोंढा' ।

मोतदिल, वि. दे. 'मातदिल' ।

मोतिया, सं. पुं. (हिं. मोती) मल्ली, मल्लिका, वन-,चन्द्रिका, गौरी, प्रिया, सौम्या, सिता, दे. 'मोगरा' (१) ।

मोतियाबिंद, सं. पुं. (हिं. मोती + सं. बिंदुः) मौक्तिक-मुक्ता,-बिन्दुः (नेत्ररोगः) ।

मोती, सं. पुं. (सं. मौक्तिकं) मुक्ता, शौक्तिकं, मुक्ताफलं, शुक्तिजम् ।

—पिरोना, क्रि. स., मौक्तिकानि सूत्र् (चु.)-गु(गुं)फ् (तु. प. से.)-संग्रंथ् (क्र. प. से.) । मु., सुमधुरं भाष् (भ्वा. आ. से.) २. सुस्पष्टाक्षरैः लिख् (तु. प. से.) ३. रुद् (अ. प. से.) ४. सुसूक्ष्मकार्यं कृ ।

मोतीचूर, सं. पुं. (हिं. मोती + चूर) मुक्ता-मोदकः ।

—आँख, सं. स्त्री., *मौक्तिकनेत्रं, लघुगोलभासुरनेत्रम् ।

मोतीज्वर, सं. पुं. (हिं. मोती + सं. ज्वरः) शीतला-मसूरिका,-ज्वरः ।

मोतीझि(झ)रा, सं. पुं. (हिं. मोती + झरना) आन्त्रिक-मन्थर,-ज्वरः ।

मोथा, सं. पुं. (सं. मुस्तकः-कं) मुस्ता, कुरुविंदः, भद्रा, भद्रकः ।

मोद, सं. पुं. (सं.) हर्षः, आनंदः, दे. 'प्रसन्नता' ।

मोदक, सं. पुं. (सं.) मिष्टान्नभेदः । वि., हर्षजनक, आह्लादक ।

मोदी, सं. पुं. (सं. मोदक >) अन्न,-विक्रेतृ-विक्रयिन्, दे. 'परचूनिया' ।

—ख़ाना, सं. पुं. (हिं.+फ़ा.) अन्न.-भांडारम् ।

मोम, सं. पुं. (फ़ा.) सिक्थं, सिक्थकं, मक्षिकामलः-लं, मधुजं, मधुशेषं, मधूच्छिष्टं, मधूलं, मधूत्थम् ।

—की नाक, सं. स्त्री., मु., चलचित्त,अस्थिरमति ।

—जामा, सं. पुं. (फ़ा.) *माधुज-सैक्थिक-सिक्थाक्त,-वस्त्रम् ।

—दिल, वि. (फ़ा.) मृदुमानस, आर्द्रचित्त ।

—बत्ती, सं. स्त्री. (फ़ा.+हिं.) मधुज-सिक्थ,-वर्ती-वर्तिः (स्त्री.) ।

—करना या बनाना, मु., दयार्द्रीकृ, करुणार्द्र (वि.) विधा (जु. उ. अ.) ।

—होना, मु., दयार्द्र (वि.) भू, अनुकंप् (भ्वा. आ. से.) ।

मोमियाई, सं. स्त्री. (फ़ा.) कृत्रिमशिलाजतु (न.), कृतकशिलाजित् (स्त्री.) २. व्रणपूरकः स्निग्धौषधभेदः ।

मोमी, वि. (फ़ा.) सिक्थमय, माधुज, सैक्थिक ।

मोर, सं. पुं. (सं. मयूरः) बर्हिणः, नीलकंठः, चित्र,-पिच्छकः-पत्रकः, कलापिन्, केकिन्, चंद्रकिन्, नर्तनप्रियः, बर्हिन्, मुजंगारिः, मेघानंदिन्, शिखंडिन्, शिखावलः, वर्षामदः, प्रचलाकिन् ।

—की ध्वनि, सं. स्त्री., 'केका' दे. ।

—की पूंछ, सं. स्त्री., कलापः, पिच्छं, प्रचलाकः, बर्हः, शिखंडः ।

—चंद्रिका, सं. स्त्री., चंद्रकः, मेचकः ।

—पंखी, सं. स्त्री., केलि-विहार,-नौका ।

—मुकुट, सं. पुं., मयूरमुकुटः-टं, शिखंडशेखरः ।

—शिखा, सं. स्त्री., बर्हिचूडा, शिखिशिखा, शिखालुः ।

मोरचा[1], सं. पुं, (फ़ा.) दे. 'जंग' २. मुकुरमलम् ।

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

मोरचा[२], सं. पुं. (फ़ा. मोरचाल) परिखा, खेयं, ख़ातम् ।
—**बंदी करना**, मु., परिखया परिवेष्ट् (प्रे.); परिखां खन् (भ्वा. प. से.), सेनां खातेषु नियुज् (रु. आ. अ.) ।
—**लेना**, मु., युध् (दि. आ. अ.) ।
मोरछल, सं. पुं. (हिं. मोर+छड़) *शिखंडचामरः, *कलापव्यजनम् ।
मोरनी, सं. स्त्री. (हिं. मोर) मयूरी, शिखंडिनी, बर्हिणी, केकिनी ।
मोरी, सं. स्त्री. (हिं. मोहरी) नाली, नालिः (स्त्री.) *वहनी, जलमार्गः ।
मोल, सं. पुं. (सं. मूल्यं, दे.) ।
—**लेना**, क्रि. स., दे. 'ख़रीदना' ।
—**तोल**, सं. पुं., अर्घनिर्धारणं, मूल्यनिर्णयः ।
मोह, सं. पुं. (सं.) भ्रमः, भ्रांतिः-मिथ्यामतिः (स्त्री.), विवर्तः, आभासः, प्रपंचः, अविद्या, अज्ञानं २. ममता-त्वं ३. स्नेहः, रागः, प्रेमन् (पुं. न.) ४. कष्टं, दुःखं ५. मूर्च्छा ।
—**लेना**, क्रि. स., मुह् (प्रे.), मनः हृ (भ्वा. प. अ.), वशी कृ ।
मोहक, वि. (सं.) चेतोहर, मनो,-हारिन्-रम, २. मोहजनक ।
मोहताज़, वि. (अ.) दे. 'मुहताज' ।
मोहन, सं. पुं. (सं.) मोहकः, मनोहारिन् २. श्रीकृष्णः ३. मूर्छाकारक उपचारभेदः (तंत्र) ४. अस्त्रभेदः ५. कंदर्पबाणविशेषः ६. धत्तूरक्षुपः । वि., मोहक, चेतोहर ।
—**भोग**, सं. पुं. (सं.) (१–३) संयावकदली-आम्र,-भेदः ।
मोहना, क्रि. अ. (सं. मोहनं) अनुरंज्-आसंज् (कर्म.), आसक्त-अनुरक्त-बद्धभाव भू २. मुह् (दि. प. से.), दे. 'मूर्च्छा आना' । क्रि. स., प्रीतिं-अनुरागं-अभिलाषं जन् (प्रे.), अनुरंज् (प्रे.), वशी कृ २. भ्रमं-भ्रांतिं-संदेहं जन् (प्रे.), प्रतृ-वंच् (प्रे.) । सं. पुं., अनुरंजनं, अनुरागः. मूर्च्छा, मोहनं, वशीकरणं, वंचनं, प्रतारणम् ।
मोहनी, सं. स्त्री. (सं.) विष्णो रूपविशेषः २. मिष्टान्नभेदः ३. मोहन,-शक्तिः (स्त्री.)-मंत्रः ४. माया । वि. स्त्री. (सं.) मोहिका, चेतोहरी ।
—**डालना**, मु., अभिचारेण मायया वा वशीकृ ।
मोहर, सं. स्त्री. (फ़ा.) दे. 'मुद्रा' (१–४) । २. सुवर्णमुद्रा, निष्कः-कं, दीनारः ।
—**लगाना**, क्रि. स., मुद्रयति (ना. धा.), मुद्रया अंक् (चु.) ।
मोहरा[१], सं. पुं. (हिं. मुँह) पात्र-भाजन,-मुखं २. पदार्थस्य अग्र-ऊर्ध्व,-भागः ३. पशुमुखजालकं ४. नासीरचराः (पुं. बहु.), सेनामुखं ५. निर्गमनमार्गः, द्वारम् ।
मोहरा,[२] सं.पुं. (फ़ा. मोहर) शारः-रिः, खेलनी २. मृण्मय *संस्थानपुटः (सांचा) ३. दे. 'ज़हरमोहरा' ।
मोहलत, सं. स्त्री. (अ.) अवकाशः २. अवधिः ।
मोहित, वि. (सं.) मोहग्रस्त, भ्रांत २. आसक्त, अनुरक्त, बद्धभाव ।
मोहिनी, वि. तथा सं. स्त्री. (सं.) दे. 'मोहनी' वि. तथा सं. स्त्री. ।
मोही, वि. (सं.-हिन्) मुग्धकारिन्, चेतोहर २. अनुरागिन्, स्नेहिन् ३. भ्रांत ४. लुब्ध, लोभिन् ।
मौंजी, सं. स्त्री. (सं.) मुंजमेखला ।
—**बंधन**, सं. पुं. (सं. न.) मुंजमेखलधारणम् ।
मौक़ा, सं. पुं. (अ.) घटनास्थानं २. स्थानं, प्रदेशः ३. अवसरः, अवकाशः ।
—**देखना**, मु., अवसरं प्रतिपा (प्रे., प्रतिपालयति) ।
—**हाथ से न जाने देना**, मु., अवसरं न वा (प्रे. वापयति)-हा (जु. प. अ., प्रे-, हापयति) ।
मौक़ूफ़, वि. (अ.) दे. 'बरख़ास्त' ।
मौक़ूफ़ी, सं. स्त्री. (अ.) दे. 'बरख़ास्तगी' ।
मौक्तिक, सं. पुं. (सं. न.) मुक्ता, मुक्ताफलं, शौक्तकम्, शुक्तिजम् ।
—**दाम**, सं. पुं. (सं.-मन् न.) मुक्ता-मौक्तक,-हारः-सरः, मुक्तावली ।
—**सर**, सं. पुं. (सं.) दे. 'मौक्तिकदाम' ।
मौखिक, वि. (सं.) वाचिक, लेखं विना ।
मौज, सं. स्त्री. (अ.) तरंगः, कल्लोलः, वीचीचिः (स्त्री.) २. कामचारः, छंदः, छंदस् (न.), चित्ततरंगः ३. आनंदः, मोदः ४. वैभवं, विभवः ५. दे. 'धुन' ।
—**आना**, मु., स्वच्छंदतया सहसा प्रवृत् (भ्वा. आ. से.) ।

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

—मनाना या उड़ाना, मु., नंद् (भ्वा.प.से.), मुद् (भ्वा. आ. से.), रम् (भ्वा. आ. अ.)।
मौज़ा, सं. पुं. (अ.) ग्रामः।
मौजी, वि. (अ. मौज) आनंदिन्, उल्लासिन् २. कामचारिन्, स्वैरिन् २. अस्थिरमति।
मौजूद, वि. (अ.) उपस्थित, विद्यमान।
मौजूदगी, सं. स्त्री. (अ.+फ़ा.) उपस्थितिः (स्त्री.), विद्यमानता।
मौजूदा, वि. (अ.) वर्तमान, विद्यमान, प्रचलित, आधुनिक, सांप्रतिक।
मौत, सं. स्त्री. (सं. मृत्युः दे.)।
—सिर पर खेलना, मु., जीवितसंशये वृत् (भ्वा. आ. से.)।
अपनी—मरना, मु., प्रकृत्या स्वभावेन मृ (तु. आ. अ.)।
मौन, सं. पुं. (सं. न.) निःशब्दता, तूष्णींभावः, वाक्,-रोधः-नियमनं-स्तंभः २. मुनिव्रतम्। वि., दे. 'मौनी'।
—व्रत, सं. पुं. (सं. न.) मूकता-मूकिम-तूष्णीकता,-प्रतिज्ञा-संकल्पः-व्रतम्।
—खोलना, क्रि. अ., मौनं भंज् (रु. प. अ.), तूष्णींभावं त्यज् (भ्वा. प. अ.)।
—धारण करना, क्रि. अ., वाचंयम् (भ्वा, प. अ.)-निरुध् (रु. उ. अ.), मौनं धृ (चु.) भज् (भ्वा. उ. अ.)।
मौनी, वि. (सं.-निन्) वाचंयम, मौनव्रतिन्, मूक, निःशब्द, तूष्णीक। सं. पुं. (सं.) मुनिः, तपस्विन्।
मौर, सं. पुं. (सं. मुकुटं>) वरस्य तालपत्रमुकुटं, *मुकुटं, २. प्रधानः, शिरोमणिः।
मौरी, सं. स्त्री. (हिं. मौर) वध्वास्तालपत्रमुकुटकं, *मुकुटकम्।
मौरूसी, वि. (अ.) पैतृक, पित्र्य, परंपरागत।
मौर्ख्य, सं. पुं. (सं. न.) मूर्खता, अज्ञता, जडता, मूढता।
मौर्य, सं. पुं., (सं.) प्राचीन-भारतस्य वंशविशेषः।
मौर्वी, सं. स्त्री. (सं.) धनुर्गुणः, प्रत्यंचा, ज्या।
मौलसिरी, सं. स्त्री. (सं. मौलिः+श्रीः>) बकुलः, सीधुगंधः, मुकु(कू)लः, मधुपुष्पः सुरभिः, स्थिरकुसुमः, भ्रमरानंदः।
मौला, सं. पुं. (अ.) परमेश्वरः।
मौलि, सं. स्त्री. (सं. पुं. स्त्री.) शिखरं, शृंगं, ऊर्ध्वभागः २. शीर्ष, मस्तकं ३. मुकुटं, किरीटं ४. जूटः, जूटकं ५. अशोकवृक्षः ६. प्रधानः, मुख्यः ७. पृथिवी।
मौलिक, वि. (सं.) मौल, आधारभूत २. प्रधान, मुख्य ३. आद्य, आदिम।
मौसा, सं. पुं., दे. 'मासड़'।
मौसिम, सं. पुं. (अ.) ऋतुः, कालः, समयः २. उपयुक्तसमयः, उचितकालः।
मौसिम, वि. (फ़ा.) आर्तव, ऋतु-संबंधिन्-विषयक २. समयानुकूल, कालानुरूप।
मौसी, सं. स्त्री., दे. 'मासी'।
मौसेरा, वि. (हिं. मौसी) मातृष्वसृसंबंधिन्।
—भाई, सं. स्त्री., मातृ,-ष्वसेयः-ष्वस्रीयः।
मौसेरी बहिन, सं.स्त्री., मातृ-ष्वसेयी-ष्वस्रीया।
म्याँव, सं. स्त्री. (अनु.) विडालशब्दः, *म्यूँकारः।
—करना, मु., भयेन मंदमंदं वद् (स्वा.प.से.)।
म्याद, सं. पुं., दे. 'मीआद'।
म्यान, सं. स्त्री., दे. 'मियान'।
म्लान, वि. (सं.) म्लान, विशीर्ण २. दुर्बल ३. मलिन ४. खिन्न, अवसन्न।
म्लानि, सं. स्त्री. (सं.) म्लानता, कांतिक्षयः, विवर्णता २. खेदः, अवसादः, शोकः, ग्लानिः, (स्त्री.)।
म्लेच्छ, सं. पुं. (सं.) वर्णाश्रमधर्मविहीनः, अनार्यः २. गोमांसभक्षकः ४. अस्पष्टभाषिन् ४. दुर्वृत्तः, दुष्टः। वि., अधम, नीच, पापिन्।

य

य, देवनागरीवर्णमालायाः षड्विंशो व्यंजनवर्णः, यकारः।
यंता, सं. पुं. (सं. यन्तृ) शासकः, निदेशकः २. वाहन-चालकः, सारथिः। ३. हस्तिपकः, गजाजीवः।
यंत्र, सं. पुं. (सं.न.) देवताधिष्ठानं, विविधप्रभावयुक्तं अंकाक्षरयुतं कोष्ठकचित्रं (तंत्र.) २. दारुयंत्रादि, यंत्रं (मशीन) ३. साधनं, उपकरणं ४. अस्त्रास्त्रं ५. वाद्यं, वीणा ६. दे. 'ताला'।
—गृह, सं. पुं. (सं. न.) यंत्रशाला २. मानमंदिरं, वेधशाला ३. (अपराधिनां) यंत्रणागृहम्।
—मंत्र, सं. पुं. (सं. न.) अभिचारः, कुहकं, कुमतिः।

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

—विद्या, सं. स्त्री. (सं.) यंत्र,-शास्त्रं-विज्ञानम् ।
—शाला, सं. स्त्री. (सं.) दे. 'यंत्रगृहे' ।
यंत्रक, सं. पुं. (सं.) यंत्रकारः, यंत्रज्ञः, शिल्पिन्।
यंत्रण, सं. पुं. (सं. न.) नियंत्रणं, दमनम् २. बन्धनं, संयमनम् ३. पीडा, वेदना ४. रक्षणं, अभिरक्षा ।
यंत्रणा, सं. स्त्री. (सं.) कष्टं, क्लेशः, यातना २. वेदना, पीडा ।
यंत्रालय, सं. पुं. (सं.) यंत्र,-गृहं-शाला २. मुद्रणयंत्रालयः ।
यंत्रित, वि. (सं.) यंत्ररुद्ध २. तालकबंद ।
यकता, वि. (फ़ा) अनुपम, अद्वितीय, अप्रतिम ।
यकसाँ, वि. (फ़ा.) तुल्य, सम, सदृश ।
यक़ीन, सं. पुं. (अ.) निश्चयः २. विश्वासः ।
यकृत्, सं. पुं. (सं. न.) कौलखंडं, कालकं, कालेयं, करंडा, महास्नायुः, दे. 'जिगर' २. यकृत, उदरं-वृद्धिः ।
यक्ष, सं. पुं. (सं.) देवताभेदः, गुह्यकः २. कुबेरः ।
—राज, सं. पुं. (सं.) कुबेरः, यक्षराजः ।
यक्षिणी, सं. स्त्री. (सं.) यक्षभार्या, यक्षी, २. कुबेरपत्नी ।
यक्ष्मा, सं. पुं. (सं. यक्ष्मन्) क्षयः, शोषः, राजयक्ष्मन् (पुं.), रोगराजः ।
यख़नी, सं. स्त्री. (फ़ा.) मांस,-मंडः-रसः २. शाक,-मंडः-रसः ।
यगाना, सं. पुं., आत्मीयः, संबंधिन्, बान्धवः, बंधुः । वि., एकाकिन् २. अनुपम ।
—बेगाना, सं. पुं., स्वकीयपरकीयाः (बहु.) २. मित्रबांधवाः (बहु.) ।
यजमान, सं. पुं. (सं.) यज्ञपतिः, यष्टृ, व्रतिन्, यज्ञ,-कृत-कर्तृ २. दानिन्, दातृ ।
यजुर्वेद, सं. पुं. (सं.) आर्याणां धर्मग्रंथविशेषः, यजुस् (न.), यजुः श्रुतिः (स्त्री.) ।
यजुर्वेदी, सं. पुं. (सं.-दिन्) यजुर्विद् (पुं.) ।
यज्ञ, सं. पुं. (सं.) यागः, अध्वरः, सवः-वनं, मखः, क्रतुः, सत्रं, हवनं, होमः यजः-जिः, इज्या, इष्टिः (स्त्री.), सप्ततंतुः, महः २. विष्णुः ।
—कर्म, सं. पुं. [सं.-र्मन् (न.)] यज्ञ,-क्रिया-कृत्यं. २. कर्मकांडम् ।
—कुंड, सं. पुं. (सं. पुं. न.) हवन,-वेदी-कुंडम् ।
—पति, सं. पुं. (सं.) दे. 'यजमान' ।
—पशु, सं. पुं. (सं.) यज्ञियचरिः २. अश्वः ३. छागः ।
—पात्र, सं. पुं. (सं. न.) याग,-भाजनं-भांडम् ।
—भूमि, सं. स्त्री. (सं.) यागक्षेत्रम् ।
—शाला, सं. स्त्री. (सं.) यज्ञ-सदनं-मंदिरं-आगारम् ।
—सूत्र, सं. पुं. (सं. न.) यज्ञोपवीतम् ।
—स्तंभ, सं. पुं. (सं.) यागयूपः ।
यज्ञांग, सं पुं., (सं. न.) यज्ञभागः २. यज्ञ-साधनम्-सामग्री-उपकरणम् । (सं. पुं.) उदुम्बरः, जन्तुफलः २. खदिरः, दन्तधावनः ३. विष्णुः ।
यज्ञागार, सं. पुं. (सं. न.) यज्ञ,-शाला-वेदी-वेदिः (स्त्री.) ।
यज्ञोपवीत, सं. पुं. (सं. न.) पवित्रं, सावित्री-यज्ञ-ब्रह्म,-सूत्रं, द्विजायनी ।
यति[1], सं. पुं. (सं.) यतिन्, जितेन्द्रियः, तापसः, परिव्राजकः, सन्न्यासिन्, योगिन्, भिक्षुः, रक्तवसनः २. ब्रह्मचारिन् ।
—धर्म, सं. पुं. (सं.) सन्न्यासः, भिक्षाचर्यम् ।
यति[2], सं. स्त्री. (सं.) विरामः, विरतिः (स्त्री.), विश्रामः, पाठविच्छेदः (छंद.) ।
यतिनी, सं. स्त्री. (सं.) सन्न्यासिनी, परिव्रजिका २. विधवा ।
यती, सं. पुं. (सं.-तिन्) दे. 'यति' 'सं. पुं.' ।
यतीम, सं. पुं. (अ.) छ(छे)मंडः, अनाथः, मातृपितृहीनः ।
—खाना, सं. पुं. (अ.+फ़ा.) अनाथालयः, छ(छे)मंडालयः ।
यत्न, सं. पुं. (सं.) प्रयत्नः, उद्योगः, उद्यमः, अध्यवसायः, चेष्टा-ष्टितं, आ-प्र,-यासः, परि-श्रमः, व्यवसायः २. उपायः, युक्तिः (स्त्री.) ३. चिकित्सा, उपचारः, रोगप्रतिकारः ।
—करना, क्रि. अ., प्र-, यत् तथा चेष्ट् (भ्वा.आ. से.) परि-, श्रम् (दि. प. से.), अध्यव-व्यव,-सो (दि. प. अ.), उदयम् (भ्वा. प. अ.), आयस् (भ्वा. दि. प. से.), प्रयत्नं-परिश्रमं-अध्यवसायं कृ ।
—शील, वि. (सं.) यत्नवत्, उद्यमिन्, उद्योगिन्, आ-प्र,-यासिन्, परिश्रम-उद्योग-कर्म,-शील-पर-परायण इ. ।
यत्र, अव्य. (सं.) यस्मिन् देशे-स्थले-स्थाने ।
—तत्र, अव्य. (सं.) अत्र तत्र, इतस्ततः २. अनेकत्र, बहुत्र ।
यथांश, अव्य. (सं. न.) यथा,-भागं-खण्डम्,

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

भाग-अंश,-अनुसारं-अनुकूलम् २. यथायोग्यम्, यथोचितम्।

यथा, अव्य. (सं.) येन प्रकारेण, यया रीत्या २. दृष्टांत-उदाहरण,-रूपेण-,तया यथा हि, -वत्, इव, यद्वत्,-अनुरूपं,-अनुसारम्।

—काम, क्रि. वि. (सं. न.) यथा,-इच्छं-इष्ट-ईप्सितं अभिमतम्।

—क्रम,क्रि.वि. (सं.न.) क्रमेण, क्रमानुसारं-रेण।

—तथा, क्रि. वि. (सं.) यथाकथंचित्, येन केन प्रकारेण।

—मति,क्रि.वि.(सं.न.) यथाबुद्धि, यथाज्ञानम्।

—योग्य, वि. (सं.) यथोचित, यथार्ह।

—रुचि, क्रि. वि. (सं. न.) दे. 'यथाकाम'।

—वत्, क्रि. वि. (सं.) यथोचितं, यथार्हं, यथायुक्तं २. यथाविधि, नियमानुसारं ३. यथातथं, यथ सत्यम्।

—शक्ति, क्रि. वि. (सं. न.) यथा-बलं-सामर्थ्य-क्षमम्।

—शास्त्र, क्रि. वि. (सं. न.) शास्त्रानुकूलम्।

—संभव, क्रि. वि. (सं. न) यथाशक्यम्।

—समय, क्रि. वि. (सं. न.) यथाकालं, कालानुसारम्।

—साध्य, क्रि. वि. (सं. न.) यथा,-शक्ति-सामर्थ्यम्।

—स्थान, क्रि. वि. (सं. न.) स्थानानुकूलं, उचितस्थानेषु।

यथार्थ, वि. (सं.) सत्य, अवितथ, निर्दोष, निर्भ्रान्त २. उचित, उत्पन्न, युक्त। क्रि. वि. (सं. न.) युक्तं, यथार्हं, सांप्रतं, सम्यक्।

यथार्थता, सं. स्त्री. (सं.) सत्यता, निर्दोषता २. औचित्यं, युक्तता।

यथेच्छ, क्रि. वि. (सं. न.) 'यथाकाम' दे.। वि., (सं.) यथेष्ट, यथेप्सित, यथाकाम।

यथेच्छाचार, सं. पुं. (सं.) स्वेच्छाचारः, यथेष्टव्यवहारः।

यथेच्छाचारी, वि. (सं.-रिन्) स्वच्छन्द, स्वैर, स्वैरिन्, अनियंत्रित।

यथेष्ट, वि. तथा क्रि. वि. दे. 'यथेच्छ'।

यथोचित, वि. (सं.) यथा,-योग्य-अर्ह-युक्त। क्रि. वि. (सं. न.) यथा,-योग्यं-अर्हम्।

यदा, अव्य. (सं.) यस्मिन् काले-समये।

—कदा, अव्य. (सं.) काले काले, कदाचित्, कदापि।

यदि, अव्य. (सं.) चेत् (यह वाक्यारंभ में नहीं आता)।

यदु, सं. पुं. (सं.) ययातिपुत्रः।

—नंदन, सं. पुं. (सं.) यदु,-नाथः-श्रेष्ठः-पतिः-राजः, श्रीकृष्णः।

यद्यपि, अव्य. (सं.) षष्ठी वा सप्तमी से भी, जैसे, यद्यपि दशरथ विलाप करता रहा तो भी राम वन को चल दिया = विलपति दशरथे (विलपतो दशरथस्य) रामो वनं ययौ।

यम, सं. पुं. (सं.) धर्मराजः, पितृपतिः, कृतांतः, यमुनाभ्रातृ, वैवस्वतः, कालः,दंडधरः, अंतकः, धर्मः, महिषध्वजः, महिषवाहनः, जीवितेशः २. इन्द्रियनिग्रहः ३. योगांगविशेषः, अहिंसासत्यास्तेयब्रह्मचर्यापरिग्रहधर्मपालनं ४. वायुः ५. दे. 'यमज'।

—दूत, सं. पुं. (सं.) धर्मराजचरः।

—पुर, सं. पु. (सं. न.) यमपुरी, यमलोकः।

—राज, सं. पुं. (सं.) दे. 'यम' (१)।

यमक, सं. पुं. (सं. न.) शब्दालंकारभेदः (काव्य.), (सं. पुं.) संयमः २. दे. 'यमज'।

यमज, सं. पुं. (सं.-जौ) यमौ, यमकौ, यमलौ २. अश्विनीकुमारौ (जोड़े में से एक) यमः, यमलः। वि., यम, यमक, यमल।

यमल, सं. पुं. तथा वि., दे. 'यमज'।

यमुना, सं. स्त्री. (सं.) कालिंदी, कलिंद,-कन्या-नंदिनी, यमी, यमनी, सूर्यसुता, तरणि-तनुजा २. दु.।

ययाति, सं. पुं. (सं.) नहुषपुत्रः, पुरुपितृ, चंद्रवंशिनृपविशेषः।

यरक़ान, सं. पुं. (अ.) पाण्डु,-रोगः-आमयः, कामला, पाण्डुकः।

यव, सं. पुं. (सं.) सित-तीक्ष्ण,-शूकः, मेध्यः, दिव्यः, अक्षतः, धान्यराजः, तुरगप्रियः, शक्तुः, महेष्टः, पवित्रधान्यम्।

—क्षार, सं. पु. (सं.) यवजः, पाक्यं, यवाग्रजः।

यवन, सं. पुं. (सं.) यूनानवासिन् २. दे. 'मुसममान' ३. विदेशीयः ४. म्लेच्छः ५. वेगः ६. वेगवान् अश्वः।

यवनानी, सं. स्त्री. (सं.) १-२. यवन-यूनान,-भाषा-लिपिः (स्त्री.)।

यवनारि, सं. पुं. (सं.) कृष्णः, नन्दनन्दनः, वासुदेवः, मधुसूदनः।

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

यवनिका, सं. स्त्री. (सं.) जवनिका, अपटी, कांडपटः२. तिरस्करिणी, प्रतिसीरा, व्यवधानम्।

यवनी, सं. स्त्री. (सं.) यवनभार्या २. यवनजातेर्नारी।

यवस, सं. स्त्री. (सं. पुं. न.) घासः, शादः, तृणम् २. पलः, पलालः, धान्यतृणम्।

यवागू, सं. पुं. (सं. स्त्री.) उष्णिका, श्राणा, विलेपी, तरला।

यश, सं. पुं. [सं. यशस् (न.)]ख्यातिः-कीर्तिः-विश्रुतिः-प्रसिद्धिः (स्त्री.), श्लोकः, विश्रावः, अभिख्यानं, समाख्या।

—**गाना**, मु., प्रशंस् (भ्वा. प. से.), श्लाघ् (भ्वा. आ. से.) २. कृतं ज्ञा (क्र. उ. अ.), उपकारं विद् (अ. प. से.)।

यशस्वी, वि. (सं.-स्विन्) कीर्तिमत्, प्र वि,-ख्यात, लोकविश्रुत, सुशंस, यशोधर, कीर्तित, पुण्यलोक, प्रसिद्ध। [यशस्विनी (स्त्री.) = कीर्तिमती, विख्याता इ.]।

यष्ट, **यष्टिका**, } सं. स्त्री. (सं.) दंडः, लगुडः, यष्टी २. हारभेदः।

यह, सर्व. (सं. इह>) इदम्, एतद्।

यहाँ, क्रि. वि. (सं. इह) अत्र, अस्मिन् देशे-स्थाने।

—**तक**, क्रि. वि., एतद्-अत्र,-पर्यंतं-यावत्-अवधि-अंतम्।

—**वहाँ**, क्रि.वि., अत्र तत्र,इतस्ततः, अत्रामुत्र।

—**से**, क्रि. वि., इतः, अस्मात् स्थानात् २.अतः इतः,-परं-ऊर्ध्वं-प्रभृति।

यही, क्रि. वि. (हिं. यह + ही) अयं-इयं-इदं-एषः-एषा-एतद्,-एव।

यहीं, क्रि. वि. (हिं-यहाँ + ही) इहैव, अत्रैव, अस्मिन्नेव स्थाने।

यहूदी, सं. पुं. (इब्रानी, यहूद) यहूद,-वासिन्-भाषा-लिपिः (स्त्री.)।

याँ, क्रि. वि., दे. 'यहाँ'।

या, अव्य. (फ़ा.) वा, अथवा, यद्वा; (प्रश्न करने में) नु।

याकूत, सं. पुं. (अं.) दे. ' ल' (रत्न)।

याग, सं. पुं. (सं.) दे. 'यज्ञ'।

याचक, सं. पुं. (सं.) अर्थिन्, प्रार्थकः २. भिक्षुः, भिक्षुकः।

याचना, सं. स्त्री. (सं.) याचनं, याच्ञा, प्रार्थनं-ना। क्रि. स., दे. 'माँगना'।

याजक, सं. पुं. (सं.) याजयितृ, पुरोहितः।

याज्ञवल्क्य, सं. पुं. (सं.) वैशंपायनशिष्यः, वाजसनेयः २. जनकसभ्यो योगीश्वरयाज्ञवल्क्यः ३. स्मृतिकारविशेषः।

याज्ञिक, सं. पुं. (सं.) यजमानः, यष्टृ २. याजयितृ। वि., यज्ञि(ज्ञी)य, यागविषयक। [याज्ञिकी (स्त्री.)]।

यातना, सं. स्त्री. (सं.) पीडा-वेदना-व्यथा,-अतिशयः २. यमदण्डपीडा।

यातायात, सं. पुं. (सं. न.) गतागतं, आयातनिर्यातं २. प्रेत्यभावः, पुनर्जन्मन् (न.)।

यात्रा, सं. स्त्री. (सं.) प्रस्थानं, प्रयाणं, व्रज्या, गमः-मनं,प्रवासः, देश,-भ्रमणं-पर्यटनं, प्रस्थितिः (स्त्री.), अध्व-मार्ग,-गमनं-क्रमणम्।

—**करना**, क्रि. अ., प्र-या (अ. प. अ.) प्रवस् (भ्वा. प. अ.), देशे अट् (भ्वा. प. से.), यात्रां कृ।

यात्री, वि. (सं.-त्रिन्) पथिकः, पथिलः, पांथः, अध्वगः, अध्वन्यः, पादविकः, प्रवासिन्, मार्गिकः, यात्रिकः, सारणिकः २. तीर्थयात्रिन्, कार्पटिकः।

याद, सं. स्त्री. (फ़ा.) धारणा, स्मृतिः-स्मरणशक्तिः (स्त्री.) २. स्मरणम्।

यादगार, सं. स्त्री. (फ़ा.) स्मृतिचिह्नं, स्मारकम्।

याददाश्त, सं. स्त्री. (फ़ा.) स्मृतिः (स्त्री.), धारणा. २. स्मरण,-स्मारक-टिप्पणी।

यादव, सं. पुं. (सं.) यदुनंश्यः, यदुवंशजः २. श्रीकृष्णः। वि., यदुसंबंधिन्।

यान, सं. पुं. (सं. न.) प्रवहणं, रथः, स्यंदनः, शताङ्गः, वाहनं, वह्यम्।

यानी-ने, अव्य. (अ.) अयं आशयः, एष भावः, इदं तात्पर्यं, अर्थात्।

यापन, सं. पुं. (सं. न.) कालक्षेपः, समयातिवहनम्।

याबू, सं. पुं. (फ़ा.) दे. 'टट्टू'।

याम, सं. पुं. (सं.) दे. 'पहर' २. समयः।

यामिनी, सं. स्त्री. (सं.) रात्रि, रजनी, निशा।

यार, सं. पुं. (फ़ा.) मित्रं, सुहृद् (पुं.) २. उपपतिः, जारः।

यारनी, सं. स्त्री. (फ़ा. यार) उपपत्नी-भुजिष्या २. स्त्री, दयिता।

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

याराना, सं. पुं. } (फ़ा.) सख्यं, मित्रता
यारी, सं. स्त्री. } २. अधर्म्य-अनुचित,-प्रणयः-प्रेमन् (पुं. न.), अनंगरागः ।

याल, सं. स्त्री. (तु.) दे. 'अयाल' ।

यावक, सं. पुं. (सं.) सक्तुः २. अलक्तकः ।

यावज्जीवन, क्रि. वि. (सं. न.) आ,-मरणं-मृत्योः, यावज्जन्म, यावज्जीवम् ।

यावत्, वि. (सं.) दे. 'जितना' २. समस्त, सकल (अव्य.) पर्यन्तम्, आ-(समास में वा पंचमी युक्त) ।

यावनी, सं. स्त्री. (सं.) करंकशालिनामकः इक्षुः, गुडतृणभेदः, वि. स्त्री. यवन-सम्बन्धिनी ।

युक्त, वि. (सं.) उचित, उपपन्न, योग्य, औपपत्तिक २. संश्लिष्ट, संहत, संलग्न, मिलित ।

युक्ति, सं. स्त्री. (सं.) उपायः, प्र,-योगः-युक्तिः (स्त्री.) २. कौशलं, चातुर्यं ३. रीतिः (स्त्री.), प्रथा ४. न्यायः, नीतिः (स्त्री.) ५. अनुमानं, तर्कः ६. हेतुः, कारणं ७. ऊहा, तर्कः ८. योगः, संश्लेषः ।

—**युक्त**, वि. (सं.) उचित, उपपन्न न्याय्य, यथार्थ ।

युग, सं. पुं. (सं. न.) द्वयं, द्वितयं, युग्मं, युगलं, युतकं, यमकं २. समयः ३. सुदीर्घ-कालपरिमाणविशेषः, कृतादिकालचतुष्टयं (दे. 'कलियुग' आदि) ४. धुर् (स्त्री.), धुर्वी, प्रासंगः, युगः-गं ५. शारः-रिः, खेलनी ६. एक-कोष्ठकस्थं शारद्वयम् ।

—**युग**, क्रि. वि. (सं. न.) निरंतरं, सदा, शाश्वत्, नित्यं, चिरं, (सब अव्य.) ।

—**धर्म**, सं. पुं. (सं.) युगानुरूप,-कर्तव्यं-आचारः ।

युगपत्, अव्य. (सं.) सहैव, समकालम् ।

युगल, सं. पुं. (सं.) दे. 'युग' (१) । २. दंपती (द्वि.) जंपती ।

युगांत, सं. पुं. (सं.) महाप्रलयः, कल्पांतः २. सत्यादियुगविशेषस्य समाप्तिः (स्त्री.) ।

युगांतर, सं. पुं. (सं. न.) अन्य-द्वितीय,-युगं २. परिवर्तितः समयः ।

—**उपस्थित करना**, मु., सर्वथा परिवृत (प्रे.) क्रांतिं कृ ।

युग्म, सं. पुं. (सं. न.) दे. 'युग' (१) ।

युत, वि. (सं.) युक्त, संलग्न, संहत, मिलित, संश्लिष्ट ।

युद्ध, सं. पुं. (सं. न.) संग्रामः, आयोधनं, जन्यं, प्रधनं, मृधं, आस्कंदनं, संख्यं, समरं, रणः, विग्रहः, संप्रहारः, अभिसंपातः, कलिः, आहवः, विदारः, आजिः (पुं. स्त्री.) वलजं, युध् (स्त्री.) ।

—**काल**, सं. पुं. (सं.) संगर-संग्राम,-समयः-कालः-वेला ।

—**क्षेत्र**, सं. पुं. (सं. न.) युद्ध-रण-संगर,-भूः (स्त्री.)-भूमिः (स्त्री.)-क्षेत्रम्-अजिरम् ।

—**विद्या**, सं. स्त्री. (सं.) रण-समर-संगर,-शास्त्रं-विज्ञानम् ।

—**वीर**, सं. पुं. (सं.) भटः, योधः, शूरः, योद्धृ ।

युधिष्ठिर, सं. पुं. (सं.) पांडवराजः, अजात-शत्रुः, धर्मपुत्रः, शल्यारिः, अजमीढः ।

युरेनियम, सं. पुं. (अ.) किरणधातुः, वरुणिकम् ।

युवक, सं. पुं. (सं.) दे. 'युवा' ।

युवती, सं. स्त्री. (सं.) युवतिः (स्त्री.), तरुणी, यूनी, धनि(नी)का, मध्यमा,-मिका, वयस्था, वर्या, ईश्वरी, वृष्टरजस् (स्त्री.), प्राप्तयौवना ।

युवराज, सं. पुं. (सं.) राज्याधिकारिन्, राज-कुमारः ।

युवा, सं. पुं. (सं. युवन्) तरुणः, तलुनः, वय-(यः)स्थः ।

यूँ, अव्य., दे. 'यों' ।

यूका, सं. पुं. (सं.) यूकः, केशकीटः, स्वेदजः, बालकृमिः, पाली-लिः (स्त्री.), षट्पदः । दे. 'जूँ' २. दे. 'खटमल' ।

यूथ, सं. पुं. (सं. न.) कुलं, वृंदं, गणः, समजः, सजातीयवस्तुसमूहः २. सैन्यं, दलः-लम् ।

—**पति**, सं. पुं. (सं.) यूथ,-पः-नाथः २. दल-पतिः ।

यूनान, सं. पुं (ग्रीक, आयोनिया) *यूनानः, यवनदेशः ।

यूनानी, वि. (हिं. यूनान्) यवनदेशसंबंधिन् । सं. स्त्री., (१-२) यवनदेश-यूनान,-भाषा-चिकित्सा-प्रणाली । सं. पुं., यवनदेशीयः, यूनानवासिन् ।

यूनिवर्सिटी, सं. स्त्री. (अं.) विश्वविद्यालयः ।

यूप, सं. पुं. (सं.) यज्ञ-याग-स्तंभः २. वि,-जयस्तंभः, कीर्तिस्तंभः ।

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

यूरोप, सं. पुं. (अं. युरोप) *यूरोपः, महाद्वीपविशेषः ।

यूरोपियन, वि. (अं.) *यूरोपीय, यूरोप,-संबंधिन्-विषयक । सं. पुं., यूरोपीयः, यूरोपवासिन् ।

यूष, सं. पुं. (सं. पुं. न.) जूषः-षं, द्विदलक्वाथरसः । दे. 'शोरवा' ।

ये, सर्व. (हिं. यह) इमे-एते, इदम, एतद् के बहुवचन के रूप ।

यों, अव्य. (सं. एवमेव >) इत्थं, एवं, अनेन प्रकारेण, एतया रीत्या ।

—**तो**, क्रि. वि.. प्रायः, प्रायशः, प्रायेण २. साधारण्येन, सामान्यतः ।

—**ही**, क्रि. वि., एवमेव, इत्थमेव २. व्यर्थं, मुधा, निष्प्रयोजनं ३. अकारणं, अहेतुकम् ।

—**ही सही**, क्रि. वि., एवमस्तु, एव भवतु, तथास्तु ।

योग, सं. पुं. (सं.) चित्तवृत्तिनिरोधः, मनःस्थैर्यं २. दर्शनशास्त्रविशेषः ३. मोक्षोपायः, मुक्तियुक्तिः (स्त्री.) ४. संधिः, संगः, सं(समा)गमः, संहतिः (स्त्री.), संयोगः, संश्लेषः ५. उपायः ६. औषधं ७. धनं ८. लाभः ९. शुभ-मंगल,-अवसरः-मुहूर्तः (-र्तं) १०. दूतः, चरः ११. वलीवर्दशकटी १२. चातुर्यं १३. वाहनं १४. परिमाणः १५. नियमः १६. उपयुक्तता १७. सामाद्युपायचतुष्टयं १८. वशीकरणोपायः १९. ध्यानं, चिंतनं २०. संबंधः २१. धनोपार्जनवर्द्धने २२. सौहार्दं २३. वैराग्यं २४. संकलनं, परिसंख्या, पिंडकारणं (गणित) २५. सौकर्यं २६. तिथिवारनक्षत्रादीनां स्थितिविशेषः (ज्यो.) ।

—**क्षेम**, सं. पुं. (सं. न.) अनागतानयनागतरक्षणे (न. द्वि.), प्राप्तिरक्षणे । जीवननिर्वाहः २. मंगलं ३. लाभः ४. राष्ट्रसुव्यवस्था ५. दायादेषु अविभाज्यं वस्तु (न.) ।

—**निद्रा**, सं. स्त्री. (सं.) योगसमाधिः २. वीरगतिः (स्त्री.) ।

—**फल**, सं. पुं. (सं. न.) संकलः, पिंडः, परिसंख्या (गणित) ।

—**बल**, सं. पुं. (सं. न.) तपोबलं, योगशक्तिः (स्त्री.) ।

योगांग, सं. पुं. (सं. न.) योग,-साधनानि-उपायाः (पुं.) [यमनियमासनप्राणायामप्रत्याहारधारणाध्यानसमाधयोऽष्टावंगानि ।

योगांजन, सं. पुं. (सं. न.) सिद्धांजनं, भृगर्भस्थपदार्थदर्शककज्जलम् २. नेत्ररोगनाशकांजनम् ।

योगाभ्यास, सं. पुं. (सं. न.) योगांगानुष्ठानं, योगसाधनम् ।

योगासन, सं. पुं. (सं. न.) ब्रह्मासनं, ध्यानासनम् ।

योगिनी, सं. स्त्री. (सं.) योगाभ्यासिनी, तपस्विनी २. रण,-पिशाची-पिशाचिका ।

योगी, सं. पुं. (सं.-गिन्) योगाभ्यासिन, तपस्विन्, तापसः, यतिः, मुनिः, वैरागिन्-गिकः, संन्यासिन् ।

योगीश्वर, सं. पुं. (सं.) योगीन्द्रः, योगिराजः ।

योगेश्वर, सं. पुं. (सं.) श्रीकृष्णः २. शिवः ३. योगेन्द्रः, सिद्धः, योगेशः ।

योग्य, वि. (सं.) क्षम, शक्त, समर्थ, पात्रं २. सुशील, श्रेष्ठ, ३. चतुर, दक्ष, निपुण ४. उचित, उपपन्न, युक्त ।

योग्यता, सं. स्त्री. (सं.) क्षमता, सामर्थ्यं २. चातुर्यं, नैपुण्यं ३. औचित्यं, युक्तता ।

योग्या, सं. स्त्री. (सं.) युवती, तरुणी २. अभ्यासः ३. शल्यक्रियाभ्यासः ।

योजक, वि. (सं.) संयोजक, सम्मेलक, संश्लेषक । सं. पुं. डमरुमध्यंम्, बृहद्भूखण्डयुग्मयोजकसूक्ष्मभूभागः ।

योजन, सं. पुं. (सं. न.) (१–३) द्वि-चतुः-अष्ट,-कोशी ४. योगः ५. संयोजनम् ।

योजना, सं. स्त्री. (सं.) उपायः, कल्पना, प्रयोगः, प्रयुक्तिः (स्त्री.) २. नियुक्तिः (स्त्री.) ३. रचना, विन्यासः ४. व्यवस्था, आयोजनं ।

योद्धा, **योधा**, सं. पुं. (सं. योद्धृ) भटः, योधः, वीरः, शूरः, सैनिकः, आयुधिकः, युद्धशस्त्र,-उपजीविन्, अस्त्र-शस्त्र,-धरः-भृत्-आजीवः ।

योनि, सं. स्त्री. (सं. पुं. स्त्री.) भगं, वरांगं, स्मरमंदिरं, रतिगृहं, अधरं, स्मर-कंदर्प,-कूपः नारी,-गुह्यं-उपस्थं, संसारमार्गः २. कारणं ३. उद्गमः, उद्भवः, निर्गमः ४. प्राणिजातिः (स्त्री.) ५. देहः ६. गर्भः ७. जन्मन् (न.) ८. गर्भाशयः ।

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

योनिज, वि. (सं.) भगज, योनिसंभव। सं. पुं., (सं.) जरायुजः अंडजो वा जीवः।
योरोप, सं. पुं., दे. 'यूरोप'।
यौगिक, सं. पुं. (सं.) व्युत्पन्नः, प्रकृतिप्रत्यय-योगलभ्यार्थवाचकः शब्दः २. समस्तशब्दः।
यौतक, सं. पुं. (सं. न.) यौतुकं, युतकं, दे. 'दहेज'।
यौवन, सं. पुं. (सं. न.) तारुण्यं, पूर्व-प्रथमं-नवं-वयः (न.)।
—काल, सं. पुं. (सं.) यौवन,-दशा-पदवी, तारुण्यावस्था।

र

र, देवनागरीवर्णमालायाः सप्तविंशो व्यंजनवर्णः, रेफः, रकारः।
रंक, वि. (सं.) दरिद्र, निर्धन २. कृपण, कदर्य। सं. पुं., भिक्षुकः २. दरिद्रः।
रंग, सं. पुं. (सं.) रागः, वर्णः २. वर्णकः-का, लेपः ३. नृत्यगीते (न. द्वि.), संगीतं ४. नाट्य-रंग,-क्षेत्रं,-शाला-गृहं-मंडपः-स्थलं-भूमिः (स्त्री.) ५. युद्ध-रण,-क्षेत्रं-भूमिः ६. शरीर-त्वग्,-वर्णः ७. यौवनं ८. सौंदर्यं ९. प्रभावः १०. कौतुकं, क्रीडा ११. युद्धं १२. कामचारः, छंदः (पुं.) १३. आनंदः १४. दशा १५. कांडं, अद्भुत-व्यापारः १६. कृपा १७. अनुरागः १८. प्रकारः, रीतिः (स्त्री.)।
—करना, क्रि. स., दे. 'रंगना'।
—चढ़ना, क्रि. अ., ब.'रंगना' के कर्म. के रूप।
—ढंग, सं. पुं., आकारः, रूपं, २. दशा ३. आचारः।
—दार, वि., रंजित, वर्णित, सरागः, रागयुक्त, चित्रित।
—बिरंग-गा, वि., अनेक-बहु-नाना,-रंग-वर्ण, चित्र, कर्बुर, शबल। २. विशिष्ट, अनेक-बहु-नाना,-विध-प्रकारक।
—भूमि, सं. स्त्री. (सं.) उत्सव,-स्थलं-स्थानं २. क्रीडा-कौतुक,-स्थलं ३. दे. 'रंग' (४)।
—र(रे)लियाँ, सं. स्त्री., आमोदप्रमोदं, परि-हासः, विनोदः, लीला, हासिका, विहारः, क्रीडा।
—रस, सं. पुं., दे. 'रंगरलियाँ'।
—रसिया, सं. पुं., क्रीडाप्रियः, विलासिन्, विनोदिन्, आनंदिन्, हास्यशीलः।
—रूप, सं. पुं. (सं. न.) आकारः, आकृतिः (स्त्री.), रूपम्।
—रेज, सं. पुं. (फ़ा.) रंजकः, रंगाजीवः। [-जिन (स्त्री.)=रंजिका]।
—शाला, सं. स्त्री. (सं.) दे. 'रंग' (४)।
—साज, सं. पुं. (फ़ा.) रंजकः, वर्णचारकः, कृणुः, वर्णाटः, तौलिकः, तौलिकिकः, रंग,-कारः-जीवकः-आजीवः २. रंग,-निर्मातृ-रञ्च-यितृ-कारः।
—साजी, सं. स्त्री. (फ़ा.) रंजनं, वर्णनं, रंजकता, तौलिकता।
—महल, सं. पुं. (सं+अ.) रंगभवनं, प्रमोदप्रासादः।
—उड़ना या उतरना, मु., पांडुच्छाय (वि.) जन् (दि. आ. से.), विवर्णतां प्रपद् (दि. आ. अ.), मलिन-म्लान-मंद,-प्रभ-कांति-द्युतिं जन्।
—जमाना या बाँधना, मु., स्वगौरवं प्रति-ष्ठा (प्रे. प्रतिष्ठापयति), निजप्रतिष्ठां प्रस् (प्रे.)।
—पीला (फ़क, फीका या मंद) होना, मु., दे. 'रंग उड़ना'।
—बदलना, मु., क्रुध् (दि. प. अ.), कुप् (दि. प. से.)।
—में भंग पड़ना, मु., आनंदोत्सवः विह (कर्म.), रंगभंगो जन्।
—र(रे)लियाँ मनाना, मु., मुद् (भ्वा. आ. से.), रम् (भ्वा. आ. अ.), विह् (भ्वा. प. अ.), नंद्-क्रीड्-विलस् (भ्वा. प. से.)।
रंगत, सं. स्त्री. (सं. रंगः>) दे. 'रंग' (१-६)। २. आनंदः, स्वादः ३. दशा, अवस्था।
—लाना, मु., परिवर्तनं जन् (प्रे.), क्रांतिं उत्पद् (प्रे.)।
रँगना, क्रि. स. (सं. रंगः>) रंज् (प्रे.), चित्र्-वर्ण (चु.) २. दे. 'मोहना' क्रि. स. (१) तथा क्रि. अ. (१)। सं. पुं., रंजनं, चित्रणं, वर्णनम्।
रंगने योग्य, वि. रंजनीय, चित्रयितव्य, वर्णनीय।
रंगनेवाला, सं. पुं. दे. 'रंगरेज' तथा 'रंगसाज'।

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

रंगरूट, सं. पुं. (अं. रिक्रूट) नव-नूतन,-सैनिकः २. नव,-छात्रः-दीक्षितः-शिष्यः, शैक्षः।

रँगरेज़, सं. पुं., दे. 'रंग' के नीचे।

रंगवाई, सं. स्त्री. (हिं. रंगवाना) रंजन-वर्णन,-भृतिः (स्त्री.)-भृत्या।

रंगवाना, क्रि. प्रे., ब. 'रंगना' के प्रे. रूप।

रंगाई, सं. स्त्री. (हिं. रंगना) दे. 'रंगवाई' २. दे. 'रंगना' सं. पुं.।

रंगा हुआ, वि., रंजित, चित्रित, वर्णित, रागयुक्त।

रंगी, वि. (सं.-गिन्) विनोदिन्, आनन्दिन्, उल्लासिन् २. सरंग. रंगयुक्त *३. रंजक, ४. अनुरक्त ५. अभिनेतृ।

रंगीन, वि. (फ़ा.) दे. 'रंगदार' २. विलासिन् आनंदित, विहारिन्, विनोदिन्, रसिक ३. चमत्कृत, अलंकृत (भाषा आदि)।

रंगीनी, सं. स्त्री. (फ़ा.) सरागता, सचित्रता २. शृंगारः, अलंक्रिया ३. अनुरागिता, कामुकता।

रंगीला, वि. (सं. रंगः>) दे. 'रंगीन' (२.)। २. सुंदर ३. अनुरागिन्, कामुक।

रंगोपजीवी, सं. पुं. (सं.-विन्) नटः, अभिनेतृ, शैलूषः, भरतपुत्रकः।

रंच, रंचक, वि. (सं. न्यंच् >) अल्प, स्तोक।

रंज, सं. पुं. (फ़ा.) शोकः, परितापः, आर्तिः (स्त्री.)।

रंजक, सं. पुं. (सं.) दे. 'रंगसाज' (२) दे. 'रंगरेज'। वि. (सं.) रंगकार, वर्णचारक २. आह्लादक, आनंदप्रद।

रंजन, सं. पुं. (सं. न.) चित्रणं, वर्णनं २. आह्लादनं, परितोषणम्।

रंजित, वि. (सं.) वर्णित, चित्रित, सराग २. आह्लादित, सहर्ष ३. अनुरक्त, आसक्त।

रंजिश, सं. स्त्री. (फ़ा.) वैरं, शत्रुता २. अप-वि,-रागः, प्रसाद-प्रीति,-अभावः।

रंजीदगी, सं. स्त्री. (फ़ा.) दे. 'रंजिश' (२)। २. शोकः।

रंजीदा, वि. (फ़ा.) शोकग्रस्त, परितप्त २. विषण्ण, प्रसन्नताशून्य।

रंड, वि. (सं.) धूर्त्त, वञ्चक २. विफल, निष्फल ३. छिन्न-विकल,-अंग। सं. पुं. (सं.) निरपत्यः, निस्सन्तानः २. निष्फल-अफल,-वृक्षः-तरुः।

रंडा, सं. स्त्री. (सं.) विधवा, गत-मृत,-भर्तृका, विश्वस्ता, कात्यायनी। सं. पुं. (पं०) दे. 'रँडुआ'।

रंडापा, सं. पुं. (सं. रंडा) वैधव्यं, दे.।

रंडी, सं. स्त्री. [(पं.) विधवा सं.रंडा>] वेश्या, भोग्या, गणिका।

—बाज, सं. पुं. (हिं.+फ़ा.) वेश्या-गणिका-गामिन्।

—बाज़ी, सं. स्त्री. (हिं.+फ़ा.) वेश्यागमनं, रम्भारमणम्।

रंडुआ-वा, सं. पुं. (हिं. रांड) मृतपत्नीकः, गतभार्यः, विधुरः।

रंदा, सं. पुं. (फ़ा.) तक्षणी, त्वक्षणी।

—फेरना, क्रि. स., तक्ष्णया समी-श्लक्ष्णीकृ, तक्ष् (भ्वा. स्वा. प. से.)।

रंध्र, सं. पुं. (सं. न.) छिद्रं, विवरं, बिलं २. योनिः (स्त्री.) ३. दोषः।

रंबा, सं. पुं. (पं.) खुरप्रः।

रंभा, सं. स्त्री. (सं.) कदली, दे. 'केला' २. गोध्वनिः ३. अप्सरोविशेषः ४. वेश्या।

रंभाना, क्रि. अ. (सं. रंभणं) रंभ्-रेभ् (भ्वा. आ. से.), मृदु नर्द् (भ्वा. प. से.)। सं. पुं., रंभा, हंबा-भा, रेभणम्।

रअय्यत, सं. स्त्री. (अ.) प्रजा २. कृषीवलः।

रईस, सं. पुं. (अ.) धनाढ्यः, धनिकः, रयीशः २. भूस्वामिन्, क्षेत्रपतिः।

रक़बा, सं. पुं. (अ.) क्षेत्रफलम्।

रक़म, सं. स्त्री. (अ.) संख्या, परिमाणं २. संपत्तिः (स्त्री.), धनं ३. प्रकारः, विधा।

रकाब, सं. स्त्री. (फ़ा.) (सादिनः) पादाधारः *पादधानं २. दे. 'तश्तरी'।

—पर पैर रखना, मु., गंतुं सज्जीभू।

रकाबी, सं. स्त्री. (फ़ा.) दे. 'तश्तरी'।

रक़ीब, सं. पुं. (अ.) सपत्नः, प्रत्यर्थिन्, प्रतिस्पर्द्धिन्।

रक्त, सं. पुं. (सं. न.) शोणं, शोणितं, लो(रो)-हितं, लोहं, रुधिरं, असृं, असृज् (न.), क्षतजं अंगजं, त्वग्जं, चर्मजं २. कुङ्कुमं ३. ताम्रं ४. सिंदूरं ५. पद्मं ६. हिंगुलम्। वि., अनुरक्त, आसक्त २. रक्त-लोहित,-वर्ण ३. लंपट, कामिन्, कामुक।

—कमल, सं. पुं. (सं. न.) कोकनदं, रवि-

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

प्रियं, रक्त-अरुण शोण,-अंभोज-कमलं-पद्म-वारिजम् ।
—कोढ़, सं. पुं. (सं. रक्तकोटः) रक्तकुष्ठः-ष्ठं, विसर्पः ।
—चंदन, सं. पुं. (सं. न.) अर्क-कु-शोणित-क्षुद्र,-चंदनं. तिलपर्णः, रंजनं, ताम्रवृक्षः, लोहितम् ।
—पात, सं. पुं. (सं.) रुधिर-रक्त,-स्रवण-स्रावः-क्षरणं २. शोण-रक्त,-पातनं-स्रावणं ३- नर-नृ,-हत्या-घातः ।
—पायी, वि. (सं.-यिन्) शोणपः, रक्तपः । सं. पुं., मत्कुणः, दे. 'खटमल' ।
—पित्त, सं. पुं. (सं. न.) रोगभेदः २. दे. 'नकसीर' ।
—प्रदर, सं. पुं. (सं.) प्रदरभेदः, नारीरोग-भेदः ।
—प्रमेह, सं. पुं. (सं.) रक्तमेहः, मूत्ररोगभेदः ।
—बहना, क्रि. अ., रक्तं स्रु (भ्वा. प. अ.)-क्षर् (भ्वा. प. से.) ।
—बहाना, क्रि. स., रक्तं शोणं पत्-स्रु-मुच् (प्रे.), मृ (प्रे.), हन् (अ. प. अ.) ।
—मोचन, सं. पुं. (सं. न.) रक्त,-मोक्षण-मोक्षः, शोणितस्रावः, दे. 'फ़स्द' ।
—लोचन, सं. पुं. (सं.) कपोतः । वि., लोहितेक्षण ।
—वर्ण, वि. (सं.) अरुण, लोहित, शोण, रक्त ।
—स्राव, सं. पुं. (सं.) रुधिरक्षरणं, असृक्-स्रुतिः (स्त्री.) ।
—हीन, वि. (सं.) शोणशून्य, रुधिररहित २. निर्वीर्य, निस्तेजस्क ।
रक्षक, सं. पुं. (सं.) शरण्यः, शरणं,-पः,-पालः (समासांत में), रक्षितृ, रक्षिन्, त्रातृ, पातृ, गोप्तृ २. प्रहरिन्, यामिकः ३. पालकः, संवर्द्धकः, पोषकः ।
रक्षण, सं. पुं. (सं. न.) परि-,त्राणं, गोपनं, रक्षा, गुप्तिः २. पालनं, पोषणं, संवर्द्धनम् ।
रक्षणीय, वि. (सं.) रक्ष्य, रक्षितव्य, त्रातव्य, गोपनीय २. पालनीय, पोषणीय ।
रक्षा, सं. स्त्री, (सं.) दे. 'रक्षण' (१) । २. कष्ट-निवारक-यंत्रं, रक्षिका ।
—करना, क्रि. स., अव्-गुप्-रक्ष् (भ्वा. प. से.), पा (अ. प. अ.) ।
—बंधन, सं. पुं. (सं. न.) श्रावणी, पर्वविशेषः २. श्रावणपूर्णिमायां वेदस्वाध्यायोपाकर्मन्(न.) ।
रक्षित, वि. (सं.) त्रात, त्राव, गुप्त, गोपायित, पात, ऊत, अवित २. प्रतिपालित, पोषित ३. स्थापित ।
रखना, क्रि. स. (सं. रक्षणं>) न्यस् (दि. प. से.), निक्षिप् (तु. प. अ.), निधा (जु. उ. अ.), स्था (प्रे. स्थापयति) २. रक्ष्-अव्-गुप् (भ्वा. प. से.), त्रै (भ्वा. आ. अ.) ३. संचि (स्वा. उ. अ.), संग्रह् (क्र्. उ. से.) ४. आधीकृ, उपनिधा (जु. उ. अ.), न्यस् ५. धृ (चु.), भृ (जु. उ. अ.) ६. आत्मसात्-स्वायत्तीकृ ७. (गौ आदि) अस् (अ. प.) विद् (दि. आ. अ.)-वृत् (भ्वा. आ. से.) ८. नियुज् (चु., रु. प. अ.) ९. विलंब् (प्रे.), व्याक्षिप् (तु. प. अ.) १०. उपपतित्वेन उपपत्नीत्वेन वा स्वीकृ ११. अन्ययेन संचि । सं. पुं., न्यसनं, निक्षेपणं, निधानं, स्थापनं २. रक्षणं, गोपनं, ३. संचयनं, संग्रहणं ४. आधीकरणं, उपनिधानं ५. धारणं, भरणं ६. आत्मसात्करणं ७. नियोजनं, ८. विलंबनं इ. ।
रखनी, सं. स्त्री. (हिं. रखना) दे. 'रखेली' ।
रखने योग्य, वि., न्यसनीय, स्थापयितव्य, रक्षितव्य, संचेय, उपनिधेय, धार्य, नियोक्तव्य ।
रखनेवाला, सं. पुं., निधातृ, स्थापकः, रक्षकः, संचायकः, उपनिधायकः, धारकः इ. ।
रखवाई, सं. स्त्री. (हिं. रखना) रक्षा,-भृतिः (स्त्री.) भृत्या ।
रखवाना, क्रि. प्रे., ब. 'रखना' के प्रे. रूप ।
रखवाला, सं. पुं. (हिं. रखना) दे. 'रक्षक' (१-२) ।
रखवाली, सं. स्त्री. (हिं. रखवाला) दे. 'रक्षण' (१) ।
रखा हुआ, वि., न्यस्त, निहित, रक्षित,संचित, उपनिहित इ. ।
रखेली, सं. स्त्री (हिं. रखना) उप,-पत्नी-भार्या-कलत्रम् ।
रग, सं. स्त्री. (फ़ा.) धमनी, नाडी, रक्तवाहिनी, शिरा, ईलिका ।
—में, मु., सर्वस्मिन्नपि शरीरे ।
—से वाकिफ़ होना, मु., सम्यक्-सु-ठु-साधु ज्ञा (क्र्. उ. अ.)-परिचि (स्वा. उ. अ.) ।

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

—रेशा, सं. पुं. (फ़ा.) शरीर,-अवयवाः-अङ्गानि (बहु.) २. पत्र,पल्लव,-नाड्यः (स्त्री. बहु.)।
रगड़, सं. स्त्री. (हिं. रगड़ना) दे. 'रगड़ना' सं. पुं.। २. त्वग्भंगहीन-क्षुद्र,-व्रणः (णं) ३. कलहः, विवादः ४. विकट,-परिश्रमः-प्रयासः।
—खाना या लगना, क्रि. अ., व. 'रगड़ना' के कर्म. के रूप।
रगड़ना, क्रि. स. (अनु.) घृष् (भ्वा. प. से.), मृद् (क्र्. प. से.) २. चूर्ण् (चु.), पिष् (रु. प. अ.) ३. श्लक्ष्णीकृ, परिष्कृ ४. परि-प्र-मृज् (अ. प. से. प्रे.), निज् (जु. उ. अ.) ५. अभ्यस् (दि. प. से.), पुनः पुनः कृ ६. सवेगं सपरिश्रमं च संपद् (प्रे.)-अनुष्ठा, (भ्वा. प. अ.) ७. पीड् (चु.), संतप् (प्रे.) ८. तड् (चु.), आहन् (अ. प. अ.)। सं. पुं., घर्षणं, मर्दनं २. चूर्णनं, पेषणं ३. श्लक्ष्णीकरणं ४, परिमार्जनं, प्रक्षालनं, ५. अभ्यसनं, आवृत्तिः (स्त्री.) ६. पीडनं ७. ताडनं ८. सवेगं संपादनं इ.।
रगड़ने योग्य, वि., घर्षणीय, मर्दनीय, पेषणीय इ.।
रगड़नेवाला, सं. पुं., घर्षकः, मर्दकः, पेषकः इ.।
रगड़वाना, क्रि. प्रे., व. 'रगड़ना' के प्रे. रूप।
रगड़ा, सं. पुं. (हिं. रगड़ना) दे. 'रगड़ना' सं. पुं.। २. अतिशय-अत्यंत,-परिश्रमः-उद्योगः ३. चिरस्थायिकलहः, नैत्यिकविवादः।
—झगड़ा, सं. पु. (नित्य-सतत-) विवादः-कलहः-कलिः।
—हुआ, वि., घर्षित, मर्दित, पिष्ट, अभ्यस्त।
रगड़ी, वि. (हिं. रगड़ा) विवादक, कलह-कलि,-प्रिय, विवादिन्।
रग़बत, सं. स्त्री. (अ.) कामना २. रुचिः-प्रवृत्तिः (स्त्री.)।
रगेदना, क्रि. स. (सं. खेटः), अपनुद् (तु. प. अ.), विद्रु-अपधाव् (प्रे.)।
रघु, सं. पुं. (सं.) सूर्यवंश्यो नृपविशेषः, दिलीपसूनुः।
—नंदन, सं. पुं. (सं.) रघु,-नाथः-पतिः-राजः-वरः-वीरः, श्रीरामचंद्रः।
—वंश, सं. पुं. (सं.) रघुकुलं २. महाकवि-कालिदास-प्रणीतो महाकाव्यविशेषः।
रचना[1], क्रि. सं. (सं. रचनं) सृज् (तु. प. अ.), निर्मा (अ. प. अ., जु. आ. अ.), जन्-उत्पाद् (प्रे.) २. क्लृप्-घट् (प्रे.), रच् (चु.), कृ ३. प्रणी (भ्वा. प. अ.), निबंध् (क्र्. प. अ.); रच् (चु.), लिख् (तु. प. से.) ४. यथाविधि न्यस् (दि. प. से.)-स्था (प्रे.) ५. परिष्कृ, अलंकृ, भूष् (भ्वा. प. से., चु.) ६. आयुज् (प्रे.), मंत्र् (चु. आ. से.)। सं. पुं., दे. 'रचना' सं. स्त्री. (१-३, ८-९); परिष्करणं, भूषणं, आयोजनम्।
रचना[2], क्रि. स. (सं. रंजनं) दे. 'रंगना'। क्रि. अ. अनुरंज् (कर्म.), स्निह् (दि. प. से.) २. व. 'रंगना' के कर्म. के रूप।
रचना[3], सं. स्त्री. (सं.) रचनं, निर्माणं, सर्जनं, घटनं, विधानं, कल्पनं, साधनं, निष्पादनं, उत्पादन,जननं २-३. रचना-निर्माण-उत्पादन,-कौशलं-रीतिः (स्त्री.) ४. रचित-निर्मित,-वस्तु (न.) ५. गद्यमयी पद्यमयी वा कृतिः (स्त्री.) ६. केशविन्यासः ७. पुष्पगुंफनं ८. स्थापनं ९. प्रणयनं, नि-प्र-बंधनम्।
रचने योग्य, वि., स्रष्टव्य, निर्मातव्य, रचनीय, प्रणेतव्य, यथाविधि, स्थापनीय इ.।
रचनेवाला, सं. पुं., स्रष्टृ, निर्मातृ, जनयितृ, घटयितृ,रचयितृ,प्रणेतृ,लेखकः,आयोजकः इ.।
रचयिता, सं. पुं. (सं.-तृ) निर्मातृ, स्रष्टृ, विधातृ, उत्पादकः २. लेखकः, प्रणेतृ इ.।
रचवाना या रचाना, क्रि. प्रे. व. 'रचना' के प्रे. रूप।
रचा हुआ, वि., सृष्ट, निर्मित, जनित, रचित, घटित, प्रणीत, लिखित, परिष्कृत इ.।
रचित, वि. (सं.) निर्मित, घटित, २. सृष्ट, जनित ३. लिखित, प्रणीत।
रज, सं. पु. [सं. रजस् (न.)] पुष्पं, कुसुमं, आर्तवं, ऋतुः, रजः (पुं.) २. प्रकृतेर्गुणविशेषः, रजः (पुं.) ३. आकाशः-शं ४. पापं ५. जलं ६. परागः, रेणुः (पुं. स्त्री.), पुष्पधूली-लिः (स्त्री.) ७. भुवनं, लोकः। सं. स्त्री., रजस् (न.), धूली-लिः (स्त्री.) २. रात्री ३.प्रकाशः।
—का रुक जाना, सं. पुं., रजोरोधः २. रजो-निवृत्तिः (स्त्री.)।
—की पीड़ा, सं. स्त्री., ऋतुशूलं, रजःकृच्छ्रम्।
रजक, सं. पुं. (सं.) निर्णेजकः, धावकः, शौचेयः, कर्मकीलकः।

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

रजकी, सं. स्त्री. (सं.) रजकां, निर्णेजिका, धाविका ।
रजत, सं. स्त्री. (सं. न.) रूप्यं, दे. 'चाँदी' २. सुवर्णं ३. गजदंतः ४. हारः । वि., रजतमय २. शुक्ल ।
—कुंभ, सं. पुं. (सं.) रूप्य-श्वेत,-कुंभः-घटः-कलशः ।
—पात्र, सं. पुं. (सं. न.) रूप्य-श्वेत-दुर्वर्ण,-पात्रं-भाजनम् ।
रजनी, सं. स्त्री. (सं.) निशा, रात्रि २. हरिद्रा ३. जतुका ४. नीली ५. लाक्षा ।
—कर, सं. पुं. (सं.) रजनी,—पतिः—नाथः, चन्द्रः ।
—चर, सं. पुं. (सं.) राक्षसः, निशाचरः ।
—मुख, सं. पुं. (सं. न.) सायं, प्रदोषः, दिनांतः ।
रजवाड़ा, सं. पुं. (हिं. राज+वाड़ा) देशीय-राज्यं २. नृपः, राजन् (पुं.) ।
रजस्, सं. पुं. स्त्री. (सं. न.) दे. 'रज' सं. पुं. स्त्री. ।
रजस्वला, सं. स्त्री. (सं.) स्त्रीधर्मिणी, ऋतुमती, पुष्पवती, पुष्पिता, म्लाना, पांशुला ।
रज़ा, सं. स्त्री. (अ.) इच्छा, कामः २. संमतिः (स्त्री.), एकचित्तता, मतैक्यं ३. अनुज्ञा, अनुमतिः (स्त्री.) ।
—मंद, वि. (फ़ा.) सह-एक,-मत-चित्त,संमत ।
—मंदी, सं. स्त्री. (फ़ा.) दे. 'रज़ा' (२-३) ।
रजाइस, रजायस, रजायसु, सं. स्त्री. (सं. राजादेशः>) आ-नि,-देशः, नियोगः, आज्ञा, शासनम् २. अनुमतिः-स्वीकृतिः (स्त्री.) ।
रज़ाई, सं. स्त्री. (<सं. रजनं ?) *पिच्चुल-प्रच्छदः, तूलाच्छादनम् ।
रजिस्टर, सं. पुं. (अं.) पंजिका, पंजी ।
रजिस्टर्ड, वि. (अं.) पंजीबद्ध ।
रजिस्ट्रार, सं. पुं. (अं.) पंजी-पंजिका,-लेखकः ।
रजिस्ट्री, सं. स्त्री. (अं.) पंजीनिबंधनम् ।
—कराना, क्रि. प्रे., राजकीयपंजिकायां लिख् (प्रे.) ।
—शुदा, वि., पंजी-पंजिकाकृत, लिखित ।
रजिस्ट्रेशन, सं. पुं. (अं.), पंजी-पंजिका,-करणं लेखनम् ।
रज़ील, वि. (अं) अधम, नीच २. अन्त्यज ।
रजोगुण, सं. पुं. (सं.) दे. 'रज'सं. पुं. (२) ।
रजोदर्शन, सं. पुं. (सं. न.) कन्यायां प्रथमः पुष्पस्रावः ।
रजोधर्म, सं. पुं. (सं.) दे. 'रज' सं. पुं. (१) ।
रज्जु, सं. स्त्री. (सं.) दे. 'रस्सी' २. वेणी ।
रट, सं. स्त्री. (हिं. रटना) असकृत् उच्चारणं, आम्रेडनं, अभीक्ष्णं वचनं, पौनःपुन्येन पठनम् ।
रटना, क्रि. स. (सं. रटनं>) अभ्यस् (दि. प. से.), असकृत् आवृत् (प्रे.) २. मुखस्थ-हृदयस्थ-कंठस्थ (वि.) कृ, स्मरणार्थं पुनःपुनः उच्चर् (प्रे.)-वद्-पठ् (भ्वा. प. से.) । क्रि. अ., अभीक्ष्णं रण-क्वण् (भ्वा. प. से.) । सं. पुं., अभ्यसनं, आवर्तनं, आवृत्तिः (स्त्री.), कंठे करणं, हृदये धारणं, पुनः पुनः उच्चारणम् ।
रटने योग्य, वि., आवर्तनीय,स्मर्तव्य,स्मरणार्ह ।
रटनेवाला, सं. पुं., अभ्यासिन्, आवर्तयितृ ।
रटा हुआ, वि., अभ्यस्त, आवर्तित, कंठे कृत ।
रण, सं. पुं. (सं. पुं. न.) संग्रामः, दे. 'युद्ध' ।
—क्षेत्र, सं. पुं. (सं. न.) रणांगणं-नं युद्ध-रण,-भूमिः (स्त्री)-स्थलं-क्षेत्रम् ।
—छोड़, सं. पुं., श्रीकृष्णः ।
—बाँकुरा, सं. पुं. (सं.+हिं.) शूरः, भटः ।
—रंग, सं. पुं. (सं.) युद्धोत्साहः २. युद्धं ३. रणक्षेत्रम् ।
—स्तंभ, सं. पुं. (सं.) विजय,-स्तंभः-यूपः ।
रत, वि. (सं.) व्यापृत, मग्न, लग्न, लीन, आसक्त २. अनुरक्त, बद्धभाव ।
रतजगा, सं. पुं. (हिं. रात+जागना) रात्रि-जागरणं-जागरा २. *नैशोत्सवः ।
रतनार, वि. (सं. रत्नं>) आ-ईषद्,-रक्त-लोहित ।
रतालू, सं. पुं. (सं. रक्तालुः) (= लाल-शकरकंद) रक्त,-पिंडकः-पिंडालुः, लोहितः, लोहितालुः, रक्तकंदः ।
रति, सं. स्त्री. (सं.) कामदेवकलत्रं, मदनपत्नी २. मैथुनं, संभोगः, कामक्रीडा ३. अनुरागः, प्रीतिः (स्त्री.) ४. शोभा, सौन्दर्यं, छविः (स्त्री.) ५. सौभाग्यं ६. स्थायिभावभेदः ७. रहस्यम् ।
—क्रिया, सं. स्त्री. (सं.) रति,-केलिः (स्त्री.)-कलहः-समरं, मैथुनम् ।

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

—गृह, सं. पुं. (सं. न.) रति,-भवनं-मंदिरं २. योनिः (स्त्री.)।
—नाथ, सं. पुं. (सं.) रति,-कांतः-पतिः-प्रियः-राजः-रमणः, कामदेवः।
—बंध, सं. पुं. (सं.) सुरतासनम्।
—शास्त्र, सं. पुं. (सं. न.) कामशास्त्रं, कोकशास्त्रम्।
रतौंधी, सं. स्त्री. (हिं. रात+अंधा) निशांधता-त्वम्।
रत्ती, सं. स्त्री. (सं. रक्तिका) काक,-तिक्ता-वल्लरी-पीलुः-जंघा-चिंची, कृष्णला, दे. 'गुंजा'। २. रक्तिकापरिमाणम्।
—भर, वि., अल्प, स्तोक, ईषत्।
रत्थी-थी, सं. स्त्री. (सं. रथः) अनिमानं, शव,-यानं,-फलकं, दे. 'अरथी'।
रत्न, सं. पुं. (सं. न.) मणिः (पुं. स्त्री.), अश्मभेदः २. स्वजातिश्रेष्ठः ३. माणिक्यम्।
—गर्भा, सं. स्त्री. (सं.) वसुंधरा, वसुधा।
—जटित, वि. (सं.) मणि,-खचित-अनुविद्ध-करंवित।
—दाम, सं. स्त्री. [सं.-मन् (न.)] मणिमाला।
—पारखी, सं. पुं., रत्नपरीक्षकः २. मणिकारः, रत्नाजीविन्।
नौ—, सं. पुं., दे. 'नवरत्न'।
रत्नाकर, सं. पुं. (सं.) रत्नालयः, समुद्रः २. मणि-खानिः (स्त्री.)-गंजा ३. वाल्मीकेः प्रथमनामन् (न.)।
रत्नावली, सं. स्त्री. (सं.) मणिमाला, रत्नदामन् (न.)।
रथ, सं. पुं. (सं.) अतांगः, स्यंदनः, चक्रयानम्। (युद्ध का रथ) सांपरायिकः, वैनायिकः। (सैर का रथ) पुष्प-रथः। (यात्रा का) पारियानिकः। २. शरीरं ३. चरणः-णम्।
—कार, सं. पुं. (सं.) रथ-स्यन्दन-चक्रयान,-निर्मातृ-रचयितृ-कर्तृ। २. वर्णसंकरजातिभेदः।
—चर्या, सं. स्त्री. (सं.) रथ-चक्रयान,-यात्रा-व्रज्या-गमनम्।
—पति, सं. पुं. (सं.) रथिन्, रथिकः, रथिनः, रथिरः।
—यात्रा, सं. स्त्री. (सं.) आषाढशुक्लद्वितीयायां श्रीजगन्नाथस्य रथारोपणरूपोत्सवः।
—वीथि, सं. स्त्री. (सं.) रथ-मुख्य-प्रधान,-मार्गः-पथः।
—शाला, सं. स्त्री. (सं.) स्यन्दनागारम्।
—विद्या, सं. स्त्री. (सं.) रथ,-शास्त्रं-विज्ञानम्।
—सूत, सं. पुं. (सं.) सारथिः, रथवाहः।
रथवान्, सं. पुं. (सं. रथवत्) रथ,-वाहः-वाहकः, सारथिः, दे. 'सारथी'।
रथांग, सं. पुं. (सं. न.) चक्रम् २. अस्त्रभेदः ३. कोकः, चक्रः, कामुकः।
—पाणि, सं. पुं. (सं.) चक्रपाणिः, विष्णुः।
रथी, सं. पुं. (सं.-थिन्) रथिकः, रथिनः, रथिरः. रथ,-आरोहिन्-स्वामिन्, साराक्षः। वि., रथस्थ, रथारूढ़। २. रथस्थ-महा,-योधः-योद्धृ। ३. (सं. रथ) दे. 'रत्थी'।
रद, रदन, } सं. पुं. (सं.) दंतः, दे. 'दाँत'।
—च्छद, —पुट, } सं. पुं. (सं.) ओष्ठः, दे. 'ओठ'।
रद्द, वि. (अ.) मोघ, निरर्थक २. मंद, निष्प्रभ, ३. निरस्त, खंडित।
—करना, क्रि. स., निरस् (दि. प. से.), खंड् (चु.), निवृत् (प्रे.)।
—बदल, सं. पुं. (अ.+फ़ा.) परिवर्तनं, विपर्ययः, परि(री)वर्तः।
रद्दा, सं. पुं. (देश.) इष्टका-मृत्तिका,-स्तरः।
—रखना या लगना, क्रि. स., भित्तिं चि (स्वा. उ. अ.), स्तरं रच् (चु.) निर्मा (जु. आ. अ.)।
रद्दी, वि. (अ. रद्द) निरर्थक, अनुपयोगिन्। सं. स्त्री., निरर्थकपत्राणि (न. बहु.)।
रन(नि)वास, सं. पुं. (हिं. रानी+सं. वासः) अंतःपुरं, शुद्धांतः, अवरोधः।
रपट[1], सं. स्त्री. (हिं. रपटना) दे. 'फिसलाहट' २. धावनं, सत्वरगमनं ३. निम्नभूः (स्त्री.), प्रवणम्।
रपट[2], सं. स्त्री. (अं. रिपोर्ट) सूचना, आख्या।
रपटना, क्रि. अ. (सं. रफनं) दे. 'फिसलना'।
रफ़, वि. (अं.) चिक्कणताशून्य, दुःस्पर्श, विषम २. संस्कार-परिष्कार-शून्य।
रफ़ा, वि. (अ.) अपसारित, दूरीकृत २. निवारित, शमित, शांत ३. समाप्त, पूर्ण।
रफ़ू, सं. पुं. (अ.) तंतुभिर्वस्त्रछिद्रपूरणम्।

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

—करना, क्रि. स., वस्त्रछिद्रं तंतुभिः पूर्(चु.)। मु., स्वविरोधिवचनेषु सामंजस्यं दृश् (प्रे.)।
—गर, सं. पुं. (फा.) वस्त्रछिद्रपूरकः।
—चक्कर होना, मु., पलाय् (भ्वा. आ. से.), अपधाव् (भ्वा. प. से.)।
रफ़्तार, सं. स्त्री. (फ़ा.) गतिः (स्त्री.) २. वेगः, जवः।
रफ़्ता-रफ़्ता, क्रि. वि. (फ़ा.) शनैः शनैः (अव्य.) २. क्रमशः (अव+)।
रब, सं. पुं. (अ.) परमेश्वरः, जगदीशः।
रबड़[1], सं. पुं. (अं. रबर) *धर्षकं, घृषि(न.)-वृक्षनिर्यासभेदः २. वटजातीयो वृक्षभेदः, *धर्षकः।
रबड़[2], सं. स्त्री. (हिं. रगड़) व्यर्थ,-श्रमः-प्रयासः २. दूरता, विप्रकर्षः।
रबड़ना, क्रि. स. (हिं. रपटना) तरलद्रव्यं परि-भ्रम्-चल् (प्रे.)। श्रम्-क्लम् (प्रे.), मुधा धाव् (प्रे.), आयस्-खिद् (प्रे.)। क्रि. अ., वृथा भ्रम् (भ्वा. प. से.)-परिश्रम् (दि. प. से.), आयस् (भ्वा. दि. प. से.)।
रबड़ी, सं. स्त्री. (हिं. रबड़ना) किलाटिका, क्षैरेयम्।
रबाब, सं. पुं. (अ.) वाद्यभेदः, *रवापम्।
रबाबिया, रबाबी, सं. पुं. (अ. रबाब) रवापवादकः।
रब्त, सं. पुं. (अ.) अभ्यासः २. संबंधः।
—ज़ब्त, सं. पुं., गाढ़सौहृदं, सुपरिचयः।
रब्बी की फ़सल, सं. स्त्री. (अ.) चैत्रशस्यम्।
रमण, सं. पुं. (सं. न.) क्रीडा, विलासः, विहरणं, विहारः, केलिः (पुं. स्त्री.), खेला, लीला २. मैथुनं, रतिः (स्त्री.) ३. भ्रमणं, पर्यटनं ४. जघनम्। (सं. पुं.) पतिः २. कामदेवः। वि., मनोहर २. प्रिय, आनंदप्रद ३. क्रीडापर।
रमणी, सं. स्त्री. (सं.) नारी २. सुन्दरी, वरवर्णिनी, वामा।
रमणीक, वि. (सं. रमणीय) मनोज्ञ, मनोहर, दे. 'सुन्दर'।
रमणीय, वि. (सं.) सुरूप, शोभनं, दे. 'सुन्दर'।
रमणीयता, सं. स्त्री. (सं.) सुच्छविः (स्त्री.), मनोहरता, दे. 'सुन्दरता'।
रमता, वि. (हिं. रमना) विचरत्-विहरत्-व्रजत् (शत्रंत)।
रमना, क्रि. अ. (सं. रमणं) रम् (भ्वा. आ. अ.), नंद्-क्रीड् (भ्वा. प. से.), मुद् (भ्वा. आ. से.) २. सुखोपलब्धये वस् स्था (भ्वा. प. अ.) ३. विह् (भ्वा. प. अ.), पर्यट् (भ्वा. प. से.) ४. व्याप् (स्वा. प. अ.), व्यश् (स्वा. आ. से.) ५. अनुरंज् (कर्म.), स्निह् (दि. प. से., सप्तमी के साथ) ६. कामक्रीडां कृ. सुरतं आतन् (त. प. से.)। सं.पुं., रमणं, नंदनं, क्रीडनं, क्रीडा, मोदः, सुखाय वसनं, विहरणं, विचरणं, व्यापनं, व्यशनं, अनुरागः, निधुवनं इ.।
रमा, सं, स्त्री. (सं.) दे. 'लक्ष्मी'।
—पति, सं. पुं. (सं) विष्णुः।
रम्ज़, सं. स्त्री. (अ.) (नेत्रादिभिः) संकेतः, इंगितम् २. रहस्यं, गुह्यं, कूटम् ३. आशयः, अभिप्रायः।
रम्माल, सं. पुं. (सं.) दैवज्ञः, ज्योतिषिकः।
रम्य, वि. (सं.) दे. 'रमणीय'।
रम्या, सं. स्त्री. (सं.) स्थलपद्मिनी २. रजनी ३. गंगा ४. निर्गुण्डी, इन्द्राणी।
रम्हाना, क्रि. अ. (सं. रंभणं) दे. 'रंभाना'।
रय्यत, सं. स्त्री. (अ. रअय्यत) दे. 'प्रजा'।
रव, सं. पुं. (सं.) शब्दः, नि-,नादः, ध्वनिः, वि-,रवः-रावः २. कलकलः, कोलाहलः, उत्क्रोशः।
रवाँ, वि. (फा.) प्रवहत्-प्रस्रवत्-प्रचलत् (शत्रंत) २. अभ्यस्त ३. निशित, तीक्ष्ण (शस्त्रादि) ४. प्रस्थित।
रवा[1], सं. पुं. (सं. रजः) कणः, लवः, अणुः, लेशः २. दे. 'सूजी'।
रवा[2], वि. (फ़ा.) उचित, युक्त २. प्रचलित, विद्यमान।
रवाज, सं. पुं. (अ.) दे. 'रिवाज'।
रवानगी, सं. स्त्री. (फ़ा.) प्रस्थानं, प्रयाणम्।
रवाना वि. (फ़ा.) प्रस्थित, प्रचलित २. प्रेषित, प्रहित।
—करना, क्रि. स., प्रस्था (प्रे. प्रस्थापयति), प्रहि (स्वा. प. अ.), सं-, प्रेष् (प्रे.), प्रचल् (प्रे.)।
—होना, क्रि. अ., प्रस्था (भ्वा. आ. अ.), आ-,प्रयाम् (भ्वा. प. अ.) प्रया (अ. प. अ.)।
रवानी, सं.स्त्री. (फ़ा.) प्रवाहः, प्रगतिः (स्त्री.)।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

रवायत, सं. स्त्री. (अ.) कथा २. लोकोक्ति (स्त्री.)।
रवि, सं. पुं. (सं.) अर्कः, भानुः, दे. 'सूर्य'।
—वार, सं. पुं. (सं.) आदित्य,-वारः-वासरः।
रवैया, सं. पुं. (फ़ा. रविश) आचारः, आचरणं, चेष्टित, वृत्तिः (स्त्री.), व्यवहारः।
रशना, सं. स्त्री. (सं.) कांची, दे. 'मेखला' (१) २. जिह्वा ३. रज्जुः (स्त्री.)।
रश्क, सं. पुं. (फ़ा.) ईर्ष्या, मात्सर्यम्।
रश्मि, सं. स्त्री. (सं. पुं.) किरणः २. अश्वरज्जुः (स्त्री.) ३. पक्ष्मन्-वल्गु (न.)।
रस, सं. पुं. (सं.) आ-स्वादः २. षट् इति संख्या ३. शरीरस्थधातुविशेषः, रसिका, चर्म-रक्त,-सारः,तेजः-अग्नि-आहार,-संभवः ४. तत्त्वं, सारः ५. काव्यनाटकानुभवजः शृङ्गारादिदश-विधो मानसानंदभेदः (काव्य.) ६. 'नव' इति संख्या ७. आनंदः, सुखं, आह्लादः, प्रमोदः ८. अनुरागः ९. रतिः (स्त्री.), सुरतं १०. उत्साहः, औत्सुक्यं ११. गुणः १२. द्रवः, सारः, रसः, आसवः, निर्यासः, सत्त्वं १३. जलं, १४. यू(जू)षः-षं १५. दे. 'शरबत' १६. वीर्यं १७. विषं १६. पारदः १९. दे. 'शिंगरफ़' २०. धातुभस्मन् (न.) २१. आनंदरूपं ब्रह्मन् (न.) २२-२३. गंध-शिला,-रसः २४. प्रकारः, रूपं २५. चित्ततरंगः, छंदः।
—चूना या टपकना, क्रि. अ., रसः कणशः निस्यंद् (भ्वा. आ. से.)-स्रु (भ्वा. प. अ.)।
—लेना, क्रि. अ., नंद् (भ्वा. प. से.), मुद् (भ्वा. आ. से.)।
—कपूर, सं. पुं. (सं. रसकर्पूरं) कर्पूररसः।
—गुल्ला, सं. पुं., *रसगोलः।
—भरा, वि., रस,-पूर्ण-मय-युक्त-वत्, सरस, रसिन्।
—भरी, सं. स्त्री., *रसबदरी।
—पति, सं. पुं. (सं.) चंद्रः २. नृपः ३. पारदः, *रसराजः ४. शृंगाररसः, रसराजः।
—सिंदूर, सं. पुं. (सं. न.) सिंदूररसः।
रसज्ञ, सं. पुं. (सं.) रस-स्वाद,-विद्-ज्ञातृ २. काव्यमर्मज्ञः, काव्यालोचकः ३. निपुणः, कुशलः ४. अनुरागिन्, रसिकः, प्रेमिन् ५.गुणग्राहकः ६.रसवैद्यः ७. रसायनविद् (पुं.)
रसद[1], वि. (सं.) सुखद, आनंदप्रद २. स्वादु, सुरस। सं. पुं. (सं.) चिकित्सकः वैद्यः, भिषज्।
रसद[2], सं. स्त्री.(फ़ा.) अन्नसामग्री, भक्ष्यजातम्।
रसना[1], सं. स्त्री. (सं.) रसा, जिह्वा, रसज्ञा, लोला, रसनेन्द्रियं २. कांची, मेखला ३. रज्जुः (स्त्री.) ४. अभीशुः-षुः, वल्गा।
रसना[2], क्रि. अ., दे. 'रिसना'।
रसनीय, वि. (सं.) आस्वाद्य, चर्वणीय २. स्वादु, रुच्य, रुचिकर।
रसनेन्द्रिय, सं. स्त्री. (सं. न.) जिह्वा, रसा, लोला, रसज्ञा।
रसम, सं. स्त्री. (अ. रस्म) प्रथा, परिपाटी-टिः (स्त्री.), रीतिः (स्त्री.)।
रसा[1], सं. स्त्री. (सं.) पृथिवी २. जिह्वा, रसना ३. पाठा ४. रास्ना, एलापर्णी ५. द्राक्षा ६. नदी ७. रसातलम्।
—पति, सं. पुं. (सं.) नृपः, भूपः।
—पायी, वि. (सं.-यिन्) जिह्वापायिन्। सं. पुं., श्वन्, कुक्कुरः, सारमेयः।
रसा[2], सं. पुं. (सं.रसः>) यू(जू)षः-षं*रसः, दे. 'शोरबा'।
रसाई, सं. स्त्री. (फ़ा.) दे. 'पहुँच'।
रसांजन, सं. पुं. (सं. न.) दे. 'रसौत'।
रसातल, सं. पुं. (सं. न.) पातालं २. पाताल-विशेषः।
रसायन, सं. पुं. (सं. न.) जराव्याधिनाश-कौषधं २. तक्रं ३. विषं ४. रस-विद्या-शास्त्र-सिद्धिः (स्त्री.) ५. रसायनशास्त्रं दे. 'कैमिस्ट्री' ६. धातुविद्या।
—बनाना, मु., (क्षुद्रधातून्) सुवर्णरूपेण परि-णम् (प्रे.) अथवा सुवर्णीकृ।
—शास्त्र, सं. पुं. (सं.) दे. 'कैमिस्ट्री'।
रसाल, सं. पुं. (सं.) इक्षुः, दे. 'गन्ना' २.आम्रः। वि., स्वादु, सुस्वाद २. सरस ३. मधुर ४. सुंदर।
रसिक, सं. पुं. (सं.) रसास्वादिन्, स्वाद-ग्राहिन् २. प्रणयिन्, अनुरागिन्, कामुकः ३. सहृदयः, भावुकः, काव्यमर्मज्ञः ४. आनंदिन्, विनोदिन् ५. भक्तः, प्रेमिन्।
रसिकता, सं. स्त्री. (सं.) विनोदित्वं, परि-हासप्रियता २. सहृदयता, भावुकता ३. कामुकता, विलासिता।
रसिया, सं. पुं., दे. 'रसिक'।
रसीद, सं. स्त्री. (फ़ा.) प्राप्तिः-उपलब्धिः (स्त्री.) २. *प्राप्तिपत्रम्।

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

—बुक, सं. स्त्री. (फ़ा.+अं.) प्राप्तिपत्रपंजिका।
रसीला, वि. (सं. रसः>) दे. 'रसभरा'।
रसूल, सं. पुं. (अ.) ईशदूतः।
रसेंद्र, सं. पुं. (सं.) पारदः, दे. 'पारा'।
रसोइया, सं. स्त्री. (हिं. रसोई) पाचकः, सूदः, सूपकारः, बल्लवः, आरातिकः, आंधसिकः, औदनिकः, रन्धकः।
रसोई, सं. स्त्री. (सं. रसवती) पाकशाला, महानसं २. सिद्धान्नं, पक्वाहारः, भोजनम्।
—घर, सं. पुं., दे. 'रसोई' (१)।
—दार, सं. पु., दे. 'रसोइया'।
कच्ची—, सं. स्त्री. (घृतादिषु) *अपक्वभोजनम्।
पक्की—, सं. स्त्री., (घृतादिषु) *पक्वभोजनम्।
रसौत, सं. स्त्री. (सं. रसोदभूतं) रसांजनं, रसगर्भं, कृतकं, बालभैषज्यं, वर्योजनम्।
रस्सा, सं. पुं. (हिं. रस्सी) स्थूलसंदानं, बृहद्रज्जुः (स्त्री.), स्थूलरश्मिः।
रस्सी, सं. स्त्री. [सं. रश्मिः (पुं.)] रज्जुः (स्त्री.), गुणः, दामन् (न.), वराटः, शुल्वा, वटी, रश(स)ना।
रहँट, सं. पु., दे. 'अरहर'।
रहटा, सं. पुं., दे. 'चरखा'।
रहते, क्रि. वि. (हिं. रहना) उपस्थितौ, विद्यमानतायां, जीवने (सब सप्तमी एक.)।
रहन[1], सं. स्त्री. (हिं. रहना) वासः, वसनं, वसती-तिः (सं.), वस्तिः (स्त्री.), स्थितिः (स्त्री.) २. आचारः, व्यवहारः, चरितं, वर्तनं, वृत्तिः (स्त्री.)।
—सहन, सं. स्त्री. दे. 'रहन' (२)।
रहन[2], सं. स्त्री. (हिं. रखना) आधानं, दे. 'गिरवी'।
रहना, क्रि. अ. (सं. राजनं>) अधि-नि-प्रति, वस् (भ्वा. प. अ.) २. अवस्था (भ्वा. आ. अ.), वृत् (भ्वा. आ. से.), स्था (भ्वा. प. अ.) ३. जीव् (भ्वा. प. से.), प्राणान् धृ (चु.) ४. विरम् (भ्वा. प. अ.), विश्रम् (दि. प. से.) ५. अव-उत्-परि-, शिष् (कर्म.) ६. उज्झ्-त्यज् (कर्म.) ७. विद् (दि. आ. अ.), उपस्था (भ्वा. प. अ.) ८. मुधा कालं या (प्रे.)। सं. पुं., अधि-नि-प्रति-, वसनं वसती-तिः (स्त्री.), अवस्थानं, अवस्थितिः (स्त्री.), जीवनं, प्राणधारणं, अवशिष्टता, त्यागः, उपस्थितिः (स्त्री.)
रहने योग्य, वि., निवसनीय, वासार्ह।
रहनेवाला, सं. पुं., नि-, वासिन्,-स्थ,-वर्तिन्, (तद्धित प्रत्यय से भी, उ., भारतीयाः, पांचनदाः)।
रह रह के, मु., पुनः पुनः, भूयो भूयः, पौनःपुन्येन, वारं वारम्।
रहम[1], सं. पुं. (अ.) कृपा, दया, करुणा, अनुकंपा।
—दिल, वि., कृपालु, सकरुण।
रहम[2], सं. पुं. (अ. रहम) गर्भाशयः, दे.।
रहमत, सं. स्त्री. (अ.) कृपा, अनुग्रहः।
रहमान, वि. (अ.) अतिशय-परम, कृपालु-दयालु। सं. पुं., परमेश्वरः।
रहस्य, वि. (सं.) गोप्य, गोपनीय, गुप्त २. गुप्त, गूढ़, प्रच्छन्न। सं. पुं. (सं. न.) गुह्यं, गोप्यं, मर्मन्, गूढ़,-मंत्रः, वार्ता।
रहा-सहा, वि., 'बचाखुचा'।
रहा हुआ, वि., उषित, अव-, स्थित, अव-उत्-परि-, शिष्ट, उपस्थित इ.।
रहाइश, सं. स्त्री. (हिं. रहना) वसती-तिः (स्त्री.), वासः, अवस्थानं, अवस्थितिः (स्त्री.)।
रहित, वि. (सं.) हीन, विरहित, वर्जित, शून्य, वियुक्त, विनाभूत।
रहीम, वि. (अ.) दयालु। सं. पुं., ईश्वरः।
राँग,गा, सं. पुं. (सं. रंगः-गं) वंगं, त्रपुः, त्रपुषं, पूतिगंधं, कुरूप्यं, मधुरं, हिमं,पिच्चटम्।
राँड, वि. (सं. रंडा) विधवा दे.। २. वेश्या।
राँधना, क्रि. स. (सं. रंधनं) दे. 'पकाना'।
राँपी, सं. स्त्री. (देश.) चर्मकारक्षुरिका, *चर्मकर्तनी।
राँभना, क्रि. अ., दे. 'रंभाना'।
राई, सं. स्त्री. (सं. राजी) रक्तसर्षपः, रक्तिका, आसुरी, क्षवः, क्षवकः, क्षुतकः। दे. 'सरसों' के भेद २. अत्यल्प,-मात्रा-परिमाणम्।
—नोन उतारना, मु. राजीलवणधूमेन कुदृष्टि-प्रभावं नश् (प्रे.)।
—भर, मु., तिल-अणु-लेश-राजी,-मात्रं, अत्यल्पम्।
—से पर्वत करना, मु., अणुमपि पर्वतीकृ, तिले तालं पश्यति, अत्युक्त्या वर्ण् (चु.)।
राईफल, सं. स्त्री. (अ.) कुक्षिभृतास्त्रं-, नाला-स्त्रभेदः।

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

राका, सं. स्त्री. (सं.) संपूर्णचंद्रा, पौर्णमासी २. पूर्णिमा, पूर्णा, पूर्णमासी ।
राकेश, सं. पुं. (सं.) राकापतिः, चंद्रः ।
राक्षस, सं. पुं. (सं.) निशा रजनी-रात्रि-नक्तं,-चरः, क्रव्यादः-द् (पुं), रक्षस् (न.), पलाशः-शिन्, भूतः, क्षपाटः, संध्यावलः, यातुः, यातुधानः, अस्र-कौण,-पः, कर्बुरः, दैत्यः, असुरः दानवः २. दुष्टप्राणिन्, पापः ३. विवाहभेदः (धर्म.) ।
—**विवाह**, सं. पुं. (सं.) विवाहभेदः, युद्धेन कन्यां प्राप्य विवाहः ।
राक्षसी, सं. स्त्री. (सं.) पिशाची, निशाचरी, दानवी । वि., राक्षस-दानव,-उचित-योग्य, अमानुषिक ।
राख, सं. स्त्री. (सं. रक्ष् >) भसितं, भस्मन् (न.), भूतिः (स्त्री.) ।
राखी, सं. स्त्री. (सं. रक्षा >) दे. 'रक्षाबंधन' २. दे. 'राख' ।
राग, सं. पुं. (सं.) अभिमतविषयाभिलाषः, सुखेषणा २. क्लेशः, कष्टं ३. मात्सर्य्यं, ईर्ष्या ४. प्रीतिः (स्त्री.), अनुरागः ५. अंगरागः ६. लोहित-,रंगः-वर्णः ७. रंजनं, आह्लादनं ८. कथा ९. संगीतशास्त्रीयरागः (भैरवादि) ।
—**रंग**, सं. पुं. (सं.) विनोदः; विलासः-क्रीडा-कौतुकं, संगीतं, रंजनम् ।
अपना—अलापना, मु., (परविचारान् अश्रुत्वा) स्वकीयानेव विचारान् सरभसं श्रु (प्रे.) ।
रागान्वित, वि. (सं.) अनुरक्त, आसक्त, सकाम २. कुपित, क्रुद्ध ।
रागिनी, सं. स्त्री. (सं. रागिणी) रागपत्नी (भैरवी, गुर्जरी आदि) २. विदग्धा नारी ।
रागी, सं. पुं. (सं.-गिन्) रागविद् (पुं.), गायकः, गातृ २. अनु,-रागिन्-रक्तः, प्रेमिन् । वि., रंजित, सराग २. लोहित-रक्त,-वर्ण ३. विषयासक्त, भोगिन् ।
राघव, सं. पुं. (सं.) रघुवंश्यः २. अजः ३. दशरथः ४. श्रीरामचंद्रः ।
राछ, सं. पुं. (सं. रक्ष् >) (शिल्पिनां) उपकरणं, साधनं, यंत्रं २. वरयात्रा ३. दे. 'जलूस' ४. चक्री-पेषणी,-कीलकः ।
राज, सं. पुं. (सं. राज्यं) शासनं, शिष्टिः (स्त्री.), देश,-प्रबंधः-व्यवस्था, प्रजापालनं, आधिपत्यं २. जनपदः, नीवृत् (पुं.), मंडलं, राष्ट्रं, देशः, राज्यं, विषयः, उपवर्तनं ३. अधिकारः, आधिपत्यं ४. शासन-राजत्व-राज्य,-कालः । सं. पुं. (सं. राजन्) नृपः २. 'मेमार' ।
—**करना**, क्रि. स., प्र,-शास् (अ. प. से.), ईश् (अ. आ. से.), अधिष्ठा (भ्वा. प. अ.), परि-पा (प्रे., पालयति), तंत्र् (चु. आ. से.) ।
—**कर**, सं. पुं. (सं.) राज,-स्व-बलिः-शुल्कः-(कं.) धनम् ।
—**काज**, सं. पुं. (सं.-कार्यं) शासन-,व्यवस्था-कृत्यम् ।
—**कुमार**, सं. पुं. (सं.) राज,-पुत्रः-सुतः,-सूनुः ।
—**कुमारी**, सं. स्त्री. (सं.) राज-नृप,-कन्या-सुता-पुत्री ।
—**कुल**, सं. पुं.(सं.न.) राज-नृप,-वंशः-अन्वयः ।
—**गद्दी**, सं. स्त्री., नृपासनं, राजसिंहासनं २. राज्य-, अभिषेकः, *राजतिलकः-कम् ।
—**गीर**, सं. पुं., दे. 'मेमार' ।
—**गुरु**, सं. पुं. (सं.) राज,-शिक्षकः-पुरोहितः ।
—**गृह**, सं. पुं. (सं. न.) नृप-राज,-प्रासादः-भवनं-मंदिरं-सदनं, सौधः, सुधामयं २. मगध-प्रांतस्य प्राचीनराजधानी ।
—**तिलक**, सं. पुं. (सं. पुं. न.) दे. 'राजगद्दी' २. अभिषेकोत्सवः ।
—**दंड**, सं. पुं. (सं.) राज-शासनं, प्रजापालनं २. राज्यनियमविहितः आर्थिक-शारीरिक,-दंडः ३. दे. 'राजकर' ।
—**दंत**, सं. पुं. (सं.) पुरोवर्तिदंतचतुष्कं २. उपरिश्रेणीमध्यवर्तिदंतद्वयम् ।
—**दरबार**, सं. पुं., दे. 'राजसभा' ।
—**दूत**, सं. पुं. (सं.) नृप,-वार्तिकः-सांदेशिकः ।
—**द्रोह**, सं. पुं. (सं.) नृपविरोधः, राज्यविप्लवः, प्रजाक्षोभः ।
—**द्रोही**, सं. पुं. (सं.-हिन्) नृपविरोधिन् ।
—**धानी**, सं. स्त्री. (सं.) नृपनगरी ।
—**नीति**, सं. स्त्री. (सं.) नृप-राज,-नयः-विद्या, शासनरीतिः (स्त्री.) (संधिविग्रहसामदानादि) ।
—**नीतिक**, वि. (सं.) राजशासनविषयकः-तंत्रणसंवंधिन् ।
—**पथ**, सं. पुं. (सं.) राज,-मार्गः-वर्त्मन् (न.), महा-घंटा श्री,-पथः ।
—**पाट**, सं. पुं., (सं.) राजसिंहासनं २. शासनाधिकारः २. जनपदः, राष्ट्रम् ।

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

—पुत्र, सं. पुं. (सं.) राजकुमारः २. क्षत्रिय-जाति-भेदः ३. बुधग्रहः ।
—पूत, सं. पुं. (सं. राजपुत्रः>) क्षत्रियजाति-भेदः, *राजपुत्रः ।
—पूती, सं. स्त्री. (हिं. राजपूत) शौर्यं, वीर्यम् ।
—फोड़ा, सं. पुं., *राजस्फोटः, *स्फोटराजः, दे. 'कारबंकल' ।
—बाहा, सं. पुं., राज-,महा-कुल्या ।
—भंडार, सं. पुं. (सं.-भांडारं) राज-राज्य,-कोषः(शः)-भांडागारः (रम्) ।
—भक्त, सं. पुं. (सं.) राज्य-राज,-भक्तः-निष्ठः ।
—भक्ति, सं. स्त्री. (सं.) राज्य-राज,-भक्तिः (स्त्री.)-निष्ठा ।
—भवन, —मंदिर, } सं. पुं. (सं.न.) दे. 'राजगृह'(१) ।
—मज्जबूर, सं. पुं., पलगंडकामिकाः, गेहकार-कर्मकाराः (प्रायः बहु.) ।
—महल, सं. पुं., दे. 'राजगृह' (१) ।
—मार्ग, सं. पुं. (सं.) दे. 'राजपथ' ।
—माष, सं. पुं. (सं.) बर्बटः-टी, नील-नृप,-माषः, नृपोचितः ।
—मुद्ग, सं. पुं. (सं.) मुकुष्ठः, दे. 'मोठ' ।
—यक्ष्मा, सं. पुं. (सं.-क्ष्मन्) राजयक्ष्मः, दे. 'यक्ष्मा' ।
—योग, सं. पुं. (सं.) अष्टांगयोगः ।
—राजेश्वर, सं. पुं. (सं.) सम्राज् (पुं.), राजाधिराजः ।
—रोग, सं. पुं. (सं. >) असाध्यव्याधिः २. दे. 'यक्ष्मा' ।
—लक्षण, सं. पुं. (सं. न.) सहजं राजचिह्नं (सामुद्रिक) ।
—लक्ष्मी, सं. स्त्री. (सं.) राजश्रीः (स्त्री.), २. नृपच्छविः (स्त्रीः), नृपवैभवम् ।
—वंशी, वि. (सं. राजवंशः>) राजवंश्य, नृपकुलोद्भूत, राजकुलज ।
—सत्ता, सं. स्त्री. (सं.) राज-,शक्तिः-अधिकारः (स्त्री.), राजता-त्वम् ।
—सभा, सं. स्त्री. (सं.) राज,-परिषद्-संसद् (दोनों स्त्री.) २. नृपतिसमाजः ।
—हंस, सं. पुं. (सं.) मरालः २. कलहंसः, कदंबः ३. नृपोत्तमः ।

राज़, सं. पुं. (फ़ा.) रहस्यं, गुह्यं, गोप्यम् ।

राजकीय, वि. (सं.) राज-,नृप-,राज-राज्य,-विषयक २. नृपोचित, राजार्ह ।
राजत, वि. (सं.) रौप्यः-प्यी-प्यम्, रूप्यमयः-यी-यं, रजत,-मय-निर्मित-कृत ।
राजत्व, सं. पुं. (सं.न.) राजता, नृपत्वं, राज,-अधिकारः-आधिपत्यम् ।
राजस, वि. (सं.) रजोगुण,-उद्भूत-जनित-प्रधान-मय (राजसी स्त्री.) ।
राजसिक, वि., दे० 'राजस' ।
राजसी, वि. (सं. राजस>) राज,-योग्य-अर्ह, नृपोचित, राजकीय ।
राजसूय, सं. पुं. (सं.) नृपाध्वरः, क्रतु,-राजः-उत्तमः ।
राजस्व, सं. पुं. (सं. पुं. न.) राज,-धनं-करः-बलिः ।
राजा, सं.पुं. (सं. राजन्) नृपः, भूपः, पार्थिवः, नर-नृ-भू-मही, पालः पतिः, क्ष्मा-मही-भू,-भृत् (पुं.), पार्थः, महींद्रः, नरेन्द्रः, प्रजेश्वरः, भूमिपः, दंडधरः, अवनि,-पः-पतिः, इनः, भूभुज् (पुं.), राज् (पुं.), महीक्षित् (पुं.), नाभिः, अर्थपतिः, प्रभुः २. स्वामिन्, अधिपतिः ३. उपाधिभेदः ४. धनाढ्यः ।
राजाज्ञा, सं. स्त्री. (सं.) नृपादेशः, राजशासनम् ।
राजाधिकारी, सं. पुं. (सं.-रिन्) राज,-नियोगिन्-भृत्यः-कर्मकरः-पुरुषः २. न्यायाधीशः, धर्माध्यक्षः ।
राजाधिराज, सं. पुं. (सं.) राजराजेश्वरः, सम्राज् (पुं.) ।
राजाधिष्ठान, सं. पुं. (सं. न.) राजधानी, नृपनगरी, राजपुरम् ।
राजानक, सं. पुं. (सं. ?) राजकः, साधारण,-नृपः-भूपः-पार्थिवः, सामंतः ।
राजाभियोग, सं. पुं. (सं.) प्रजया बलात् कार्यकारणम्, दे. 'बेगार' ।
राजि-जिका, सं. स्त्री. (सं.) श्रेणी, पंक्तिः (स्त्री.) २. रेखा ३. दे. 'राई' ।
राजी, सं. स्त्री. (सं.) दे. 'राजि' ।
राज़ी, वि. (अ.) एक-सह-सं,-मत-चित्त २. स्वस्थ ३. प्रसन्न ४. सुखिन् ।
—करना, क्रि. स., प्रसद् (प्रे.), सं-परि-तुष् (प्रे.), प्री (क्र्या. उ.) ।

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

—होना, क्रि. अ., प्रसद् (भ्वा. प. अ.) सं-परि तुष् (दि. प. अ.), प्री (कर्म.)।
—नामा, सं. पुं. (अ.+फ़ा.) समाधानं २. समाधानपत्रम्।
राजीव, सं. पुं. (सं. न.) नीलकमलं २. पद्मं, सरोजं, कमलम्
राजेन्द्र, सं. पुं. (सं.) दे. 'राजाधिराज'।
राज्ञी, सं. स्त्री. (सं.) राजपत्नी, दे. 'रानी'।
राज्य, सं. पु. (सं. न.) दे. 'राज' (१-२)।
—च्युत, वि. (सं.) राज्यभ्रष्ट, सिंहासनच्युत।
—च्युति, सं. स्त्री. (सं.) राज्य,-भ्रंशः-भंगः, सिंहासनावरोपणम्।
—तंत्र, सं. पुं. (सं. न.) शासन,-प्रणाली-व्यवस्था।
—पाल, सं. पुं. (सं.) राज्य-प्रदेश-प्रान्त-, शासकः। (प्रादेशिक शासन का सर्वोच्च प्रबन्धक)।
—लक्ष्मी, सं. स्त्री. (सं.) दे. 'राजलक्ष्मी'।
—व्यवस्था, सं. स्त्री. (सं.) राज्य,-नियमः-व्यवस्था।
राज्याभिषेक, सं. पुं. (सं.) राज्य-सिंहासन,-आरोहणं, राजतिलकः-कं २. सिंहासनारोहणे राजसूये वा नृपस्नानविशेषः।
राणा, सं. पुं. (सं. राजन्) राजपुत्रनृपाणां उपाधिः।
रात, सं. स्त्री. [सं. रात्री-त्रिः (स्त्री.)] श(शा)र्वरी,निशा,निशीथिनी,त्रियामा, क्षणदा, क्षपा, विभावरी, रजनी, यामिनी, तमी, तमस्विनी, श्यामा, घोरा, नक्तं, दोषा।
—दिन, क्रि. वि., नक्तंदिनं, नक्तंदिवं, सदा, सर्वदा।
—भर, क्रि. वि., यावन्नक्तं, निशांतं यावत्।
आधी—, सं. स्त्री., मध्य-अर्ध,-रात्रः, निशीथः, निशा-रात्रि,-मध्यम्।
रातों—, क्रि. वि., निशीथे एव।
रात्रि-त्री, सं. स्त्री. (सं.) दे. 'रात'।
रात्र्यंध, सं. पुं. (सं.) निशांधः (मनुष्य या पशु आदि)।
राधा-धिका, सं. स्त्री. (सं.) रासेश्वरी, रसिकेश्वरी, कृष्णप्रिया, वृषभानुतनया।
—रमण, सं. पुं. (सं.) राधावल्लभः, श्रीकृष्णः।
रान, सं. स्त्री. (फ़ा.) ऊरुः, सक्थि (न.)।
राना, सं. पुं., दे. 'राणा'।
रानी, सं. स्त्री. (सं. राज्ञी) राजपत्नी, नृपकलत्रं २. स्वामिनी।
छोटी—, सं. स्त्री., परिवृत्ती।
पट्ट—, सं. स्त्री., पट्ट,-राज्ञी-महिषी-देवी, महापट्ट,-राज्ञी।
प्रिय परन्तु छोटी—, सं. स्त्री., वावाता।
राब, सं. स्त्री. (सं. द्रावक) फाणितं, अर्द्धावर्तितेक्षुरसः।
राबड़ी, सं. स्त्री., दे. 'रबड़ी'।
राम, सं. पुं. (सं.) परशुरामः २. बल,-रामः-देवः ३. श्रीरामचंद्रः ४. परमेश्वरः ५. 'त्रि' इति संख्या।
—कली, सं. स्त्री. (सं.) रामक(कि)री (रागिणी)।
—कहानी, सं. स्त्री., बृहत्कथा २. करुणकथा।
—जनी, सं. स्त्री., हिंदू नर्तकी २. वेश्या।
—तरोई, सं. स्त्री., दे. 'भिंडी'।
—दूत, सं. पुं. (सं.) हनुमत् (पुं.), पवनपुत्रः।
—धनुष, सं. पुं. [सं.-नुस् (न.)] इन्द्रचापः।
—नवमी, सं. स्त्री. (सं.) श्रीरामजन्मतिथिः, चैत्रशुक्लनवमी।
—नामी, सं. पुं. [सं. रामनामन् (न.)] रामनामांकितवस्त्रं २. रामनामांकितहारभेदः।
—पुर, सं. पुं. (सं. न.) स्वर्गः २ अयोध्या।
—बाण, सं. पुं. (सं.) अजीर्णनाशक औषधविशेषः २. रामशरः, शरवृक्षभेदः। वि., अमोघ, सद्यः फलदायिन्।
—रस, सं. पुं. (सं.) लवणं २. भंगासवः (मदरास में)।
—राज्य, सं. पुं. (सं. न.) धर्म्य-न्याय्य,-राज्यम्।
—राम, अव्य. (सं.) प्रणामः, नमस्कारः।
—लीला, सं. स्त्री. (सं.) रामायणाभिनयः।
—सखा, सं. स्त्री. (सं.-खः) सुग्रीवः।
—करके, मु., अत्यायासेन, अतिकृच्छ्रेण, यथाकथंचित्।
—जाने, मु., न वेद्मि, न जाने, ईश्वरो जानाति २. ईश्वरः साक्षी, अहं सत्यं वच्मि।
—नाम सत्य है, मु., रामनाम(गोविन्दनाम)-सत्यं, प्रेतवहनकालोचितवाक्यम्।

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

रामचंद्र, सं. पुं. (सं.) दशरथस्य ज्येष्ठसुतः, रघुनंदनः, सीतापतिः, रामभद्रः, रात्रणारिः ।

रामा, सं. स्त्री. (सं.) सुंदरनारी, सुन्दरी, वामा २. नारी ३. संगीतकुशला नारी ४. सीता ५. राधा ६. रुक्मिणी ७. लक्ष्मीः ८. शीतला ।

रामानंद, सं. पुं. (सं.) वैष्णवाचार्यविशेषः ।

रामानुज, सं. पुं. (सं.) लक्ष्मणः, सौमित्रिः २. श्रीवैष्णवसम्प्रदायप्रवर्तकाचार्यः (सं. १०७३-११९४) ।

रामायण, सं. पुं. (सं. न.) श्रीवाल्मीकि-प्रणीतो महाकाव्यविशेषः २. रामचरितम् ।

रामायणी, वि. (सं. रामायणम्>) रामायण,-सम्बन्धिन्-विषयक, रामायणीय । सं. पुं. रामायण,-पाठिन्-पंडितः ।

राय[1], सं. पुं. (सं. राजन्) नृपः, भूपः २. सामंतः, नायकः ३. चारणः, वंदिन् ४. राजकीयोपाधिभेदः, राजन् (पुं.) ।

—**बहादुर**, सं. पुं. (हिं.+फ़ा.) *राजवीरः (उपाधिभेदः) ।

—**साहब**, सं. पुं. (हिं+फ़ा.) *राजमहोदयः (उपाधिभेदः) ।

राय[2], सं. स्त्री. (फ़ा.) मतं, मतिः (स्त्री.) आशयः, अभिप्रायः, विचारः, तर्कः ।

—**देना**, क्रि. अ., निजमतं-स्वमतिं प्रकटयति (ना. धा.) ।

—**पूछना या लेना**, क्रि. स., परमतं प्रच्छ् (तु. प. अ.), (स्वहिताय) परविचारं ज्ञा (सन्नंत, जिज्ञासते) ।

रायगाँ, वि, (सं.) व्यर्थ, निरर्थक, अपार्थक ।

रायज, वि. (सं.) दे. 'प्रचलित' ।

रायता, सं. पुं. (सं. राज्यक्ता) दाधिकव्यंजनभेदः, दाधेयम् ।

रायल, वि. (अं.) राजकीय, राजोचित, नृपोचित, राजार्ह ।

रार, सं. स्त्री. [सं. राटिः (स्त्री.)] दे. 'झगड़ा' ।

राल[1], सं. पुं. (सं.) शाल-साल,-वृक्षः २. सर्ज-साल,-निर्यासः-रसः, सुर-यक्षः-धूपः, सुरभिः, अग्निवल्लभः, दे. 'धूप' ।

राल[2], सं. स्त्री. (सं. लाला) सृणि(णी)का, स्यंदिनी, द्राविका, मुखस्रावः ।

—**गिरना चूना या टपकना**, मु., लालायते (ना. धा.), लालायित (वि.) भू, अत्यर्थं अभिलप् (भ्वा. प. से.) ।

राव, सं. पुं., दे. 'राय' ।

—**चाव**, सं. पुं., संगीतोत्सवः, दे. 'रागरंग' २. लालनम् ।

रावण, सं. पुं. (सं.) पौलस्त्यः, लंकेशः, दश, कंधरः-ग्रीवः-आननः-आस्यः ।

रावल[1], सं. पुं. (सं. राजपुरं>) अंतःपुरं, दे. 'रनवास' ।

रावल[2], सं. पुं. (सं. राजपुत्रः>) नृपः २. सामंतः ३. संमानसूचकं संबोधनपदं, राजन् ! ४. योधः, भटः ।

रावी, सं. स्त्री. (सं. इरावती) देरावती, पंचनदप्रान्तवर्तिनदीविशेषः ।

राशि, सं. स्त्री. (सं. पुं.) पुं(पिं)जः, पुंजिः (स्त्री.), उत्करः, कूटः-टं, समुच्चयः, निकरः, दे. 'ढेर' २. ज्योतिष्चक्रस्य द्वादशांशः ३. उत्तराधिकारः ।

—**चक्र**, सं. पुं. (सं. न.), ज्योतिश्चक्रं, भ,-मंडल-पंजरः-चक्रम् ।

—**भाग**, सं. पुं. (सं.) राश्यंशः, भग्नांशः (ज्यो.) ।

—**भोग**, सं. पुं. (सं.) राशौ ग्रहावस्थितिः (स्त्री.) २. राशौ ग्रहावस्थितिकालः ।

राशी[1], सं. स्त्री., दे. 'राशि' ।

राशी[2], वि. (अ.) दे. 'रिश्वतखोर' ।

राष्ट्र, सं. पुं (सं. न.) देशः, विषयः, जनपदः, दे. 'राज' (२) । २. राष्ट्रवासिनः, राष्ट्रिकाः, जनाः, प्रजाः (सब बहु.), लोकः, जनता ३. राष्ट्रीय-,उपद्रवः, दे. 'इति' ।

—**पति**, सं. पुं. (सं.) राष्ट्रिकः, राष्ट्रियः, राष्ट्रनायकः, प्रजातंत्रप्रधानः ।

—**पाल**, सं. पुं. (सं.) नृपः, भूप । २. कंसभ्रातृ ।

—**विप्लव**, सं. पुं. (सं.) राजद्रोहः, प्रजाक्षोभः, क्रान्तिः (स्त्री.) ।

राष्ट्रीय, वि. (सं.) देशीय, देश्य, राष्ट्रिय, जानपदिक ।

राष्ट्रीयता, सं. स्त्री. (सं.) देशीयता, देशभक्तिः (स्त्री.) ।

रास[1], सं. पुं. (सं.) कोलाहलः, कलकलः, महाध्वानः २. ध्वनिः, शब्दः । सं. स्त्री.

CC-0. Prof. Satya Vrat Shastri Collection. Digitized by eGangotri

(सं. पुं.), गोपानां नृत्य-क्रीडाभेदः २. नाटक-रूपक,-भेदः३. शृंखला ४. प्रचलितगीतिकाभेदः ५. विलासः ६. लास्यं ७. नर्तकसमाजः।

—क्रीड़ा, सं. स्त्री. (सं.) रासविलासः, रास-लीला २. कृष्णगोपिकानृत्यम्।

—धारी, सं. पुं. (सं.-रिन्) रासाभिनेतृ।

—बिहारी, सं. पुं. (सं.-रिन्) श्रीकृष्णः।

रास[२], सं. स्त्री. (अ.) दे. 'लगाम'।

रास[३], सं. स्त्री., दे. 'राशि' (१-२)।

रासभ, सं. पुं. (सं.) गर्दभः २. अश्वतरः (रासभी स्त्री.)।

रास्त, वि. (फ़ा.) सरल २. उचित ३. अनुकूल ४. यथातथ।

रास्ता, सं. पुं. (फ़ा.) मार्गः, पथिन् (पुं.) २. रीतिः (स्त्री.)।

रास्ती, सं. स्त्री. (फ़ा.) सत्यं, तथ्यं, ऋतं २. आर्जवं, धर्मशीलता।

राह, सं. स्त्री. (फ़ा.) पथिन् (पुं.), दे. 'मार्ग' २. प्रथा, रीतिः (स्त्री.) २. नियमः।

—खर्च, सं. पुं. (फ़ा.) मार्गव्ययः।

—गीर, सं. पुं. (फ़ा.) यात्रिन्, पथिकः।

—चलता, सं. पुं. (फ़ा.+हिं.) पथिकः २. अपरिचितः।

—ज़न, सं. पुं. (सं.) दस्युः, परिपंथिन्, मार्गतस्करः।

—ज़नी, सं. स्त्री. (फ़ा.) लुंठनं, मोषणं, अपहारः।

—दारी, सं. स्त्री. (फ़ा.) पथ,-करः-देयं, मार्ग-शुल्कः-कम्।

—रीति, सं. स्त्री. (फ़ा.+सं.) परस्पर,-व्यवहारः-संसर्गः।

—ताकना या देखना, मु., प्रतीक्ष् (भ्वा. आ. से.), प्रतिपा (प्रे. प्रतिपालयति)।

—नापना, मु., व्यर्थं पर्यट् (भ्वा. प. से.)।

—निकालना, मु., युक्तिं चिंत् (चु.) उपायं क्लृप् (प्रे.)।

—पर आना, मु., सुपथे प्रवृत् (भ्वा. आ. से.), सन्मार्गं आलम्ब् (भ्वा. आ. से.)।

—बताना, मु., स्वपदात् भ्रंश्-च्यु (प्रे.) २. मार्गं दृश् (प्रे.)।

—रखना, मु., व्यवहृ (भ्वा. प. अ.), संसर्गं रक्ष् (भ्वा. प. से.)।

—लेना, मु., प्रस्था (भ्वा. आ. अ.), प्रया-(अ. प अ.)।

राहत, सं. स्त्री. (अ.) सुखं, आनंदः।

राही, सं. पुं. (फ़ा.) पांथः, पथिकः।

राहु, सं. पुं. (सं.) विधुंतुदः, सैंहिकेयः, तमस् (पुं. न.), स्वर्भानुः, शीर्षकः, कबंधः।

—ग्रास, सं. पुं. (सं.) राहु,-ग्रसनं-दर्शनं-स्पर्शः-ग्राहः-उपरागः, सूर्य-चंद्र,-ग्रहणम्।

रिआयत, सं. स्त्री. (अ.) मूल्यन्यूनता २. अनुग्रहः, व्यवहारमार्दवं, प्रसादः ३. पक्षपातः।

—करना, क्रि. स., मूल्यं न्यूनीकृ २. अनुग्रह् (क्र. प. से.) ३. सपक्षपातं आचर (भ्वा. प. से.)।

रिआयती, वि., (अ.) प्रासादिक, आनुग्रहिक, न्यूनमूल्य।

रिआया, सं. स्त्री. (अ.) प्रजा, दे.।

रिकशा, सं. स्त्री. (अं. रिक्षा) नर,-यानं-वाहनम्।

रिकाब, सं. स्त्री., दे. 'रकाब'।

रिकाबी, सं. स्त्री., दे. 'तश्तरी'।

रिकेट्स, सं. पुं. (अं.) बालग्रहः (रोगभेदः)।

रिक्त, वि. (सं.) पर,-शून्य, शून्यगर्भ २. निर्धन।

—हस्त, वि. (सं.) शून्यपाणि।

रिक्थ, सं. पुं. (सं. न.) दायः, पैतृकधनम्।

—हारी, सं. पुं. (सं.-रिन्) रिक्थिन्, दायादः।

रिज़क, सं. पुं. (अ. रिज़्क़) आ-उप,-जीविका, वृत्तिः (स्त्री.)।

रिज़र्व, वि. (अं.) रक्षित, निश्चित, नियत।

रिज़ल्ट, सं. पुं. (अं.) परीक्षा,-फलं-परिणामः २. परिणामः, फलम्।

रिझाना, क्रि. स., ब. 'रीझना' के. प्रे. रूप।

रिपु, सं. पुं. (सं.) अरिः, वैरिन्, दे. 'शत्रु'।

रिपोर्ट, सं. स्त्री. (अं.) सूचना २. विवरणिका, विवरणं, प्रतिवेदनम्।

रिपोर्टर, सं. पुं. (अं.) संवाद,-दातृ-प्रेषकः, वृत्तान्त-समाचार,-लेखकः।

रिपोर्ताज़, सं. पुं. (अं.) घटनान्दोलनादीनां साहित्यिकविवरणं, साहित्यांगविशेषः, रिपोर्ताजम्।

रिफ़ार्म, सं. पुं. (अं.) संशोधनं, दोषापनयनं, संस्करणं, संस्कारः, उद्धारः।

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

रिफ़ार्मर, सं. पुं. (अं.) (समाज-) संशोधकः-संस्कारकः-दोषहर्तृ, *सूद्धारकः ।

रिफ़ार्मेटरी, सं. स्त्री. (अं.) कारास्थबालक-संस्कारकपाठशाला, *संशोधिका, *संस्कारिका, *सूद्धारिका ।

रिब्बन, सं. पुं. (अं.) पट्टिका ।

रिमझिम, सं. स्त्री. (अनु.) शीकर,-वर्षः-पातः ।
—**होना**, क्रि. अ., मंदं मंदं वृष् (भ्वा.प.से.) ।

रियासत, सं. स्त्री. (अ.) देशीयराज्यं, राज्यं २. ऐश्वर्यं, वैभवम् ।

रिवाज, सं. पुं. (अ..) दे. 'रीति' ।

रिशवत, सं. स्त्री. (अ. रिश्वत) उत्कोचः, आमिषं, ढौकनं, लंबा २. उत्कोचदानादानम् ।
—**खाना**, क्रि. अ., उत्कोचं ग्रह् (क्र्. प. से.)-आदा (जु. आ. अ.) ।
—**ख़ोर**, सं. पुं. (अ.+फ़ा.) उत्कोचग्राहिन् ।
—**ख़ोरी**, सं. स्त्री. (अ.+फ़ा.) उत्कोच,-आदानं-ग्रहणम् ।
—**देना**, क्रि. स., उत्कोचं दा ।

रिश्ता, सं. पुं. (फ़ा.) द. 'संबंध' ।

रिश्तेदार, सं. पुं. (फ़ा.) दे. 'संबंधी' ।

रिश्तेदारी, सं. स्त्री. (फ़ा.) दे. 'संबंध' ।

रिस, सं. स्त्री. (सं. रिष् >) कोपः, क्रोधः ।

रिसना, क्रि. अ. (सं. रसः >) बिंदुशः कण-क्रमेण स्यंद् (भ्वा. आ. से.)-क्षर्-गल् (भ्वा. प. से.), री (दि. आ. अ.) २. मंदं मंदं स्रु (भ्वा. प. अ.)-प्रस्रु (अ. प. से.)-स्यंद्, री ।

रिसालदार, सं. पुं. (फ़ा.) सादि-सेना,-नीः (पुं.)-पतिः ।

रिसाला[1], सं. पुं. (अ.) सामयिक-, पत्रिका, २. पुस्त-र्ती ।

रिसाला[2], सं. पुं. (फ़ा.) तुरगबलं, सादिसैन्यं, अश्वारोहानीकम् ।

रिहा, वि. (फ़ा.) निर्-वि,-मुक्त, विमोचित, दे. 'मुक्त' ।

रिहाई, सं. स्त्री. (फ़ा.) (बंधनादिन्यः) वि-, मुक्तिः (स्त्री.) उद्धारः, निस्तारः ।

रींगना, क्रि. अ., दे. 'रेंगना' ।

रींधना, क्रि. स. (सं. रंधनं) दे. 'पकाना' ।

री, अव्य. (सं. रे) अरे, भोः, अयि, हे, दे. 'अरी' ।

रीछ, सं. पुं. (सं. ऋक्षः) भल्लुकः, दे. 'भालू' ।

रीझ, सं. स्त्री. (हिं. रीझना) तुष्टिः तृप्तिः-प्रीतिः (स्त्री.), प्रसादः, २. दे. 'रीझना' सं. पुं. ।

रीझना, क्रि. अ. (सं. रंजनं) अनुरंज्-आसंज् (कर्म.), अनुरक्त-आसक्त-बद्धभाव (वि.) भू, वि-परि,-मुह् (दि. प. से.) २. तुष्-तृष् (दि. प. से.), प्रसद् (भ्वा. प. अ.) । सं. पुं., अनुरागः आसक्तिः (स्त्री.) २. तुष्टिः-प्रीतिः (स्त्री.) ।

रीझा हुआ, वि., अनुरक्त, आसक्त, बद्धभाव,-वि-,मुग्ध, प्रेमिन्, प्रणयिन् ।

रीटार्ड, सं. पुं. (सं.) वकभाण्डम् ।

रीठा, सं. पुं. (सं. रिष्टः) अरिष्टः-ष्टकः, मांगल्यः, कृष्णवर्णः, अर्थसाधनः, पीतफेनः, गुच्छफलः, फेनि(णि)लः २. रिष्ट-फेनि(णि)ल,-फलम् ।

रीढ़, सं. स्त्री. (सं. रीढ़कः) पृष्ठवंशः, पृष्ठास्थि (न.), कशे(से)रु(:)(पुं. न.), वंशेरुका ।

रीता, वि. (सं. 'रिक्त' दे.) ।

रीति, सं. स्त्री. (सं.) रूढ़िः (स्त्री.), आचारः,-व्यवहारः प्रथा, परिपाटी-टिः (स्त्री.) २. संस्कारः, कृत्यं, विधिः, कल्पः ३. प्रकारः, विधा, पद्धतिः (स्त्री.) ४. नियमः ५. रसादीनां उपकर्त्री पदसंघटना (काव्य., उ.) वैदर्भी, गौड़ी इ.) ५. स्वभावः, प्रकृतिः (स्त्री.), धर्मः ।
—**रिवाज**, सं. पुं., रूढयः, आचारव्यवहाराः, संस्काराः (तीनों बहु.) ।

रीस, सं. स्त्री. (सं. ईर्ष्या) मात्सर्यं २. स्पर्द्धा, विजिगीषा ।
—**करना**, क्रि. अ., स्पर्ध (भ्वा. आ. से.), संधृष् (भ्वा. प. से.) । (पं.) अनुकृ ।

रुंड, सं. पुं. (सं. पुं. न.) कबंधः, निःशीर्षकायः २. छिन्नपाणिपादो देहः ।

रुँ(रौं) दवाना, क्रि. प्रे. ब. 'रौंदना' के प्रे.रूप ।

रुंधना, क्रि. अ. (सं. रुद्ध) अव-उप,-रुध् (कर्म.), प्रतिबाध्-स्तंभ् (कर्म.) ।

रुकना, क्रि. अ., ब. 'रोकना' के कर्म. के रूप ।

रुकवाना, क्रि. प्रे., ब. 'रोकना' के प्रे. रूप ।

रुकाव, सं. पुं.
रुकावट, सं. स्त्री. } (हिं. रुकना) दे. 'रोक' ।

रुक्का, सं. पुं. (अ. रुक्अह्) पत्रकं, लघुपत्रम् ।

रुक्म, सं. पुं. (सं. न.) सुवर्णं, कांचनं २. लोहं ३. रुक्मिणीभ्रातृ । वि. भास्वर ।

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

—रथ, सं. पुं. (सं.) रुक्मवाहनः द्रोणाचार्यः ।
रुक्मिणी, सं. स्त्री. (सं.) श्रीकृष्णस्य प्रथम-पत्नी, विदर्भेशभीष्मपुत्री ।
रुक्मी, सं. पुं. (सं.-क्मिन्) विदर्भेश्वरभीष्मस्य ज्येष्ठपुत्रः ।
रुख, सं. पुं. (फ़ा.) मुखं, वदनं, आननं, २. कपोलः, गल्लः ३. मुख-मुद्रा आकृतिः (स्त्री.) ४. भावः, आशयः ५. कृपा-दया,-दृष्टिः (स्त्री.) ५. रथ-गज,-नामकश्चतुरंगशारः । क्रि. वि., प्रति (द्वितीया के साथ), दिशायां २. समक्षं, पुरतः ।
—करना या देना, मु., अवधा (जु. उ. अ.) मनोयुज् (चु.) २. अभिमुखीभू ।
—बदलना या फेरना, मु., पराङ्मुखीभू २. मनोऽन्यत्र युज् (चु.), अन्यमनस्क (वि.) भू ।
रुख़सत, सं. स्त्री. (अ.) प्रस्थानं, प्रयाणं २. अवकाशः दे. 'छुट्टी' ।
रुखाई, सं. स्त्री. (हिं. रूखा) शुष्कता, शोषः, नीरसता २. रूक्षता, औदासीन्यं, स्नेहाभावः, उपेक्षा, रौक्ष्यम् ।
रुखानी, सं. स्त्री. (सं. रोकखानं) *रोक-खननी, वर्धक्युपकरणभेदः ।
रुचना, क्रि. अ. (सं. रोचनं) रुच् (भ्वा. आ. से.), प्रिय-भद्र-रुचिकर प्रति-इ (कर्म.) । इष्-अभिलष् (कर्म.) ।
रुचि, सं. स्त्री. (सं.) अभिरुचिः-प्रीतिः-तुष्टिः-प्रवृत्तिः (स्त्री.), छंदः, कामः २. अनुरागः, प्रेमन् (पुं. न.) ३. किरणः ४. सौन्दर्यं, छविः (स्त्री.) ५. बुभुक्षा, जिघत्सा, क्षुधा ६. आ,स्वादः ।
—कर, वि. (सं.) स्वादिष्ट, सुरस २. हृद्य, प्रिय, मनोहर, रुचिकारक ।
—वर्द्धक, वि. (सं.) रुचि-कारक-कर-कारिन् २. पाचक, दीपक, अग्निवर्द्धक ।
रुचिर, वि. (सं.) सुन्दर, मनोहर २. मधुर, सुस्वादु ।
रुठाना, क्रि. स., ब. 'रूठना' के प्रे. रूप ।
रुतबा, सं. पुं. (अ.) पदं, पदवी २. मानः, प्रतिष्ठा ।
रुदन, सं. पुं. (सं.) रुदितं, रोदनं, विलपनं, विलापः, क्रंदनं, क्रंदितं, अश्रुपातः ।
रुद्ध, वि. (सं.) वेष्टित, वलयित, संवीत, २. मुद्रित, अ,-पिहित, आ-सं,-वृत ३. स्तंभित, निश्चलीकृत ।
—कंठ, वि. (सं.) गद्गदस्वर, स्खलद्वचन २. वक्तुमसमर्थ (प्रेमादि के कारण) ।
रुद्र, सं. पुं. (सं.) शिवस्य रूपविशेषः, शिवः २. गणदेवताभेदः ३. 'एकादश' इति संख्या ४. रसभेदः (काव्य.) । वि., भीम, भयंकर-भीषण ।
रुद्राक्ष, सं. पुं. (सं.) (वृक्ष) तृणमेरुः, अमरः, पुष्पचामरः २. (फल) शिव-हर-नीलकंठ,-अक्ष, पावनं, भूतनाशनम् ।
रुधिर, सं. पुं. (सं. न.) शोणितं, दे. 'रक्त' ।
रुपया, सं. पु., (सं. रूप्यं) रूप्यकं, रूपकः, टङ्कः, रजतमुद्रा २. धनम् ।
—उड़ाना, मु., धनं अपव्यय् (चु.) अथवा वृथा क्षै (प्रे.) ।
—जोड़ना, मु., धनं संचि (स्वा. उ. अ.) ।
—तुड़ाना, मु., दे. 'भुनाना' ।
—वाला, वि., धनिक, धनाढ्य ।
रुपहला, वि. (हिं. रूपा) रूप्य-रजत,-मय, राजत २. रूप्य-रजत,-वर्ण, धवल ।
रुमाली, सं. स्त्री. (फ़ा. रूमाल) दे. 'लंगोट' ।
रुरुआ, सं. पुं. (हिं ररना) भीषणरव उल्लू-कभेदः ।
रुलाई, सं. स्त्री. (हिं. रोना) दे. 'रुदन' २. रोदनवृत्तिः (स्त्री.), रुरुदिषा ।
रुलाना, क्रि. स., ब. 'रोना' के प्रे. रूप ।
रुष्ट, वि. (सं.) कुपित, क्रुद्ध ।
रूँधना, क्रि. स. (सं. रोधनं) (रक्षार्थं कंट-कादिभिः) परि-,वेष्ट् (भ्वा. आ. से., प्रे.), परिवृ (स्वा. उ. से., प्रे.) २. परि-इ (अ. प. अ.), परिच्छद् (चु.), संवलयति (ना. धा.) संवल् (भ्वा. आ. से.) ३. अव-नि-सं-रुध् (रु. उ. अ.); पिधा (जु. उ. अ.) ।
रूँ रूँ, सं. स्त्री. (अनु.) शिशु,-रुदितं-रुदनं, *रूँकारः ।
—करना, क्रि. अ., मंदं मंदं रुद् (अ. प. से.) ।
रू, सं. पुं. (फ़ा.) मुखं, वदनं (२-३) उपरि-अग्र,-भागः ।
—स्याह, वि. (फ़ा.) अ[illegible]कीर्तिमत्, कलंकित ।
—स्याही, सं. स्त्री. (फ़ा.) अ[illegible]शस् (न.), कीर्तिः (स्त्री.) ।

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

रूई, सं. स्त्री. [सं. रोमन् (न.)] (पौदा) कर्पासः-सं-सी, कार्पासी-सिका २. (धूआ) कार्पासः, तूलः-लं, पिचुः, पिचुलः, पिचु-तूलम् ।

—का गाला, सं. पुं., पिचुपिंडः-डम् ।

—दार, वि., कार्पास (–सी स्त्री.), कार्पासिक (–की स्त्री.) ।

—दार वस्त्र, सं. पुं., कर्पासं, फालं, बादरं, तूलांबरम् ।

रूक्ष, वि. (सं.) दे. 'रूखा' ।

रूख, सं. पुं. (सं. वृक्षः) पादपः, तरुः ।

रूखा, वि. (सं. रूक्ष) स्निग्धता-चिक्कणता-मसृणता-श्लक्ष्णता,-शून्य-रहित २. घृत-तैल,-हीन-रहित ३. विरस, स्वादहीन ४. शुष्क, निर्जल, नीरस ५. उदासीन, प्रेमहीन, विरक्त ६. कठोर, परुष ७. विषम, नतोन्नत ।

—सूखा, वि., रूक्षशुष्क (भोजनादि), विरस, निःस्वाद ।

रूखापन, सं. पुं., दे. 'रुखाई' ।

रूठन, सं. स्त्री. (हिं. रूठना) दे. 'रूठना' सं. पुं. ।

रूठना, क्रि. अ. (सं. रुष्ट) रुष् (दि. प. से.) अप-वि-रंज् (भ्वा. उ. से.) रज(ज्य)ति-ते, रुष्ट-कुपित-रुषित (वि.) भू । सं. पुं., रोषः, अप-वि,-रागः, प्रीति-प्रसाद-परितोष,-अभावः ।

रूठा हुआ, वि., रुषित, कुपित, अप-वि,-रक्त, कृतरोष ।

रूढ़, वि. (सं.) आ-अधि,-रूढ, उपर्यासीन २. प्रचलित, प्रसिद्ध ३. कठिन, कठोर ४. अविभाज्य (संख्या) ५. अशिष्ट, ग्राम्य ।

रूढ़ि, सं. स्त्री. (सं.) प्रथा, दे. 'रीति' (१) । २. ख्यातिः-प्रसिद्धिः (स्त्री.) ३. आ-अधि-, रोहः ४. वृद्धिः (स्त्री.) ।

रूप, सं. पुं. (सं. न.) आकारः, आकृतिः-मूर्तिः (स्त्री.), संस्थानं २. प्रकृतिः, स्वभावः ३. मुख-,सौन्दर्य-छविः (स्त्री.)-वर्णः ४. कायः, देहः ५. वेशः-षः ६. दशा ७. लक्षणम् ।

—बिगाड़ना, क्रि. स., विरूप् (चु.), आकृतिं दुष् (प्रे.) विकृ ।

—रंग, सं. पुं. (सं. न.) वर्णाकारम् ।

—रेखा, सं. स्त्री., दे. 'रूप' (१) ।

—भरना या बनाना, क्रि., वेषं गृह् (क्र. प. से.), रूपं धृ (भ्वा. प. अ., चु.) ।

रूपक, सं. पुं. (सं. न.) नाटकं २. अर्थालंकार-भेदः (काव्य.) । सं. पुं., दे. 'रुपया' ।

रूपवती, वि. (सं.) सुरूपिणी, वरवर्णिनी ।

रूपवान्, वि. (सं.-वत्) सुन्दर, सुरूप, रूप-शालिन् ।

रूपा, सं. पुं. (सं. रूप्यं) रजतं, श्वेतं, शुभ्रं,-सितं, दे. 'चाँदी' ।

रूपी, वि. (सं.-पिन्) रूपान्वित, रूपधारिन् २. तुल्य, समान ।

रूपोपजीविनी, सं. स्त्री. (सं.) वेश्या,-वारांगना ।

रूपोपजीवी, सं. पुं. (सं.-विन्) दे. 'बहु-रूपिया' ।

रूपोश, वि. (फ़ा.) (दंडभयात्) पलायित-गुप्त-गूढ-प्रच्छन्न ।

रूपोशी, सं. स्त्री. (फ़ा.) (दंडादिभयात्) गुप्तिः (स्त्री.), अज्ञातवासः, प्रच्छन्नता ।

रूप्यक, सं. पुं. (सं. न.) दे. 'रुपया' ।

रूबरू, क्रि. वि. (फ़ा.) अभि-सं,-मुखं-मुखे, पुरः, पुरतः (सब अव्य.) ।

रूमाल, सं. पुं. (फ़ा.) वरकं, कर,-वस्त्रं-पूः (पुं.), कर्पटः ।

—पर रूमाल भिगोना, मु., अत्यधिकं रुद् (अ. प. से.), अश्रुधाराः प्रवह् (प्रे.), वाष्पवर्षं कृ ।

रूल, सं. पुं. (अं) नियमः, विधिः २. पत्ररेखा ३. *रेखादंडः ।

—दार, वि. (अं.+फ़ा) रेखांकित, सरेख (पत्रादि) ।

रूलर, सं. पुं. (अं.) *रेखादंडः २. प्रमाण-पट्टिका ३. शासकः ।

रूस, सं. पुं. (फा.) *रूसः, देशविशेषः ।

रूसी, सं. पुं. (फा.) रूसवासिन् । सं. स्त्री., रूसभाषा ।

रूह, सं. स्त्री. (अ.) जीव-, आत्मन् (पुं.) २. तत्त्वं, सारः-रम् ।

—केवड़ा, सं. स्त्री., केतकीसारः ।

—गुलाब, सं. स्त्री., जपा,-तत्त्वं-सारः ।

रेंक, सं. स्त्री. (हिं. रेंकना) *रैंकारः, खर-गर्दभ,-नादः, चि(ची)त्कारः-, हेषः-षा-षितम् ।

रेंकना, क्रि. अ. (अनु.) आरट् (भ्वा. प. से.), रेंक, चीत्कृ, हेष्-हेष् (भ्वा. आ. से.) २. परुषं गै (भ्वा. प. अ.) ।

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

रेंगटा, सं. पुं. (हि. रेंकना) गर्दभाभेकः, रासभशावकः।

रेंगना, क्रि. अ. (सं. रिंगणं) रिंग्-(भ्वा. प. से.), सृप् (भ्वा. प. अ.), उरसा गम् २. निभृतं-शनैः-अतिमंदं चल् (भ्वा. प. से.)-सृप्। सं. पुं., रिंगणं, सर्पणं, उरसा गमनं, शनैः चलनम्।

रेंगनेवाला, सं. पुं., उरोगामिन्, सर्पिन्।

रेंट-टा, सं. पुं. (देश.) सिंघाणं, सिंहाणं-नं, नासामलम्।

रेंड, सं. पुं. (सं. एरंडः) अलंबकः, हस्तपर्णः।

रेंडी, सं. स्त्री. (हि. रेंड) एरंडवीजम्।

—का तेल, सं. पुं., एरंडतैलम्।

रेंदी, सं. स्त्री. (देश.) क्षुद्रख(र्ब)र्बूजं २. क्षुद्र-तरंबुजं (पं. रेंडी)।

रें रें, सं. स्त्री. (अनु.) दे. 'रूँ रूँ'।

रे, अव्य. (सं.) अरे, अयि, भोः (सब अव्य.)।

रे, सं. पुं. (सं. ऋषभः) ऋषभस्वरः (संगीत)।

रेख, सं. स्त्री. (सं. रेखा) दे. 'रेखा' २. चिह्नं ३. संख्या, गणना ४. नवश्मश्रु (न.), श्म-श्रूद्भेदः।

रेखांश, सं. पुं. (सं.) द्राघिमांशः।

रेखा, सं. स्त्री. (सं.) रेषा, लेखा, दंडाकार-लिपिः (स्त्री.) २. चिह्नं, अंकः ३. गणना, संख्या ४. आकारः ५. पाणिपादादिरेखा (सामुद्रिक) ६. हीरकदोषभेदः ७. भाग्यम्।

—गणित, सं. पुं. (सं. न.) भू-ज्या,-मितिः (स्त्री.)।

कर्म—, सं. स्त्री. (सं.) भाग्यलेखः, दैवम्।

रेगिस्तान, सं. पुं. (फ़ा.) मरुः, मरु,-स्थलं-भूमिः (स्त्री.), खिलं, धन्वन् (पुं.), ऊषरः-रम्।

रेचक, वि. (सं.) वि-,रेचक-रेचन, दे. 'दस्तावर'।

रेचन, सं. पुं. (सं. न.) वि-,रेकः, प्रस्कंदनं, रेचना, विरेचनं, उदरशोधनम्। सं. पुं., सारकं वि,-रेचकं-रेचनम्।

रेज़ा, सं. पुं. (फ़ा.) लवः, लेशः, अणुः, कणः।

रेजीमेंट, सं. स्त्री. (अं.) सैन्य,-दलं-गुल्मम्।

रेट, सं. पुं. (अं.) अर्घः, मूल्यम्।

रेडियम, सं. पुं. (अं.) *रेडियमं, धातुभेदः। २. तेजातु (न.)।

रेणु, सं. स्त्री. (सं. पुं.) पांशुः-सुः, धूली-लिः (स्त्री.) २. वालुकाः, सिकता ३. कणः-णिका।

—रूषित, वि. (सं.) धूलिधूसरित २. गर्द-मय।

रेणुका, सं. स्त्री. (सं.) दे. 'रेणु' १, २, ३. जमदग्निपत्नी, परशुरामजननी।

रेत, सं. पुं. [सं.-तस् (न.)] वीर्यं २. पारदः ३. जलम्।

रेत, सं. स्त्री. (सं. रेतजा) वालुका, सिकता, सिक्ता, शीतला, महा-,सूक्ष्मा।

रेतना, क्रि. स. (हिं. रेत) व्रश्चन्या घृष् (भ्वा. प. से.), लोहमार्जन्या श्लक्ष्णीकृ २. व्रश्चन्यादिभिः शनैःशनैः कृत् (तु. प. से.)। सं. पुं., लोहमार्जन्या घर्षणं-श्लक्ष्णीकरणं-कर्तनं-छेदनम्।

रेतल-ला, वि., दे. 'रेतीला'।

रेता, सं. पुं. (हिं. रेत) दे. 'रेत' २. धूली-लिः (स्त्री.) ३. सिकतिलस्थलम्।

रेतिया, सं. पुं. (हिं. रेतना) (लोहमार्जन्या) घर्षकः।

रेती[1], सं. स्त्री. (हिं. रेतना) लोहमार्जनी, व्रश्चनः*नी।

रेती[2], सं. स्त्री. (हिं. रेत) पुलिनं, सैकतं २. सरिन्मध्ये सिकतिलद्वीपः-पम्।

रेफ, सं. पुं. (सं.) रवर्णः, रकारः (र) २. वर्णा-न्तरमूर्धस्थो रकारः (उ., दर्प)।

रेल[1], सं. स्त्री. (अं.) लोहपथभागः।

—की लाइन, सं. स्त्री., लोह-,पथः-सारणी-मार्गः।

—गाड़ी, सं. स्त्री., वाष्पशकटी।

रेल[2], सं. स्त्री. (हिं. रेलना) धारा, प्रवाहः २. आधिक्यं, बाहुल्यम्।

—पेल, सं. स्त्री. जनौघः, जनसंमर्दः २. बाहुल्यं

रेलना, क्रि. स. (देश.) दे. 'धकेलना'।

रेलवे, सं. स्त्री. (अं.) लोहपथः २. लोहपथ-विभागः।

रेला, सं. पुं. (देश.) दे. 'धक्का' २. दे. 'धावा' ३. प्रवाहः, आप्लावः ४. पंक्तिः, राजिः (स्त्री.)।

रेवंद, सं. पुं. (फ़ा.) पीतमूली, गन्धिनी।

रेवड़, सं. पुं. (देश.) (अजमेषादीनां) यूथं, वृंदं, समजः, कुलं, षण्डः-डम्।

रेवड़ी, सं. स्त्री. (देश.) *गुडतिलगुली।

रेवती, सं. स्त्री. (सं.) नक्षत्रविशेषः २. बलदेव-पत्नी, रेवतपुत्री ३. गौः (स्त्री.) ४. दुर्गा।

—रमण, सं. पुं. (सं.) बलः, देवः-रामः।

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

रेवा, सं. स्त्री. (सं.) नर्मदा २. कामपत्नी, रतिः (स्त्री.) ३. दुर्गा।
रेश, सं. स्त्री. (फ़ा.) दाढ़िका, कूर्चः, कूर्चम्।
—सफ़ेद, सं. पुं. (फ़ा.) वृद्धः, स्थविरः, जरठः।
रेशम, सं. पुं. (फ़ा.) कौशेयं, कीट,-जं-सूत्रं, कौशं, पट्टः-ट्टम्।
—का कीड़ा, सं. पुं., तंतु-पट्ट,-कीटः।
रेशमी, वि. (फ़ा.) कौश, कौशिक, कौशेय, पट्ट-, कौश—।
—कपड़ा, सं. पुं., कौशिकं, चीन-पट्ट,-अंशुकं, दुकूलं, कौशांवरम्।
रेशा, सं. पुं. (फ़ा.) (फलवल्कलादीनां) गुणः, तंतुः, सूत्रं २. नाडी, दे. 'रग' ३. दे. 'जुक़ाम'।
रेशेदार, वि. (फ़ा.) सूत्र-तंतु,-मत्-युक्त।
रेहन, सं. पुं. (फ़ा.) दे. 'गिरवी'।
रैदास, सं. पुं. (सं. राजदासः) भक्तविशेषः, श्रीरामानंदशिष्यविशेषः २. चर्मकारः।
रैन, सं. स्त्री. (सं. रजनी) दे. 'रात'।
रैयत, सं. स्त्री. (अ.) प्रजा, दे.।
रोआँ, सं. पुं., दे. 'रोंगटा'।
रोंगटा, सं. पुं. [सं. रोमन् (न.)] लोमन् (न.), अंग-चर्म-त्वग्,-जं, तनुरुहम्।
रोंगटे खड़े होना, मु., रोमांचः-रोमहर्षः-रोमोद्गमः जन् (दि. आ. से.), दे. 'रोमांच'।
रोक[1], सं. स्त्री. (सं. रोधक>) विरामः, विरतिः (स्त्री.), गतिविच्छेदः, अवरोधः २. नि-प्रति,-षेधः, प्रत्याख्यानं ३. बाधः-धा, विघ्नः, प्रतिबंधः ४. वरणः, वृतिः (स्त्री.)।
—टोक, सं. स्त्री., दे. 'रोक' (२-३)।
बे—टोक, क्रि. वि., निरंतरार्थं, निर्विघ्नं, निर्बाधं (सब अव्य.)।
रोक[2], सं. पुं. (सं.) प्रस्तुतटंकैर्व्यवहारः २. टंकः, नाणकं, मुद्रा, दे. 'नकद' ३. दीप्तिः (स्त्री.)।
रोकड़, सं. स्त्री. (सं. रोकः>) दे. 'रोक' (२) २. मूलद्रव्यं, दे. 'पूंजी'।
—बही, सं. स्त्री. (हि. रोकड़) मूलद्रव्य-आयव्यय,-लेखनपञ्जिका।
रोकड़िया, सं. पुं. (हि. रोकड़+प्र-इया), आयव्यय-मूलद्रव्य-, लेखकः-प्रस्तोता।
रोकना, क्रि. स., (हिं. रोक) अव-नि-प्रति-सं-, रुध् (रु. उ. अ.), अवस्था (प्रे.), प्रतिबंध् (क्र. प. अ.), वि,-स्तंभ् (भ्रा. प. से.) २. नि-विनि-,वृ (प्रे.), नि-प्रति-पिध् (भ्वा. प. से.), निवृत् (प्रे.) ३. वशीकृ, निग्रह् (क्र्. प. से.), नियम् (भ्वा. प. अ.) ४. प्रतियुध् (दि. आ. अ.), शत्रुसैन्यं प्रतिबंध्-प्रतिरुध्। सं. पुं., अव-नि-प्रति-सं-,रोधः-रोधनं, निवारणं, नियमनं, निग्रहः-हणं, प्रतियोधनं, नि-प्रति,-षेधः-षेधनम्।
रोकनेवाला, सं. पुं., अव-नि-,रोधकः, निवारकः, प्रतिषेधकः, प्रतियोधः इ.।
रोका हुआ, वि.,अव-नि-, रुद्ध, निवारित, निगृहीत इ.।
रोग, सं. पुं. (सं.) रुज् (स्त्री.), रुजा,व्याधिः, गदः,अ(आ)मः, आमयः, उपतापः, मृत्युभृत्यः।
—कारक, वि. (सं.) व्याधिजनक।
—ग्रस्त, वि. (सं.) रोगाक्रांत, दे. 'रोगी'।
—नाशक, वि. (सं.) रोग-गद, हारिन्-हर, स्वास्थ्यकर।
—निदान, सं. पुं. (सं. न.) रोग,-निर्णयः-निरूपणम्।
—राज, सं. पुं. (सं.) राज,-यक्ष्मन् (पुं.)-यक्ष्मः।
—लक्षण, सं. पुं. (सं. न.) व्याधिचिह्नं २. रोग-निदानम्।
—लगाना, क्रि. अ., रोगेण ग्रस्-उपसृज्-बाध् (कर्म.)।
रोग़न, सं. पुं. (फ़ा. रौग़न) तैलं, दे. 'तेल' २. कुक्कुमः, रंगः, रागः, वर्णः-र्णकः-र्णिका।
—करना, क्रि. स., रंज् (प्रे.), वर्ण् (चु.), २. कुक्कुमेन लिप् (तु. प. अ.)।
—ज़र्द, सं. पुं. (फ़ा.) घृतं, आज्यम्।
रोगी, वि. (सं.) व्याधित, रुग्ण, रोग-युक्त-पीडित-आर्त्त-आक्रांत, आतुर, अभ्यांत, अभ्यमित, सामयः, आमयाविन्, मंद, विकृत। [रोगिणी (स्त्री.)= रुग्णा, व्याधिता]।
रोचक, वि. (सं.) आछादक, मनोरंजक २. दे. 'रुचिकर'(२)।
रोचन, वि. (सं.) रोचक, रुचिकर २. दीप्तिमत्, छविमत् २. हृद्य, प्रिय।
रोचना, सं. स्त्री. (सं.) कोकनदं, रक्तकमलं २. गोरोचना ३. वरनारी, सुन्दरी ४. दे. 'वंशलोचन'।
रोज़, सं. पुं. (फ़ा.) दिनं, दिवसः, अहन् (न.)। क्रि. वि., दिने दिने, प्रतिअहनि,-दिनं-अहम्।

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

—बरोज़,
—मर्रा,
—रोज़, } क्रि. वि., दे., 'रोज़' क्रि. वि.।

रोज़गार, सं. पुं. (फ़ा.) आ-उप,-जीविका, वृत्तिः (स्त्री.), व्यवसायः २. वाणिज्यं, वणिक्-कर्मन् (न.)।

रोज़नामचा, सं. पुं. (फ़ा.) दे. 'डायरी' २. दैनिकायव्ययपंजिका, दैनिकलेखः।

रोज़ा, सं. पुं. (फ़ा.) व्रतं, उपवासः, उपोषणं-षितम् (इस्लाम)।

रोज़ाना, क्रि. वि. (फ़ा.) प्रतिदिनं २.सर्वदा।

रोज़ी, सं. स्त्री. (फ़ा.) दैनिकान्नं, प्रात्याहिक-भोजनं २. आ-उप,-जीविका, व्यवसायः।

रोज़ीना, वि. (फ़ा.) प्रात्याहिक, दैनिक। सं. पुं., प्रात्याहिक-दैनिक,-वृत्तिः-भृतिः (स्त्री.)-वेतनम्।

रोट, सं. पुं. (हिं. रोटी) बृहत-स्थूल,-रोटि(टि)का २. मिष्टस्थूलरोटिका।

रोटी, सं. स्त्री. (सं. रोटिका)रोटका २. भोजनं, सिद्धान्नम्।

—कपड़ा, मु., भोजन-वस्त्रं, निर्वाहसामग्री २. ग्रासाच्छादनमात्रम्।

—दाल, मु., सामान्य-साधारण,-भोजनं, अन्नोदकमात्रम्।

—दाल चलना, मु., जीवनं निर्वह्, सामान्य-निर्वाहः भू।

किसी के यहाँ—तोड़ना, मु., परान्नेन जीव् (भ्वा. प. से.), परार्पितं भुज् (रु. आ. अ.)।

रोड़ा, सं. पुं. (सं. लोष्टः-ष्टं) लोष्टकः, लोष्टुः पाषाण-प्रस्तर-इष्टका,-खण्डः-शकलः।

—अटकाना, या डालना, मु., बाध् (भ्वा. अ. से.), अव-उप-नि-प्रति-सं-,रुध् (रु. प. अ.), प्रतिबंध (क्र्. प. अ.)।

रोदन, सं. पुं. (सं. न.) दे. 'रुदन'।

रोधन, सं. पुं. (सं.) अवरोधः दे. 'रोक' २. दमनम्।

रोना, क्रि. अ. (सं. रोदनं) रुद् (अ. प. से., अश्रूणि पत् (प्रे.)-विमुच् (तु. प. अ.), आ-क्रन्द् (भ्वा. प. से.), क्रुश् (भ्वा. प. अ.), शुच् (भ्वा. प. से.) २. दे. 'रूठना' ३. अनुतप् (दि. आ. अ.) अनुशी (अ. आ. से.) पश्चात्तापं कृ। क्रि. स., अनुशुच्-विलप् (भ्वा. प. से.), परिदेव् (भ्वा. आ. से.)। सं. पुं., दे. 'रुदन'।

रोनी, वि. स्त्री. (हिं. रोना) विषण्णा, शोकमयी।

रोनेवाला, सं. पुं., रोदकः, अश्रुमोचकः, आक्रंदकः २. अनुशोचकः, परिदेवकः, विलापकः।

रोपना, क्रि. स. (सं. रोपणं) दे. 'बोना'।

रोब, सं. पुं. (अ. रुअब) आतंकः, तेजस्(न.), प्रतापः, प्रभावः, प्रावल्यम्।

—दाब, सं. पुं. (अ.) दे. 'रोब'।

—दार, वि. (अ.+फ़ा.) तेजस्विन्, प्रतापिन्, प्रभावशालिन्।

—जमाना, मु., स्वप्रभावं जन् (प्रे.), स्वगौरवं प्रतिष्ठा (प्रे.), निजतेजसा अभिभू।

—में आना, मु., परतेजसा अभिभू (कर्म.), परप्रतापेन नम् (भ्वा. प. अ.)।

रोबीला, (अ.) दे. 'रोबदार'।

रोमंथ, सं. पुं. (सं.) उद्गीर्य चर्वणं, दे. 'जुगाली'।

रोम[1], सं. पुं. [सं. रोमन् (न.)] दे. 'रोंगटा'

—कूप, सं. पुं. (सं. पुं. न.) लोम,-विवरं-छिद्रं, रोम,-द्वारं-गर्तः।

—राजी, सं. स्त्री. (सं.) रो(लो)मलता, रोमाली, रोमावली-लिः (स्त्री.)।

—हर्ष, सं. पुं. (सं.) रोमांचः।

—हर्षण,सं. पुं. (सं. न.) रोम,-उद्गमः-उद्भेदः-हर्षः। वि. (सं.) रोमांचकर, भीषण।

—रोम में, मु., सर्वदेहे, संपूर्णशरीरे।

—रोम से, मु., सर्वात्मना, साभिनिवेशम्।

रोम[2], सं. पुं. (सं. रोमकः) रोम,-पत्तनं-नगरं, रोमम्।

—वासी, सं. पुं. (सं.-सिनः) रोमकाः (प्रायः बहु.)।

रोमन, सं. पुं. (अं.) रोम,-निवासिन्-वास्तव्यः। वि. रोम,-सम्बन्धिन्,-विषयक।

—कैथलिक, सं. पुं., खिस्तसम्प्रदायविशेषः।

रोमांच, सं. पुं. (सं.) रोम,-उद्गमः-उद्भेदः-विकारः-विक्रिया-हर्षः-हर्षणं, पुलकः, कंटकः-कं, उद्धर्षणं, उल्लसनं, उल्वणकम्।

रोमांचित, वि. (सं.) हृष्टरो(लो)मन्, पुलकित, कंटकित, सपुलक।

—करना, क्रि. स., कंटकयति-पुलकयति-रोमांचयति (ना. धा.)।

—होना, क्रि. अ. पुलकित-कंटकित (वि.) जन् (दि. आ. से.)।

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

रोयां, सं. पुं., दे. 'रोंगटा' तथा 'रोम' (१)।
रोलर, सं. पुं. (अं.) (१-२) समीकरण-पिंडीकरण,-यंत्रं ३. दे. 'बेलना'।
रोला[1], सं. पुं. (सं. रावण) कोलाहलः, कलकलः तुमुलं, महा,-शब्दः-स्वनः-ध्वनः-घोषः-रवः-रावः, निनादः, निस्वनः, उत्क्रोशः, उद्घोषः २. तुमुलयुद्धम्।
—डालना या मचाना, क्रि. स., कलकलं-कोलाहलं कृ, वि,-रु (अ. प. अ.), उत्क्रुश (भ्वा.-प. अ.)।
रोला[2], सं. पुं. (सं.) चतुर्विंशतिमात्रिकछन्दस् (न.)।
रोली, सं. स्त्री. (सं. रोचनी>) चूर्णहरिद्रानिर्मितं तिलकोपयोगि रक्तचूर्णम्।
रोशन, वि. (फा.) प्रकाशित, प्रदीप्त २. भास्वर, प्रकाशमान ३. प्र-वि,-ख्यात ४. प्रकट, व्यक्त।
—दान, सं. पुं. (फा.) गवाक्षः-छदिर्वातायनम्।
—दिमाग़, वि., प्राज्ञ, बुद्धिमत्।
रोशनाई, सं. स्त्री. (फा.) दे. 'मसी' २. प्रकाशः।
रोशनी, सं. स्त्री. (फा.) प्रकाशः, आलोकः २. दीपः ३. दीपमालिका ४. ज्ञानालोकः।
रोष, सं. पुं. (सं.) कोपः, क्रोधः, मन्युः।
रोहिणी, सं. स्त्री. (सं.) धेनुः (स्त्री.), गौः (स्त्री.) २. तडित् (स्त्री.), चपला ३. नक्षत्रविशेषः ४. बलदेवजननी।
—पति, सं. पुं. (सं.) चन्द्रः २. वसुदेवः।
रोहित, वि. (सं.) रक्त, लोहित। सं. पुं., रुधिरं, रक्तं २. रक्त,-वर्णः-रंगः (३-४) मृग-मीन,-भेदः ५. हरिश्चन्द्रपुत्रः।
रोहू, सं. स्त्री. (सं. रोहिषः) (१-२) मीन-मृग,-भेदः।
रौंद(ध)ना, क्रि. स. (सं. मर्दनं?) पादाभ्यां मृद् (क्र. प. से.)-क्षुद् (रु. प. अ.)।
रौ, सं. स्त्री. (फा.) धारा, प्रवाहः, मंदाकः, स्रोतस् (न.)।
रौग़न, सं. पुं. (फा.) दे. 'रोगन'।
रौज़ा, सं. पुं. (अ.) समाधिः, चैत्यः २. उद्यानम्।
रौद्र, वि. (सं.) रुद्र,-विषयक-संबंधिन् २. भीम, भीषण ३. चंड, संरब्ध, कोपान्वित। सं. पुं. (सं.) रुद्रोपासकः २. कोपः ३. रसभेदः (काव्य.) ४. यमः।
रौनक, सं. स्त्री. (अ.) कांतिः-दीप्तिः-द्युतिः (स्त्री.) २. श्रीः (स्त्री.), शोभा, छटा ३. जन-लोकः-समुदायः।
रौप्य, सं. पुं. (सं. न.) रूप्यं, रजतम्। वि. (सं.) राजत, रजतमय, रजतोपम।
रौरव, वि. (सं.) भीम, घोर २. धूर्त, कापटिक ३. रुरुसंबंधिन्। सं. पुं. (सं.) नरकविशेषः।
रौला, सं. पुं., दे. 'रोला'।
रौशन, वि., दे. 'रोशन'।

ल

ल, देवनागरीवर्णमालाया अष्टाविंशो व्यंजनवर्णः, लकारः।
लंक, सं. स्त्री. (सं. लंका, दे.)।
—नाथ-नायक-पति, सं. पुं. (सं.) रावणः, दशाननः।
लंका, सं. स्त्री. (सं.) रक्षःपुरी, रावणराजधानी २. भारतदक्षिणवर्तिद्वीपविशेषः।
—पति, सं. पुं. (सं.) दे. 'रावण'।
लंग[1], सं. स्त्री., दे. 'लांग'।
लंग[2], सं. पुं. (सं.) दे. 'लँगड़ापन'।
लँगड़ा, वि. (सं. लंगः>) पंगु (-गू स्त्री.), खंज, श्रोण, खोड-र-ल, विचलगति २. एकपादहीन (मेज़ आदि)। सं. पुं., उत्तमाम्रभेदः।
लँगड़ाना, क्रि. अ. (हिं. लगड़ा) खंज-खोल-खोर्-खोड्-लंग् (भ्वा. प. से.), सलंगं चल् (भ्वा. प. से.)। सं. पुं., खंजनं, खोडनं-र्णलनं, लंगनं, लंग-विकल,-गतिः (स्त्री.)।
लंगड़ापन, सं. पुं. (हिं. लंगड़ा) खंजता, पंगुता, खोड(रल)ता, लंगः, विकलंगतिः (स्त्री.)।
लंगर, सं. पुं. (फा.) लांगलं, पोतस्तंभनं २. महानसं, पाकशाला ३. अनाथ-दरिद्र,-भोजनं ४. 'लंगोट' ५. लोहमयीस्थूलशृंखला ६. लंबकः, लोलकः ७. दुष्टधेनूनां गललगुडः। वि., भारवत्, गुरु २. खल, दुष्ट।
—ख़ाना, सं. पुं. (फा.) क्षेत्रं, अनाथभोजनशाला।
—गाह, सं. पुं. (फा.) नौकाश्रयः, नौकाश्रयः।

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

—करना, मु., कुत्सितं चेष्ट् (भ्वा. आ. से.), कुचेष्टां कृ ।

लंगूर, सं. पुं. (सं. लांगूलिन्) कपिः, मर्कटः, वानरः २. कपि-वानर,-पुच्छं, लांगु(गू)लं ३. श्वेतलोमा कृष्णमुखो वानरभेदः ।

—फल, सं. पुं. (हिं.+सं.) नारिकेलः, लांगलिन् ।

लंगूल, सं. पुं. (सं. न.) लांगूलं, पुच्छं, दे. 'पुच्छ' ।

लँगोट-टा, सं. पुं. (सं. लिंगं+हिं. ओट) पुटी, घटी, कौपीनं, लिंगावरणम् ।

—बंद, वि., ब्रह्मचारिन्, ऊर्ध्वरेतस् ।

लँगोटिया-यार, सं. पुं. (हिं. फ़ा.) सह-पांशु-क्रीडिन् शैशव-बाल्य,-मित्रं सखि (पुं.) ।

—में मस्त, मु., दारिद्र्येऽपि प्रसन्न, अकिंचनत्वेऽपि संतुष्ट ।

लँगोटी, सं. स्त्री. (हिं. लँगोट) दे. 'कछनी' २. लघु,-पुटी-कौपीनं, घटिका ।

लंघन, सं. पुं. (सं. न.) उपवासः, उपोषणं-पितं, अनाहार-,व्रतं २. दे. 'लाँघना' सं. पुं. प्लवनं ३. अति,-क्रमणं-क्रमः,नियम,-भंगः-उल्लंघनं ४. धोटकानां अतित्वरितगतिः (स्त्री.) ।

लंघना, क्रि. स. (सं. लंघनं) दे. 'लाँघना' ।

लंच, सं. पुं. (अं.) मध्याह्न-माध्यन्दिन,-भोजनम् ।

लंठ, वि. (हि. लट्ठ) जड, मूर्ख २. धृष्ट ।

लंडूरा, वि. (देश.) अलांगु(गू)ल, छिन्नपुच्छ, लूमहीन (खगादि) २. परित्यक्त, निराश्रय ।

लंप, सं. पुं. (अं. लैंप) दे. 'लालटेन' ।

लंपट, वि. (सं.) लिंपट, अभिक, कामिन्, कामुक, विषय-काम,-आसक्त, रतेच्छु, स्मरार्त्त, व्यभिचारिन्, दुराचारिन् ।

लंपटता, सं. स्त्री. (सं.) व्यभिचारीः, विषयासक्तिः (स्त्री.), कामुकता, अभिकता, लांपट्यं, दुराचारः ।

लंब, सं. पुं. (सं.) लंबकः (= अमूद) । वि. (सं.) दे. 'लंबा' ।

—कर्ण, सं. पुं. (सं.) अजः २. गजः ३. खरः ४. शशः ५. राक्षसः ६. श्येनः । वि. (सं.) दीर्घश्रवण ।

—ग्रीव, सं. पुं. (सं.) उष्ट्रः, क्रमेलकः ।

लंबतड़ंग, वि. (सं. लंब+ताल+अंग) तालतुंग, अत्युच्च, अत्युच्छ्रित ।

लंबा, वि. (सं. लंब) दीर्घ, दीर्घं,-आकार-परिमाण, आयत, आयामवत् २. उच्च, प्रांशु, तुंग, उच्छ्रित ३. विशाल, महत्, बहु, अधिक ।

—करना, क्रि. स., दीर्घी-लंबी-आयती-विततीकृ, आयम् (भ्वा. उ. अ.), विस्तृ-प्रस् (प्रे.) प्र-वि,-तन् (त. उ. से.) । मु., प्रस्था (प्रे.) २. भूमौ अवपत् (प्रे.) ।

—चौड़ा, वि., विशाल, विपुल, महत्, बृहत्, लंबोरु, आयतविस्तृत ।

—होना, क्रि. अ., दीर्घीभू, विस्तृ-प्रतन्-आयम् (कर्म.) । मु., प्रस्था (भ्वा. आ. अ.), प्रया (अ. प. अ.) ।

लंबाई, सं. स्त्री. (हिं. लंबा) दीर्घता-त्वं, दैर्घ्य-र्घं, द्राघिमन् (पुं.), आयामः, आयमनं, आयतिः (स्त्री.) लंबता, आनाहः २. उच्चता ।

—चौड़ाई, सं. स्त्री., आनाहपरि(री)णाहौ, दीर्घत्वपृथुत्वे, आयामविस्तारौ (सब द्वि.) २. मानं, प्र-परि,-माणम् ।

लंबान, सं. स्त्री. (हिं. लंबा) दे. 'लंबाई' ।

लंबी, वि. स्त्री. (हिं. लंबा) दीर्घा, आयता, आयामवती ।

—तानना, मु., निश्चिंतं शी (अ. प. से.) ।

—सांस भरना, मु., दीर्घं निःश्वस् (अ.प.से.) ।

लंबोतरा, वि. (हिं. लंबा) दीर्घचतुरस्र : अंड,-आकार-आकृति ।

लंबोदर, वि. (सं.) तुंदिक-भ-ल-त । सं. पुं. (सं.) गणेशः २. औदरिकः, घस्मरः ।

लकड़बग्घा, सं. पुं. (हिं. लकड़+बाघ) ईहावृकः, *लगुडव्याघ्रः ।

लकड़फोड़, सं. पुं. (हिं. लकड़+फोड़ना) दार्वाघाटः, काष्ठकूटः ।

लकड़हारा, सं. पुं. (हिं. लकड़+हारा) काष्ठिकः, काष्ठछिद्, *लगुडहारः ।

लकड़ा, सं. पुं. (सं. लकुटः) लगुडः-रः-लः, स्थूल-बृहत्,-काष्ठं-दारु (न.) ।

लकड़ी, सं. स्त्री. (हिं. लकड़ा) काष्ठं, दारु (न.) २. इंधनं, एधः, दंडः, यष्टिः (स्त्री), वेत्रं ३. दे. 'गतका' ।

—देना, मु., अंत्येष्टिं कृ, शवं दह् (भ्वा.प.अ.) ।

लक़ब, सं. पुं. (अ.) उपाधिः, उपनामन् (न.) ।

लक्कलक्क, सं. पुं. (अ.) लंबग्रीवो जलखगभेदः, *लकलकः ।

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

लक़वा, सं. पुं. (अ.) अर्दितम् ।
लकीर, सं. स्त्री. (सं. लेखा) रेषा-खा, दंडाकारलिपिः (स्त्री.) २. पंक्तिः-श्रेणिः-आलिः (स्त्री.) ।
—का फ़क़ीर, मु., विवेकशून्य, अंध, -अनुगामिन्-अनुयायिन्-अनुवर्तिन्, परंपरानुसारिन् ।
—पर चलना, —पीटना, } मु., अंधवत्-अनुगम् (भ्वा. प.अ.)-अनुया(अ.प.अ.) ।
लकुट, सं. पुं. (सं.) लगुडः, यष्टिः (स्त्री.), दंडः ।
लक्कड़, सं. पुं., दे. 'लकड़ा' ।
लक्का, सं. पुं. (अ.) व्यजनपुच्छः, पारावंतः, कपोतभेदः ।
लक्ष, वि. तथा सं. पुं. (सं.) दे. 'लाख' ।
लक्षक, वि. (सं.) प्रकटयितृ, प्रकाशक । सं. पुं. (सं.) लक्ष्यार्थप्रकाशकः शब्दः । (सं. न.) दे. 'लाख' ।
लक्षण, सं. पुं. (सं. न.) अंकः, चिह्नं, लिंगं, लांछनं, व्यंजनं; अभिज्ञानम् । २. परिभाषा, परिच्छेदः, निर्देशः ३. विशिष्टलिंगं, विशेषः ४. चरित्रं, आचारः ।
लक्षणा, सं. स्त्री. (सं.) शब्दशक्तिभेदः, शक्यसंबंधः (सा.) २. सारसी ३. हंसी ।
लक्षित, वि. (सं.) निर्दिष्ट, ज्ञापित २. दृष्ट, वीक्षित ३. अनुमित, तर्कित ४. चिह्नित, अंकित ।
लक्ष्मण, सं. पुं. (सं.) रामानुजः, सौमित्रिः २. दुर्योधनपुत्रविशेषः ३. सारसः ।
लक्ष्मी, सं. स्त्री. (सं.) श्रीः, कमला, पद्मा, पद्मालया, हरि,-प्रिया-वल्लभा, इंदिरा, मा, रमा, क्षीराब्धितनया, भार्गवी, लोकमातृ (स्त्री.) २. धनं, संपद् (स्त्री.) ३. छविः (स्त्री.), शोभा ४. दुर्गा ५. सीता ६. वीरनारी ७. गृहस्वामिनी ।
—नारायण, सं. पुं. (सं.) लक्ष्मीजनार्दनः, शालग्रामभेदः ।
—पति, सं. पुं. (सं.) विष्णुः २. श्रीकृष्णः ३. नृपः ।
लक्ष्मीश, सं. पुं. (सं.) विष्णुः २. आम्रवृक्षः ३. धनाढ्यः ।
लक्ष्य, सं. पुं. (सं. न.) शरव्यं, लक्ष्मं, वेध्यं, वेधं, प्रतिकायः २. निंदा-आक्षेप-उपालंभ-विषयः ३. आशयः, उद्देशः, अभि-इष्टं, मनोरथः, ईप्सितं ४. लक्ष्यार्थः । वि., दर्शनीय, अवलोकनीय ।
—वेधी, सं. पुं. (सं.-धिन्) वेध्यवेधकः ।
लखपती, सं. पुं. (सं. लक्षपतिः) लक्ष,-ईश्वरः-अधीशः २. धनिकः, धनाढ्यः ।
लखेरा, सं. पुं. (हिं. लाख) लाक्षा-जतु,-कारः २. हिंदूपजातिभेदः ३. कुक्कुभ,-लेपकः-लेपिन् ।
लग, क्रि. वि. (सं. लग् >) दे, 'तक', २. समीपं पे । अव्य., सह, सार्द्धं २. दे. 'लिए' ।
—भग, क्रि. वि. प्रायः, प्रायशः, प्रायेण,-प्राय,-कल्प, उप-,आसन्न- ।
लगन[1], सं. स्त्री. (हिं. लगना) आसंग, प्रीतिः (स्त्री.), आ-प्र,-सक्तिः (स्त्री.), अभिनिवेशः, दे. 'धुन' २. प्रेमन् (पुं. न.), अनुरागः, स्नेहः ३. दे. 'लगना' सं. पुं. ।
लगन[2], सं. पुं. (सं. लग्न) राशीनामुदयः (ज्यो.) २. (विवाहस्य) शुभमुहूर्तः-र्तम् ।
—कुंडली, सं. स्त्री. (सं. लग्नकुंडली) जन्मकुंडली ।
—लगना, क्रि. अ., अनुरंज् (कर्म.), स्निह् (दि. प. से.) ।
लगना, क्रि. अ. (सं.लगन) सं-, युज् (कर्म.), लग् (भ्वा. प. से.), संहन्-संधा (कर्म.), संश्लिष् (दि. प. अ.) संपृच्-संसृज् (कर्म.) २. आरोप्-मूल् (कर्म.) ३. निवेश्-स्थाप् (कर्म.) ४. आहन्-ताड्-प्रह्-व्यध् (कर्म.) ५. स्पृश्-समालभ्-परामृश् (कर्म.) ६. विन्यस्-व्यवस्थाप्-व्यूह् (कर्म.) ७. दृश्-लक्ष्-प्रती (कर्म.), प्रति-,भा (अ. प. अ.) ८. संबन्ध् (कर्म.), सम्बन्धः ज्ञातित्वं वृत् (भ्वा. आ. से.) ९. स्वाद्-रसं धा १०. अनुरंज् (कर्म.), स्निह् (दि. प. से.) ११. करः-शुल्कः नियोज् (कर्म.) १२. मूल्यं अपेक्ष् (भ्वा. आ. से.), मूल्यकेन लभ् (कर्म.) १३. व्यापृ (तु. आ. अ.), मग्न-व्यापृत (वि.) वृत १४. पण् (कर्म.) १५. पूतीभू, जु (दि. प. से.), पूय् (भ्वा. आ. से.) । सं. पुं. तथा भाव, लगनं, सं-, योगः, संधानं, सं-श्लेषः-श्लेषणं, संपर्कः, संसृष्टिः (स्त्री.), आरोपणं, मूलनं, निवेशः, स्थापनं, आघातः, प्रहारः, स्पर्शः, समालम्भः, विन्यासः, व्यूहः, व्यवस्थितिः, प्रतीतिः (स्त्री.), भानं, व्यापृतिः-आसक्तिः (स्त्री.) १६. पूतीभावः, पूयनं इ. ।

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

लगा हुआ, वि., सं-, युक्त, लगित, लग्न, संहत, संपृक्त, संसृष्ट, आरोपित, निवेशित, स्पृष्ट, विन्यस्त, अनुरक्त, व्यापृत, मग्न इ.।

लगवाना, क्रि. प्रे., ब. 'लगाना' के प्रे. रूप।

लगातार, क्रि. वि. (हिं. लगना+तार) सततं, अविच्छिन्नं, दे. 'निरंतर'।

लगान, सं. पुं. (हिं. लगाना) भू-भूमि,-करः, शस्यशुल्कं, राजस्वम्।

लगाना, क्रि. स., ब. 'लगना' के स. रूप।

लगाम, सं. स्त्री. (फ़ा.) कविकः-का, खलीनः-नं, कवि(वी)र्यं, कनी, पंचांगी २.वल्गा, रश्मिः, अवक्षेपणी, कुशा।

—चढ़ाना या देना, मु., संयम्(भ्वा. प. अ.), निग्रह् (क्र. प. से.), वशीकृ, निवृ (प्रे.)।

लगालगी, सं. स्त्री. (हिं. लगाना) अनुरागः, प्रेमन् (पुं. न.) २. संबंधः, संपर्कः, संसर्गः, संगतिः (स्त्री.)।

लगाव, सं. पुं. / लगावट, सं. स्त्री. } (हिं. लगाना) दे. 'लगालगी' १-२।

लगुड-र-ल, सं. पुं. (सं.) दंडः, यष्टिः (स्त्री.) २. लोहमयोऽस्त्रभेदः।

लग्गा, सं. पुं. (सं. लग्न>) लंब,-वेणुः-वंशः २. नौदंडः ३. आकर्षणी।

लग्गी, सं. स्त्री. (हिं. लग्गा) मीनदंडः २-४. दे. 'लग्गा' १-३।

लग्न[1], सं. (पुं. सं. न.) दे. 'लगन[2]' (१-२)।

लग्न[2], वि. (सं.) संयुक्त, संश्लिष्ट, संलगित, संबद्ध २. आसक्त, मग्न, व्यापृत,-पर,-परायण,-निष्ठ ३. लज्जित।

लघु, वि. (सं.) अल्प-ईषद्,-भार, सु-सुख,-वाह्य २. अणु, महत्त्व-बृहत्त्व,-शून्य, क्षुद्र, तनु, अल्प,-आकार-आकृति-काय ३. निस्तत्त्व, निस्सार ४. अल्प, स्तोक (मात्रा) ५. अधम, नीच ६. दुर्बल, निर्बल ६. कनीयस्, यवीयस्।

—चेता, वि. (सं.-तस्) तुच्छ, क्षुद्रमति, क्षुद्राशय।

—शंका, सं. स्त्री. (सं.) मूत्रोत्सर्गः, मेहनम्।

लघुता, सं. स्त्री. (सं.) लघुत्वं, लाघवं, लघिमन् (पुं.), अल्पभारवत्त्वं २. अणुता, तनुता, क्षुद्रता ३. अधमता ४. कनीयस्त्वं ५. अल्पता।

लचक, सं. स्त्री. (हिं. लचकना) स्थितिस्थापकता-त्वं, नम्यता, कुंचनीयता २. दे. 'लचकना' सं. पुं.।

—दार, वि. (हिं.+फ़ा.) नम्य,कुंचनीय, नमन-कुंचन,-शील, स्थितिस्थापक, प्रकृतिप्रापक।

लचकना, क्रि. अ. (हिं. लच अनु.) अव-, नम् (भ्वा. प. अ.), वक्रीभू। सं. पुं. तथा भाव, अव,-नमनं-नतिः-नामः, वक्रीभावः।

लचकाना, क्रि. स., ब. 'लचकना' के प्रे. रूप।

लचकीला, / लचलचा, } वि (हिं. लचक) दे. 'लचकदार'।

लचना, क्रि. अ., दे. 'लचकना'।

लचाना, क्रि. स., ब. 'लचकना' के प्रे. रूप।

लचीला, वि., दे. 'लचकदार'।

लच्छा, सं. पुं. (सं. लंबगुच्छः>) सूत्रस्तबकः, गुणगुच्छः, तंतुपंची २. सूत्राकाराः, पट्टिकाकाराः वा तनुदीर्घखंडाः ३. सूक्ष्मतंतुरूपः पाणिपादभूषणभेदः ४. मिष्टान्नभेदः।

लच्छेदार, वि. (हिं.+फ़ा.) गुच्छ-सूत्र-पट्टिका,-आकार २. श्रुतिमधुर, सुश्राव्य, सुखश्रव।

लजाना, क्रि. अ., दे. 'लज्जित होना'।

लजालू, सं. पुं., दे. 'लाजवंती'।

लज़ीज़, वि. (अ.) सुस्वादु, सुरस, स्वादिष्ट (भक्ष्य)।

लजीला, वि. (हिं. लाज) दे. 'लज्जाशील'।

लज़्ज़त, सं. स्त्री. (अ.) आ-,स्वादः, रसः।

—दार, वि. (अ.+फ़ा.) दे. 'लज़ीज़'।

लज्जा, सं. स्त्री. [सं. व्रीडः-डा, ह्रीः (स्त्री.),] त्रपा, मंदाक्षं, शालीनता, लज्या २. मानः, प्रतिष्ठा।

—कर, वि. (सं.) त्रपा-लज्जा,-प्रद-जनक-आवह, गर्हित।

—शील, वि. (सं.) ह्रीमत्, शालीन, लज्जार्त्त, सलज्ज, विनीत, लज्जावत्, लज्जान्वित।

—हीन, वि. (सं.) निर्लज्ज, निर्व्रीड, धृष्ट, निस्त्रप, अपत्रप, लज्जा-त्रपा,-शून्य।

लज्जालु, वि. (सं.) दे. 'लाजवंती' २. दे. 'लज्जाशील'।

लज्जित, वि. (सं.) ह्रीत, ह्रीण, व्रीडित, त्रपित, त्रपा-लज्जा,-अन्वित।

—करना, क्रि. स., लज्ज-त्रप्-व्रीड्-ह्री (प्रे.)।

—होना, क्रि. अ., लज्ज् (तु. आ. से.), त्रप् (भ्वा. आ. से.), व्रीड् (दि. प. से.), ह्री (जु. प. अ.)।

लट[1], सं. स्त्री. (सं. लट्वा) अलकः, चूर्णकुन्तलः,

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

कुरलः २. केशपाशः, कचपक्षः ३. जटा, सटा, संश्लिष्टकेशाः ।
—धारी, सं. पुं., जटिन्, जटिलः (भिक्षु) ।
लट,[२] सं. स्त्री. (हिं. लपट) ज्वाला, अग्निशिखा ।
लटक, सं. स्त्री. (हिं. लटकना) दे. 'लटकना' सं. पुं. । २. कुंचनीयता, नम्यता ३. आवेशः, आवेगः ४. हावः, विभ्रमः, मनोहरी(री) अंगभंगिः (स्त्री.) ।
—चाल, सं. स्त्री., सविभ्रमगतिः (स्त्री.) ।
लटकन, सं. पुं. (हिं. लटकना) दे. 'लटकना' सं. पुं. २. हावः, विभ्रमः ३. प्रालंबः, लोलकः ४. नासिकाभूषणभेदः ५. उष्णीषलंबितो रत्नगुच्छः ।
लटकना, क्रि. अ. (सं. लटनं>) अव-प्र-लम्ब् (भ्वा. आ. से.), उद्बन्ध् (कर्म.) २. दोलायते (ना. धा.) । प्रेंख् (भ्वा. प. से.) ३. विलंबं कृ, चिरायति-ते (ना. धा.), विलम्ब् (भ्वा. आ. से.) । सं. पु. तथा भाव, अव-प्र,-लम्बः-लम्बनं, उद्बंधनं २. प्रेंखणं, दोलनं ३. विलम्बनं, कालक्षेपः ।
लटका, सं. पुं. (हिं. लटक) गतिः (स्त्री.), चारः २. हावभावौ, विभ्रमः ३. सविलासं भाषणं ४. वागाधारः (= तकिया कलाम) ५. संक्षिप्त,-योगः-उपचारः-औषधं ६. चलद्गीतं ७. माया-यातु,-यष्टिः (स्त्री.) ८. अभिचारमंत्रः ।
लटकाना, क्रि. स., व. 'लटकना' के. प्रे. रूप ।
लटकाव, सं. पुं., दे. 'लटकना' सं. पुं. ।
लटकीला, वि. (हिं. लटक) दे. 'लचकदार' ।
लटपट-टा, वि. (हिं. लटपटाना) प्रस्खलत्-विचलत् (शत्रंत), अस्थिरगतिक २. शिथिल, अपरिष्कृत, अस्तव्यस्त, अवस्रस्त ३. अस्पष्ट, च्युत्यत् (शब्द) ४. क्रमहीन, असंगत ५. खिन्न, श्रांत, ग्लान, अशक्त ६. उदपेष,-गाढ-घन ७. वलियुत (वस्त्रादि) ।
लटपटाना, क्रि. अ. (सं. लड्+पत्) प्रस्खल् (भ्वा. प. से.) २. पतत् चल् (भ्वा. प. से.) ३. चपलतया गम् ४. वेप् (भ्वा. आ. से.) ५. अनुरंज् (कर्म.) । सं. पुं., प्रस्खलनं, दूषितगतिः (स्त्री.), कंपनं, अनुरागः ।
लटा, वि. (सं. लुट्टः) लंपट २. नीच ३. तुच्छ ४. पतित ५. दुष्ट ।
लटापटी, सं. स्त्री. (हिं. लटपटाना) दे. 'लटपटाना' सं. पुं. २. कलहः, कलिः ।
लटी, सं. स्त्री. (हिं. लटा) १-२. अभद्र-असत्य, वार्ता ३. भिक्षा(क्षु)की ४. वेश्या ५. पंजी-जिः (स्त्री.) ।
लटूरी, सं. स्त्री. (हिं. लट) दे. 'लट' (१) ।
—उतरवाना, चूडाकरणसंस्कारं कृ (प्रे.) ।
लटोरा, सं. पुं. (देश.) कलिंगः, धूम्रांटः, खगभेदः ।
लट्टू, सं. पुं. (सं. लुंठनं>) भ्रमरकः-कं, २. लंब्रकः, लंबसीसकम् ।
—होना, मु., अत्यधिकं स्निह् (दि. प. से.), गाढं अनुरंज् (कर्म.) ।
लट्ठ, सं. पुं. [सं. लगुड-यष्टिः (स्त्री.)] स्थूल-बृहद्-दंडः-यष्टिः, लकुटः, लगुडः ।
—बाज़, वि. (हिं.+फ़ा.) यष्टियोध-धिन्, दंडधर, दंडिक ।
—बाज़ी, सं. स्त्री. (हिं.+फ़ा.) दंडादंडि (अव्य.), यष्टियुद्धम् ।
—मार, वि. (हिं.) दे. 'लट्ठबाज़' २. कटु, कठोर (वचन) ।
—मारना, क्रि. स., दंडेन-यष्ट्या प्रहृ (भ्वा. प. अ.) । मु., परुषं ब्रू (अ. उ. से.) ।
पीछे—लिये फिरना, मु., सततं विरुध् (रु. उ. अ.) २. प्रतिकूलं आचर् (भ्वा. प. से.) ।
लट्ठा[१], सं. पुं. (हिं. लट्ठ) दीर्घकाष्ठं २. तुला, छदिः, स्थूणा ३. सार्द्धपंचगजमितो भूमानदंडः ।
लट्ठम्—, सं. पुं., दे. 'लट्ठबाजी' ।
लट्ठा[२], सं. पुं. (अं. लांगक्लाथ) लंबपटः ।
लठ, सं. पुं., दे. 'लट्ठ' ।
लठालठी, सं. स्त्री., दे. 'लट्ठबाजी' ।
लठैत, सं. पुं. (हिं. लठ) दे. 'लट्ठबाज' ।
लड़ंत, सं. स्त्री. (हिं. लड़ना) दे. 'लड़ाई' ।
लड़, सं. स्त्री. [सं. यष्टिः (स्त्री.) ?] आवली-लिः (स्त्री.), सरल,-माला-हारः २. रज्जोः घटक-सूक्ष्म,-तंतुः ३. शृंखलः-लं-ला ४. श्रेणिः-पंक्तिः (स्त्री.) ।
लड़कपन, सं. पुं. (हिं. लड़का) बाल्यं, कौमारं २. चापल्यं, चांचल्यम् ।
लड़ककुद्धि, सं. स्त्री. (हिं.+सं.), बालबुद्धिः (स्त्री.), अपक्वमतिः (स्त्री.) ।
लड़का, सं. पुं. (हिं. लाड़) बालकः, कुमारः २. पुत्रः ।

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

—बाला, सं. पुं., संततिः (स्त्री.), संतानः २. *परिवारः, कुटुंबम् ।
—लड़की, सं. स्त्री., संततिः (स्त्री.)।
लड़केवाला, मु., (विवाहे) वरस्य जनकः संरक्षको वा ।
लड़कों का खेल, मु., सुकरकर्मन् (न.), सुसाध्यकार्यम् ।
लड़की, सं. स्त्री. (हिं. लड़का) बालिका, कुमारी २. पुत्री ।
—वाला, मु. (विवाहे) वध्वा जनकः संरक्षको वा ।
लड़कौरी, वि. स्त्री. (हिं. लड़का) बालोत्संगा, शिशुमती ।
लड़खड़ाना, क्रि. अ. (सं. लड्+हिं. खड़ा) प्रस्खल् (भ्वा. प. से.), घूर्ण् (भ्वा. आ. से.) २. गद्गदवाचा भाष् (भ्वा. आ. से.), सगद्गदं ब्रू (अ.उ.से.) स्खल् । सं. पुं., प्रस्खलनं, घूर्णनं २. सगद्गदं भाषणं, स्खलनम् ।
लड़ना, क्रि. अ. (सं. रणनं>) विग्रह् (क्र. प. से.), युध् (दि. आ. अ.), युद्धं-संग्रामं-संगरं कृ २. विवद् (भ्वा. आ. से.), विप्रलप् (भ्वा. प. से.), कलहायन्ते (ना. धा.) ३. दंश् (भ्वा. प. अ.) ४. संघट् (भ्वा. आ. से.), संभृद् (क्र. प. से.) ५. मल्लयुद्धं कृ, हस्ताहस्ति-मुष्टीमुष्टि युध् । सं. पुं. तथा भाव, विग्रहः, युद्धं, विवादः, विप्रलापः, कलहः, दंशनं, संघट्टनं, संमर्दः, मल्लयुद्धम् ।
लड़बड़ाना, क्रि. अ., दे. 'लड़खड़ाना' ।
लड़बावरा, वि. (हिं. लड़का+बावरा) मूर्ख, अज्ञ, बालबुद्धि २. अशिष्ट, ग्रामीण ।
लड़ाई, सं. स्त्री. (हिं. लड़ना) संग्रामः, दे. 'युद्ध' २. मल्ल-बाहु,-युद्धं ३. वाग्युद्धं, कलहः ४. वादः, वादप्रतिवादः ५. संघट्टः, समाघातः ६. विरोधः, वैरम् ।
—करना, क्रि. स., दे. 'लड़ना' ।
—का मैदान, रणक्षेत्रं, युद्धभूमिः (स्त्री.)।
—मोल लेना, मु., कामतः कलहे प्रवृत् (भ्वा. आ. से.), युध् (सन्नतं, युयुत्सते)।
लड़ाका, सं. पुं. (हिं. लड़ना) योधः, भटः, योद्धृ । वि., कलह-कलि,-प्रिय, युयुत्सु, विवादिन् ।
लड़ाकू, वि. (हिं. लड़ना) सांग्रामिक (-की स्त्री.), यौद्ध (-द्धी स्त्री.)।
लड़ाना, क्रि. स., व. 'लड़ना' के प्रे. रूप ।
लड़ी, सं. स्त्री., दे. 'लड़' ।
लड़ीला, वि., दे. 'लाड़ला' ।
लड्डू, सं. पुं. (सं. लड्डुः) लड्डुकः, मोदकः ।
—खिलाना, मु., निमंत्र् (चु. आ. से.)।
—मिलना, मु., सुफलं अधिगम् ।
मन के—खाना, मु., मनोराज्यं विजृम्भ् (प्रे.)।
लढ़ा, सं. पुं. } [हिं. लुढ़(ढ़क)ना]
लढ़िया, सं. स्त्री. } बलदशकटी ।
लत, सं. स्त्री. (सं. रतिः>) कु,-वृत्तिः (स्त्री.)-शीलं, कदभ्यासः, दुर्व्यसनं, दुष्प्रवृत्तिः (स्त्री.), दे. 'आदत' (बुरी)।
लतखोर-रा, वि. (हिं. लात+फ़ा. ख़ोर) पादप्रहारसह, जंघाघातसह, कुकर्मिन् २. नीच, क्षुद्र । सं. पुं., दासः, किंकरः २. देहली, अवग्रहणी ३. दे. 'पायंदाज़' [लतख़ोरिन (स्त्री.)]।
लतपत, वि., दे. 'लथपथ' ।
लता, सं. स्त्री. (सं.) वल्ली, व(वे)ल्लिः-ल्ली(प्र)ततिः (स्त्री.); (बहुत शाखाओं तथा पत्तों वाली) प्रतानिनी, गुल्मिनी, वीरुध् (स्त्री.), उलपः २. सुन्दरी, तन्वी, रोचना ।
—मंडप, सं. पुं. (सं.) लता,-भवनं-कुंजः-गृहं, नि,-कुंजः-जं, कुडंगः-गम् ।
लताड़, सं. स्त्री., दे. 'लथाड़' ।
लताड़ना, क्रि. स. (हिं. लात) दे. 'रौंदना' ।
लतिका, सं. स्त्री. (सं.) लघु,-वल्ली-व्रततिः(स्त्री.)।
लतीफ़ा, सं. पुं. (अ.) दे. 'चुटकुला' ।
लत्ता, सं. पुं. (सं. लक्तकः) नक्तकः, कर्पटः-टं, चीरं, पटच्चरं, जीर्णवसनं २. वस्त्रखंडः ३. वस्त्रम् ।
—कपड़ा, सं. पुं., परिधानं, वस्त्राणि-वासांसि (न. बहु.)।
लत्ती[1], सं. स्त्री. (हिं. लात) पादप्रहारः, लत्ताघातः, खुर,-आघातः-क्षेपः ।
लत्ती[2], सं. स्त्री. (हिं. लत्ता) *पतंगपुच्छं २. लंबवस्त्रखंडः-डम् ।
लथड़ना, क्रि. अ., व. 'लथेड़ना' के कर्म. के रूप ।
लथपथ, वि. (अनु.) अति,-क्लिन्न-उन्न-तिमित्त-आर्द्र २. (पंकादिभिः) लिप्त, द्विग्ध, मलिन, कलुष ।
लथाड़, सं. स्त्री. (अनु. लथपथ) भूमौ पात-

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

यित्वा इतस्ततः कर्षणं २. पराजयः ३. हानिः (स्त्री.) ४. अधिक्षेपः, निर्भर्त्सनं-ना, तर्जनम्।

लथाड़ना, क्रि. स., दे. 'लताड़ना' २. 'लथेड़ना'।

लथेड़ना, क्रि. स. (अनु. लथपथ) पंकेन मलिनयति (ना. धा.), कर्दमे कृष् (भ्वा. प. अ.) २. संमिश्र् (चु.), संसृज् (तु. प. अ.) ३. निर्भर्त्स् (चु.), अधिक्षिप् (तु. प. अ.) ४. व्यथ् (प्रे.), पीड् (चु.)।

लदना, क्रि. अ. (सं. लम्ब>) ब. 'लादना' के कर्म. के रूप २. भृ (तु. आ. अ.)।

लदवाना, लदाना, } क्रि. प्रे., ब. 'लादना' के प्रे. रूप।

लदा फँदा, वि. (हिं. लदना+फँदना) भाराक्रांत, भारग्रस्त, पर्याहारपीडित।

लदाव, सं. पुं. (हिं. लादना) दे. 'लादना' सं. पुं. २. भारः, भरः, पर्याहारः ३. पटलादिषु निराधार इष्टकाचयः।

लदुवा, लद्दू, वि. (हिं. लादना) धुरंधर, धुरीण, धौरेय, धुर्य, पृष्ठथ, स्थूरिन् (घोड़ा, बैल आदि)।

लद्धड़, वि. (हिं. लदना) अलस, मंथर।
—पन, सं. पुं., आलस्यं, मन्थरत्वम्।

लप[1], सं. स्त्री. (देश.) अंजलिः, करपुटः २. अंजलि,-मित-मात्रं वस्तु (न.)।

लप[2], सं. स्त्री. (अनु.) वेत्र-यष्टि,-शब्दः, लपलपध्वनिः २. खड्गादीनां तरलप्रभा।

लपक, सं. स्त्री. (अनु.) ज्वाला, अग्निशिखा २. क्षणिक-अस्थिर,-दीप्तिः (स्त्री.) प्रभा ३. वेगः, जवः, त्वरा, लाघवं ४. प्लुतिः (स्त्री.), झंपा।

लपकना, क्रि. अ. (हिं. लपक) धाव् (भ्वा. प. से.), द्रु (भ्वा. प. अ.), सत्वरं गम् २. स्फुर् (तु. प. से.), तरलप्रभया प्रकाश् (भ्वा. आ. से.) ३. वल्ग् (भ्वा. प. से.), उत्,-प्लु (भ्वा. प. अ.) ४. धृ (चु.), ग्रह् (क्र्. प. से.)। सं. पुं., धावनं, स्फुरणं, उत्,-प्लवनं, धारणम्।

लपकाना, क्रि. स., ब. 'लपकना' के प्रे. रूप।

लपकी, सं. स्त्री. (हिं. लपकना) सरलसीवन-भेदः।

लपझप, वि. (अनु. लप+हिं. झपटना) चपल, चंचल २. क्षिप्र, आशु।

लपट, सं. स्त्री. (हिं. लौ+पट) वह्निशिखा, ज्वाला २. तप्तपवनः, घर्मानिलः ३. सुगन्धः, सुवासः, दुर्गंधः, पूतिगंधः ४. सुगंधि-दुर्गंधि,-पवनतरंगः।

लपटना क्रि. अ., दे. 'लिपटना'।

लपड़शपड़, सं. स्त्री. (सं. लपन+अनु.) प्र,-जल्पः-पनं, निरर्थकशब्दाः (बहु.)।

लपन, सं. पुं. (सं. न.) मुखं २. भाषणम्।

लपलप, सं. पुं. (अनु.) लेहनं, लेहः। वि., क्षिप्र-शीघ्र,-कारिन्, आशु। क्रि. वि., क्षिप्रं, द्रुतं, झटिति (सब अव्य.)।
—करना, क्रि. स., लिह् (अ. उ. अ.), जिह्वाग्रेण पा (भ्वा. प. अ.)।
—खाना, क्रि. स., सत्वरं भक्ष् (चु.)।

लपलपाना, क्रि. स. (अनु. लपलप) (जिह्वा-खड्गादिकं) परिभ्रम् (प्रे.)-वि-धू (स्वा. क्र्. उ. से.)। क्रि. अ., खड्गवत् प्रकाश्-भास्-द्युत् (भ्वा. आ. से.)। सं. पुं. तथा भाव, विधुवनं, विधूतिः (स्त्री.), विधूननं, परिभ्रा(भ्र)मणं, प्रकाशनं, भासनं, द्योतनम्।

लपलपाहट, सं. स्त्री. (हिं. लपलपाना) (खड्गादीनां) द्युतिः-दीप्तिः (स्त्री.), प्रभा २. दे. 'लपलपाना' सं. पुं.।

लपसी, सं. स्त्री. (सं. लप्सिका) द्रवप्रायः संयावः ३. द्रवप्रायं भक्ष्यम्।

लपेट, सं. स्त्री. (हिं. लपेटना) दे. 'लपेटना' सं. पुं. व्यावर्तः, व्यावृत्तिः (स्त्री.) बंधन-चक्रं ३. परिधिः, परिणाहः, परिवेशः, मंडलं ४. कष्टं, क्लेशः, कृच्छ्रं, जालं ५. कु-दुष्,-प्रभावः ६. वेष्टनं, बंधनं ७. पुटः, भंगः, वलिः (स्त्री.)।

लपेटना, क्रि. स. (हिं. लिपटना) संवेष्ट् (प्रे.), संपुटीकृ २. भ्रम्-घूर्ण् (प्रे.) ३. व्यावृत् (प्रे.), पुटीकृ, पुटयति (ना. धा.) ४. पिण्डी-वर्तुली-कृ ५. आच्छद् (चु.), परिवेष्ट् (भ्वा. आ. से., प्रे.) ६. संग्रंथ् (क्र्. प. से.) ७. अन्तर्गण् (चु.), संश्लिष् (प्रे.)। सं. पुं. तथा भाव, संवेष्टनं, संपुटीकरणं, भ्रामणं, घूर्णनं, व्यावर्तनं, पिण्डीकरणं, आच्छादनं, संग्रंथनं, संश्लेषणम्।

लपेटवाँ, वि. (हिं. लपेटना) सपुट, सभंग, वलियुत २. व्यावृत्त, आकुंचित, ३. गूढार्थ, गुप्ताशय, व्यंग्य ४. वक्र।

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

लप्पड़, सं. पुं., दे. 'थप्पड़'।
लप्पा, सं. पुं. (देश.) सौवर्ण-राज़त,-तंतुजाला-भरणभेदः।
लफ़ंगा, सं. पुं. (फ़ा.-ग) लंपटः, व्यभिचारिन् २. कुपथगः, दुर्वृत्तः।
लफ़टंट, सं. पुं. (अं. लेफ्टिनेंट) गणाध्यक्षः २. प्रतिपुरुषः।
—गर्वनर, सं. पुं. (अं.) उपप्रांताध्यक्षः, उप-भोगपतिः।
—जनरल, सं. पुं. (अं.) अक्षौहिणीयः।
सेकंड—, सं. पुं. (अं.) गुल्मपः।
लफ़्ज़, सं. पुं. (अ.) शब्दः, पदं २. उक्तिः (स्त्री.), भाषणम्।
—बलफ़्ज़, क्रि. वि., शब्दशः, यथाशब्दं, अक्षरशः।
लफ़्ज़ी, वि. (अ.) शाब्द-ब्दिक।
—तर्जुमा, सं. पुं. (अ.) अक्षरशः-शब्दशः-मूलशब्दानुवर्ति-भावोपेक्षक,-अनुवादः।
—बहस, सं. स्त्री. (अ.) भावोपेक्षक-शाब्दिक,-वादप्रतिवादः।
लफ़्फ़ाज़, वि. (अ.) वावदूक, वाचाल, बहुभाषिन्, मुखर।
लफ़्फ़ाज़ी, सं. स्त्री. (अ.) वावदूकता, वाचालता, मुखरता, जल्पकता।
लब, सं. पुं. (फ़ा.) अधरः, ओष्ठः, दंतच्छदः २. स्यंदिनी, लाला ३. प्रान्तः, मुखं, कंठः, धारः, कर्णः।
—रेज़, वि., परि-,पूर्ण, संभृत।
लबड़धोंधों, सं. स्त्री. (अनु.) कोलाहलः-कलकलः २. अ-कु-दुर्,-व्यवस्था, संकुलं, क्रमाभावः ३. अन्यायः, अधर्मः, अनीतिः (स्त्री) ४. वाक्छलं, वाग्वंचना।
लबलबा, सं. पुं. (अनु.) क्लोमं पङ्क्रिया (अं. पेनक्रियास)। वि., चिक्कण, संलग्नशील।
—का रस, सं. पुं., क्लोमरसः।
लबादा, सं. पुं. (फ़ा.) *पिचुकंचुकः २. वंचुकः।
लबार, वि. (सं. लपनं>) मिथ्याभाषिन् २. जल्पाकः, वृथालापिन्।
लबालब, क्रि. वि. (फ़ा.) आ,-कंठं-मुखं-कर्णम्। वि., आकर्ण, परिपूर्ण।
लबी, सं. स्त्री., दे. 'राब'।
लबेरा, सं. पुं. (देश.) दे. 'लुच्चा'।
लब्ध, वि. (सं.) अव-प्र,-आप्त, अधिगत, समासादित २. उप,-अर्जित। सं. पुं. (सं. न.) फलं, लब्धिः (गणित) २. दासभेदः।
—प्रतिष्ठ, वि. (सं.) लब्ध,-कीर्ति-नामन्, वि-प्र,-ख्यात।
लब्धि, सं. स्त्री. (सं.) प्राप्तिः (स्त्री.), लाभः २. उत्तरं, लब्धांकः (गणित)।
लभ्य, वि. (सं.) प्राप्य, अधिगम्य २. उचित।
लमछड़, सं. पुं. (हिं. लंबा+छड़) लंबयष्टिः (स्त्री.) २. कुंतः, प्रासः ३. लंबाग्न्यस्त्रम्। वि., तनुलंब।
लमटंगा, वि. (हिं. लंबी+टांग) दीर्घजंघ (-घा,-घी स्त्री.) २. दे. 'लमढींग'।
लमढींग, सं. पुं. (देश.) सारसः, पुष्कराहः।
लमतड़ंग, वि., दे. 'लंबतड़ंग'।
लमहा, सं. पुं. (अ.) क्षणः, पलं, निमे(मे)षः।
लय, सं. पुं. (सं.) एकरूपता, ऐकरूप्यं, एकी-सदृशी,-भावः, सायुज्यं, मग्नता, लीनता २. एकाग्रता, समाधिः, अनन्यमनस्कता २. अनुरागः, प्रेमन् (पुं. न.) ४. महाप्रलयः, कल्पांतः ५. अदर्शनं, लोपः, तिरोभावः ६. संश्लेषः, संमिश्रणं ७. नृत्यगीतवाद्यानां साम्यं (संगीत) ८. मूर्च्छा। सं. स्त्री., स्वरोद्गम-प्रकारः (२-३) दे. 'तर्ज' तथा 'सम'।
लरज़ना, क्रि. अ. (फ़ा. जरज़ा) कंप्-वेप् (भ्वा. आ. से.) २. भी (जु. प. अ.), वि-सं-त्रस् (भ्वा. दि. प. से.)।
लरज़ा, सं. पुं. (फ़ा.) कंपः, वेपथुः २. भूकंपः ३. *कंपज्वरः।
ललक, सं. स्त्री. (सं. लल् = चाहना>) उत्कटेच्छा, लालसा, अभिलाषातिशयः।
ललकना, क्रि. अ. (हिं. ललक) अत्यन्तं स्पृह् (चु., चतुर्थी के साथ), अतीव अभिलष्-वांछ् (भ्वा. प. से.)।
ललकार, सं. स्त्री. (हिं. अनु. लेलें+सं. कारः) समर-, आह्वानं, युद्धाय आकारणं-णा, रणनिमंत्रणं २. आक्रमण,-उत्तेजना-प्रेरणा।
ललकारना, क्रि. स. (हिं. ललकार) आह्वे (भ्वा. आ. अ.), (योद्धुं) आकृ-उद्दीप्-उत्तिज्-प्रचुद् (प्रे.)। सं. पुं. तथा भाव, दे. 'ललकार'।
ललचना, क्रि. अ. (हिं. लालच) दे. 'ललचाना', क्रि. अ.

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

ललचाना, क्रि. अ. (हिं. ललचना) (अत्यन्तं) लुभ् (दि. प. से.) स्पृह् (चु.)-कम् (भ्वा. आ. से.)-अभिलष् (भ्वा. दि. प. से.) २. मुह् (दि. प. से.)। क्रि. स., अभिलाषां जन् (प्रे.), प्र-, लुभ् (प्रे.) २. मुह् (प्रे.) वशीकृ।

ललचौहाँ, वि. (हिं. लालच) लोलुप-भ, गृध्नु, अत्यभिलाषिन्, अत्याकांक्षिन्।

ललन, सं. पुं. (सं.) प्रिय-ललित-,बालः-कुमारः २. कांतः, वल्लभः ३. (नायकसंबोधनपदं) ललन! प्रियवर! ४. विहारः, क्रीडा, केलिः (स्त्री.)।

ललना, सं. स्त्री. (सं.) कामिनी, रामा २. जिह्वा।

लला-ल्ला, सं. पुं. (सं. लल>) दे. 'ललन' (१-३) २. (बालकसंबोधनपदं) अंग! वत्स! ललित! लालितक!

ललाई, सं. स्त्री. (हिं. लाल) दे. 'लाली'।

ललाट, सं. पुं. (सं. न.) अलि(ली)कं, गोधिः (पुं. स्त्री.) भालं, निटि(ट)लं, दे. 'माथा' २. भाग्यं, दैवम्।

—पटल, सं. पुं. (सं. न.) ललाट-मस्तक,-पट्ट-फलकम्।

—रेखा, सं. स्त्री. (सं.) भाग्यलेखः।

ललाटिका, सं. स्त्री. (सं.) पत्रपाश्या, ललाट-भरणभेदः २. ललाट, चरी-चर्चा, भालस्थचंदनं, तिलकः-कम्।

ललाम, वि. (सं.) रम्य, सुन्दर २. रक्त, लोहित ३. श्रेष्ठ, प्रधान। सं. पुं. (सं. न.) आ-,भूषणं २. रत्नं ३. चिह्नं ४. ध्वजः ५. शृंगं ६. अश्वः ७-८. अश्व,-भूषणं,-भालचिह्नं ९. प्रभातः १०. केस(श)रः-रं, दे. 'अयाल'।

ललित, वि. (सं.) सुंदर, मनोहर, रम्य, २. ईप्सित, अभीष्ट ३. लोल, चंचल, कंप्र।

—कला, सं. स्त्री. (सं.) कोमल-उत्कृष्ट,-कला-शिल्पं (काव्य, संगीत, चित्रकारी इ.)।

—लोचन, वि. (सं.) सु,-नेत्र-नयन।

ललिता, सं. स्त्री. (सं.) रमणी, सुन्दरी २. राधिकायाः सखीविशेषः।

ललिताई, सं. स्त्री. (सं. ललित>) सौन्दर्यं, रम्यता।

लली, ल्ली, सं. स्त्री. (हि. लला-ल्ला) प्रिय-पुत्री, ललिततनुजा २. (नायिकासंबोधनपदं) प्रिये! कान्ते! वल्लभे! ३. (बालिकासंबोधनपदं) ललिते! वत्से! कन्यके।

ललौहाँ, वि. (हिं. लाल) आ-ईषद्,-रक्त-लोहित।

लल्लो, सं. स्त्री. (सं. ललना) जिह्वा-रस-।

—चप्पो, सं. स्त्री., चाटु (पुं. न.),

—पत्तो, चाटूक्तिः (स्त्री.), उपच्छंदनम्।

—पत्तो करना, मु., मिथ्या प्रशंस् (भ्वा. प. से.), उपछंद् (चु.), चाटुभिः तुष् (प्रे.)।

लवंग, सं. पुं. (सं. न.) दे. 'लौंग'।

—लता, सं. स्त्री. (सं.) श्रीपुष्पलता (२. राधा-सखीविशेषः।

लव, सं. पुं. (सं.) परम,अणुः, लेशः, कणः, कणिका, क्षुद्रखंडः, बिंदुः २. काष्ठाद्वयं, षट् त्रिंशन्निमेषमितः कालः ३. श्रीरामपुत्रः, कुशभ्रातृ।

—लेश, सं. पुं. (सं.) २-२. अत्यल्प,-मात्रा-संसर्गः।

लवण, सं. पुं. (सं. न.) दे. 'नमक'। सं. पुं. (१-३) राक्षस-रस-समुद्र,-विशेषः। वि., लवणित, लावणिक, दे. 'नमकीन' २. सुन्दर।

—भास्कर, सं. पुं. (सं.) पाचकचूर्णभेदः (वैद्यक)।

लवणाकर, सं. पुं. (सं.) लवणख(खा)निः (स्त्री.) २. सागरः।

लवनि-नी, सं. स्त्री. (सं. लवनं) शस्य,-लावः-संचयः।

लवलीन, वि. (सं. लयः+लीन>) व्यग्र, नि,-मग्न, पर,-परायण, निरत, लीन, आसक्त, व्यावृत।

लवा, सं. पुं. (सं. लवः) लावः (वः), लाव-(ब)कः, लघुर्जंगलः।

लश्कर, सं. पुं. (फ़ा.) सेना, सैन्यं, अनीकं-किनी २. जन,-ओघः-संमर्दः ३. शिबि(वि)रं, निवेशः ४. नाविकाः-नौवाहाः (बहु.)।

लश्करी, वि. (फ़ा. लश्कर) सैनिकः, सेना-संबंधिन् २. पौत-थ, हौड। सं. पुं., सैनिकः २. नाविकः।

—भाषा, सं. स्त्री., मिश्रित-सैनिक,-भाषा २. दे. 'उर्दू'।

लशुन, सं. पुं. (सं. न.) दे 'लहसुन'।

लस, सं. पुं. (सं. लस्>) संलग्नशीलता,

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

श्लेषः, श्लेषणं २. संश्लेषक,-लेपः-द्रव्यं ३. आकर्षणम् ।

लसक, वि. (सं.) नर्तक, लासक ।

लसदार, वि. (हिं.+फ़ा.) संलग्नशील, सांद्र, श्यान, श्लीन, श्लेषशील ।

लसना, क्रि. स. (सं. लसनं>) लेपेन संश्लिष् (प्रे.)-संयुज् (चु.) । क्रि. अ., शुभ् (भ्वा. आ. से.) २. विद् (दि. आ. अ.) ।

लसलसा, वि. (हिं. लस) दे. 'लसदार' ।

लसलसाना, क्रि. अ. (सं. लस्>) संश्लिष् (कर्म.). सांद्र-श्यान-श्लीन (वि.) भू ।

लसित, वि. (स.) सुशोभित, सश्रीक २. प्रकट, स्फुट ३. क्रीडाशील ।

लसांला, वि. (हिं. लस) दे. 'लसदार' २. सुन्दर ।

लसुन, सं. पुं. (सं. लसुनं) दे. 'लहसुन' ।

लसो (सु)ड़ा, सं. पुं. (हिं. लस) (वृक्ष) श्लेष्मांतः-तकः, पिच्छिलः, भूतद्रुमः, शीतः, शेलुः, उद्दालकः २. (फल) श्लेष्मांतक-पिच्छिल,-फलं, श्लेष्मांतकं इ. ।

लस्टमपस्टम, क्रि. वि. (देश.) शनैः शनैः, मंदं मंदं २. यथाकथंचित, कथं,-अपि-चित् ।

लस्सी, सं. स्त्री. (सं. रसः> वा हिं. लयस्) दुग्धजलं. *क्षीरनीरं २. तक्रं, दे. 'छाछ' ।

लहँगा, सं. पुं. (हिं. लंक+अंगा) दे. 'घघरा' ।

लहकना, क्रि. अ. (अनु.) इतस्ततः धू (कर्म.) प्र-वि-चल् (भ्वा. प. से.) । सं. पुं., इतस्ततः विधूनन-विचलनं, धूतिः-निः (स्त्री.) ।

लहकाना, क्रि. स., व. 'लहकना' के प्रे. 'रूप' ।

लहकौर-रि, सं. स्त्री. (हिं. लहना+कौर) कवललाभः, वैवाहिकरीतिभेदः ।

लहजा, सं. पुं. (अ.-जः) ध्वनिः, स्वरः ।

लहज़ा, सं. पुं. (अ.) क्षणः, पलम् ।

लहना, क्रि. स. (सं. लभनं) दे. 'लेना' सं. पुं., शोध्य-प्रतिदेय,-ऋणं-पर्युदंचनं २. आदेय-लभ्य,-धनं ३. भाग्यम् ।

—**चुकाना**, मु., ऋणं शुध् (प्रे.) ।

लहर, सं. स्त्री. [सं. लहरी-रिः (स्त्री.)] उल्लोलः, कल्लोलः, ऊर्मिः-वीचिः (पुं. स्त्री.), भंगः, दे. 'तरंग' । २. आ,-वेगः, भाव-,आवेशः ३. कामचारः, छंदः ४. सर्पदंशनमूर्च्छा-पीडादीनां पुनःपुनर्भवो वेगः ५. प्रति,-शब्दः-ध्वनिः ६. आनन्दलहरी, आनन्दातिशयः ७. जिह्म-वक्र-कुटिल,-गतिः (स्त्री.) ८. दे. 'लपट' (४) ।

—**बहर**, सं. पुं. (हिं.+अ.) आनंदमंगलं, सौभाग्यं, अभ्युदयः ।

लहरना, क्रि. अ., दे. 'लहराना' क्रि. अ. ।

लहराना, क्रि. अ. (हिं. लहर) इतस्ततः प्र-वि-चल् (भ्वा. प. से.), धू (कर्म.), प्रकंप् (भ्वा. आ. से.), तरंगति-तरंगायते (ना. धा.), २. सर्पवत् व्रज् (भ्वा. आ. से.) ३. (चित्तं) उल्लस् (भ्वा. प. से.) ४. विराज् (भ्वा. आ. से.) । क्रि. स., व. 'लहराना' क्रि. अ. के प्रे. रूप । सं. पुं., धूतिः, धूनिः (स्त्री.), इतस्ततः विचलनं-विधूननं-कंपनम् ।

लहरिया, सं. पुं. (हिं. लहर) वक्ररेखावृंदं २. वक्ररेखांकितवस्त्रं, *लहरीयः ३. तरंगः ।

—**दार**, वि. (हिं.+फ़ा.) वक्ररेखा,-युत-अंकित, ऊर्मिमत्, भंगिमत् ।

लहरी, सं. स्त्री. (सं.) तरंगः, दे. 'लहर'(१) । वि. (हिं. लहर) स्वेच्छा,काम,-चारिन्, आनंदिन् ।

लहलहा, वि. (हिं. लहलहाना) स्फुटित, विकसित, सपत्रपुष्प, हरित, सरस, विकच २. आनंदित, मुदित ३. पुष्ट ।

लहलहाना, क्रि. अ. (हिं. लहरना) दे. 'लहराना' (१) । २. पत्रित-पुष्पित-हरित-सरस (वि.) जन् (दि. आ. से.) ३. स्फुट् (तु. प. से.), विकस्-फुल्ल् (भ्वा. प. से.) ४. मुद् (भ्वा. आ. से.), हृष् (दि. प. से.) ।

लहलहाहट, सं. स्त्री. (हिं. लहलहाना) धूतिः-धूनिः (स्त्री.), इतस्ततो विचलनं, दोलः २. सरसता, विकचता, प्रफुल्लता, विकासः ।

लहसुन, सं. पुं. [सं. लशु(शु)नः-नं] रसु-(सो)नः, महौषधं, महा-म्लेच्छ,-कंदः, गृंजनः-नं, अरिष्टं, उग्रगंधः, भूतघ्नः ।

लहसुनिया, सं. पुं. (हिं. लहसुन) धूम्ररत्न-भेदः, रुद्राक्षकं, वैदूर्यम् ।

लहू, सं. पुं. (सं. लोहः-हं) लोहितं, दे. 'रक्त' ।

—**का प्यासा**, वि., रक्तपिपासु, जिघांसु ।

—**की कै**, सं. स्त्री., रक्त,-वमनं-छर्दिका ।

—**के घूँट पीना**, मु., यथाकथंचित सह् (भ्वा. आ. से.) ।

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

—लुहान होना, मु., लोहितक्लिन्न-रुधिर-स्नात-रक्तरंजित-शोणशोण (वि.) भू ।

लांग, सं. स्त्री. (सं. लांगूलं>) कच्छः-च्छं, कच्छ(च्छा)टिका, कच्छाटी, कक्षा, दे. 'काँछ' ।

—खुलना, मु., अत्यर्थं भी (जु. प. अ.), साहसं धैर्यं मुच् (तु. प. अ.) ।

लांगल, सं. पुं. (सं. न.) दे. 'हल' ।

लांगली, सं. पुं. (सं-लिन्) बलरामः २. सर्पः ।

लांगूल, सं. पुं. (सं. न.) पुच्छं २. शिश्नम् ।

लांगूली, सं. पुं. (सं.-लिन्) कपिः, वानरः ।

लाँघना, क्रि. स. (सं. लंघनं) लंघ् (चु.), अतिक्रम् (भ्वा. दि. प. से.), तॄ (भ्वा. प. से.) २. उत्प्लुत्य लंघ् (भ्वा. आ. से., चु.) । सं. पुं. तथा भाव, अतिक्रमणं, लंघनं, तरणं, उत्प्लुत्य लंघनम् ।

लांछन, सं. पुं. (सं. न.) कलंकः, दोषः, दूषणं, अपकीर्तिचिह्नं २. चिह्नं, लक्षण, लक्ष्मन् (न.), लिंगम् ।

—लगाना, दुप् (प्रे.); कलंकयति, यशो मलिनयति (दोनों ना. धा.) ।

लाइन, सं. स्त्री. (अं.) पंक्तिः (स्त्री.) २. रेखा ३. लोहमार्गः, ४. पत्तिसेना ५. दे. 'बारक' ।

—डोरी, सं. स्त्री., दे. 'पेशखेमा' ।

ला, अ. (अ.) विना, न, ऋते (सब अव्य.) ।

—इलाज, वि. (अ.) असाध्य, निरुपाय, अचिकित्स्य, अप्रतिकार्य ।

—इल्म, वि. (अ.) निरक्षर, शिक्षाशून्य, विद्याविहीन, अज्ञ ।

लाइट, सं. स्त्री. (अं.) प्रकाशः, आलोकः ।

—हाउस, सं. पुं. (अं.) प्रकाश-,स्तम्भः-गृहम्, आकाशदीपः, दीपस्तम्भः ।

लाकड़ा काकड़ा, सं. पुं., दे. 'माता(छोटी)' ।

लाक्षणिक, वि. (सं.) लक्षणागम्य (अर्थ), लाक्षण २. लक्षणज्ञ, लाक्षण्य ३. गौण, अप्रधान ४. लक्षणसंबंधिन् ।

लाक्षा, सं. स्त्री (सं.) कीटजा, जतुका, दे. 'लाख[1]' ।

—गृह, सं. पुं. (सं. न.) पांडवदाहार्थं दुर्योधननिर्मापितो जतुगृहविशेषः ।

—रस, सं. पुं. (सं.) दे. 'महावर' ।

लाख[1], सं. स्त्री. (सं. लाक्षा) राक्षा, यावः, यावकः-कं, जतुकं-का, जतु (न.) रक्ता, अलक्तः (-क्तकः), द्रुम,-आमयः-व्याधिः, मुद्रिणी, जंतुका २. रक्तवर्णः कृमिभेदः ।

—चपड़ा, सं. स्त्री., पत्रकलाक्षा ।

लाख[2], वि. (सं. लक्षं) नियुतं, अयुतदशकं, सहस्रशतकं २. असंख्य, अगण्य । सं. पुं. (सं. न.) उक्ता संख्या, तदंकाश्च (=२०००००) । क्रि. वि., असकृत्, अनेकवारं, बहु, अधिकम् ।

—टके की बात, मु., अत्युपयोगिवार्ता ।

—से ख़ाक होना, मु., वैभवात् दारिद्र्यं उप-इ (अ. प. अ.), वित्ततः परिक्षि (कर्म.) ।

लाखा, सं. पुं. (हिं. लाख) ओष्ठरंजको लाक्षिकरंगः ।

लाखी, सं. स्त्री. (हिं. लाख) लाक्षिकरंगः । वि., लाक्षिक, लाक्षा,-निर्मित-रंजित-वर्ण-संबंधिन् ।

लाग, सं. स्त्री. (हिं. लगना) संपर्कः, संसर्गः, संबंधः २. प्रेमन् (पुं. न.), अनुरागः २. अभिनिवेशः, आसक्तिः (स्त्री.) ४. युक्तिः (स्त्री.), उपायः ५. इंद्रजालं, माया ६. प्रतियोगिता, स्पर्द्धा ७. वैरं, शत्रुता ८. अभिचारः ९. भूमिकरः १०. धातुभस्मन् (न.), दे. 'भस्म' ११, *लागम् ।

—डाँट, सं. स्त्री. (हिं.) वैरं, द्वेषः २. प्रतियोगिता-स्पर्द्धा ।

—लपेट, सं. स्त्री. (हिं.) पक्षपातः, पक्षपातिता, समदृष्ट्यभावः (स्त्री.) २. मनोगुप्ति-संवृतिः (स्त्री.) ।

लागत, सं. स्त्री. (हिं. लगना) व्ययः, विनियोगः, विसर्जनं २. मूल्यं, अर्घः, अर्हा ।

—आना या बैठना, क्रि. अ., मूल्येन क्री-ग्रह् (कर्म.) २. व्ययेन सपद्-साध् (कर्म.) ।

लाघव, सं. पुं. (सं. न.) दे. 'लघुता' (१-५) । ६. क्षिप्रता, द्रुतता, दक्षता ७. क्लीबता ८. आरोग्यम् ।

लाचार, वि. (फ़ा.) विवश, निरुपाय, अगतिक । क्रि. वि., विवश-निरुपाय-अगतिक,-तया ।

लाचारी, सं. स्त्री. (फ़ा.) विवशता, अगतिकता ।

लाची, सं. स्त्री., दे. 'इलायची' ।

लाज, सं. स्त्री. (सं. लज्जा) दे. 'लज्जा' (१-२) ।

—आना या करना, क्रि. अ., दे. 'लज्जित होना' ।

—रखना, मु., प्रतिष्ठां रक्ष् (भ्वा. प. से.), अपमानात् त्रै (भ्वा. आ. अ.) ।

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

लाजवंत, वि. (सं. लज्जावत्) दे. 'लज्जाशील'।
लाजवंती, वि. (हिं. लाजवंत) लज्जावती, ह्रीमती। सं. स्त्री., लज्जालुः (पुं. स्त्री.), संकोचिनी, स्पर्शलज्जा, महाभीता, महौषधिः (स्त्री.), रक्त,-पादी-मूला।
लाजवर्द, सं. पुं. (फ़ा., मि. सं. राजावर्तः) नृपावर्तः, आवर्तमणिः २. (विदेशीयं) नीलम्।
लाजवर्दी, वि. (फ़ा.) नीलवर्णः, आ-ईषत्-,नील।
लाजवाब, वि. (अ.) निरुत्तर, मूकी,-कृत-भूत, वादे पराजित ३. अनुपम, अतुल।
लाजा, सं. स्त्री. [सं. लाजाः (पुं. बहु.)] अक्षताः (पुं. बहु.) २. तंडुलः।
लाज़िम, वि. (अ.) आवश्यक, अवश्यकर्तव्य २. उचित, युक्त।
लाज़िमी, वि. (अ. लाज़िम) दे. 'लाज़िम'।
लाट[1], सं. पुं. (अं. लॉर्ड) शासकः, शासित २. भोगपतिः, प्रांताध्यक्षः।
लाट[2], सं. स्त्री. (हिं. लटठा) स्तंभः, मेठिः-थिः, यूपः।
लाट[3], सं. पुं. (सं. बहु.) प्रांतविशेषः (गुजरात, अहमदाबाद के आसपास) २. लाट-प्रांतवासिनः (बहु.) ३. (लाटः) अनुप्रास-भेदः (सा.) ४. जीर्णवसनभूषणादिकं ५. वसनानि-वासांसि (न. बहु.) ५. पंडितः-।
लाटरी, सं. स्त्री. (अं.) गुटिकापातः, पाटकः, *लात्री।
लाटानुप्रास, सं. पुं. (सं.) शब्दालंकारभेदः (सा.)।
लाटिका, लाटी, सं. स्त्री. (सं.) रीतिभेदः (सा.) २. प्राकृतभाषाविशेषः।
लाठ, सं. पुं., दे. 'लाट' (१-२)।
लाठी, सं. स्त्री. (सं. लकुटयष्टी>) यष्टिकः-का, यष्टी-टिः (स्त्री.), कांडः, लगुडः, दंडः, पशुघ्नः २. वेत्रं, वेत्रयष्टिः (स्त्री.)।
—चलना, मु., दंडादंडि जन् (दि. आ. से.)।
—टेक के चलना, मु., यष्टिमवलंब्य-दंडाश्रयेण चल् (भ्वा. प. से.)।
—बाँधना, मु., यष्टिं धृ (चु.)।
लाड़, सं. पु. (सं. लाडः) लाडनं, उप-,लालनं, २. परिष्वंगः, आलिंगनं, परिरंभणं ३. चुंबनं, निंसनं ४. क्रोडीकरणम् इ.।
—करना, क्रि. स., लल-लड्-लाड् (चु.), चुंब्-आलिंग (भ्वा. प. से.), क्रोडीकृ इ.।
लाड़ला, वि. (सं. लाडः>) उप-, लाडि(लि)-त, चुंबित, आलिंगित, प्रेम-लालन,-आस्पदं-पात्रं-भाजनं, प्रिय, अभिमत।
अत्यधिक—, वि., दुर्ललित, अतिलालित, लालनदूषित।
लाड़ा, सं. पुं. (हिं. लाड़) दे. 'वर'।
लाड़ी, सं. स्त्री. (हिं. लाड़ा) दे. 'वधू'।
लात, सं. स्त्री. (देश.) जंघा, जाघनी, प्रसृता २. पादः, चरणः-णं, पदं ३. जंघा-पाद,-प्रहारः-आघातः ४. खुर-पार्ष्णि,-क्षेपः-आघातः।
—चलाना, मु., पादेन-जंघया प्रहृ (भ्वा. प. अ.)-तड् (चु.)।
—जाना, मु., (गौ भैंस आदि) दुग्धं न दद् (भ्वा. आ. से.)।
—मारना, मु., तुच्छं मत्वा त्यज् (भ्वा. प. अ.)।
लाद, सं. स्त्री. (हिं. लादना) दे. 'लादना' सं. पुं. २. उदरं ३. अंत्रम्।
लादना, क्रि. स. (हिं. लदना) भारं न्यस् (दि. प. से.), निधा (जु. उ. अ.)-आरुह् (प्रे.)-निविश् (प्रे.), भाराक्रांतं कृ, भारेण पूर् (चु.) ३. राशी कृ, समा-चि (स्वा.उ.अ.)। सं. पुं. भ(भा)र,-न्यासः-निवेशनं-आधानं-आरोपणम्।
लादनेवाला, सं. पुं. भ(भा)र,-आरोपकः-निवेशकः।
लादवा, वि. (अ.) दे. 'लाइलाज'।
लादा हुआ, वि., भार,-ग्रस्त-आक्रांत, आरोपित-निदेशित-स,-भार।
लादी, स्त्री. (हिं. लादना) भारः, पोटलिका।
लादू, वि. (हिं. लादना) दे. 'लद्दू'।
लानत, सं. स्त्री. (अ. लअनत) धिक्कारः, न्यक्कारः, निर्-,भर्त्सनं-ना, अधिक्षेपः, गर्हा।
—मलामत करना, क्रि. स., निर्भर्त्स् (चु. आ. से.), अधिक्षिप् (तु. प. अ.)।
लानती, सं. स्त्री. (अ. लानत>) निंद्य, गर्ह्य, निर्भर्त्सनीय, दुष्ट, खल।
लाना, क्रि. स. (हिं. लेना+आना) आनी (भ्वा. प. अ.), उपा-आ,-हृ (भ्वा. प. अ.), आवह् (भ्वा. प अ.) २. उपस्था (प्रे.), पुरो निधा (जु. उ. अ.), उपन्यस् (दि. प. से.) ३. उपहृ (भ्वा. प. अ.), सम्-ऋ (प्रे.), उपायनं दा ४. उत्पद्-जन् (प्रे.)। सं. पुं.,

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

आनयनं, आ-उपा-हरणं, आवहनं, उपस्थापनं, उत्पादनं इ. ।

लाने योग्य, वि., आनेय, उपाहार्य, उपस्थाप्य ।

लानेवाला, सं. पुं., आनेतृ, आ-उपा,-हर्तृ-हारकः ।

लापता, वि. (अ. ला+हिं. पता) अलभ्य, अदृश्य, तिरोहित, अन्तर्हित, गुप्त, प्रच्छन्न, अज्ञातवास ।

लापरवा-वाह, वि. (अ. ला+फ़ा. परवाह) निश्चिंत, अनवहित, प्रमत्त, प्रमादिन् ।

लापरवाही, सं. स्त्री. (अ.+फ़ा.) निश्चिंतता, अनवधानता, प्रमत्तता, प्रमादः ।

लाफ़, सं. स्त्री. (फ़ा.) आत्म-स्व-,श्लाघा-प्रशंसा, विकत्थनम् ।

—ज़न, वि., आत्मश्लाघिन्, विकत्थनशील ।

—ज़नी, सं. स्त्री., आत्मश्लाघिता, विकत्थन-शीलता ।

लाफिंग गैस, सं. स्त्री. (अं.) हसनवातिः (स्त्री.) ।

लाभ, सं. पुं. (सं.) अव-प्र,-आप्तिः, उप-, लब्धिः (दोनों स्त्री.), अधिगमः-मनं, आसादनं २. फलं, आयः, उदयः, वृद्धिः (स्त्री.), लभ्यं ३. कल्याणं, उपकारः, हितम् ।

—उठाना, क्रि. अ., लाभं अधिगम्, अर्ज् (भ्वा. प. से., प्रे.), लभ (भ्वा. आ. अ.) समासद् (प्रे.), विद् (तु. उ. वे.) ।

—दायक, वि. (सं.) लाभ,-कारक-कारिन्-जनक-प्रद, गुणकारिन्, हित, हितकर, फल-दायक, उपयोगिन् ।

लाभालाभ, सं. पुं. (सं.-भौ द्वि.) आयापायौ, अधिगमापगमौ, वृद्धिक्षयौ, उपचयापचयौ ।

लाम, सं. पुं. (फ़ा. लार्म) सैन्यं, सेना २. जनौघः ३. युद्धम् ।

लामज़हब, वि. (अ.) धर्मविमुख, नास्तिक ।

लायक़, वि. (अ.) योग्य, क्षम, समर्थ, शक्त २. अनुरूप, अनुकूल, उपयुक्त ३. गुणिन्, गुणवत्, सुशील, श्रेष्ठ, भद्र ।

लाया हुआ, वि., आनीत, आ-उपा,-हृत, उप-स्थापित, उपन्यस्त ।

लार, सं. स्त्री. (सं. लाला) दे. 'राल' (२) ।

लार्ड, सं. पुं. (अं.) जगदीशः २. स्वामिन् ३. क्षेत्रपतिः ४. आंग्लदेशे उपाधिभेदः ।

लाल, सं. पुं. (फ़ा.) पद्मरागः, दे. 'माणिक्य' वि., रक्त, लोहित, शोण ।

—आलू, सं. पुं., दे. 'रताल' २. दे. 'अरुई' ।

—इलायची, सं. स्त्री., दे. 'इलायची' (बड़ी) ।

—कुर्त्ती, सं. स्त्री., आंग्लसैन्यनिवेशः, शिबि-(वि)रम् ।

—चंदन, सं. पुं., रक्त-कु-देवी,-चंदनं, रंजनं, दे. 'चंदन' में ।

—पानी, सं. स्त्री., सुरा, मद्यम् ।

—पेठा, सं. पुं., दे. 'कुम्हड़ा' ।

—बुझक्कड़, सं. पुं., पंडितं-प्राज्ञं,-मन्यः, प्राज्ञ-पंडित,-मानिन्-अभिमानिन्-वादिन् ।

—मिर्च, सं. स्त्री., दे. 'मिर्च' में ।

—मूली, सं. स्त्री., दे. 'शलजम' ।

—शक्कर, सं. स्त्री., दे. 'खाँड़' ।

—सागर, सं. पुं., रक्तसागरः ।

—सुर्ख़, वि., अग्निरूप, अंगारवर्ण, अतिलोहित २. अति,-कुपित-संरब्ध ।

—पीला होना,-पीली आँखें निकालना, मु., अत्यंतं कुप् (दि. प. से.)-क्रुध् (दि. प. अ.), संरंभातिशयेन लोहितलोचन-रक्तवदन (वि.)भू ।

लालच, सं. स्त्री. (सं. लालसा) लोलुपता, दे. 'लोभ' ।

लालची, वि. (हिं. लालच) लोलुप, दे. 'लोभी' ।

लालटेन, सं. स्त्री. (अं. लैंटर्न) प्रदीपः-पकः, प्रदीपकोशः(षः) ।

लालड़ी, सं. स्त्री. (फ़ा. लाल) मिथ्यामाणिक्यं, कृतकलोहितकम् ।

लालन[1], सं. पुं. (सं. न.) दे. 'लाड' सं. पुं. ।

—पालन, सं. पुं. (सं. न.) पालन-भरण, पोषणं, संवर्द्धनं, भरणं, रक्षणम् ।

लालन[2], सं. पुं. (हिं. लाला) प्रिय-लालित,-पुत्रः-कुमारः २. बालकः ।

लालसा, सं. स्त्री. (सं.) उत्कटेच्छा, लिप्सा-आकांक्षा-वांछा-स्पृहा-इच्छा-अभिलाष,-अतिशयः २. उत्कंठा, उत्सुकता ३. गर्भ-,दोहदः ।

लाला[1], सं. पुं. (सं. लालकः>) महाशयः, महोदयः, श्रीमत्, श्रीयुतः २. (क्षत्रियवैश्यानां संबोधनं) श्रीमन् ! महोदय ! श्रेष्ठिन् ३. कायस्थः ४. शिशुः, बालः ५. (बालसंबोधनपदं) वत्स ! अंग ! ललित ! लालितक ! ६. पितृ, जनकः ।

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

—भैया करना, मु., सादरं संभाष् (भ्वा. आ. से.)-संबुध् (प्रे.) २. लड्-लस् (चु.)।

लाला[२], स. स्त्री. (सं.) मुखस्रावः, दे. 'राल'(२)।

लाला[३], सं.पुं. (फ़ा.) खस्खस-खसतिल,-पुष्पम्।

लालाटिक, वि. (सं.) ललाट-भाल,-संबंधिन् २. दैव,-आयत्त-निर्दिष्ट ३. सावधान। सं. पुं., सावधानः सेवकः २. अलसः।

लालायित, वि. (स.) अत्यभिलाषिन्, अत्याकांक्षिन्, अत्युत्सुक, लालस।

लालित, वि. (सं.) लाडित, चुंबित, आलिंगित, क्रोडीकृत, प्रिय २. संवर्द्धित, पोषित।

लालित्य, सं. स्त्री. (सं. न.) सौंदर्यं, मनोज्ञता, मनोहरता, छविः (स्त्री.), माधुर्यम्।

लालिमा, सं. स्त्री. (फ़ा. लाल) दे. 'लाली'।

लाली, सं. स्त्री. (फ़ा. लाल) रक्तत्वं-ता, लौहित्य, रक्तिमन्-लोहितिमन्-अरुणिमन् (पुं.), अरुणता, लोहितता-त्वं, २. सम्मानः, प्रतिष्ठा ३. प्रिय,-कन्य(न्यि)का-कुमारिका।

लालसे, सं. पुं. (सं. लाला>) लालसा, उत्कटेच्छा।

(किसी चीज़ के)—पड़ना, मु., अतिलालायित (वि.) भू, अत्यंतं स्पृह (चु., चतुर्थी के साथ) २. दुर्लभ-दुष्प्राप (वि.) वृत् (भ्वा. आ. से.), कृच्छ्रेण लभ्-प्राप् (कर्म.)।

लाव[१], सं. पुं. (सं.) कर्तनं, कृंतनं, लवनं, छेदनम् २. लवः, लावकः, लघुजंगलः।

लाव[२], सं. स्त्री. (देश.) दे. 'रस्सा, रस्सी'।

लावक, सं. पुं. (सं.) लवः, लावकः, लघुजंगलः २. छेदकः, छेत्तृ, छेदकरः,-छिद्।

लावण्य, सं. पुं. (सं. न.) लवणता-त्वं, क्षारता २. विशिष्ट-सौंदर्य-रूपं, छविः (स्त्री.), चारुता, श्रीः-कांतिः (स्त्री.)।

लावनी, सं. स्त्री. (देश.) (१-२) छन्दो-गीतिका,-भेदः, *लावणी।

लावलश्कर, सं. पुं. (हिं.+फ़ा.) सपरिच्छदं सैन्यम्।

लावल्द, वि. (अ.) निस्संतान, निरपत्य।

लावा[१], सं. पुं. (सं. लावः-वः) दे. 'लवा'।

लावा[२], सं. पुं. (अं.) ज्वालामुखी-आग्नेय,-उद्गारः।

लावारिस, वि. (अ.) अदायाद, दायादरहित (मनुष्य) २. अदायिक, स्वामि-प्रभु,-हीन (धन)।

—माल, सं. पुं. (अ.) अदायिकं-स्वामिहीनं, रिक्थं-द्रव्यं-धनम्।

लाश, सं. स्त्री. (फ़ा.) दे. 'शव'।

लासा, सं. पुं. (हिं. लस) संश्लेषक,-द्रव्यं-लेपः २. द्रुमदुग्धं, क्षुपक्षीरम्।

—लगाना, मु., प्र-वि,-लुभ् (प्रे.), प्रतु-वंच् (प्रे.) २. उत्तिज्-उद्दीप् (प्रे.) ३. संश्लेषक-द्रव्येण खगान् बंध् (क्र. प. अ.)।

लासानी, वि. (अ.) अनुपम, अप्रतिम, अद्वितीय।

लास्य, सं. पुं. (सं. न.) नृत्यं २. भाव-ताल-लय-आश्रयं-नृत्यं ३. स्त्रीनृत्यं ४. तौर्यत्रिकम्।

लाहौरी नमक, सं. पुं. (हिं.+फ़ा.) दे. 'सेंधा नमक' (नमक के नीचे)।

लिंग, सं. पुं. (सं.) चिह्नं, लक्षणं, अभिज्ञानं, लक्ष्मन् (न.) २. अनुमानकारणं, साधक-हेतुः ३. मूलप्रकृतिः (स्त्री., सां.) ४. मेढ्रः-ढ्रं, दे. 'लिंगेंद्रिय' ५. शिवमूर्ति-भेदः ६. शब्द-रूपभेदः (व्या.) ७. पुराणविशेषः।

—देह, सं. पुं. (सं.) सूक्ष्म-लिंग,-शरीरं (=१० इन्द्रियाँ, ५ तन्मात्रा, मन, बुद्धि=१७ तत्त्व)।

—पुराण, सं. पुं. (सं. न.) शैवानां पुराण-विशेषः।

—वृत्ति, सं. पुं. (सं.) धर्मध्वजिन्, दांभिकः, लिंगिन्।

—स्थ, सं. पुं. (सं.) ब्रह्मचारिन्।

लिंगेंद्रिय, सं. पुं. (सं. न.) शेफः, शिश्नः-नं, लिंगं, उपस्थः-स्थं, शेफस् (न.), राग-काम,-लता मेढ्रः-ढ्रं, मेहनं, शंकुः, काम-मदन,-अंकुशः, ध्वजः, कंदर्पमुषलः।

लिंगोटी, सं. स्त्री., दे. 'लँगोटी'।

लिंट, सं. पुं. (अं.) व्रणोपयोगी श्लक्ष्णवस्त्रभेदः।

लिंफ, सं. पुं. (अं.) देहरसः।

लिए, अव्य. (कारकचिह्न) (सं. लग्न या कृते) —अर्थं,—अर्थे—अर्थाय,-कृते,-हेतोः, (प्रायः चतुर्थी विभक्ति, से, उ. राम के लिए=रामाय)।

लिखत, सं. स्त्री. (सं. लिखितं) लेखः, लिपि-बद्ध-अक्षरांकित,-विषयः २. लिखितपत्रं ३. लिखितं दे. 'दस्तावेज़'।

लिखना, क्रि. स. (सं. लिखनं) लिख् (तु. प. से.), लेखे वर्णं (चु.)-प्रतिपद् (प्रे.),

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

पत्रे आरुह्-निविश् (प्रे.), लिपिबद्ध (वि.) कृ. २. (ग्रंथादि), प्रणी (भ्वा. प. अ.), रच् (चु.), निर्मा (जु. आ. अ.; अ. प. अ.), ग्रंथ् (क्र. प. से.), नि-प्र,-बंध् (क्र. प. अ.) ३. वर्ण् (चु.), आ-अभि,-लिख्, चित्र् (चु.)। सं. पुं., लि(ले)खनं, पत्रे आरोपणं-निवेशनं २. रचनं, निर्माणं, प्रणयनं ३. आलिखनं, चित्रणम्।

लिखने योग्य, वि., लेख्य, लेखनीय, लेखार्ह इ.।

लिखने वाला, सं. पुं., दे. लेखकः।

लिखवाई, सं. स्त्री., दे. 'लिखाई' (४)।

लिखवाना, क्रि. प्रे., ब. 'लिखना' के प्रे. रूप।

लिखाई, सं. स्त्री. (हिं. लिखना) लिखनं, लेखनं, अक्षरविन्यासः २. लिपिः (स्त्री.)-पी, अक्षर रचना ३. लि(ले)खन,-रीतिः (स्त्री.)-शैली ४. लि(ले)खन,-भृतिः (स्त्री.)।

—पढ़ाई, सं. स्त्री., विद्याभ्यासः, शिक्षा, लिखनपठनम्।

लिखाना, क्रि. प्रे., ब. 'लिखना' के प्रे. रूप।

—पढ़ाना, मु., शिक्ष् (प्रे.), विद्याभ्यासं कृ (प्रे.)।

लिखापढ़ी, सं. स्त्री. (हिं. लिखना+पढ़ना) लेख-पत्र,-व्यवहारः २. लिखितेन दृढीकरणम्।

लिखावट, सं. स्त्री. (हिं. लिखना) लिपी-पिः (स्त्री.), अक्षर,-विन्यासः-संस्थानं २. लेख-लखन,-प्रणाली-शैली।

लिखा हुआ, वि. लिखित, लिपिबद्ध, लेख्यार्पित २. रचित, प्रणीत, निर्मित ३. चित्रित।

लिखित, वि. (सं.) लेख-लिपि,-बद्ध, अंकित, लेख्य, कृत-आरूढ सं. पुं. (सं. न.) लि(ले)-खनं, लेखः २. लिपी-पिः (स्त्री.) ३. लिखितं, दे. 'दस्तावेज़' ४. प्रमाणपत्रम्।

—पाठक, सं. पुं. (सं.) हस्तलेख,-पाठकः-अध्येतृ।

लिटमस, सं. पुं. (अं.) शेवलम्।

लिटाना, क्रि. स., ब. 'लेटना' के प्रे. रूप।

लिथड़ना, क्रि. अ., ब. 'लथेड़ना' के कर्म. के रूप।

लिपटना, क्रि. अ. (सं. लिप्त>), आ-प्र-सं, संज् (भ्वा. प. अ.), सं-परि,-लग् (भ्वा. प. से.) संसक्त-परिलग्न-भू, दिलग् (दि. प. अ.) २. आलिंग् (भ्वा. प. से.), आश्लिष्, परि-,स्वंज् (भ्वा. आ. अ.), उपगुह् (भ्वा. उ. से.) २. लीन-मग्न-व्यापृत-निरत-परायण (वि.) भू। सं. पुं., आसंगः, परिलगनं, श्लेषः २. आलिंगनं, परिरंभण, परिष्वजनम्।

लिपटनेवाला, सं. पुं., आसंगिन्, संलग्नशीलः २, आलिंगनकर्तृ, परिरंभकः ३. आलिंगित।

लिपटाना, क्रि. स., ब. 'लिपटना' के प्रे. रूप।

लिपटा हुआ, वि., परिलग्न, संसक्त, उपगूढ।

लिपड़ी, सं. स्त्री. (सं. लेपः>) उपनाहः, उत्कारिका, प्रलेपः।

लिपना, क्रि. अ., ब. 'लीपना' के कर्म. के रूप।

लिपवाना, लिपाना, क्रि. प्रे., ब. 'लीपना' के प्रे. रूप।

लिपाई, सं. स्त्री. (हिं. लीपना) प्र-वि-,लेपः-लेपनं, उपनाहनं, लिपः, लिंपः, लिपी-पिः (स्त्री.) २. लेपन-भृत्या-कर्मण्या-भर्मण्या।

लिपि, सं. स्त्री. (सं. लिपी-पिः, स्त्री.) लिपिका, लिबी-विः-विः (स्त्री.), अक्षर,-विन्यासः-संस्थानं-रचना, लिखितं, लि(ले)खनम्।

—कर, सं. पुं. (सं.) लेपकः, लेपकारः, पलांडः, लिंपः, लिपिंकरः २. लेखकः, पंजिकारः, लिपिकारः।

—कार, सं. पुं. (सं.) दे. 'लिपिकर'(२)।

—बद्ध, वि. (सं.) लिखित, अक्षरांकित, लेखनिवेशित।

—सज्जा, सं. स्त्री., लेख,-साधनानि-उपकरणानि (न. बहु.)।

लिप्त, वि. (सं.) चर्चित, दिग्ध, लेपान्वित, २. मग्न, लग्न, निरत, आसक्त, लीन।

लिप्सा, सं. स्त्री. (सं.) इच्छा, अभिलाषः, ईप्सा २. लोभः, लोलुपता।

लिप्सु, वि. (सं.) इच्छु-च्छुक, अभिलाषिन् २. लोलुप-भ, गृध्नु।

लिफ़ाफ़ा, सं. पुं. (अ.) पत्र,-पुटः-कोषः-आवेष्टनं-आवरणं २. आपातरमणीयंवेशः ३. आडंबरः ४. भंगुर-भिदुर,-पदार्थः।

—खुलना, मु., रहस्यं विद्रृ (कर्म.), स्वरूपं प्रकटीभू।

—बनाना, मु. आडंबरं रच् (चु.)।

लिबास, सं. पुं. (अ.) दे. 'वेश'।

लियाक़त, सं. स्त्री. (अ.) योग्यता, क्षमता २, गुणः, कला ३. सामर्थ्यं ४. शीलम्।

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

लिवाना, क्रि. प्रे., ब. 'लेना' तथा 'लाना' के प्रे. रूप।
लिवा लाना, क्रि. स., सह आनी (भ्वा.प.अ.)।
लिसोड़ा, सं. पुं., दे. 'लसोड़ा'।
लिहाज़, सं. पुं. (अ.) अवेक्षणं, अवधानं २. कृपा-दया,-दृष्टिः, (स्त्री.) अनुग्रहः ३. पक्षपातः-तिता ४. लज्जा, त्रपा ५. प्रतिष्ठा-मर्यादा,-विचारः ६. शीलसंकोचः।
—करना, क्रि. अवधा (जु. उ. अ.) २. आद्द (तु. आ. अ.) ३. अनुग्रहद् (क्र. प. से.) ४. मर्यादां पा (प्रे. पालयति)।
लिहाज़ा, अ. (अ.) अतः, अत एव (दोनों अव्य.)।
लिहाफ़, सं. पुं. (अ.) दे. 'रजाई'।
लीक, सं. स्त्री. (सं. लेखा) रेखा-खा, दंडाकार-लिपी-पिः (स्त्री.) २. (शकटादीनां) चक्रमार्गः ३. दे. 'पगदंडी' ४. यशस् (न.), प्रतिष्ठा ५. रीतिः (स्त्री.), लोकाचारः, प्रथा ६. कलंकः, लांछनं ७. गणनाचिह्नम्।
—पर चलना, —पीटना, } मु. दे. 'लकीर' के नीचे।
—से बेलीक होना, मु., पथभ्रष्ट (वि.) भू, रूढ़िं त्यज् (भ्वा. प. अ.)।
लीख, सं. स्त्री. (सं. लीक्षा) लिक्षा, यूकांडं, लि(ली)क्षा, लिख्यः।
लीचड़, वि. (देश.) अलस, मंद, मंथर २. संलग्नशील, दृढ़ग्राहिन् ३. कृपण, कदर्य।
—पन, सं. पुं., आलस्यं, कार्पण्यं, संलग्नशीलता।
लीची, सं. स्त्री. (चीनी-लीचू) अलीचिका, फलभेदः।
लीडर, सं. पुं. (अं.) दे. 'नेता'।
लीद, सं. स्त्री. (देश.) (गजाश्वादीनां) अवस्करः, उच्चारः, शमलं, पुरीषं, फलम्।
लीन, वि. (सं.) लयप्राप्त, समाविष्ट, व्याप्त २. तन्मय, नि-,मग्न, आसक्त, तद्गतचित्त, निरत, व्यापृत,-पर,-परायण। ३. द्रवीभूत ४. तिरोहित, लुप्त।
लीनता, सं. स्त्री. (सं.) तन्मयता, तत्परता, निमग्नता, आसक्ति (स्त्री.)।
लीपन, सं. पुं. (सं. लेपनं) दे. 'लिपाई'(१)।
लीपना, क्रि. स. (सं. लेपनं) अनु-प्र-वि-लिप् (तु. प. अ.) २. दिह् (अ. उ. अ.), उपनह् (दि. प. अ.), अंज् (रु. प. वे.)। सं. पुं., अनु-प्र-वि,-लेपः-लेपनं; उपनाहनं, उपदेहनम्।
—पोतना, क्रि. स., शुध् (प्रे.), संस्कृ.।
लीपनेवाला, सं. पुं., लेपकः, पलगंडः, २. उपदेहकः।
लीपा हुआ, वि., प्र-वि-,लिप्त, दिग्ध, अक्त।
लोमड़ी, सं. पुं. (फ़ा.) दे. 'निंदू'।
लीला, सं. स्त्री. (सं.) क्रीडा, केलिः (स्त्री.), खेला, खेलनं, कूर्दनं, क्रीडनं २. विहारः, विनोदः, रंजनं ३. शृङ्गारभावचेष्टा, विलासः, काम,-क्रीडा-केलिः (स्त्री.) ४. हावभेदः (सा.) ५. विचित्रव्यापारः, रहस्यकृत्यं ६. चरित्राभिनयः (उ. रामलीला इ.)।
—गृह, सं. पुं. (सं. न.) विलास-क्रीडा,-भवनम्।
—पुरुषोत्तम, सं.-पुं. (सं.) श्रीकृष्णः।
—स्थल, सं. पुं. (सं. न.) क्रीडाभूमिः (स्त्री.)।
लीलावती, वि. स्त्री. (सं.) विलासिनी। सं. स्त्री. (सं.) भास्कराचार्यभार्या २. गणित-ग्रन्थविशेषः (३-४) रागिनी-छंदो,-भेदः।
लुंगी, सं. स्त्री. (हिं. लांग) *निष्कच्छ,-शाटी-धौतिका २. *रेखोष्णीषः-षं, चित्रशिरोवेष्टनम्।
लुंचन, सं. पुं. (सं. न.) उत्पाटनं, उद्धरणं, उत्कर्षणं, २. पृथक् करणं, अपनयनं ३. कर्तनं छेदनम्।
लुंज-जा, वि. (सं. लुंचनं>) करचरणविहीन, अपांग, व्यंग, विकल, विकलांग, श्रोण। सं. पुं., स्थाणुः, ध्रुवः, शंकुः, अपत्रपादपः।
लुंठक, सं. पुं. (स.) लुंटा(ठा)कः, दे. 'लुटेरा'।
लुंठन, सं. पुं. (सं. न.) अपहरणं, मोषणं, दे. 'लूटना' (सं. पुं.)।
लुंड[1], सं. पुं. (सं.) चौरः, तस्करः।
लुंड[2], सं. पुं. (सं. रुंडः-डं) कबंधः।
—मुंड, वि. (सं. रुंडं+मुंडं>) दे. 'लुंज' वि. तथा सं. पुं. २. पोट्टलीवत् व्यावर्तित।
लुंडा, वि. (सं. रुंड>) दे. 'लंडूरा'।
लुआठी, सं. स्त्री. (सं. उल्का+काष्ठं>) अलातं, उल्का, प्रदीप्तकाष्ठम्।
लुआब, सं. पुं. (अ.) संलग्नशीलः, फलसारः २. लाला, स्यंदिनी।

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

—दार, वि. (अ.+फ़ा.) संलग्नशील, दे. 'लसदार'।

लुक, सं. पुं. (सं. लोकः>) कुक्कुभः (=वानिंश) २. ज्वाला।

लुकना, क्रि. अ. (सं. लुक् = लोप>) दे. 'छिपना'।

—लुकछिपकर, मु., निभृतं, रहसि, रहः (सब अव्य.)।

लुकमा, सं. पुं. (अ.) कवलः, ग्रासः, गुडकः।

लुकमान, सं. पुं. (अ.) प्राचीनो वैद्य-विशेषः।

—के पास दवा नहीं, मु., असाध्य-अप्रतिकार्य-निरुपाय,-रोगः-व्याधिः-आमयः।

—को हिकमत सिखाना, मु., प्राज्ञाय प्रज्ञां दा (जु. उ. अ.), चतुरमपि चातुर्यं शिक्ष् (प्रे.)।

लुकाट, सं. पुं. (सं. लकु(क)चः) (वृक्ष) लिकुचः, शूरः, काश्यः, दृढवल्कलः, उहुः। २. (फल) लक(कु)चं, शूरं इ.।

लुकाना, क्रि. स. (हिं. लुकना) व. 'छिपना' के प्रे. रूप।

लुगदी, सं. स्त्री. (देश.) आर्द्रगोलकः-कम्।

लुगाई, सं. स्त्री. (हिं. लोग) नारी २. पत्नी।

लुच्चपन, सं. पुं. (हिं. लुच्चा) लंपटता, कामुकता २. दुर्वृत्तं, दुराचारः, दौर्जन्यम्।

लुच्चा, सं. पुं. (हिं. लुचकना, सं. लुंचन से) लुंचकः, अपहारकः, दुर्वृत्तः, दुराचारिन्, कुपथगामिन् २. लंपटः, कामुकः ३. क्षुद्रः, दुष्टः, निर्लज्जः [लुच्ची (स्त्री.)]।

लुच्ची, सं. स्त्री. (सं. चूलिकं) पक्वान्नभेदः।

लुटना, क्रि. अ., ब. 'लूटना' के कर्म. के रूप।

लुटवाना, क्रि. स. ब. 'लूटना' के प्रे. रूप।

लुटाना, क्रि. स. (हिं. लूटना) ब. 'लूटना' के प्रे. रूप। २. अमितं व्यय् (चु.), अपव्ययं-अतिव्ययं कृ, अपव्यय् (चु.) ३. मूल्यं विना दा ४. मुष्टिभिः परिक्षिप् (तु. प. अ.)-पर्यस् (दि. प. से.)। सं. पुं., अप-अति-अमित,-व्ययः २. मुधा विक्षेपः।

लुटानेवाला, सं. पुं., अपव्ययिन्, विक्षेपिन्।

लुटारू, वि. (हिं. लुटाना) अप-अति-वृथा, व्ययिन्, मुक्तहस्त, अर्थनाशिन्।

लुटिया, सं. स्त्री. (हिं. लोटा) लघुकमंडलुः।

—डुबाना, मु., आत्मानं न्यक्कृ (प्रे.)।

लुटेरा, सं. पुं. (हिं. लूटना) मार्गतस्करः, हठमोषकः, पाटच्चरः, परिपंथिन्,लुंट(टा,ठा)कः २. वंचकः, प्रतारकः।

लुढ़कना, लुढ़ना, क्रि. अ. (सं. लुंठनं) वि-लुठ् (तु. प. से.), वि-लुट् (भ्वा. दि. प. से.) २. स्रु (भ्वा. प. अ.), बहिःपत्-निर्गल् (भ्वा. प. से.), निःस्रु (भ्वा. प. अ.)। सं. पुं., वि-, लुठनं-लोटनं २. बहिः पतनं, निर्गलनं, च्यवनम्।

लुढ़काना, लुढ़ाना, क्रि. स., ब. 'लुढ़कना' के प्रे. रूप।

लुढ़ियाना, क्रि. स. (हिं. लोढ़िया) वर्त्तिकाकारं सिव् (दि. प. से.)।

लुतरा, सं. पुं. (देश.) परोक्षनिंदकः, पिशुनः, कलहसाधकः। कर्णेजपः २. अपकारकः, कुचेष्टकः। [लुतरी (स्त्री.)]।

लुत्फ़, सं. पुं. (अ.) आनंदः, मोदः २. रसः, आ-,स्वादः ३. उत्तमता ४. कृपा ५. रोचकता।

लु(लो)नाई, सं. स्त्री. (हिं. लोना) दे. 'लावण्य'(२)।

लुपरी-ड़ी, सं. स्त्री. (सं. लेपः>) दे. 'लिपड़ी' २. द्रवप्रायं भक्ष्यं, लप्सिका।

लुप्त, वि. (सं.) गुप्त, प्रच्छन्न, निभृत २. अंतर्हित, तिरोभूत, अदृष्ट ३. नष्ट, ध्वस्त। सं. पुं., लुप्तं, चौर्यधनम्।

लुब्ध, वि. (सं.) गृध्नु, गर्द्धन, दे. 'लोभी'। २. मुग्ध, मोहित, हृत। सं. पुं., दे. 'लुब्धक'।

लुब्धक, सं. पुं. (सं.) व्याधः, दे. 'शिकारी' २. लंपटः ३. गृध्नुः।

लुब्बलुबाब, सं. पुं. (अ.) तत्त्वं, सारः, सारांशः २. दे. 'गूदा'।

लुभाना, क्रिं. अ. (हिं. लोभ) विलुभ् (प्रे.), दुराचारे-कुमार्गे प्रवृत् (प्रे.) २. वि-, मुह् (प्रे.), प्रलुभ् (प्रे.) ३. सम्-, आकृष् (भ्वा. प. अ.)। क्रि. अ., दे. 'रीझना'।

लुहंडा, सं. पुं. (सं. लोहहंडी) *अयःस्थाली।

लुहां(हं)गी, सं. स्त्री. (सं. लोहांग>) *लोहांगी, लोहमुखी यष्टी-ष्टिः (स्त्री.)।

लुहार, सं. पुं. (सं. लो(लौ)हकारः) अयस्कारः, व्योकारः, कर्मारः, कर्मकारः (लुहारिन स्त्री.)।

लुहारी, सं. स्त्री. (हिं. लुहार) लो(लौ)हकारी,

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

अयस्कारी २. लोहकारव्यवसायः, कर्मारता, अयःशिल्पम् ।

लू, सं. स्त्री. (हिं. लूक) घर्मवातः, उष्णानिलः, तप्तपवनः ।

—**चलना**, क्रि. अ., उष्णानिलः वा(अ.प.अ.) ।

—**मारना या लगना**, मु., घर्मवातेन व्यथ् (भ्वा. आ. से.) ।

लूक, सं. स्त्री. (सं. लोक्>) ज्वाला २. दे. 'लुआठी' ३. दे. 'लू' ४. उल्का ।

लूट, सं. स्त्री. (हिं. लूटना) वि-,लुंट(ठ)नं, बलात् अपहरणं, मोषणं, लुंटा-ठा, लुंठितं, लुंटी-ठी-टिः-ठिः (स्त्री.) २. अन्याय्य-व्यवहारः ३. लोतं, लोत्रं, लोप्त्रं-त्री, स्तेय-अपहृत-लुंठित,-धनं, लुंपम् ।

—**का माल**, सं. पुं., दे. 'लूट' (३) ।

—**खसोट-पाट**, सं. स्त्री. लुंठनध्वंसनं, लुंठालुंठि (न.) ।

—**खून, मार**, सं. स्त्री. मोषणहिंसनं लुंठनमारणं, लुंठामारम् ।

—**पड़ना या मचना**, क्रि. अ., ब. 'लूटना' के कर्म. के रूप ।

—**मचाना**, क्रि. स., दे. 'लूटना' ।

लूटना, क्रि. स. (सं. लुंठनं) वि-,लुंट्-लुठ् (भ्वा. प. से., चु.), लुट् (भ्वा. दि. प. से.), बलात् अपह (भ्वा. प. अ.), प्रसह्य मुष् (क्र. प. से.) २. चुर् (चु.), मुष्, अपह ३. वि-,ध्वंस्-नश् (प्रे.) ४. छलेन अन्यायेन वा आदा (जु. आ. अ.)-ह ५. अत्यधिक-अनुचित,-मूल्यं आदा ६. मुह् (प्रे.), वशीकृ. मनो ह । सं. पुं., दे. 'लूट' ।

लूटने योग्य, वि., लुंठनीय, लुंठितव्य ।

लूटनेवाला, सं. पुं., दे. 'लुटेरा' ।

लूटा हुआ, वि., लुंटि(ठि)त, बलात् अपहृत-मुषित ।

लूता, सं. स्त्री. (सं.) मर्कटकः, ऊर्णनाभिः, दे. 'मकड़ी' २. पिपीलिका ३. मर्कटकमूत्र-स्पर्शजः त्वग्रोगः ।

लूती, सं. स्त्री., दे. 'लुआठी' ।

—**लगाना**, मु., कलहं जन् (प्रे.), दे. 'चुगली करना' ।

लून, वि. (सं.) छिन्न, कृत्त ।

लून, सं. पुं. (सं. लवणं) दे. 'नमक' ।

लूनिया, वि. (हिं. लून) लवण, क्षार । सं. पुं., लवणकारः ।

लूम, सं. पुं. (सं. न.) लांगूलं, पुच्छम् ।

लूमड़ी, सं. स्त्री., दे. 'लोमड़ी' ।

लूला, वि. (सं. लून>) छिन्न-लून,-पाणि-हस्त-कर २. अपांग, व्यंग ३. असक्त, असमर्थ ।

लेंड़ी, सं. स्त्री. (सं. लेंडं>) वद्धमलं, *विष्ठावर्तिः (स्त्री.) २. दे. 'मेंगनी' ।

लेंस, सं. पुं. (अं.) वीक्षम् ।

—**मेग्निफाइङ्ग लेंस**, बृहद्दर्शकवीक्षम् ।

लेंहड़ा, सं. पुं. (देश.) पशु,-वृंदं-यूथं कुलं-समजः ।

ले, लेकर, अव्य. (हिं. लेना) आरभ्य, प्रभृति, आ-, (पंचमी से भी; उ., गांव से ले(कर)= आग्रामात्, ग्रामात्, कल से ले(कर) = श्वः (प्रभृति-आरभ्य) २. गृहीत्वा, आदाय ।

लेई[1], सं. स्त्री. (सं. लेपः>) संश्लेषकलेपः, २. *सुपेष्टकचूर्णलेपः ।

लेइ[2], सं. स्त्री. (सं. लेहः) अवलेहः, दे. २. लप्तिका, द्रवप्रायसंयावः ।

लेकिन, अव्य. (अ.) किंतु, परंतु २. तथापि ।

—**अगर**, अव्य. (अ.+फ़ा.) किंतु, यदि ।

लेक्चर, सं. पुं. (अ.) व्याख्यानं, भाषणं २. प्रपाठः, अध्यापनम् ।

—**बाज़ी**, सं. स्त्री. (अं.+फ़ा.) व्याख्यान-प्राचुर्य्यम् ।

—**झाड़ना**, मु., सोत्साहं व्याख्या (अ. प. अ.) अथवा अधि-इ (प्रे., अध्यापयति) ।

लेक्चरार, सं. पुं. (अं. लेक्चरर) व्याख्यातृ, उपदेशकः, वक्तृ २. अध्यापकः, उपाध्यायः ।

लेक्टोमीटर, सं. पुं. (अं.) दुग्धमापकम् ।

लेख, सं. पुं. (सं.) लिपी(बी)-पिः(विः) (स्त्री.) २. लिखित-लिपिबद्ध,-विषयः-वार्ता ३. प्रस्तावः, निबंधः ४. दे. 'लिखाई' (१–३) । ५. गणनं, संकलनम् ।

लेखक, सं. पुं. (सं.) ग्रंथकारः, पुस्तक-लेखकः-रचयितृ-प्रणेतृ २. लिपि(पी-बी) कारः, मसिपण्यः, पंजीकारः, लिपिज्ञः, वाणिकः ।

लेखन, सं. पुं. (सं. न.) दे. 'लिखाई'(१) । २. लेखन,-कला-विद्या ३. गणनं, संख्यानं ४. भूर्जत्वच् (स्त्री.) ।

लेखनी, सं. स्त्री. (सं.) अक्षर-वर्ण,-तूली-

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

लिका, कलमः, चित्रकः, कराश्रयः, वर्णिका, शर्करी ।

लेखा, सं. पुं. (सं. लेखः>) संकलनं, संख्यानं, गणनं-ना २. व्यय-मूल्य-निरूपणं-अनुमानं ३. आयव्यय-देयादेय,-विवरणं ४. अनुमानं, विचारः ।

—डालना, मु., आयव्ययपंजिकायां नामन् (न.) लिख् (तु. प. से.) ।

—पूरा या साफ करना, मु., अवशेषं शुध् (प्रे.) ।

लेखिका, सं. स्त्री. (सं.) ग्रंथकर्त्री, पुस्तकप्रणेत्री २. लिपिकारी, लिपिज्ञा ।

लेखे, क्रि. वि. (हिं. लेखा) विचारेण २. संबंधे ।

लेख्य, वि. (सं.) लि(ले)खितव्य, ले(लि)खनार्ह, ले(लि)खनीय । सं. पुं. (सं. न.) लिखित-लिपिबद्ध,-विषयः, लेखः २. दे. 'दस्तावेज़' ।

लेजिस्लेटिव काउंसिल, सं. स्त्री. (अं.) व्यवस्थापकसभा ।

लेट[1], वि. (अं.) चिरायित, विलंबित, काल-समय,-अतीत ।

लेट[2], सं. स्त्री. (देश.) दे. 'गच' ।

लेटना, क्रि. अ. (हिं. लोटना) संविश् (तु. प. अ.), शी (अ. आ. से.) २. विश्रम् (दि. प. से.) ३. दे. 'मरना' । सं. पुं., संवेशः-शनं, शयनम् ।

लेटनेवाला, सं. पुं., संवेशेच्छुकः, शयालुः ।

लेटर, सं. पुं. (स्त्री.) (अं.) पत्रं, लेखः, लेख्यं, पत्रिका, पत्री, पत्रकं, लिखितं, सन्देशपत्रं । २. अक्षरं, वर्णः,-र्णी मातृका, अभिनिष्ठानः ।

—बाक्स, सं. पुं. (अं.) पत्रपेटिका ।

लेटाना, क्रि. स., ब. 'लेटना' के प्रे. रूप ।

लेटा हुआ, वि., संविष्ट, शयान, शयित ।

लेड, सं. पुं. (अं.) सीसं, सीसकम्, दे. 'सीसा' ।

लेडी, सं. स्त्री. (अं.) महिला, कुलांगना, आर्या २. नारी, रमणी ३. लार्डोपाधिधारकस्य पत्नी ।

—डाक्टर, सं. स्त्री. (अं.), जीवदा, चिकित्साजीविनी, चिकित्सिका, रोगहारिणी ।

लेन, सं. पुं. (हिं. लेना) आदानं, ग्रहणं, धारणं २. दे. 'लहना' (१-२) ।

—दार, सं. पुं. (हिं. + फ़ा.) उत्तमर्णः, ऋणदः, महाजनः ।

—देन, सं. पुं. (हिं.) आदानप्रदानं, व्यवहारः २. कौसीद्यं, वृद्धिजीवनं-विका ।

लेना, क्रि. स. (सं. लभनं) आदा (जु. आ. अ.), प्रति-इप् (तु. प. से.), प्रति-परि,-ग्रह् (क्र. प. से.) २. अधिगम् (भ्वा. प. अ.), आसद् (प्रे.), प्राप् (स्वा. प. अ.), लभ् (भ्वा. आ. अ.) ३. धृ (भ्वा. प. अ., चु.), अव-आ-लंब् (भ्वा. आ. से.), ग्रह् ४. जि (भ्वा. प. अ.), अभिभू (भ्वा. प. से.), वशीकृ ५. क्री (क्र्. उ. अ.) ६. ऋणं ग्रह् ७. अंके-क्रोडे निधा (जु. उ. अ.) ८. स्वी-अंगी-कृ, प्रतिपद् (दि. आ. अ.) ९. प्रत्युद्-गम्-व्रज् (भ्वा. प. से.)-या (अ. प. अ.) सत्कृ, संमन्-संभू (प्रे.) १०. कार्यभार स्वीकृ ११. रुचि (स्वा. प. अ.), संग्रह् (क्र्. प. से.) १२. उपहस् (भ्वा. प. से.), व्यंग्योक्तिभिः लज्ज् (प्रे.) । सं. पुं., आदानं, ग्रहणं, प्रतिग्रहः, अधिगमनं, प्रापणं, आसादनं, आलंबनं, धारणं, ऋणादानं, अंगीकरणं, वशीकरणं, संचयः-यनं, क्रयणं, क्रयः इ. ।

लेने योग्य, वि. (सं.) आदेय, ग्राह्य, ग्रहीतव्य, प्राप्य, आसादनीय, क्रेय, क्रयणीय इ. ।

लेने वाला, सं. पुं., आदातृ, गृहीतृ, अधिगंतृ, आसादयितृ, अंगीकर्तृ, क्रेतृ, ग्राहकः ।

लिया हुआ, वि. (सं.) आत्त, आदत्त, गृहीत, प्राप्त, अधिगत, धृत, अंगीकृत, वशीकृत, क्रीत इ. ।

ले आना, मु., दे. ३. 'लाना' ।

ले चलना या ले जाना, मु., आदाय गम् २. आत्मना सह नी (भ्वा. प. अ.) ।

ले डूबना, मु., परमपि आत्मना सह क्षी-अवसद्-नश् (प्रे.) ।

ले देकर, मु., सर्वं संकलय्य २. कृच्छ्रेण, कथमपि ।

लेना एक न देना दो, मु., न कोऽप्यर्थः, न किमपि प्रयोजनम् ।

लेना देना, मु., दानादानं, आदानप्रदानं २. कौसीद्यं, वृद्धिजीवनम् ।

लेने के देने पड़ना, मु., भद्रस्यामद्रं फलं, इष्टाशायामनिष्टप्रसंगः ।

ले भागना, मु., सह नीत्वा पलाय् (भ्वा. आ. से.), अपह (चु. उ. अ.) ।

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

ले भरना, मु., दे. 'ले डूबना'।
लेन्स, सं. पुं. (अं.) काचः।
लेप, सं. पुं. (सं.) अभि,-अंजनं, उपदेहः, समालभः, उपनाहः, प्रलेपपट्टिका २. लेपनं, सुधा ३. लेपस्तरः ४. उद्वर्तनं, दे. 'उबटन' ५. संपर्कः, सम्बन्धः।
—चढ़ाना, क्रि. स., दे. 'लीपना'।
लेपक, सं. पुं. (सं.) लेपिन्, लेपकारः, पलगंडः, लेप्यकृत्।
लेपन, सं. पुं. (सं. न.) दे. 'लिपाई' (१)।
लेपना, क्रि. स., दे. 'लीपना'।
लेपालक, सं. पुं. (हिं. लेना+पालना) दत्तकः, दे.
लेबर, सं. पुं. (अं.) परि-,श्रमः, आयासः, प्रयासः २. श्रमिक-कर्मकर,-वर्गः।
—पार्टी, सं. स्त्री. (अं.) श्रमिकदलः लम्।
—यूनियन, सं. स्त्री. (अं.) श्रमिक-कर्मकर-, संघः-समाजः-सभा।
लेबुल, सं. पुं. (अं.) लेपपत्रम्।
लेबोरेटरी, सं. स्त्री. (अं.) प्रयोगशाला, २. रसायनशाला।
लेमोनेड, सं. पुं. (अं.) जंबीर,-पेयं-पानकम्।
लेरुवा, सं. पुं. (सं. लेहः>) दे. 'बछड़ा'।
लेवा, वि. (हिं. लेना) आ,-दातृ-दायक।
—देवा, सं. पुं., आदानप्रदानम्।
नाम—, सं. पुं., पुत्रः २. दायादः।
लेश, सं. पुं. (सं.) दे. 'लव' २. चिह्नं, लक्षणं ३. संबंधः ४. अलंकारभेदः (सा.) २. अल्प, स्तोक।
—मात्र, वि. (सं.) अणु-अल्प,-मात्र (–त्रा, त्री स्त्री.)।
लेस, सं. पुं., दे. 'लासा' (१)।
—दार, वि. (हिं+फ़ा.) दे. 'लसदार'।
लेहन, सं. पुं. (सं. न.) जिह्वया स्वादनं-स्वदनं-रसनम्।
लेहाज़ा, क्रि. वि. (अ.) अतः, अतएव।
लेहिन, सं. पुं. (सं.) टंकणं-नं, रसशोधनः, बिडम्।
लेह्य, वि. (सं.) लेहनीय, लेटव्य। सं. पुं. (सं. न.) दे. 'अवलेह' २. लेहनीयाहारः ३. अमृतम्।
लेन, सं. स्त्री., दे. 'लेना'।
लैसंस, सं. पुं. (अं. लाइसेंस) अधिकारपत्रं. अनुज्ञालेखः।
लैस, सं. पुं. (अं. लेस) सज्ज, सन्नद्ध, सिद्ध २. जालाभरणं, दे. 'फ़ीता'।
लोंद, सं. पुं., दे. 'मलमास'।
लोंदा, सं. पुं. (सं. लोष्टः-ष्टं) आर्द्र-,पिंडः (–डं)-घनः, क्लिन्नगोलः (–लं)-लोष्टः(–ष्टं)।
लो, अव्य. (हिं. लेना) दृश्यतां, प्रेक्ष्यतां, अवलोक्यतां। (केवल इन्हीं रूपों में)।
लोई[1], सं. स्त्री. (सं. लोमीय) लौमी, नीशारः, आविकं. ऊर्णायुः, कंबलभेदः।
लोई[2], सं. स्त्री., दे. 'पेड़ा' (गूंधे हुए आटे का)।
लोक, सं. पुं. (सं.) भुवनं, भूर्भुवःस्वरादयः चतुर्दशस्थानविशेषाः २. जगत् (न.),जगती, विश्वं, चराचरं, ब्रह्मांडं, भुवनं, विष्टपं ३. निआ,-वासः ४. दिशा, प्रदेशः ५. लोकः-काः, जनः-नाः ६. समाजः ७. प्राणिन्।
—कंटक, सं. पुं. (सं.) जनपीडकः।
—तंत्र, सं. पुं. (सं. न.) जन-प्रजा-तंत्रम्।
—त्रय, सं. पु. (सं. न.) त्रिभुवनं, त्रैलोक्यं, त्रिलोकी।
—नाथ, सं. पुं. (सं.) ब्रह्मन् (पुं.) २. विष्णुः ३. शिवः ४. बुद्धः ५. लोकपालः।
—पति, सं. पुं. (सं.) ब्रह्मन् (पुं.) २. नृपः ३. लोकपालः।
—परलोक, सं. पुं. (सं.-कौ) उभौ लोकौ, लोकद्वयम्।
—पाल, सं. पुं. (सं.) दिक्पालः २. नृपः।
—प्रवाद, सं. पुं. (सं.) जन-लोक,-रवः-श्रुतिः (स्त्री.)-प्रवादः।
—मर्यादा, सं. स्त्री. (सं.) लोक, आचारः-व्यवहारः, जगद्रीतिः (स्त्री.)।
—यात्रा, सं. स्त्री. (सं.) जीवनं, प्राणधारणं।
—विश्रुत, वि. (सं.) जगद्विख्यात। २. व्यवहारः, लौकिककृत्यानि (न. बहु.)।
—श्रुति, सं. स्त्री. (सं.) दे. 'लोकप्रवाद'।
—संग्रह, सं. पुं. (सं.) लोक-जन,-रंजनं-प्रसादनं २. लोकहितैषणा।
लोकांतर, सं. पुं. (सं. न.) पर-प्रेत,-लोकः।
लोकाचार, सं. पुं. (सं.) जगद्रीतिः-रूढ़िः (स्त्री.), लौकिक, लोक, नयः-व्यवहारः।

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

लोकाट, सं. पुं. (चीनी लुः+क्यू) लवकटं, चैनम् ।

लोकालोक, सं. पुं. (सं.) चक्रवालः, पर्वत-विशेषः (पुराणं) ।

लोकैषणा, सं. स्त्री. (सं.) अभ्युदयाभिलाषः २. स्वर्गलिप्सा ।

लोकोक्ति, सं. स्त्री. (सं.) आभाणकः, जनवादः, लौकिक-न्यायः २. अलंकारभेदः (सा०) ।

लोकोत्तर, वि. (सं.) अलौकिक, अमानुष, अपार्थिव, लोकातिशायिन्, दिव्य, अति,-विलक्षण-अद्भुत ।

लोग, सं. पुं. (सं. लोकः) लोकः-काः, जनः-नाः, मानवाः, मनुष्याः, नराः, मानुषाः, मर्त्याः, मनुजाः (सब बहु.) ।

लोच[1], सं. स्त्री. (हिं. लचक) दे. 'लचक' २. कोमलता, मृदुता ।

लोच[2], सं. पुं. [सं. रुचिः (स्त्री.)] अभि-लाषः, इच्छा ।

लोचन, सं. पुं. (सं. न.) नयनं, नेत्रम्, दे. 'आँख' ।

लोट, सं. स्त्री. (हिं. लोटना) लु(लो)ठनं, लोटनं, वेल्लनं, लुंटा,-लुंठा, लोटः ।

—पोट, वि., लुटि(ठि)त, वेल्लित, स्खलित २. मुग्ध, बद्धभाव, अनुरागिन् ३. वि-,आकुल ४. व्यत्यस्त, विपर्यस्त ।

—जाना, मु., मूर्च्छ् (भ्वा. प. से., मूर्च्छति) २. मृ (तु. आ. अ.) ३. विश्रम् (दि. प. से.) ४. चकितो मुग्धो वा भू ।

—पोट होना, मु., (पीडादिभिः) वि-,लुठ् (तु. प. से., भ्वा. आ. से.) २. भावं-अनुरागं बंध् (क्र. प. अ.), ३. सहसा विलुठ्य वा मृ (तु. आ. अ.) ।

—होना, मु., अनुरक्त-आसक्त (वि.) भू २. व्याकुलीभू ।

लोटन, सं. पुं. (सं. न.) दे. 'लोट' २. *लोट-नकोतः ३. लांगलभेदः ४. मार्गशर्करा ।

लोटना, क्रि. अ. (सं. लोटनं) लुट् (भ्वा. दि. प. से.), लुठ् (भ्वा. आ. से., तु. प. से.) २. पार्श्वं परिवृत् (प्रे.) ३. आकुल-व्याकुल (वि.)भू । सं. पुं. तथा भाव, दे. 'लोट' सं. स्त्री. ।

लोटा, सं. पुं. (हिं. लोटना) कमंडलुः, दे. ।

लोडन, सं. पुं. (सं. न.) मथनं, आ-वि-लोडनम्, मंथः ।

लोडित, वि. (सं.) नथित, आ-वि-लोडित, व्याघट्टित ।

लोढ़ा, सं. पुं, (सं. लोष्टः-ष्टं>) दे. 'बट्टा' ।

लोथ-थि, सं. स्त्री. (सं. लोष्टः-ष्टं>) शवः, दे. ।

—पोथ, मु., अति,-शिथिल-श्रांत-खिन्न ।

लोथड़ा, सं. पुं. (हिं. लोथः) पलल-मांस,-पिंडः (डं) ।

लोद्-ध, सं. स्त्री. (सं. लोधः) (लाल) लोध्रः, रक्तः, मार्जनः, तिरीटः, तिंदुकः । (सफेद) शुक्लः, महा,-शबरः, लोध्रः, शावरः ।

लोन, सं. पुं. (सं. लवणं) दे. 'नमक' २. लावण्यं, विशिष्टसौन्दर्यम् ।

लोना, वि. (हिं. लोन) लवण दे. 'नमकीन' २. सुन्दर, चारु । सं. पुं., *कुडय-भित्ति,-लवणं ३ लवणितकुड्यस्य धूलिः (स्त्री.) ।

लोनिया, सं. पुं. (हिं. लोग) दे. 'लुनिया' । सं. पुं. ।

लोप, सं. पुं. (सं.) वि-,नाशः, क्षयः, वि,-ध्वंसः ३. अदर्शनं, तिरोभावः, अंतर्धानं ३. अभावः, अविद्यमानता ४. वर्णविनाशः (व्या.) ५. विच्छेदः, विरामः ।

लोपामुद्रा, सं. स्त्री. (सं.) अगस्त्यमुनिपत्नी, लोपः, वरप्रदा, कोशीतकी ।

लोबान, सं. पुं. (अ.) सुगंधिनिर्यासभेदः *लोबानम् ।

लोबिया, सं. पुं. (सं. लोभ्यः = मूँग) क्षुधा-भिजनकः, चप(व)लः, चर्वरः, सुकुमारः, शिंबिका, दीर्घ,-शिम्बी-बीजः ।

लोभ, सं. पुं. (सं.) परद्रव्याभिलाषः, गृध्या, गृध्नता, स्पृहा, लौल्यं, लिप्सा, गर्द्धः, तृष्णा, कांक्षा, शंसा, लोलुपता-भता, इच्छा, वांछा, मनोरथः, अभिलाषः, कामः २, कार्पण्यं, कदर्यता ।

लोभित, वि. (सं.) मोहित, आकृष्ट, हृतचित्त, लुब्ध, मुग्ध ।

लोभी, वि. (सं.-भिन्) गृध्नु, गर्द्धन, लुब्ध, लोलुप-भ, लिप्सु, अभिलाषुक, तृष्णक ।

लोम, सं. पुं. (सं.) लोमन् (न.) दे. 'रोंगटा' २. लांगूलं पुच्छम् ।

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

—हर्षण, सं. पुं. (सं. न.) रोमांचः, दे. । वि., दे. 'रोमहर्षण' ।
लोमड़, सं. पुं. (सं. लोमः>) *लोमशः, *लोमाशः, दे. 'गीदड़' ।
लोमड़ी, सं. स्त्री. (हिं. लोमड़) लोमशा, लोमाशिका, दे. गीदड़ी' (संस्कृत में गीदड़-लोमड़ तथा गीदड़ी-लोमड़ी के लिए समान शब्दों का ही प्रयोग होता है ।) ।
लोमश, सं. पुं. (सं.) ऋषिविशेषः २. मेषः, दे. 'भेड़ा' । वि., बहुलोमान्वित, केशिन्, केशिक २. ऊर्णामय (-यी स्त्री.), और्ण (-र्णी स्त्री.) ।
—मार्जार, सं. पुं. (सं.) गंधमार्जारः, पूतिकः, मूत्रपातनः ।
लोरी, सं. स्त्री. (सं. लोल>) निद्रा-शयन-, गीतिका ।
—देना, क्रि. स., निद्रा-गीतिकया स्वप् (प्रे.) ।
लोल, वि. (सं.) सकंप, कंपमान, वेपमान, कंपित, कंप २. चंचलचित्त ३. क्षणभंगुर, पल, क्षणिक ४. उत्सुक, उत्कंठित ।
लोला, सं. स्त्री. (सं.) जिह्वा, रसना २. लक्ष्मीः-श्रीः (स्त्री.) ।
लोलुप, वि. (सं.) दे. 'लोभी' ।
लोलुपता, सं. स्त्री., दे. 'लोभ' ।
लोशन, सं. पुं. (अं.) व्रणक्षालकं, धावनौषधं, *औषधजलम् ।
लोष्ट सं. पुं. (सं. पुं. न.) लोष्टः, मृत्तिकाखंडं, दलिः (पुं. स्त्री.), दलनी २. अश्मखंडं-डः ।
लोह, सं. पुं. (सं. लोहः-हं) लौहं, दे. 'लोहा' २. रुधिरं ३. रक्तछागः ।
—कांत, सं. पुं. (सं.) अयस्कांतः, लोह-, चुंबकः ।
—कार, सं. पुं. (सं.) अयस्कारः, दे. 'लुहार' ।
—किट्ट, सं. पुं. (सं. न.) लोहं-मलं, मंडूरं, लोहजं, कृष्णचूर्णं, अयो,-मल-रजस् (न.) ।
—चून,
—चूर,
—चूर्ण, } सं. पुं. (सं. लोहचूर्ण) कालक्षोदः ।
—द्रावी, सं. पुं. (सं.-विन्) लोहितः, टंकणं न. दे. 'सोहागा' ।
लोहाँगी, सं. स्त्री. (सं. लोहांगी) लोहशीर्ष,-यष्टी-दंडः-लगुडः ।
लोहा, सं. पुं. (सं. लोहः-हं) कृष्ण-, अयस् (न.)-आयसं, कालं, कालायसं, लौहं, अश्मगिरि,-सारः, दृढं, पिंडं २. अस्त्रं, शस्त्रं, ३. लोहमयद्रव्यम् । वि., रक्त, लोहित २. अति,-दृढ-कीकस ।
लोहे का, वि., लौह(-ही स्त्री.), लोह अयो,-मय (-यी स्त्री.), आयस (-सी स्त्री.), लोह-, आयस-, ।
लोहे का चना, मु., सुदुष्करं कर्मन् (न.) ।
लोहे के चने चबाना, मु., सुदुष्करं कर्म संपद् (प्रे.) ।
—गहना या लेना, मु., युध् (दि. आ. अ.) दे. 'लड़ना' ।
—बजना, मु., युद्धं प्रवृत्त (भ्वा. आ. से.) ।
(किसीका)—मानना, मु., (अन्यस्य) प्रभुत्वं *स्वीकृ २. वि-परा,-जि (कर्म.) ।
लोहार, सं. पुं. (सं. लोहकारः) दे. 'लुहार' ।
—की स्याही, सं. स्त्री., दे, 'हीराकसीस' ।
लोहित, वि. (सं.) रक्त, शोण । सं. पुं. (सं.) मंगलग्रहः, कुजः, भौमः २. रक्तवर्णः । (सं. न.) रक्तं, रुधिरम् ।
—चंदन, सं. पुं., केसरः-रं, कश्मीरजं, कुंकुमम् ।
—नयन, वि., (सं.) रक्त-लोहित, नेत्र-नयन-ईक्षण, कुपित, क्रुद्ध ।
—शतपत्र, सं. पुं., कोकनदं, रक्त,-उत्पलं-नीरजम् ।
लोहिया, सं. पुं. (हिं. लोहा) लोहपण्य-विक्रेतृ, लोहविक्रयिन् २. लोहितवर्णभः ३. लोह-गुलिका ।
लोहू, सं. पुं. (सं. लोहित) दे. 'रक्त' तथा 'लहू' ।
लौं, अव्य. (हिं. लग) दे. 'तक' २. सदृश, तुल्य ।
लौंग, सं. पुं. (सं. लवंग) देवकुसुमं, श्री,-प्रसूनं-पुष्पं-संज्ञं, लवंगकं, दिव्यं, शेखरं, लवं २. लवंगं (घ्राणभूषणभेदः) ।
लौंडा, सं. पुं. (हिं. लोना) (लावण्यविशिष्टः) बालकः-दारकः । वि., अबोध, अज्ञ २. चपल, चंचल ।
—पन, सं. पुं., बाल्यं २. चांचल्यम् ।
लौंडी-डिया, सं. स्त्री. (हिं. लौंडा) कन्या, कुमारी २. पुत्री ३. दासी ।
लौंडेबाज़, वि. (हिं.+फ़ा.) पुंमैथुनकारिन् ।

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

लौंडेबाज़ी, सं. स्त्री. (हिं.+फ़ा.) पुंमैथुनम् ।

लौ[1], सं. स्त्री. (हिं. लपट) कीलः-ला, अग्नि-ज्वाला(लः)ज्वाला, जिह्वा, शिखा २. दीपशिखा ।

लौ, सं. स्त्री. (हिं. लाग) अभिलाषः, रागः २. चित्त-मनो,-वृत्तिः(स्त्री.) ३. कामना,वांछा ।

—**लगना**, क्रि. अ., उद्यत (वि.) भू २. (भक्त्यादिषु) लीन-मग्न-निरत(वि.) भू ।

—**लगाना**, क्रि. स., सततं अभिलष् (भ्वा. प. से.) २. आत्मानं भक्त्यादिषु निमस्ज्-आसंज् (प्रे.) ३. आश्रेड् (प्रे.) ।

—**लीन**, वि. (सं.) मग्न, आसक्त, निरत ।

लौकिक, वि., (सं.) सांसारिक, ऐहिक, प्रापंचिक, लौक्य २. व्यावहारिक, आचारिक ।

लौकी, सं. स्त्री. (सं. लाबु-बूः दोनों स्त्री.) अलाबुः बूः (स्त्री.), दे. 'कद्दू' ।

लौटना, क्रि. अ. (हिं. उलटना) दे. वापस आना' तथा 'वापस जाना' ।

लौटफेर, सं. पुं. (हिं. लौटना+फेरना) बृहत्-महा,-परिवर्तः-र्त्तनम् ।

लौटाना, क्रि. स., दे. 'वापस करना' ।

लौह, सं. पुं. (सं. न.) दे. 'लोहा' (१) । वि., दे. 'लोहे का' ('लोहा' में) ।

व

व, देवनागरीवर्णमालाया ऊनत्रिंशो व्यंजनवर्णः, वकारः ।

वंक, वि. (सं.) अराल, वृजिन, कुंचित, वक्र, आनत, जिह्म, वेल्लित, आभुग्न, कुटिल । सं. पुं. (सं.) नदीवक्रम् ।

वंकिम, वि. (सं.) ईषत्-किंचित,-अराल-वक्र-वृजिन ।

वंग, सं. पुं. [सं. वंगाः (पुं. बहु.)] वंगप्रांतः (=बंगाल) । (सं. न.) त्रपुः, त्रपु (न.), रंगं, नागजं, कस्तीरं २.सीसं-सकं, सीसपत्रम् ।

—**भस्म**, सं. पुं. [सं.-भस्मन् (न.)] रंगभस्मन् (न.) ।

वंगन, सं. पुं., दे. 'बैंगन' ।

वंचक, वि. तथा सं. पुं. (सं.) कपटिन्, प्रतारक(:), धूर्त्त (:) ।

वंचना, सं. स्त्री. (सं.) वंचनं, प्रतारणं-णा, मा.या, कपटं, कैतवं, वंचथः ।

वंचित, वि. (सं.) प्रतारित, विप्रलब्ध २. हीन, रहित ।

वंदन, सं. पुं. (सं. न.) वंदना, प्रणामः, प्रणतिः (स्त्री.), नमस्कारः २. पूजा, अर्चा, आराधना २. स्तुतिः-नुतिः (स्त्री.) ।

—**वार**, सं. स्त्री. (सं. वंदनमाल्यं) वंदनमालिका, तोरणस्रज् (स्त्री.) ।

वंदना, सं. स्त्री. (सं.) दे. 'वंदन' (१-३) ।

वंदनीय, वि. (सं.) नमस्य, वंद्य २. पूज्य, अर्चनीय ३ स्तुत्य, न(ना)व्य ।

वंदी, सं. पुं. (सं.-दिन्) स्तुतिपाठकः, मा(म)-गधः, चारणः, वंदथः २. कारागुप्तः, बंदी-दिः (स्त्री.) ।

—**गृह**, सं. पुं. (सं. न.) कारा, कारा,-गृह-गारम् ।

वंद्य, वि. (सं.) दे. 'वंदनीय' ।

वंध्या, सं. स्त्री. (सं.) दे. 'बंध्या' ।

वंश, सं. पुं. (सं.) कुलं, अन्वयः, अन्ववायः, गोत्रं, अभिजनः २. जातिः (स्त्री.), वर्गः ३. कुटुंबं, गृहजनः, पुत्रकलत्रादीनि (न. बहु.) ४. वेणुः, दृढग्रंथिः, दे. 'बांस' । ५. मुरली, वंशी ६. पृष्ठास्थि (न.), पृष्ठवंशः ७. भुजादीनां लंबास्थि (न.) ।

—**ज**, सं. पुं. (सं.) पुत्रः २. संतानः ।

—**धर**, सं. पुं. (सं.) वंशजः, संततिः (स्त्री.) ।

—**लोचन**, सं. पुं. [सं.-लो(रो)चना]वंशशर्करा, वंशज-जा, वांशी, शुभा ।

—**हीन**, वि. (सं.) निर्वंश २. अपुत्र ।

वंशानुक्रम, सं. पुं. (सं.) वंश-, अन्वयः-क्रमः,-परम्परा (स्त्री.)-अवलिः-विततिः ।

वंशावली, सं. स्त्री. [सं.-ली-लिः (स्त्री.)] वंश,-क्रमः-श्रेणी-परंपरा ।

वंशी, सं. स्त्री. (सं.) वंशिका, मुरली दे. ।

—**धर**, सं. पुं. (सं.) मुरलीधरः, श्रीकृष्णः

व, अव्य. (फ़ा.) च, दे. 'और' ।

वक, सं. पुं. (सं.) दे. 'बगला' २. राक्षस-विशेषः ।

—**वृत्ति**, सं. स्त्री. (अ.) विडालवृत्तिः, दंभः ।

वकालत, सं. स्त्री. (अ.) अभिभाषकता-त्वं, वाक्कीलत्वं, व्यवहारदर्शकता-त्वं २. परप्रातिनिध्यं, परकार्यसाधकत्वं ३. दूतकर्मन् (न.) ४. परपक्षमंडनम् ।

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

—करना, क्र. अ., परिपक्षं समर्थ् (चु.) २. अभिभाषकवृत्तिं उपजीव् (भ्वा. प. से.)।
—नामा, सं. पुं. (अ.+फ़ा.) अभिभापकता-पत्रम्।
वकील, सं. पुं. (अं.) अभिभाषकः, व्यवहार-दर्शकः, वाक्कीलः, पक्षवादिन् २. राज-, दूतः ३. प्रतिनिधिः, प्रतिहस्तकः ४. पर-पक्ष-पोषकः।
वकुल, सं. पुं. (सं.) दे. 'बकुल'।
वकूफ़, सं. पुं. (अ.) ज्ञानं २. बुद्धिः (स्त्री.)।
बे—, वि. (फ़ा.+अ.) निर्बुद्धि।
वक्त, सं. पुं. (अ.) समयः, कालः २. अवसरः ३. अवकाशः ४. ऋतुः ५. मृत्युकालः।
—की चीज़, सं. स्त्री., कालानुकूलो रागः।
—बे वक्त, क्रि. वि. कालेऽकाले वा, समयेऽ-समये वा।
—काटना, मु., येन केन प्रकारेण कालं या (प्रे. यापयति) २. मनो विनुद् (प्रे.)।
—पड़ना, मु., आपद् आपत् (भ्वा. प. से.), उपनम् (भ्वा. प. अ.)।
वक्तन् फ़ौक़तन, क्रि. वि. (अ.) कदा कदा, यदा कदा २. यथाकालम्।
वक्तव्य, वि. (सं.) कथनीय, वचनीय २. हीन, कुत्सित। सं. पुं. (सं. न.) कथनं. वचनं २. व्याख्यानम्।
वक्ता, सं. पुं. (सं. वक्तृ) वाग्मिन्, वाक्पटुः २. व्याख्यातृ, उपदेशकः ३. कथ(थि)कः।
वक्तृता, सं. स्त्री. (सं.) वक्तृत्वं, वाग्मिता, वाक्पाटवं, भाषणकौशलं २. व्याख्यानं, भाषणं, कथनम्।
वक्त्र, सं. पुं. (स. न.) मुखं, आस्यं, लपनं, वदनम् २. चंचुः—चूः (स्त्री.) ३. लम्बास्यं, प्रलम्बमुखम् ४. वाणाग्रम् ५. कार्यारम्भः ६. परिधानभेदः।
—ज, सं. पुं. (सं.) ब्राह्मणः, विप्रः २. दन्तः, दशनः, रदनः, खादनः।
—तुंड, सं. पुं. (सं.) गणेशः, गजवदनः।
—शोधन, सं. पुं. (सं. न.) मुखशुद्धिः (स्त्री.) २. निंबुकं, जंबीरम् ३. मातुलुंगम्।
वक्फ़, सं. पुं. (अ.) परोपकाराय दानं २. धर्मार्थं उत्सृष्टा संपद् (स्त्री.)।
—नामा, सं. पुं. (अ.+फ़ा.) दानपत्रम्।
वख़्फ़ा, सं. पुं. (अ.) अवकाशः २. उद्योग-विश्रांतिः (स्त्री.)।
वक्र, वि. (सं.) दे. 'बंक' २. छलिन्, कपटिन्, धूर्त्त। (सं. पुं.) शनैश्चरः २. मंगलः, भौमः। (सं. न.) नदीवक्र, वंकः।
—गामी, वि. (सं.) कुटिलगति २. शठ, कुटिल।
—तुंड, सं. पुं. (सं.) गणेशः २. शुकः।
वक्रता, सं. स्त्री. (सं.) जिह्मता, आनतिः (स्त्री.), कौटिल्यं २. छलं, कपटं, शाठ्यम्।
वक्रोक्ति, सं. स्त्री. (सं.) काकूक्तिः (स्त्री.) २. शब्दालंकारभेदः (सा.) ३. चमत्कृत-कुटिल,-उक्तिः (स्त्री.)।
वक्षःस्थल, सं. पुं. (सं. न.) उरस्-वक्षस् (न.), अंकः, उत्संगः, उरःस्थलम्।
वग़ैरह, अव्य. (अ.)-आदि,-प्रभृति।
वचन, सं. पुं. (सं. न.) भाषा, सरस्वती, वाणी दे. २. उक्तिः (स्त्री.), कथनं, भाषणं, वाक्यं ३. एकत्वादिबोधकः शब्दरूपभेदः (व्या.) ४. प्रतिज्ञा, संगरः।
वजह, सं. स्त्री. (अ.) कारणं, हेतुः।
वज़न, सं. पुं. (अ.) भारः, गुरुत्वम्।
वज़नी, वि. (अ. वज़न) भारवत्, गुरु २. मान्य, प्रभावशालिन्।
वज़ा, सं. स्त्री. (अ. वज़अ) रचना २. आकृतिः (स्त्री.) ३. आचारः, व्यवहारः ४. दशा ५. रीतिः (स्त्री.)।
वज़ारत, सं. स्त्री. (अ.) सांचिव्यं, अमात्यत्वं, मंत्रित्वम्।
वज़ीफ़ा, सं.पुं.(अ.) (छात्र)-वृत्तिः-भृतिः(स्त्री.)।
वज़ीर, सं. पुं. (अ.) अमात्यः, सचिवः, मंत्रिन्, मंत्रधरः, मंत्रज्ञः, धी-बुद्धि,-सहायः।
वज़ीरी, सं. स्त्री., दे. 'वज़ारत'।
वज़ू, सं. पुं. (अ.) प्रार्थनायाः पूर्वं अंग-प्रक्षालनं (इस्लाम), *अङ्गस्पर्शः।
वजूद, सं. पुं. (अ.) अस्तित्वं, सत्ता २. शरीरं ३. सृष्टिः (स्त्री.) ४. अभिव्यक्तिः (स्त्री.)।
वज्र, सं. पुं. (सं. पुं. न.) कुलिशं, पविः, अशनिः (पुं. स्त्री.), दंभोलिः, ह्रादिनी, शतधारं, अभ्रोत्थं, शंबः, गिरिकंटकः २. हीरः-रं, हीरकः, रत्नं २. विद्युत् (स्त्री.)। वि., अति,-दृढ-संहत-कीकस-कठिन, दुर्भेद्य २. घोर, भीषण।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

—घर, सं. पुं. (सं.) इंद्रः, वज्रिन्, वज्र, पाणिः-बाहुः-मुष्टिः ।
—पात, सं. पुं. (सं.) वज्राघातः ।
—मय, वि. (सं.) दे. 'वज्र' वि. (१) ।
—हृदय, वि. (सं.) पाषाणहृदय, निष्करुण, निर्दय ।
वट, सं. पुं. (सं.) न्यग्रोधः, वृक्षनाथः, रक्तफलः, क्षीरिन्, जटालः, अवरोही, महच्छायः ।
वटी, सं. स्त्री. (सं.) गुली-लिका, वटिका, निस्तली, दे. 'गोली' ।
वटु, वटुक, } सं. पुं. (सं.) बालकः, माणवकः २. वर्णिन्, ब्रह्मचारिन् ।
वड़ी, सं. स्त्री. (सं. वटी) मापवटी ।
वणिक्, सं. पुं. (सं. वणिज्) पण्याजीवः, क्रयविक्रयिकः २. वैश्यः ।
वतन, सं. पुं. (अ.) जन्म,-भूः-भूमिः (दोनों (स्त्री.), स्वदेशः २. निवासस्थानं ३. जन्मस्थानम् ।
वतीरा, सं. पुं. (अ.) प्रथा, रीतिः (स्त्री.) २. आचारः, वृत्तम् ।
वत्स, सं. पुं. (सं.) गोशिशुः, तर्णकः, दोषःपकः, तंतुभः २. शिशुः, बालकः ।
वत्सतर, सं. पुं. (सं.) दम्यः, दुर्दांतः, गडिः ।
वत्सतरी, सं. स्त्री. (सं.) त्रिहायणी गौः (स्त्री.) ।
वत्सर, सं. पुं. (सं.) अब्दः, हायनः, वर्षम् ।
वत्सल, वि. (सं.) अपत्यानुरागिन्, संतानस्नेहिन्, पुत्रप्रेमिन् २. स्नेहिन्, प्रेमिन् ।
वत्सलता, सं. स्त्री. (सं.) (सन्तानादिकस्य) अनुरागः-स्नेहः ।
वदन, सं. पुं. (सं. न.) मुखं, आननम ।
वदान्य, वि. (सं.) बहुप्रद, दानशील, उदार २. वल्गुवाच्, मधुरभाषिन् ।
वदाम, सं. पुं., दे. 'बादाम' ।
वदावद, वि. (सं.) वाचाल, वाचाट ।
वध, सं. पुं. (सं.) घातः, हननं, हत्या, विशसनं, प्रमाथः, संहारः ।
वधक, सं. पुं. (सं.) नरघातकः, हंतृ, हिंसकः २. व्याधः, शाकुनिकः ३. मृत्युः ।
वधू, वधूटी, सं. स्त्री. (सं.) नवोढ़ा, नववधूः, पाणिगृहीता २. पत्नी ३. पुत्रवधूः ।
वध्य, वि. (सं.) वधार्ह, शीर्षच्छेद्य, हंतव्य ।
वन, सं. पुं. (सं. न.) अरण्यं, विपिनं, अटवी, काननं, गहनं, द(दा)वः, कांतारं २. वाटिका ३. जलम् ।
—चर, सं. पुं. (सं.) वन,-चारिन्-विहारिन् २. वन्य,-पशुः-मनुष्यः ।
—माली, सं. पुं. (सं.) श्रीकृष्णः २. वनपुष्पमालाधारिन् ।
—राज, सं. पुं. (सं.) सिंहः ।
—वास, सं. पुं. (सं.) विपिनवसतिः (स्त्री.) ।
—वासी, सं. पुं. (सं.-सिन्) आटविकः, वनेचरः, वनौकस्, वनिन् ।
—स्थली, सं. स्त्री. (सं.) कानन-भूमिः, अरण्यप्रदेशः ।
वनस्पति, सं. स्त्री. (सं. पुं.) पुष्पहीनः फलिवृक्षः (उ. बड़, पीपल आदि) २. वृक्षः, पादपः ३. वटः, न्यग्रोधः ।
—शास्त्र, सं. पुं. (सं. न.) वनस्पतिविज्ञानम् ।
वनिता, सं. स्त्री. (सं.) नारी, रमणी २. प्रिया, कांता ।
वनी, सं. स्त्री. (सं.) वनं, दे. ।
वनी, सं. पुं. (सं.-निन्) वानप्रस्थः दे. २. दे. 'वनवासी' ।
वन्य, वि. (सं.) वन,-उद्भव-उद्भूत-जात, आरण्यक, जांगल २. असभ्य, अशिष्ट ३. क्रूर, हिंस्र ।
वपनं, सं. पुं. (सं. न.) केशमुंडनं २. बीजाधानम् ।
वपा, सं. स्त्री. (सं.) मेदस् (न.), वसा ।
वपु, सं. पुं. [सं. वपुस् (न.)] शरीरम् ।
वप्र, सं. पुं. (सं. पुं. न.) वरणः, सालः, प्राकारः २. क्षेत्रं ३. धूलिः (स्त्री.) ४. तुंगतटः ५. गिरिशिखरं ६. वल्मीकः-कं, मृत्तिकाचयः ।
—क्रीड़ा, सं. स्त्री. (सं.) वप्रक्रिया ।
वफ़ा, सं. स्त्री. (अ.) प्रतिज्ञापालनं २. आज्ञा,-कारित-अनुसरण-पालनं ३. विश्वसनीयता ४. सुशीलता ।
—दार, वि. (अ.+फ़ा.) विश्वसनीय, विश्वास्थ, स्वामिभक्त २. आज्ञा,-कारिन्-पालक ३. कर्तव्यपालक ।
—दारी, सं. स्त्री. (अ.+फ़ा.) दे. 'वफ़ा' ।
वबा, सं. स्त्री. (अ.) महा-मारी, जन-, मारः, मारिका २. स्पर्शसंचारिरोगः ।
वबाल, सं. पुं. (अ.) भारः, भरः २. कष्टं, विपद् (स्त्री.) ।

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

वमन, सं. पुं. (सं. न.) वमः, वमिः (स्त्री.), छर्दनं, छर्दिका २. वांत-वमन,-द्रव्यम् ।
—करना, क्रि. स., उद्-,वम् (भ्वा. प. से.), छर्द् (चु.) ।
वयःसंधि, सं. स्त्री. (सं. पुं.) बाल्ययौवन-मध्यकालः ।
वय, सं. स्त्री. [सं. वयस् (न.) आयुस् (न.), वयःक्रमः, अतीतजीवनकालः ।
वयस्क, वि. (सं.) प्रौढ़, प्राप्तव्यवहार, दे. 'बालिग़' ।
वयस्य, सं. पुं. (सं.) समवयस्कः २. मित्रं, सखि (पुं.) ।
वयस्या, सं. स्त्री. (सं.) सखी दे. ।
वयोवृद्ध, वि. (सं.) स्थविर, जरठ-ण, जरित-न्, वृद्ध ।
वरंच, अव्य. (सं.) अपि तु, दे. 'बल्कि' २. परंतु, किंतु ।
वर, सं. पुं. (सं.) वृतिः (स्त्री.), तपोभिः देवेभ्यो याचितो मनोरथः २. (देवादीनां) अनुग्रहः, प्रसादः, आशिस् (स्त्री.) ३. जामातृ ४. परिणेतृ, वोढृ ५. पतिः, भर्तृ । वि. (सं.)-उत्तम,-श्रेष्ठ (उ. ऋषिवरः=ऋषिश्रेष्ठः) ।
—मांगना, क्रि. स., वरं याच् (भ्वा. आ. से.) वृ (स्वा. उ. से.)-वृ (क्र्. उ. से.) ।
—दान, सं. पुं. (सं.) मनोरथपूरणं, अभीष्ट-प्रदानं २. दे. 'वर' (२) ।
—दायक, सं. पुं. (सं.) वर-दः-प्रदः-दातृ, वांछितार्थदः, समर्द्धकः ।
—यात्रा, सं. स्त्री. (सं.) *जनेतं, परिणेतृ-प्रस्थानम् । दे. 'बरात' ।
—वर्णिनी, सं. स्त्री. (सं.) वर,-अंगना-नारी, सुंदरी ।
वरक़, स. पुं. (अ.) (पुस्तक-) पत्रं-पर्ण २-३. सुवर्ण-रजत,-पत्रम् ।
—गरदानी, सं. स्त्री., (अ.+फ़ा.) ग्रन्थे विहंगमदृष्टिः (स्त्री.), अध्ययनाडम्बरः, अध्ययनाभासः ।
—स्याह करना, मु., अत्यन्तं-अत्यर्थं लिख् (तु, प. स.) ।
वरग़लाना, क्रि. स. (फ़ा. वरग़लानीदन) प्रलुभ्-विमुह् (प्रे.) २. प्रतृ-वंच् (प्रे.) ।
वरज़िश, सं. स्त्री. (फ़ा.) व्यायामः, दे. ।
वरण, सं. पुं. (सं. न.) वृतिः (स्त्री.), उद्ग्रहणं २. भर्तृत्वेनांगीकरणं, पतित्वेन स्वीकरणं ३. पूजा ४. आवरणं, आच्छादनम् ।
वरद, सं. पुं. (सं.) दे. 'वरदायक' ('वर' के नीचे) ।
वरदी, सं. स्त्री. (अ.) *नियतपरिधानं, विशिष्ट-वर्गीय-वेषः ।
वरन्, अव्य. (सं. वरं>) अपि तु ।
वरना, अव्य. (अ.) अन्यथा, इतरथा, नो चेत् ।
वराटिका, सं. स्त्री. (सं.) कपर्दिका, दे. 'कौड़ी' ।
वरानना, सं. स्त्री. (सं.) सुंदरी, वरवर्णिनी, सुवदना-नी ।
वराह, सं. पुं. (सं.) शूकरः, दे. 'सूअर' २. विष्णुः, विष्णोरवतारविशेषः ।
वरिष्ठ, वि. (सं.) उत्तम, श्रेष्ठ, पूज्यतम ।
वरुण, सं. पुं. (सं.) पाशिन्, प्रचेतस् , अप्-अपां,-पतिः, जलेश्वरः, मेघनादः २. जलं ३. सूर्यः ४. ग्रह-विशेषः (अं. नेपचून) ।
वरुणालय, सं. पुं. (सं.) सागरः ।
वरूथिनी, सं. स्त्री. (सं.) सेना, सैन्यम् ।
वरे, क्रि. वि. [सं. अवारतः (अव्य.)] इतः, एतत्स्थानं प्रति, अत्र २. समीपं-पे-पतः, अतिकं-के (सब १-२. अव्य.) ।
वरेण्य, वि. (सं.) प्रधान, मुख्य २. वरणीय, सत्कार्य ।
वर्कशाप, सं. स्त्री. (अं.) प्रावेशनं, शिल्प,-शालं-शाला ।
वर्ग, सं. पुं. (सं.) (सजातीयानां) गणः, जातिः (स्त्री.), समूहः, श्रेणी-णिः (स्त्री.) २. समस्थानवत् व्यंजनपंचकं (उ. कवर्गः, इ.) ३. अध्यायः, परिच्छेदः ४. सम-,चतुर्भुजः-चतुरस्रः ५. समद्विघातः, वर्गफलं, कृतिः (स्त्री.) (उ. ३×३=९ वर्गांकः) ।
—फल, सं. पुं. (सं. न.) दे. 'वर्ग' (५) ।
—मूल, सं. पुं. (सं. न.) पूरितसमानांकद्वय-स्याचंकः, पदं (उ. ९ का वर्गमूल=३) ।
वर्चस्, सं. पुं. (सं. न.) तेजस् (न.), कांतिः (स्त्री.) ।
वर्चस्वी, वि. (सं.-स्विन्) तेजस्विन्, कांतिमत् ।
वर्जन, सं. पुं. (सं. न.) त्यागः २. निषेधः ।
वर्जनीय, वि. (सं.) त्याज्य, हेय, वर्ज्य २. निषेधार्ह ।
वर्जित, वि. (सं.)त्यक्त, उत्सृष्ट २. निषिद्ध, हेय ।
वर्ण, सं. पुं. (सं.) आर्याणां ब्राह्मणादिविभाग-

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

चतुष्टयं, जातिः (स्त्री.) २. रंगः, रागः ३. प्रकारः, विधा ४. अक्षरं ५. रूपं, आकारः । —धर्म, सं. पुं. (सं.) ब्राह्मणादिकर्तव्यकलापः । —नाश, सं. पुं. (सं.) वर्ण-अक्षर,-लोपः-पातः (निरुक्तः) (उ., पृषतोदर से पृषोदर) । —माला, सं. स्त्री. (सं.) वर्णसमाम्नायः, अक्षरश्रेणी (उ. अ से ह् तक) । —विकार, सं. पुं. (सं.) अक्षरविक्रिया (निरुक्त) (उ. गाली से गारी) । —विचार, सं. पुं. (सं.) व्याकरणांगविशेषः, शिक्षा । —विपर्यय, सं. पुं. (सं.) अक्षरव्यत्यासः (निरुक्त; उ. हिंस से सिंह) । —वृत्त, सं. पुं. (सं. न.) अक्षरछंदस् (न.) । —श्रेष्ठ, सं. पुं. (सं.) ब्राह्मणः । —संकर, सं. पुं. (सं.) वर्ण-जाति,-मिश्रणं २. मिश्रजः, संकरजः, सांकरिकः । —हीन, वि. (सं.) बहिष्कृत, अपांक्तेय ।

वर्णन, सं. पुं. (सं. न.) निरूपणं, विवरणं, व्याख्यानं, सविस्तरकथनं, वर्णना २. स्तवनं, गुणकथनं ३. रंजनं, चित्रणम् । —करना, क्रि. स., विवृ (स्वा. उ. से.), निरूप्, वर्ण् (चु.), सविस्तरं कथ् (चु.), व्याख्या (अ. प. अ.) ।

वर्णनीय, वि. (सं.) वर्णयितव्य, निरूपयितव्य, व्याख्येय, वर्ण्य ।

वर्णित, वि. (सं.) निरूपित, व्याख्यात २. उक्त, कथित ।

वर्णी, सं. पुं. (सं.-र्णिन्) ब्रह्मचारिन् २. लेखकः ३. चित्रकारः ।

वर्ण्य, वि. (सं.) वर्णनीय, निरूपयितव्य, प्रस्तुत, उपमेय, व्याख्यातव्य ।

वर्तन, सं. पुं. (सं. न.) व्यवहारः, वृत्तं, चेष्टितं, आचरणं २. वृत्तिः (स्त्री.), आ-उप,-जीविका ३. पात्रम्, भाजनं, दे. 'बर्तन' ।

वर्तनी, सं. स्त्री. (सं.) मार्गः, पथः, पथिन् २. पेषणभृतिः (स्त्री.) ३. तर्कुः (पुं. स्त्री.), तर्कुटम् । ४. वसती-तिः (स्त्री.), अवस्थितिः (स्त्री.) ५. वर्णविन्यासः, शब्दाक्षरोच्चारणम् ।

वर्तमान, वि. (सं.) प्रचरि(लि)त, प्रचल, सर्वसंमत २. उपस्थित, विद्यमान ३. आधुनिक(-की), अधुना-इदानीं-तन(नी) ।

सं. पुं. (सं.) क्रियायाः कालभेदः (व्या.) २. वृत्तांतः ३. प्रचलितव्यवहारः ।

वर्ती, सं. स्त्री. (सं.) वर्तिः-र्तिका (स्त्री.), दे. 'बत्ती' २. शलाका । —वर्ती, वि. (सं.-र्तिन्)-स्थ,-वासिन् ।

वर्तुल, वि. (सं.) गोल, मंडल-चक्र,-आकार ।

वर्दी, सं. स्त्री., दे. 'बरदी' ।

वर्द्धन, सं. पुं. (सं. न.) वृद्धिः-उन्नतिः (स्त्री.) २. समृद्धिः (स्त्री.) ।

वर्मा, सं. पुं. (सं. वर्मन्) क्षत्रियोपाधिः ।

वर्वर, सं. पुं. (सं.) देशविशेषः २. वर्वरवासिन् ३. असभ्यः, ग्राम्यः ४. म्लेच्छः, वर्बरः, वर्वरः, अनार्यः ।

वर्ष, सं. पुं. (सं. पुं. न.) अब्दः, हायनः, समा, शरद् (स्त्री.), सं,-वत्सरः, संवत् (अव्य.) २. मेघः ३. वृष्टिः (स्त्री.) ४. महाभूभागः । —गांठ, सं. स्त्री. (सं+हिं.) वर्षवृद्धिः (स्त्री.), जन्म,-दिवसः-दिनं-तिथिः । —फल, सं. पुं. (सं. न.) वार्षिकग्रह-फल-दर्शिका-पत्रिका ।

शायद, अव्य. (फ़ा.) स्यात्, कदापि, कदाचित्, नाम, सम्भाव्यते।
शाय(इ)र, सं. पुं. (अ.) कविः, दे.।
शाय(इ)रा, सं. स्त्री. (अ.) कवित्री, कविता-काव्य-कर्त्री।
शायराना, वि. (अ.) कविसुलभ २. कविसदृश ३. कवित्वमय ४. अतिरंजित, अतिशयोक्ति-अत्युक्ति-युक्त।
शायरी, सं. स्त्री. (अ.) काव्यकला २. काव्यं, कविता।
शारदा, सं. स्त्री. (सं.) सरस्वती दे. २. दुर्गा ३. ब्राह्मी ४. प्राचीनलिपिविशेषः।
शारीरिक, वि. (सं.) शारीर(—री स्त्री.), कायिक-दैहिक (—की स्त्री.)।
—भाष्य, सं. पुं. (सं. न.) श्रीशंकराचार्य-प्रणीतं ब्रह्मसूत्रभाष्यम्।
—सूत्र, सं. पुं. (सं.-त्राणि) श्रीवेदव्यास-प्रणीतानि वेदांतसूत्राणि (न. बहु.)।
शार्क, सं. स्त्री. (अ.) जलकिराटः।
शार्ट हैंड, सं. पुं. (अं.) शीघ्र-संक्षिप्त,-लिपिः (स्त्री.)।
शार्दूल, सं. पुं. (सं.) व्याघ्रः, दे. २. सिंहः, दे.। वि., उत्तम, श्रेष्ठ (केवल समासांत में, उ. नरशार्दूल = नरोत्तम)।
—विक्रीडित, सं. पुं. (सं. न.) वर्णवृत्तभेदः (छन्द.)।
शाल[1], सं. पुं. (सं.) सालः, सर्जः, शंकुवृक्षः, अश्वकर्णकः, चीरपर्णः, गंधवृक्षकः, रालनिर्यासः, अग्निवल्लभः, यक्षधूपः, सुरेष्टकः २. दे. 'राल' ३. मीनभेदः (=गजाड़ मछली)।
शाल[2], सं. स्त्री. (फ़ा.) १-२. और्ण-कौशेय,-प्रावारः-रकः, दे. 'दुशाला'।
शालग्राम, सं. पुं. (सं.) विष्णुमूर्तिभेदः २. शालवहुलो गंडकीतीरवर्तिग्रामविशेषः।
शाला, सं. स्त्री. (सं.) गृहं, गेहः-हं, सदनं, अ(आ)गारः-रं २. स्थानं, स्थलं, ३. शाखा।
शालि, सं. पुं. (सं.) व्रीहिश्रेष्ठः, धान्योत्तमः, सुकुमारकः, कैदारः, नृपप्रियः २. गंधमार्जारः।
—धान, सं. पुं. (सं. शालिधान्यं) *तंडुलोत्तमः, दे. 'वासमती चावल'।
शालिवाहन, सं. पुं. (सं.) शकजातीयको नृपविशेषः, सातवाहनः।
शालिहोत्र, सं. पुं. (सं.) पशुचिकित्साशास्त्रलेखकविशेषः २. घोटकः। (सं. न.) पशुचिकित्साशास्त्रम्।
शालीन, वि. (सं.) विनीत, नम्र २. लज्जाशील ३. समान ४. सदाचारिन् ५. धनाढ्य ६. व्यवहारकुशल ७. शालासंबंधिन्।
शालीनता, सं. स्त्री. (सं.) विनयः २. लज्जा ३. सदाचारः।
शावक, सं. पुं. (सं.) शावः, अर्भकः, पोतः, पोतकः, डिंभः-पृथुकः, खग-मृग,-शिशुः २. शिशुः (कदाचित्)।
शाश्वत, वि. (सं.) नित्य, अनन्त, अक्षय, अविनाशिन्।
शासन, सं. पुं. (सं. न.) शास्तिः-शिष्टिः (स्त्री.), राज्यं, आधिपत्यं, अधिकारः २. आज्ञा, आदेशः ३. राजदत्तभूमिः (स्त्री.) ४. अधिकारपत्रं ५. शास्त्रं ६. इन्द्रियनिग्रहः ७. निय-

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

न्त्रणा; नियमनं ८. राज्य-,दण्डः ९. लिखित-प्रतिज्ञा ।

—करना, क्रि. स., प्र-,शास् (अ. प. से.), ईश् (अ. आ. से.), तंत्र् (चु.), अधिष्ठा (भ्वा. प. से.), नियम्–विनी (भ्वा. प. अ.) । सं.पुं., ईशनं, अधिष्ठानं, नियमनं, नियंत्रणम् ।

—कर्ता, सं. पुं. (सं.-र्तृ)शासकः, शासनधरः, शास्तृ, शासितृ, अधिष्ठातृ, देशकः ।

—पत्र, सं, पुं. (सं. न.) राजादेशपत्रम् ।

—हर, सं. पुं. (सं.) आज्ञावाहकः २. शासन,-हारक-हारिन्, राजदूतः ।

शासित, वि. (सं.) कृतशासन, अधिकृत, अधिष्ठित, नियंत्रित २. दंडित, दे. ।

शास्त्र, सं. पुं. (सं. न.) धर्मग्रंथः २. विज्ञानम् ।

—कार, सं. पुं. (सं.) शास्त्र,-कृत्-रचयितृ, आचार्यः ।

—चक्षु, सं. पुं. [सं.-क्षुस् (न.)] व्याकरणं २. शनिन् ।

—ज्ञ, सं. पुं (सं.) शास्त्र-दर्शिन्-दृष्टिः-विद्-कोविदः-वेत्तृ ।

—वक्ता, सं. पुं. (सं.-क्तृ) उपदेशकः ।

—विरुद्ध, वि. (सं) धर्मविरुद्ध, अधर्म्य ।

शास्त्रानुसार, क्रि. वि. (सं. न.) यथाशास्त्रं, धर्मानुकूलम् । वि., शास्त्रोक्त, स्मार्त ।

शास्त्री, सं. पुं. (सं.-स्त्रिन्) उपाधिभेदः २. धर्मशास्त्रज्ञः ३. दे. 'शास्त्रज्ञ' ।

शास्त्रीय, वि. (सं.) श्रौत, स्मार्त, शास्त्रविषयक २. शास्त्र,-उक्त-विहित ।

शास्त्रोक्त, वि. (सं.) शास्त्र,-विहित-निर्दिष्ट-अनुकूल ।

शास्य, वि. (सं.) नियंत्रणीय, नियन्तव्य, शासन-अर्ह-योग्य ३. शिक्षणीय, उपदेष्टव्य, विनेय ३. दण्डय, दंडनीय ।

शाह, सं. पुं. (फ़ा.) महाराजः २. यवनभिक्षू-पाधिः । वि., महत्, बृहत्, प्रधान ।

—जादा, सं. पुं. (फ़ा.) दे. 'शहज़ादा' ।

शाहिद, सं. पुं. (अ.) साक्षिन् , प्रत्यक्षदर्शिन्, देश्यः ।

शाही, वि. (फ़ा.) राजकीय २. भूपोचित, नृपयोग्य ।

शिंगरफ़, सं. पुं. (फ़ा. शंगर्फ़) हिंगुलं,-लः, हिंगुलुः,-लिः, रक्तपारदः, चूर्णपारदं, सुरंगं, रसोद्भवम् ।

शिंघाण, सं. पुं. (स. न.) नासिकामलं, शिंघाणकः-कं २. लोहमलं ३. काचपात्रम् । (सं.पुं.) शिंघाणकः, श्लेष्मन् ।

शिंजन, सं. पुं. (सं. न.) शिंजितं, झणत्कारः, झणझणध्वनिः ।

शिकंजबी, सं. स्त्री. (फ़ा. शिकंजबीं) पानकं, *अम्लगौल्यम् ।

शिकंजा, सं. पुं. (फ़ा.) १-३. निपीडन-दृढीकरण-निर्गालन,-यंत्रं ४. ग्रन्थनिपीडनयंत्रं ५. निगडः, हडिः ६. दे. 'कोल्हू' ।

शिकंजे में खींचना, मु., प्रमथ् (क्र. प. से.), यत् (प्रे.), अत्यर्थं अर्द् (प्रे.)-पीड् (चु.), निगडयति (ना. धा.) ।

शिकन, सं. स्त्री. (फ़ा.) व(ब)ली-लिः (स्त्री.) २. पुटः, भंगः ।

—डालना, क्रि. स., वलिनं कृ. २. सपुटं विधा ।

—पड़ना, क्रि. अ. वलिन-वलिम-वलिप्नुत् (वि.) भू २. सपुट-सभंग (वि.) जन् (दि. आ. से.) ।

शिकम, सं. पुं. (फ़ा.) उदरं, जठरम् ।

शिकरा, सं. पुं. (फ़ा.) श्येनभेदः, *शीकरः ।

शिकवा, सं. पुं. (अ.) दे. 'शिकायत' ।

शिकस्त, सं. स्त्री. (फ़ा.) अभि-परा,-भवः पराजयः दे. २. वैफल्यम् ।

—खाना, क्रि. अ., परिभू विजि (कर्म.), दे. 'हारना' ।

शिकायत, सं. स्त्री. (अ.) (सविलापा) विज्ञापना, दुःखनिवेदनं २. परि(री)वादः, आक्षेपः, गर्हा, निंदा ३. उपालम्भः, ४.आमयः, व्याधिः ।

—करना, क्रि. अ., सशोकं-सविलापं विज्ञा-निविद् (प्रे.) २. आ-अधि-क्षिप् (तु. प. अ.), गर्ह् (भ्वा. चु. आ. से.), अप-परि,-वद् (भ्वा. प. से.) ३. उपालभ् (भ्वा. आ. अ.) ।

शिकार, सं. पुं. (फ़ा.) आखेटः-खेटनं-टकं, मृगया, मृगव्यं, आच्छोदनं, पापर्द्धिः (स्त्री.) २. मृग्य,-जंतुः-प्राणिन् ३. मृगयाहतो जीवः ४. मांसं ५. भक्ष्यं ६. प्रतारितः, वञ्चितः ।

—करना, क्रि. स., मृग् (चु. आ. से., दि. प. से.) मृगयां कृ, अनुधाव् (भ्वा. प. से.) । मु., छलेन धनादिकं हृ (भ्वा. प. अ.) ।

—होना, क्रि. अ., आखेटे हन्-मार् (कर्म.) । मु., वशवर्तीं जन् (दि. आ. से.) ।

शिकारी, सं. पुं. (फ़ा.) व्याधः, लुब्धकः,

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

मृगयुः, आखेटकः, जीवांतकः, शाकुनिकः, जालिकः, वागुरिकः । वि., आखेटिक ।
—कुत्ता, सं. पुं., मृगदंशकः, मृगयाकुक्कुरः, विश्वकद्रुः ।
—ब्याह, सं. पुं., गांधर्वविवाहः ।
—लिबास, सं. पुं., मृगया-आखेट,-वेशः(षः) ।
शिक्षक, सं. पुं. (सं.) अध्यापकः, गुरुः, उपाध्यायः, अनुशास्तृ, उपदेशकः, आचार्यः ।
शिक्षण—सं. पुं. (सं. न.) शिक्षा, अध्यापनं, विद्यादानं, पाठनं, अनु,-शासनं-शिष्टिः (स्त्री.), विनयः २. विद्या,-उपादानं-ग्रहणं-अभ्यासः ।
शिक्षा, सं. स्त्री. (सं.) अध्ययनाध्यापनं, पठनपाठनं । २-३. दे. 'शिक्षण' (१-२) ४. निपुणता ५. उपदेशः, मंत्रः ६. वेदांगविशेषः ७. नियंत्रणं ७. दंडः, कुफलम् ।
—हीन, वि. (सं.) अशिक्षित, निरक्षर ।
शिक्षार्थी, सं. पुं. (सं.-र्थिन्) शिक्षाग्राहकः, छात्रः ।
शिक्षालय, सं. पुं. (सं.) शिक्षणालयः, विद्यालयः ।
शिक्षित, वि. (सं.) साक्षर, अक्षराभिज्ञ, लेखनवाचनक्षम, कृतविद्य २. पंडित, विज्ञ । [शिक्षिता (स्त्री.)=कृतविद्या पंडिता इ.] ।
शिखंड=डक, सं. पुं. (सं.) मयूरपुच्छं २. चूडा, शिखा ३. काकपक्षः ।
शिखंडी, सं. पुं. (सं-डिन्) मयूरः २. कुक्कुटः ३. द्रुपदपुत्रविशेषः ४. विष्णुः ५. कृष्णः ६. शिवः ७. बाणः ८. गुञ्जा ९. स्वर्णयूथिका ।
शिखर, सं. पुं. (सं. पुं. न.) गिरि,-मस्तकं-शृङ्गं, पर्वताग्रं, कूटं २. उच्चतमो भागः, दे. 'चोटी' ।
शिखरन, सं. स्त्री. (सं. शिखरिणी) *दधि-सितोदकम् ।
शिखरिणी, सं. स्त्री. (सं.) वर्णवृत्तभेदः २. स्त्रीरत्नं ३. रोमराजी ४. द्राक्षाभेदः ५. दे. 'शिखरन' ।
शिखरी, सं. पुं. (सं.-रिन्) पर्वतः २. वृक्षः ३. कोट्टः ।
शिखा, सं. स्त्री. (सं.) शिखंडः-डकः, चूडा २. अग्निज्वाला,ज्वालः, अर्चिस् (न.) ३. दीप,-अर्चिस् (न.)-शिखा ४. शिखरः-रं ५. किरणः ६. शाखा ।
—कंद, सं. पुं. (सं. पुं. न.) दे. 'शलजम' ।
—वान्, वि. (सं.-वत्) शिखिन्, चूड़ावत्, शिखान्वित । सं. पुं., दीपकः २. अग्निः ३. केतुग्रहः ४. उल्का, खोल्का ।
—सूत्र, सं. पुं. (सं.-त्रे) चूडायज्ञोपवीते (न. द्वि.) ।
शिखिनी, सं. स्त्री. (सं.) मयूरी, शिखंडिनी, केकिनी २. कुक्कुटी, कुक्कुटवधूः (स्त्री.), पक्षिणी ।
शिखी, वि. (सं.-खिन्) शिखावत्-चूडावत् । सं. पुं. (सं.) मयूरः २. कुक्कुटः ३. दीपकः ४. अग्निः ५. पर्वतः ६. बाणः ७. वृक्षः ८. उल्का, केतुः ।
शिगाफ़, सं. पुं. (फ़ा.) छिद्रं-बिलं २. विदरः, भेदः ।
शिगार, शिगा(ग़ा)ल, सं. पुं. (फ़ा.) शृगालः, जंबुकः ।
शिताब, क्रि. वि. (फ़ा.) शीघ्रं, सत्वरम् ।
शिथिल, वि. (सं.) मंदबन्धन, ढलथ, स्रस्त, दे. 'ढीला' २. अलस, मंथर ३. उदासीन ४. दृढत्वशून्य ५. बंधनहीन, मुक्त ६. श्रांत, क्लांत ७. अस्पष्ट (शब्दादि) ८. उपेक्षित (नियम) ।
शिथिलता, सं. स्त्री. (सं.) शैथिल्यं, ढलथता, स्रस्तता, दे. 'ढीलापन' २. आलस्यं ३. औदासीन्यं ४. दृढताऽभावः ४. श्रांतिः (स्त्री.) ५. नियमभंगः ६. शक्तिन्यूनता ।
शिद्दत, सं. स्त्री. (अ.) उग्रता, तीव्रता, प्रचंडता २. आधिक्यम् ।
शिर, सं. पुं. (सं.) शिरस् (न.) दे. 'सिर' ।
शिर(रा)कत, सं. स्त्री. (अ.) दे. 'शराकत' ।
शिरस्त्राण, सं. पुं. (सं. न.) शीर्षण्यं, शिरस्त्रं, दे. 'खोद' ।
शिरा, सं. स्त्री. (सं.) सिरा, ईलिका, रक्तवाहिनी नाड़ी (Vein) ।
शिरोधार्य, वि. (सं.) अंगी-स्वी,-कार्य, पालयितव्य ।
—करना, मु., सादरं स्वी-अंगी,-कृ ।
शिरोमणि, सं. पुं. स्त्री. (सं.) चूडामणिः, शिरोरत्नं २. प्रधानः, मुख्यः ।
शिला, सं. स्त्री. (सं.) शिला,-पट्टः-फलकं २. अश्मन्-ग्रावन् (पुं.) ३. गंडशैलः ४. *पेषणशिला, *शिला-पट्टी-पट्टिका, *शिला ।

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

—जीत, सं. पुं. [सं.-जतु (न.)] गिरि-अग-अद्रि-अश्म-शिला,-जं, अश्म,-जतुकं-लाक्षा-उत्थं, शिला,-जित् (स्त्री.)-दद्रुः-मलं-स्वेदः ।
—लेख, सं. पुं. (सं.) प्रस्तरलेख्यम् ।
—वृष्टि, सं. स्त्री. (सं.) करकासारः ।
शिलोंछ, सं. पुं. (सं.) उंछशिलं, उपात्तशस्य-क्षेत्रात् शेषावचयनम् ।
शिल्प, सं. पुं. (सं. न.) यंत्र-,कला, *हस्त-कर्मन् (न.)-शिल्पं-व्यवसायः, शिल्पिकं, दे. 'दस्तकारी' ।
—कला, सं. स्त्री. (सं.) दे. 'शिल्प' ।
—कार, सं. पुं. (सं.) शिल्पिन्, कारुः, देवटः, शिल्पजीविन्, शिल्पकारिन्, कर्मकारः ।
—विद्या, सं. स्त्री. (सं.) हस्तकौशलं २. गृह-निर्माण-वास्तु,-कला ।
—शाला, सं. स्त्री. (सं.) शिल्प(ल्पि),-गृहं-गेहं-शाला-आवेशनम् ।
—शास्त्र, सं. पुं. (सं. न.) हस्तव्यवसाय-शास्त्रं २. गृहनिर्माण-वास्तु,-शास्त्रम् ।
शिल्पी, सं. पुं. (सं.-पिन्) दे. 'शिल्पकार' २. गृह,-कारकः-संवेशकः, पलगंडः ३. चित्र-कारः ।
शिव, सं. पुं. (सं.) महादेवः, शंभुः, पशुपतिः, शूलिन्, महा-,ईश्वरः, शंकरः, चंद्रशेखरः, गिरीशः, मृडः, पिनाकिन्, त्रिलोचनः, भूतेशः, धूर्जटिः, हरः, त्र्यंबकः, त्रिपुरारिः, गंगाधरः, वृषध्वजः, भवः, रुद्रः, उमापतिः, महानटः, भैरवः, पंचाननः, कंठेकालः, नंदीश्वरः २. परमेश्वरः ३. वेदः ४. शृगालः । (सं. न.) कल्याणं, मंगलम् । वि., कल्याण-मंगल,-कारक-कारिन् ।
—द्रुम, सं. पुं. (सं.) बिल्ववृक्षः ।
—नंदन, सं. पुं. (सं.) गणेशः ।
—पुराण, सं. पुं. (सं. न.) शैवपुराणं, पुराण-ग्रथविशेषः ।
—पुरी, सं. स्त्री. (सं.) काशी, शिवतीर्थम् ।
—बीज, सं. पुं. (सं. न.) पारदः, शिववीर्यम् ।
—रात, सं. स्त्री. (सं. शिवरात्रिः) शिवचतु-र्दशी, फाल्गुनकृष्णचतुर्दशी ।
—लिंग, सं. पुं. (सं. न.) शिवप्रतिमाभेदः ।
—लिंगी, सं. स्त्री. (सं.-लिंगिनी) शिव,-वल्ली-वल्लिका, ईश्वरलिंगी, चित्रफला ।
—लोक, सं. पुं. (सं.) कैलासः, शिवशैलः ।
—वाहन, सं. पुं. (सं.) शिववृषभः, नंदिन् ।
—सुंदरी, सं. स्त्री. (सं.) दुर्गा ।
शिवा, सं. स्त्री. (सं.) दुर्गा २. पार्वती ३. शृगाली ।
शिवानी, सं. स्त्री. (सं.) पार्वती, गौरी, दुर्गा ।
शिवालय, सं. पुं. (सं.-लयः) शिव,-मंदिरं-आयतनं २. देवालयः ३. श्मशानम् ।
शिवि, सं. पुं. (सं.) उशीनरनृपपुत्रः, ययाति-दौहित्रः २. हिंस्रपशुः ३. भूर्जवृक्षः ।
शिविका, सं. स्त्री. (सं.) याप्ययानं, शिबीरथः, दे. 'पालकी' ।
शिविर, सं. पुं. (सं. न.) कटकः-कं, निवेशः, आगन्तुकसैन्यवासः २. पट,-मंडपः-कुटी, दे. 'तंबू' ३. दुर्गः-र्गम् ।
शिवेतर, वि. (सं.) अशुभ, अमंगल, हानि-कारक ।
शिशिर, सं. पुं. (सं. पुं. न.) कंपनः, शीतः, हिमकूटः, कोटनः (माघ तथा फाल्गुन) २. तुषारः, तुहिनम् । वि., शीत, शीतल, उष्णताशून्य ।
—कर, सं. पुं. (सं.) हिमांशुः, चंद्रः ।
—काल, सं. पुं. (सं.) शीतर्तुः, शीतकालः ।
शिशु, सं. पुं. (सं.) स्तनंधयः, स्तनपः, वत्सः, बालकः, दारकः, उत्तानशयः, डिंभः, अपत्यम् ।
शिशुता, सं. स्त्री. (सं.) शिशुत्वं, शैशवं, बाल्यं दे. ।
शिशुपाल, सं. पुं. (सं.) चेदिराजः, दमघोष-सुतः, चैद्यः ।
—वध, सं. पुं. (सं. न.) महाकविमाघप्रणीत-महाकाव्यविशेषः ।
शिष्ट, वि. (सं.) सभ्य, भद्र, श्रेष्ठ, सुशील २. धर्मशील ३. शांत ४. बुद्धिमत् ५. शालीन, व्यवहारनिपुण ६. प्रख्यात ७. आज्ञाकारिन् ।
शिष्टता, सं. स्त्री. (सं.) सभ्यता, भद्रता, सुशीलता, श्रेष्ठता २. अधीनता ।
शिष्टाचार, सं. पुं. (सं.) सदाचारः, सद्व्यव-हारः २. सत्कारः, संमानः ३. विनयः, प्रश्रयः ४. उपचारः, आचारः, यथाविधि वर्तनं ५. आतिथ्यं, आतिथेयम् ।
शिष्य, सं. पुं. (सं.) छात्रः, अंते-वासिन्, सद्-

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

विद्यार्थिन्, शिक्षार्थिन् २. अनु,-गामिन्, यायिन्।

शिस्त, सं. स्त्री. (फा.) शरव्यं, लक्ष्यम्।

—बाँधना, मु., लक्ष्ये दृष्टिं बंध् (क्र. प. अ.)।

शीकर, सं. पुं. (सं.) पवनादिप्रेरित-,जलकणः, तुषारः २. अवश्यायः, दे. 'ओस' ३. स्वल्प-वृष्टिः (स्त्री.), दे. 'फुहार' (१)।

शीघ्र, क्रि. वि. (सं. शीघ्रं) आशु, सद्यः, सपदि, अचिरेण, अविलंबेन, झटिति।

—कारी, वि. (सं.-रिन्) विलम्बासह, आशु-कारिन्।

—कोपी, वि. (सं.-पिन्) कोपन, आशुक्रोधिन्।

—गामी, वि. (सं.-मिन्) द्रुतगामिन्, आशु।

—चेतन, वि. (सं.) तीव्रबुद्धि।

—वेधी, सं. पुं. (सं.-धिन्) लघुहस्तः।

शीघ्रता, सं. स्त्री. (सं.) त्वरा, क्षिप्रता, लाघवं, तरस्-रंहस् (न.), जवः, वेगः, रंभसः-सम्।

—करना, क्रि. अ., त्वर् (भ्वा. आ. से.), सत्वरं-झटिति कृ।

शीत, वि. (सं.) शीतल, शिशिर, हिम, तुषार, उष्णत्वशून्य २. शिथिल, दीर्घसूत्रिन्। सं. पुं. (सं. न.) शीतः, शीतर्तुः, शीतकालं, शिशिरः, हिमागमः २. शीतता, हिमता, शैत्यं ३. अव-श्यायः, तुषारः ४. प्रतिश्यायः, दे. 'जुकाम' ५. जलम्।

—कटिबंध, सं. पुं. (सं.) कर्कमकररेखापर-वर्तिनौ अतिशीतौ भूभागौ (पुं. द्वि.)।

—काल, सं. पुं. (सं.) दे. 'शीत' सं. पुं.(१)।

—किरण, सं. पुं. (सं.) शीत-हिम,-करः-रश्मिः-अंशुः,-द्युतिः, चंद्रः।

शीतता, सं. स्त्री. (सं.) शैत्यं, शीतं-तलम्।

शीतल, वि. (सं.) दे. 'शीत' वि.। २. शांत, शमान्वित ३. संतुष्ट, प्रसन्न।

शीतलता, सं. स्त्री. (सं.) दे. शीतता'।

शीतला, सं. स्त्री. (सं.) विस्फोटकरोगः, विस्फोटा, मसूरिका, शीतली, वसंतरोगः, दे. 'चेचक' २. वसंतविस्फोटकादीनामधिष्ठात्री देवी।

—वाहन, सं. पुं. (सं. न.) गर्दभः, खरः।

शीतांशु, सं. पुं. (सं.) चंद्रः २. कर्पूरः-रम्।

शीर, सं. पुं. (फा.) क्षीरं, दुग्धं, दे. 'दूध'।

शीताकुल, वि. (सं.) शीत-शैत्य-हिम,-आकुल-अर्दित-पीडित-विह्वल।

शीरा, सं. पुं. (फा.) दे. 'शरबत' २. दे. 'चाशनी'।

शीरीं, वि. (फा.) मधुर २. प्रिय।

शीरीनी, सं. स्त्री. (फा.) मिष्टान्नं, दे. 'मिठाई' २. माधुर्यम्।

शीर्ण, वि. (सं.) कृश, क्षीणतनु, क्षाम, २.भग्न, खंडित, ३. च्युत ४. जीर्ण, विदीर्ण ५. म्लान, विरस।

शीर्णता, सं. स्त्री. (सं.) कृशता, दौर्बल्यं, जीर्णता, विदीर्णता।

शीर्ष, सं. पुं. (सं. न.) शिरस् (न.), दे. 'सिर' २. ललाटं, दे. 'माथ' ३. शिखरं ४. अग्रभागः।

शीर्षक, सं. पुं. (सं. न.) अग्राक्षरपंक्तिः, शिरः पंक्तिः (स्त्री.) २. शिरस्त्रं, दे. 'खोद'।

शील, सं. पुं. (सं. न.) चरित्रं, आचरणं, वृत्तिः (स्त्री.) ३. स्वभावः, प्रकृतिः (स्त्री.) ४. सदाचारः, सच्चरित्रम् ५. सत्-स्वभावः-प्रकृतिः (स्त्री.) ६. हृदयमार्दवं ७. संकोचः, आदरः वि. पर,-परायण (उ. दानशील)।

शीलवान, वि. (सं.-वत्) सदाचारिन्, सद्वृत्त २. सत्स्वभाव, कोमलप्रकृति, सुशील।

शीशम, सं. स्त्री. (फा.) शिंशपा, पिच्छिल (च्छ)ला, पिंगला, कपिला, भस्मगर्भा।

शीशमहल, सं. पुं. (फा. शीशा+अ. महल) काच-स्फाटिक,-भवनं २. काचकोष्ठः, आदर्शावासः।

—का कुत्ता, मु., उन्मत्तः, वातुलः।

शीशा, सं. पुं. (फा.) काचः, दे. २. आदर्शः, मुकुरः, दर्पणः, दे. ३. काचफलकः-कम्।

शीशी, सं. स्त्री. (फा. शीशा) काचकूपी।

—सुँघाना, औषधगंधेन मूर्च्छां (प्रे.)।

शुंठी, सं. स्त्री. (सं.) कटुग्रंथिः, दे. 'सोंठ'।

शुक, सं. पुं. (सं.) कीरः, वक्रतुंडः, दे. 'तोता' २. महर्षि-व्यासपुत्रः।

शुक्ति, सं. स्त्री. (सं.) मुक्तामातृ (स्त्री.), दे. 'सीपी'।

—बीज, सं. पुं. (सं. न.) मौक्तिकं, शुक्ता-मणिः।

शुक्र[1], सं. पुं. (सं.) सितः, श्वेतः, काव्यः, कविः, भार्गवः, दैत्यगुरुः २. अग्निः ३. ज्येष्ठ-मासः ४. शुक्लपक्षः। (सं. न.) बीजं, वीर्य-

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

रेतस् (न.) २. बलं, सामर्थ्यम् । वि. (सं.) भासुर, देदीप्यमान २. स्वच्छ, उज्ज्वल ।

शुक्र[2], सं. पुं. (अ.) धन्यवादः, कृतज्ञता-प्रकाशः ।

—गुज़ार, वि. (अ.+फ़ा.) कृतज्ञ, दे. ।

—गुज़ारी, सं. स्त्री. (अ.+फ़ा.) कृतज्ञता ।

शुक्ल, वि. (सं.) धवल, सित, श्वेत, दे. 'सफ़ेद' ।

—पक्ष, सं. पुं. (सं.) शुक्लकः, दे. 'पक्ष' में ।

शुक्लता, सं. स्त्री. (सं.) धवलता, दे. 'सफेदी' ।

शुग़ल, सं. पुं. (अ.) दे. 'शग़ल' ।

शुचि, वि. (सं.) वि-शुद्ध, पवित्र, पूत २. उज्ज्वल, निर्मल ३. निर्दोष, निष्पाप ४. शुद्ध मानस ।

शुतुरमुर्ग़, सं. पुं. (फ़ा.) * उष्ट्रकुक्कुटः ।

शुदनी, सं. स्त्री. (फ़ा.) नियतिः (स्त्री.), भवितव्यता ।

शुद्ध, वि. (सं.) केवल, स्वच्छ, मिश्रणशून्य २. उज्ज्वल, श्वेत ३. त्रुटिरहित, यथातथ, यथार्थ ४. निर्दोष ५. पूत, पवित्र, पावन, मेध्य ।

—करना, क्रि. स., परि-, पू (क्र्. उ. से.), शुचीकृ । परि-वि-सं-, शुध् (प्रे.), निर्मलीकृ २. प्रतिसमा-समा-धा (जु. उ. अ.), त्रुटि-रहितं विधा (जु. उ. अ.) ।

शुद्धता, सं. स्त्री. (सं.) शुचिता, शौचं, पवित्रता, पूतता, वि,-शुद्धिः (स्त्री.) २. निर्दोषता, यथार्थता ।

शुद्धि, सं. स्त्री. (सं.) दे. 'शुद्धता' (१) । २. स्वच्छता, नैर्मल्यं ३. वैदिकधर्मप्रवेशसंस्कारः ।

—पत्र, सं. पुं. (सं. न.) त्रुटिदर्शकपत्रम् ।

शुबहा, सं. पुं. (अ.) संदेहः २. भ्रमः ।

शुभ, वि. (सं.) मंगल, हित, कल्याण २. उत्तम, भद्र । सं. पुं. (सं. न.) मंगलं, हितं, कल्याणम् ।

—कर्म, सं. पुं. (सं.-र्मन् न.) सुकृत्यं, पुण्यम् ।

—घड़ी, सं. स्त्री., मांगलिकमुहूर्तः-र्तम् ।

—चिंतक, वि. (सं.) हितैषिन्, हितचिंतक ।

—दर्शन, वि. (सं.) प्रिय-सु,-दर्शन, सुन्दर ।

—फल, सं. पुं. (सं. न.) सुपरिणामः ।

शुभ्र, वि. (सं.) श्वेत, शुक्ल, भासुर ।

—कर, सं. पुं. (सं.) शुभ्र,-भानुः-रश्मिः, चन्द्रः ।

शुभ्रता, सं. स्त्री. (सं.) शुक्लता, भासुरता ।

शुमार, सं. पुं. (फ़ा.) 'गणनं', संकलनम् ।

शुमाल, सं. पुं. (अ.) उदीची, दे. 'उत्तर' (दिशा) ।

शुमाली, वि. (अ.) उत्तर, उदीचीन, उत्तर,-दिश्य-संबंधिन् ।

शुरू, सं. पुं. (अ.) उपक्रमः, आरंभः दे. २. प्रभवः, आदिः ।

शुल्क, सं. पुं. (सं. पुं. न.) घट्टपथादीनां करः २. वरात्र प्राप्तोऽर्थः ३. युतकं, दे. 'दहेज' ४. पणः, ग्लहः ५. मूल्यं ६. भाटं, भाटकं ७. प्रतिफलं, वेतनम् ।

शुश्रूषा, सं. स्त्री. (सं.) परिचर्या, सेवा दे. २. श्रवणेच्छा ।

शुष्क, वि. (सं.) निर्जल, आर्द्रतारहित, म्लान २. वि-नी-अ,-रस, निःस्वाद ३. खेदकर, अरुचिकर ४. मोघ, निरर्थक ५. रूक्ष, स्नेहहीन ६. जीर्ण, शीर्ण ।

शुष्कता, सं. स्त्री. (सं.) शोषः, शुष्कता २. नीरसता ३. अरोचकता ४. रूक्षता ५. जीर्णता ।

शूकर, सं. पुं. (सं.) वराहः, दे. 'सूअर' ।

शूद्र, सं. पुं. (सं.) वृषलः, दासः, पादजः, पद्यः, पज्जः, जघन्यः, द्विजसेवकः, उपासकः, चतुर्थः २. निकृष्टः ३. सेवकः ।

शूद्रक, सं. पुं. (सं.) मृच्छकटिकरचयिता महाकविः २. शूद्रः ३. शंबुकः, तपस्विशूद्र-विशेषः (रामायण) ।

शूद्रा, सं. स्त्री. (सं.) शूद्रजातेः स्त्री ।

शूद्री, सं. स्त्री. (सं.) शूद्रस्य पत्नी ।

शून्य, वि. (सं.) रिक्त, वशिक, शून्य-रिक्त,-गर्भ-मध्य २. निराकार ३. असत् ४. रहित ।

सं. पुं. (सं. न.) आकाशः-शं, दे. २. बिंदुः, खं ३. रिक्त-एकांत-निर्जन,-स्थानं ४. अभावः ।

शून्यता, सं. स्त्री. (स.) शून्यत्वं, रिक्तता ।

शूप, सं. पुं. (सं. शूर्पः-र्पं) सूर्पः, कुल्यः, प्रस्फोटनं-नी, दे. 'छाज' ।

शूर, सं. पुं. (सं.) दे. 'वीर' ।

शूरण, सं. पुं. (सं.) दे. 'सूरन' ।

शूरता, सं. स्त्री. (सं.) दे. 'वीरता' ।

शूर्प, सं. पुं. (सं. पुं. न.) दे. 'शूप' ।

—कर्ण, सं. पुं. (सं.) गजः २. गणेशः ।

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

—जखा, सं. स्त्री. (सं.) रावणभगिनी ।
शूल, सं. पुं. (सं. पुं. न.) उदरवेदना, जठर-व्यथा, वातरोगभेदः २. पीडा, क्लेशः व्यथा ३. कुंतः, प्रासः ४. त्रिशूलं, त्रिशीर्षकं ५. ध्वजः ६. मृत्युः ७. अयःकीलः ८. शलाका ९. दे. 'सूली' ।
—धारी, सं. पुं. (सं.-रिन्) शूल,-धर-ग्राहिन्-पाणिः, शिवः ।
शूली, सं. पुं. (सं.-लिन्) शिवः, शूलपाणिः २. शशकः ३. शूलार्त्तः । सं. स्त्री., दे. 'सूली' ।
शृंखला, सं. स्त्री. (सं.) शृंखलः-लं, निगडः, बंधः, बंधनं २. क्रमः, परंपरा ३. श्रेणी, पंक्तिः (स्त्री.) ४. मेखला, पुंस्कटिबन्धः ५. कांची, रशना ।
—बद्ध, वि. (सं.) शृङ्खलित, निगडित २. क्रम-श्रेणी-बद्ध ।
शृंग, सं. पुं. (सं. न.) विषाणं, दे. 'सींग' २. सानुः, कूटः-टं, शिखरं, शैलाग्रं ३. वाद्य-भेदः ४. कामोत्तेजना ५. क्रीडाजलयंत्रं (पिचकारी, दे. रघुवंश १६'७०) ६. दे. 'कंगूरा' ।
शृंगार, सं. पुं. (सं.) रसविशेषः (सा.) २. मैथुनस्पृहा ३. मंडनं, भूषणं, प्रसाधनं, अलंकरणं, परिष्करणं ४. संभोगः, मैथुनं ५. मंडन-प्रसाधन,-साधनं-द्रव्यं (चंदनादि) दे. 'षोडश शृंगार' ।
—करना, क्रि. स., अलंकृ, परिष्कृ, प्रसाध् (प्रे.), भूष्-मंड् (चु.) ।
—योनि, सं. पुं. (सं.) मदनः, कंदर्पः ।
शृंगी, सं. पुं. (सं.-गिन्) गजः २. वृक्षः ३. पर्वतः ४. ऋषिविशेषः ५. शृङ्गवत् पशुः ६. बाधभेदः ७. महादेवः ।
शृगाल, सं. पुं. (सं.) गोमायुः, क्रोष्टुः, जंबु-(वू)कः, दे. 'गीदड़' । वि., भीरु २. खल ३. निष्ठुर ।
शेख, सं. पुं. (अ.) श्रीमोहंमदवंशजानामुपाधिः २. यवनवर्गविशेषः ३. यवनोपदेशकः ४. वृद्धः ।
—चिल्ली, सं. पुं. (अ.+हिं.) मंदः, जडः २. भंडः, विदूषकः ।
शेखर, सं. पुं. (सं.) शिरोमाल्यं, शीर्षमाला २. शिरोभूषणमात्रं ३. शीर्षं ४. किरीटः, मौलिः ५. पर्वताग्रं, सानुः ।
शेखी, सं. स्त्री. (अ. शेखह्) दर्पः, गर्वः २. विकत्थनं, गर्वोक्तिः (स्त्री.) ।
—बाज़, वि. (हिं.+फ़ा.) विकत्थक, आत्म-श्लाघिन् २. दृप्त ।
—झड़ना या निकलना, मु., गर्वः खंड् (कर्म.) मदः व्यपगम् (भ्वा. प. अ.) लघूभू ।
—बघारना,-मारना या-हाँकना, मु., विकत्थ् (भ्वा. आ. से.), आत्मानं श्लाघ् (भ्वा. आ. से.) ।
शेप, सं. पुं. (सं.) शेप(फ)स् (न.), शेफः-फं, मेढ्रं २. मुष्कः, वृषणः, शुक्रग्रंथिः ३. पुच्छं, लांगूलं, लूमम् ।
शेमुषी, सं. स्त्री. (सं.) बुद्धिः-धीः-मतिः (स्त्री.), प्रज्ञा ।
शेयर, सं. पुं. (अं.) अंशः, भागः ।
—होल्डर, सं. पुं. (अं.) अंशिन्, भागिन् ।
शेर[1], सं. पुं. (फ़ा.) द्वीपिन्, भेलः, मृगांतकः, शार्दूलः, व्याघ्रः दे. २. केसरी, सिंहः दे. ३. वीरः, शूरः ।
—पंजा, सं. पुं. (फ़ा.+हिं.) दे. 'बघनखा' ।
—बच्चा, सं. पुं. (फ़ा.+हिं.) सिंह-व्याघ्र,-पोतः-शावकः २. वीरः, शूरः ।
—बबर, सं. पुं. (फ़ा.) दे. 'शेर' (२) ।
—मर्द, वि. (फ़ा.) वीर, निर्भय ।
—होना, मु., भयं मुच् (तु. प. अ.), निर्भय (वि.) भू ।
शेर[2], सं. पुं. (अ.) कवितायाश्चरणद्वयं (उर्दू, फ़ारसी आदि) ।
शेरनी, सं. स्त्री. (फ़ा. शेर) व्याघ्री, द्वीपिनी २. सिंही, केसरिणी इ. ।
शेरवानी, सं. स्त्री. (देश.) *आजानुलंबी कंचुकभेदः ।
शेष, सं. पुं. (सं.) अनंतः, सर्पराजः, शेषनागः, फणींद्रः, फणीश्वरः २. परमेश्वरः ३. लक्ष्मणः ४. बलरामः ५. अंतरम् (गणित) ६. अन्तः ७. परिणामः ८. गजः ९. मृत्युः १०. नाशः । (सं. पुं. न.) अव-परि,-शेषः, उद्वर्तः, अव-शिष्ट-उपयुक्तेतर,-वस्तु (न.) २. अध्याहार्य-शब्दः । वि., अवशिष्ट २. समाप्त ३. इतर, अपर, अन्य ।
—नाग, सं. पुं. (सं.) दे. 'शेष' सं. पुं. (१) ।
—शायी, सं. पुं. (सं.-शायिन्) विष्णुः ।
शेषांश, सं. पुं. (सं.) १-२ अवशिष्ट-अंतिम,-भागः ।
शैतान, सं. पुं. (अ.) ईश्वर-विरोधी देवविशेषः

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

(सामो धर्म) २. भूतः, प्रेतः ३. क्रूरः ४. दुष्टः, खलः ५. कामः, मदनः ६. क्रोधः ।

शैतानी, सं. स्त्री. (अ. शैतान) दुष्टता, कुचेष्टा ।

शैत्य, सं. पुं. (सं. न.) शीतता, शीतलत्वम् ।

शैथिल्य, सं. पुं. (सं. न.) शिथिलता, दे. ।

शैल, सं. पुं. (सं.) गिरिः, अद्रिः, पर्वतः, दे. । २. गंडशैल, दे. 'चट्टान' ३ दे. 'शिलाजीत' ।

—**कुमारी**, सं. स्त्री. (सं.) अद्रितनया, शैल,-कन्या-जा, दे. 'पार्वती' ।

शैली, सं. स्त्री. (सं.) भाषण-लेखन,-रीतिः-सरणिः (दोनों स्त्री.)-प्रकारः २. प्रथा, रीतिः ३. परिपाटिः (स्त्री.), प्रणाली ४. चर्या, वर्तनं, वृत्तिः (स्त्री.) ।

शैलेंद्र, सं. पुं. (सं.) हिमगिरिः, हिमालयः ।

शैव, सं. पुं. (सं.) शिव,-भक्तः-उपासकः-अनुयायिन् २. संप्रदायविशेषः । वि. (सं.) शिव-संबन्धिन् ।

शैव्या, सं. स्त्री. (सं.) सत्यहरिश्चन्द्रपत्नी ।

शैशव, सं. पुं. (सं. न.) शिशुता-त्वं, बाल्यम् । वि. (सं.) बाल-बाल्य-संबंधिन् ।

शोक, सं. पुं. (सं.) आर्तिः (स्त्री.) आधिः, दुःखं, परितापः, खेदः, शुच् (स्त्री.), शुचा, मन्युः, निस्समः, शोचनम् ।

शोकार्त, वि. (सं.) शोकिन्, शोक,-आकुल-आतुर-ग्रस्त-उपहत-विह्वल, सशोक, परितप्त ।

शोख़, वि. (फ़ा.) धृष्ट, वियात २. चंचल, चपल ३. गाढ़, भासुर (रस) २. दुर्ललित, कुचेष्टक ।

शोख़ी, सं. स्त्री. (फ़ा.) धाष्टर्यं, वैयात्यं २. चाञ्चल्यं ३. गाढ़ता, प्रखरता ।

शोच, सं. पुं. (सं. शोचनं) शोकः २. चिंता ।

शोचनीय, वि. (सं.) आपन्न, दुःख, आर्त्त, निरानंद २. सांशयिक, संदिग्ध ।

शोण, सं. पुं. (सं.) रक्त-लोहित-वर्ण-रंगः २. नदविशेषः, हिरण्यवाहः ३. माणिक्यं ४. रक्तेक्षुः ५. अग्निः ६. लोहिताश्वः । सं. न., रुचिरं २. सिंदूरम् ।

—**रत्न**, सं. पुं. (सं. न.) पद्मरागमणिः, शोणितोपलः ।

शोणित, सं. पुं. (सं. न.) रुधिरं, रक्तं दे. । वि. (सं.) लोहित, रक्त, शोण ।

शोणिमा, सं. स्त्री. (सं.-मन् पुं.) रक्तिमन्-, लोहितिमन्-अरुणिमन् (पुं.) । दे. 'लाली' ।

शोथ, सं. पुं. (सं.) शोफः, शोथकः, श्वयथुः ।

शोध, सं. पुं. (सं.) शोधनं, निस्तारः (ऋणादि का) २. अनुसंधानं, अन्वेषणं ३. शुद्धिः (स्त्री.), शुद्धिसंस्कारः ४. परीक्षा-क्षणम् ।

शोधक, सं. पुं. (सं.) पावन, शोधन, मलहर २. अन्वेषक, अनुसंधातृ ३. दे. 'सुधारक' ।

शोधन, सं. पुं. (सं. न.) पावनं, संस्करणं, निर्मली-वित्री-शुची,-करणं, मार्जनं, प्रक्षालनं, धावनं २. प्रतिसमा-समा,-धानं, त्रुटिनिरसनं ३. धातूनां निर्दोषीकरणं ४. अन्वेषणं, अनुसंधानं ५. परीक्षणं ६. ऋणनिस्तारणं ७. दंडः ८. प्रायश्चित्तं ९. विरेचनं १०. निंबूकं ११. व्यवकलनम् ।

शोधना, क्रि. स. (सं. शोधनं) दे. 'शुद्ध करना' (१-२) ३. औषधार्थं धातुं संस्कृ ४. अन्विष् (दि. प. से.), अनुसंधा (जु. उ. अ.) । सं. पुं., दे. 'शोधन' ।

शोधनी, सं. स्त्री. (सं.) सं-, मार्जनी, बहुंकरी ।

शोधनीय, वि. (सं.) पवनीय, मार्जनीय २. निस्तार्य, प्रत्यर्पयितव्य ३. अनुसंधेय ।

शोभन, वि. (सं.) सुंदर, रम्य, रमणीय, २. उत्तम, श्रेष्ठ ३. उचित, उपयुक्त ४. मांगलिक, मंगल्य, मंगलीय ।

शोभा, सं. स्त्री. (सं.) कांतिः-द्युतिः-दीप्तिः (स्त्री.), भा, भासा, श्रीः (स्त्री.) २. छविः (स्त्री.), सुन्दरता, रुचिरता ३. भूषा, परिष्क्रिया ४. वर्णः, रंगः ५. श्रेष्ठगुणः ।

—**देना**, क्रि. अ., राज्-शुभ् (भ्वा. आ. से.) ।

शोभायमान, वि. (सं. शोभमान) राजमान, भ्राजमान, भासुर, देदीप्यमान, सुन्दर २. विद्यमान, उपस्थित ।

शोभित, वि. (सं.) शोभान्वित, सुन्दर, छविमत् । २. मंडित, भूषित ३. उपस्थित, विद्यमान ।

शोर, सं. पुं. (फ़ा.) महारवः, कलकलः, कोलाहलः दे. ।

—**मचाना**, क्रि. अ., कोलाहलं कृ, उत्कुश् (भ्वा. प. अ.) ।

शोरबा, सं. पुं. (फ़ा.) यूषः-षं, सूपः, लासः, रसः २. मांसरसः, दे. 'यखनी' ।

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

शीरा, सं. पुं. (फ़ा. शीर) यवक्षारः, विपाकिन्, निपीतिन्, पाक्यः ।
शीरे का तेज़ाब, सं. पुं.; भूथिकाम्लः, फाक्यद्रावकं, नत्रिक-यवक्षार,-अम्लः ।
शोला, सं. पुं. (अ.), ज्वाला, अर्चिस् (न.) ।
शोशा, सं. पु. (फ़ा.) अद्भुत-विलक्षण,-वार्त्ता २. व्यंग्योक्तिः (स्त्री.) ३. कलहोत्पादिका वार्त्ता ।
शोषक, वि. (सं.) रसाकर्षक, शोषणकर २. क्षय-ध्वंस,-कारिन् ।
शोषण, सं. पुं. (सं. न.) रसाकर्षणं, शुष्कीकरणं २. क्षपणं ३. वि,-नाशनं, वि,-ध्वंसनं ४. सारोद्धारः, ५. चूषणम् ।
शोहदा, सं. पुं. (अ.) दे. 'लुचा' ।
शोहरत, सं. स्त्री. (अ.) ख्यातिः-प्रसिद्धिः (स्त्री.) ।
शोहरा, सं. पुं. (अ.) शोहरत, दे. ।
शौक, सं. पुं. (अ.) अभि,-रुचिः (स्त्री.), प्रवृत्तिः (स्त्री.), प्रवणता २. लालसा, उत्कंठा, औत्सुक्यम् ।
—करना, मु., भुज् (रु. आ. अ.) ।
—चर्राना, मु., तीव्रम् अभिलष् (भ्वा.प.से.) ।
—पूरा करना, मु., कामं उपभोगेन शम् (प्रे.) ।
—से, मु., सानंदं, सहर्षं, समोदम् ।
शौकीन, सं. पुं. (अ. शौक) प्रसाधन-शृङ्गार-सुवेश,-प्रियः, वेषाभिमानिन्, छैकः २. वेश्यागामिन् ३. प्रेमिन्, अनुरागिन्, स्नेहिन्, अभिलाषिन् ।
शौकीनी, सं. स्त्री. (हिं. शौकीन) वेषाभिमानः, शृङ्गारप्रियता २. वेश्यागमनम् ।
शौच, सं. पुं. (सं. न.) शुद्धता, शुद्धिः (स्त्री.), पवित्रता, पूतता, शुचित्व-त्वं, पुण्यता, निष्पापता २. प्रातः,-कृत्यानि-कार्याणि (न. बहु०) (शौच, स्नान, संध्या आदि) ३. पुरीषोत्सर्गः, हदनम् ।
शौरसेनी, सं. स्त्री. (सं.) १-२. प्राकृत-अपभ्रंश,-भाषाविशेषः ।
शौर्य, सं. पुं. (सं. न.) शूरता, वीरता, पराक्रमः ।
शौहर, सं. पुं. (फ़ा.) पतिः, भर्तृ ।
श्मशान, सं. पुं. (सं. न.) पित्र,-वनं-काननं, अंतश्शय्या, शतानकं, रुद्राक्रीडः, दाहसरः (पुं.), शवसादनम् ।
—वासी, सं. पुं. (सं.-सिन्) शिवः, २. चांडालः ।
श्मश्रु, सं. पुं. (सं. न) कूर्चः,-र्चं, चोटः, व्यंजनं, मुखरोमन् (न.), शिंगिन् (न.), शिंघाणं, दे. 'दाढ़ी' ।
—वर्धक, सं. पुं. (सं.) नापितः ।
श्याम, सं. पुं. (सं.) श्रीकृष्णः २. कृष्णवर्णः । वि. (सं.) काल, कृष्ण २. कालनील, कृष्ण-मेचक ।
—सुंदर, सं. पुं. (सं.) श्रीकृष्णः ।
श्यामता, सं. स्त्री. (सं.) कालिमन्-कृष्णिमन् (पुं.) २. नीलता, मेचकता ।
श्यामल, वि. (सं.) काल २. कालीन ।
श्यामा, सं. स्त्री. (सं.) राधा-धिका २. शकुनी, कालिका, कृष्णा (खगभेदः) ३. अप्रसूतांगना ४. (तप्तकांचनवर्णाभा) नारी ५. कृष्णा गौः (स्त्री.) ६. यमुना ७. रात्री ।
श्याल, सं. पुं. (सं.) श्यालकः, भार्या-पत्नी,-भ्रातृ ।
श्यालकी, सं. स्त्री. (सं.) श्यालिका, श्याली, भार्या-पत्नी,-भगिनी ।
श्येन, सं. पुं. (सं.) शशादः-दनः, कपोतारिः, खगांतकः, घाति-रण,-पक्षिन्, नीलपिच्छः ।
श्येनी, सं. स्त्री. (सं.) श्येनिका, नीलपिच्छी-च्छा ।
श्रद्धा, सं. स्त्री. (सं.) आदरः, संमानः सत्कारः २. विश्वासः, प्रत्ययः, विश्रंभः ३. निष्ठा, आस्था, भक्तिः (स्त्री.) ।
—करना या—रखना, क्रि. अ. श्रद्धा (जु. उ. अ.), विश्वस् (अ. प. से.) ।
—हीन, वि. (सं.) अविश्वासिन्, अश्रद्दधान २. आस्था-निष्ठा-भक्ति,-हीन ।
श्रद्धालु, वि. (सं.) श्रद्धा,-वत्-युक्त-अन्वित, श्रद्दधान, विश्वासिन्, प्रत्ययिन् २. (स्त्री.) दोहदवती ।
श्रद्धेय, वि. (सं.) विश्वास-श्रद्धा,-पात्रं-आस्पदं, श्रद्धातव्य, पूज्य, सं,-मान्य, नमस्य ।
श्रम, सं. पुं. (सं.) परिश्रमः, दे. । २. श्रांतिः (स्त्री.) ३. व्यायामः ।
—जल, सं. पुं. (सं. न.) प्र,-स्वेदः, श्रम,-कणाः-शीकराः (बहु.) दे. 'पसीना' ।
—जीवी, सं., पुं. (सं.-विन्) श्रमिकः, कर्मकरः, दे. 'मजदूर' ।

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

श्रवण, सं. पुं. (सं. पुं. न.) कर्णः, श्रवः, श्रोत्रं दे. 'कान' सं. न. निशमनं, आकर्णनम् (सं. पुं. स्त्री.) श्रवणनक्षत्रम् (ज्यो.)।

श्रवणा, सं. स्त्री. (सं.) श्रवणः-णं, नक्षत्रविशेषः।

श्रव्य, वि. (सं.) दे. 'श्राव्य'।

श्रांत, वि. (सं.) क्लांत, ग्लान, खिन्न, श्रमार्त्त, अवसन्न, जातश्रम २. शांत ३. निवृत्त।

श्रांति, सं. स्त्री. (सं. स्त्री.) श्रमः, आयासः, अवसादः, खेदः।

श्राद्ध, सं. पुं. (सं. न.) श्रद्धया क्रियमाणं कर्मन् (न.) २. पितॄन् उद्दिश्य श्रद्धया अन्नादिदानं ३. पितृ-आश्विनकृष्ण,-पक्षः।

श्राप, सं. पुं., दे. 'सराप'।

श्रावण, सं. पुं. (सं.) श्रावणिकः, नभः (पुं.)।

श्रावणी, सं. स्त्री. (सं.) श्रावणमासीयपूर्णिमा।

श्राव्य, वि. (सं.) श्रव्य, श्रोतव्य, श्रवणार्ह, आकर्णनीय, निशमनीय।

श्री, सं. स्त्री. (सं.) कमला, लक्ष्मीः दे. २. सरस्वती ३. धनं, संपद् (स्त्री.) ४. विभूतिः (स्त्री.), विभवः ५. यशस् (न.) ६. शोभा, प्रभा ७. कांतिः-द्युतिः (स्त्री.) ८. नामपुरोवर्ति समानपदं श्रीयुत, श्रीमन् ९. वृद्धिः (स्त्री.) १०. साफल्यं, सिद्धिः (स्त्री.) ११. रागभेदः। वि., योग्य २. मनोज्ञ ३. उत्तम ४. मंगल।

—कंठ, सं. पुं. (सं.) शिवः, शंभुः।

—खंड, सं. पुं. (सं. पुं. न.) हरिचंदनं २. दे. 'शिखरन'।

—धर, सं. (सं.) विष्णुः, श्री,-निवासः-निकेतनः। वि., तेजस्विन्।

—पति, सं. पुं. (सं.) विष्णुः २. श्रीरामः ३. श्रीकृष्णः ४. कुबेरः ५. नृपः।

—पथ, सं. पुं. (सं.) राज,-मार्गः-पथः।

—पाद, वि. (सं.) पूज्य २. संपन्न।

—पुष्प, सं. पुं. (सं. न.) लवंगं, श्रीप्रसूनम्।

—फल, सं. पुं. (सं.) विल्ववृक्षः २. नारिकेलः ३. राजादनीवृक्षः ४. आमलकः-की।

—फली, सं. स्त्री. (सं.) आमलकी २. नीली।

श्रीमंत, वि. (सं-मत्) धनिक, धनाढ्य।

श्रीमत्, वि. (सं.) धनवत्, धनिन्, श्रील, २. शोभान्वित, द्युतिमत् ३. छविमत्, सुन्दर। सं. पुं., विष्णुः २. कुबेरः ३. शिवः।

श्रीमती, सं. स्त्री. (सं.) स्त्रीनामपुरोवर्त्तिसमानपदं २. लक्ष्मीः (स्त्री.) ३. राधा। वि., धनाढ्या २. शोभान्विता ३. सुन्दरी।

श्रीमान्, सं. पुं. (सं. श्रीमत्) नरनामपुरोवर्तिसंमानपदं, श्रीयुत, श्रीयुक्त। दे. 'श्रीमत्' वि. तथा सं. पुं.।

श्रीरस, सं. पुं. (सं.) श्रीवेष्टः, दे. 'श्रीवास'।

श्रीराग, सं. पुं. (सं.) षड्रागमध्ये तृतीयो रागः।

श्रील, वि. (सं.) लक्ष्मीवत्, धनाढ्य २. श्री-शोभा,-युक्त-युत ३. अन्नङ्लील, भद्र।

श्रीवत्स, सं. पुं. (सं.) विष्णुः २. विष्णुवक्षःस्थशुक्लवर्णदक्षिणावर्ततरोमावली।

—लांछन, सं. पुं. (सं.) विष्णुः।

श्रीवास, सं. पुं. (सं.) पायस्, वृकधूपः, श्रीवेष्टः, सरलद्रवः दे. 'गंधाबिरोजा' तथा 'तारपीन' २. पद्मं ३. विष्णुः ४. शिवः।

श्रीहर्ष, सं. पुं. (सं.) नैषधकाव्यरचयिता २. सम्राट् हर्षवर्द्धनः।

श्रुत, वि. (सं.) आकर्णित, श्रवणगोचरतां गत, निशान्त २. प्र-,ख्यात।

—कीर्ति, सं. स्त्री. (सं.) शत्रुघ्न-पत्नी। वि., कीर्तियुत, यशस्विन्।

श्रुति, सं. स्त्री. (सं.) वेदः २. कर्णः, दे. 'कान' ३. श्रवणं ४. ध्वनिः ५. किंवदंती।

—कटु, सं. पुं. (सं.) (काव्ये दोषभेदः) कर्कशशब्दप्रयोगः, दुःश्रवत्वम्।

—पथ, सं. पुं. (सं.) कर्णः २. वेदोक्तमार्गः।

श्रेणी, सं. स्त्री. (सं.) श्रेणिः (स्त्री.), कक्षा, वर्गः, छात्रगणः २. पंक्तिः-,क्तिका, विंजोली, आली-लिः, आवलि-लीः, राजी-जिः, वीथी-थिका, रेखा, लेखा, पाली-लिः (सब स्त्री.) ३. क्रमः, परंपरा, शृङ्खला ४. समव्यवसायिसंघः।

—बद्ध, वि. (सं.) पंक्ति,-बद्ध-स्थ, वर्गीकृत।

श्रेय, स. पुं. [सं. श्रेयस् (न.)] कल्याणं, आनन्दः, मंगलं २. धर्मः, सुकृतं ३. मोक्षः, समृद्धिः (स्त्री.) ४. कीर्तिः (स्त्री.), यशस् (न.)। वि., भद्रतर, साधीयस्, उत्कृष्टतर २. उत्तम, श्रेष्ठ ३. शुभंकर, मंगल ४. कीर्तिकर, यशोदायक।

श्रेयस्कर, वि. (सं.) कल्याण-हित-मंगल,-कारक-कारिन्।

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

श्रेष्ठ, वि. (सं.) उत्तम, परम, प्रशस्ततम, वरेण्य, मुख्य, प्रथम, अग्रि(ग्री)य ३. पूज्य, मान्य ४. वृद्ध, ज्येष्ठ ५. अभिजात, अभिजनवत्, कुलीन ६. आर्य, महानुभाव, महाशय।

श्रेष्ठता, सं. स्त्री. (सं.) औदार्यं, माहात्म्यं, प्रधानता, भद्रता, आर्यत्वं, कुलीनता २. उत्तमता, उत्कृष्टता।

श्रोतव्य, वि. (सं.) दे. 'श्राव्य'।

श्रोता, सं. पुं. (सं.-तृ) श्रावकः, श्रवण-निशमन,-कर्तृ, आकर्णयितृ।

श्रोत्र, सं. पुं. (सं. न.) श्रवणः-णं, कर्णः, दे. 'कान'।

श्रोत्रिय, सं. पुं. (सं.) वेद,-विद्-पाठकः, छांदसः २. ब्राह्मणजातिभेदः।

श्रौत, वि. (सं.) श्रुति-वेद,-विहित-प्रतिपादित २. वैदिक, छांदस ३. यज्ञीय। (सं. न.) गार्हपत्याहवनीयदक्षिणाग्नयः (बहु.)।

—**सूत्र**, सं. पुं. (सं. न.) यज्ञविधायकग्रन्थविशेषः।

श्लाघनीय, वि. (सं.) श्लाघ्य, प्रशंसनीय, दे. २. उत्तम, श्रेष्ठ।

श्लाघा, सं. स्त्री. (सं.) स्तुतिः-नुतिः (स्त्री.), प्रशंसा, दे. २. चाटु (पुं. न.), चाटूक्तिः (स्त्री.) ३. इच्छा।

श्लाघ्य, वि. (सं.) श्लाघनीय, दे.।

श्लिष्ट, वि. (सं.) संयुक्त, संलग्न २. आलिंगित ३. अनेकार्थक, श्लेषयुक्त (शब्दादि)।

श्लीपद, सं. पुं. (सं. न.) पादवल्मीकं, दे. 'फीलपाँव'।

श्लील, वि. (सं.) उत्तम, उत्कृष्ट २. शुभ, भद्र।

श्लेष, सं. पुं. (सं.) अनेकार्थकशब्दप्रयोगः, शब्दालंकारभेदः (सा.) २. परिरंभः, आलिंगनं ३. संयोगः, संधिः।

श्लेष्मा, सं. पुं. (सं.-मन्) कफः, दे. 'बलगम'।

श्लोक, सं. पुं. (सं.) अनुष्टुप्छंदस् (न.) २. पद्यं; छंदस् (न.) ३. यशस् (न.) ४. प्रशंसा।

श्वसुर, सं. पुं. (सं.) दे. 'ससुर'।

श्वशुर्य, सं. पुं. (सं.) देवरः २. श्यालः।

श्वश्रू, सं. स्त्री. (सं.) दे. 'सास'।

श्वान, सं. पुं. (सं.) श्वन्, कुक्कुरः, दे. 'कुत्ता'।

—**निद्रा**, सं. स्त्री. (सं.) अगाढ़-कुक्कुर,-निद्रा-स्वापः।

श्वानी, सं. स्त्री. (सं.) कुक्कुरी, शुनी, सरमा, भषी, सारमेयी।

श्वापद, सं. पुं. (सं.) हिंस्रपशुः।

श्वास, सं. पुं. (सं.) प्राणाः-असवः (बहु.), दे. 'सांस' २. श्वासरोगः, दे. 'दमा'।

—**धारण**, सं. पुं. (सं. न.) श्वासरोधः, प्राणायामः।

श्वासोच्छ्वास, सं. पुं. (सं.) *प्राण,-गतिः क्रिया, श्वसितोच्छ्वासितम्।

श्वित्र, सं. पुं. (सं. न.) श्वेतं-त्रं, श्वेतकुष्ठम्। वि. (सं.) श्वेत २. श्वित्रिन्।

श्वित्री, वि. (सं.-त्रिन्) श्वित्र-श्वेतकुष्ठ,-युक्त।

श्वेत, वि. (सं.) धवल, गौर, शुक्ल-क्ल, दे. 'सफेद' २. निर्मल, स्वच्छ ३. निर्दोष, निष्कलंक। सं. पुं. (सं.) शुक्लवर्णः २. शंखः ३. शुक्रग्रहः (सं. न.) रूप्यं, रजतम्।

—**कुष्ठ**, सं. पुं. (सं. न.) दे. 'श्वित्र'।

—**कृष्ण**, वि. (सं.) सितासित, शुक्लश्याम २. पक्षविपक्ष।

—**केतु**, सं. पुं. (सं.) उद्दालकपुत्रः।

—**प्रदर**, सं. पुं. [सं. प्रदरभेदः (स्त्रीरोग)]।

श्वेतता, सं. स्त्री. (सं.) श्वेतिमन् (पुं.), शुक्लता, दे. 'सफेदी'।

श्वेतांबर, सं. पुं. (सं.) जैनसंप्रदायविशेषः, धवलवेषः।

ष

ष, देवनागरीवर्णमालाया एकत्रिंशो व्यंजनवर्णः, षकारः।

षंढ, सं. पुं. (सं.) दे. 'शंढ' (१-२)।

षट्, वि. (सं. षष्) सं. पुं., उक्ता संख्या, तद्बोधकांकश्च (६) २. दीपकरागपुत्रः।

—**कर्म**, सं. पुं. (सं. नं) (न.) षट् ब्राह्मण-कर्माणि (यजनं, याजनं, अध्ययनं, अध्यापनं, दानं, प्रतिग्रहः)।

—**कोण**, सं. पुं. (सं. न.) षड्भुजः। वि., षड्भुज।

—**पद**, सं. पुं. (सं.) षडंघ्रिः, षट्चरणः, भ्रमरः

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

—पदी, सं. स्त्री. (सं.) भ्रमरी २. छन्दोभेदः (छप्पय) ३. यूका ।

—शास्त्र, सं. पुं. (सं. न.) सांख्ययोगन्याय-वैशेषिकमीमांसावेदांतशास्त्राणि (न. बहु.) ।

—शास्त्री, सं. पुं. (सं.-स्त्रिन्) षड्दर्शनविद् ।

षट्क, सं. पुं. (सं. न.) षट् इति संख्या २. षट्वस्तुसमूहः ।

षडंग, सं. पुं. (सं. न.) वेदांगषट्शास्त्राणि (शिक्षा, कल्पः, व्याकरणं, निरुक्तं, छन्दस् (न.), ज्योतिषं) २. षट् शरीरावयवाः (जंघे बाहू शिरो मध्यं षडंगमिदमुच्यते)) वि., षडवयवयुक्त ।

षडंघ्रि, सं. पुं. (सं.) भ्रमरः, षट्पदः ।

षडानन, सं. पुं. (सं.) कार्तिकेयः, षण्मुखः ।

षड्गुण, सं. पुं. (सं. न.) षाड्गुण्यं, राज्य-रक्षणस्य षड्उपायाः (= संधिः, विग्रहः, यानं, आसनं, द्वैधीभावः, संश्रयः) । वि., गुणषट्कयुत २. षड्गुणित ।

षड्ज, सं. पुं. (सं.) स्वरसप्तके प्रथमः, चतुर्थो वा स्वरः (संगीत) ।

षड्दर्शन, सं. पुं. (सं. न.) दे. 'षट्शास्त्र' ।

षड्यंत्र, सं. पुं. (सं.) कूटः-टं, कूट-, युक्तिः (स्त्री.)-उपायः उपजापः, *षडयंत्रं, *षट्चक्रं, कुमंत्रणा ।

षड्रस, सं. पुं. (सं.-रसं,-रसाः) रसषट्कं (= मधुरः, अम्लः, लवणः, कटुः, तिक्तः, कषायः) ।

षड्रिपु, सं. पुं. (सं. न.) षड्वर्गः, विकारषट्कं (= कामः क्रोधस्तथा लोभो मदमोहौ च मत्सरः) ।

षष्ठी, सं. स्त्री.(सं.) शुक्लकृष्णपक्षयोः षष्ठी तिथिः (स्त्री.) २. संबन्धविभक्तिः (व्या.) ३. कात्यायनी, दुर्गा ।

षाड्गुण्य, सं. पुं. (सं. न.) दे. 'षड्गुण' सं. पुं. ।

षोडश, वि. तथा (सं.) 'सोलह' ।

—कला, सं. स्त्री. (सं. बहु.) चंद्रमडण्डलस्य षडधिकदश भागाः (= अमृता, मानदा, पूषा, तुष्टिः, पुष्टिः, रतिः धृतिः, शशिनी, चन्द्रिका, कांतिः, ज्योत्स्ना, श्रीः, प्रीतिः, अंगदा, पूर्णा, पूर्णामृता = १६ कला) ।

—शृङ्गार, सं. पुं. (सं. बहु.) षोडशसंख्याकानि प्रसाधनसाधनानि ।
(अंग शुची, मंजन, वसन, मांग, महावर, केश । तिलक भाल, तिल चिबुकमें, भूषण, मेंहदीवेष । मिस्सी, काजल, अर्गजा, बीरी और सुगंध । पुष्पकली, युत होय कर तब नवसप्त निबन्ध ।)

—संस्कार, सं. पुं. (सं. बहु.) धार्मिककृत्यभेदः (= गर्भाधानपुंसवनसीमन्तोन्नयनजातकर्मनाम-करणनिष्क्रमणान्नप्राशनचूडाकर्मकर्णवेधोपनयन वेदारंभसमावर्तनविवाहवानप्रस्थसन्न्यासांत्येष्टि-संस्काराः (स्वामी दयानन्द) ।

षोडशी, सं. स्त्री. (सं.) षोडशवर्षा युवतिः (स्त्री.) २. प्रेतक्रियाभेदः ।

षोडशोपचार, सं. पुं. (सं. बहु.) षोडशपूजनं, (=आसनं स्वागतं पाद्यमर्घ्यमाचमनीयकम् ।
मधुपर्काचमस्नानं वसनाभरणानि च ॥
गंधपुष्पे धूपदीपौ नैवेद्यं वंदनं तथा ।
प्रयोजयेदर्चनायां उपचारास्तु षोडश ॥)

स

स, देवनागरीवर्णमालाया द्वात्रिंशो व्यंजनवर्णः सकारः ।

संकट, सं. पुं. (सं. न.) आपद्-विपद्-आपत्तिः-विपत्तिः (स्त्री.) २. दुःखं, कष्टं ३. जन,-समूहः-संमर्दः ४. गिरिद्वारं, दे. 'दर्रा' ५. संबाधपथः ।

संकटापन्न, वि. (सं.) आपद्-विपद्-आपत्ति,-ग्रस्त ।

संकटोत्तीर्ण, वि. (सं.) कष्ट-क्लेश-विपत्ति,-मुक्त-रहित ।

संकर, सं. पुं. (सं.) सम्मिश्रण, संमिलन २. सांकरिकः, मिश्रजः, संकरजः, ३. अधर्म्य-विवाहः ।

संकरता, सं. स्त्री. (सं.) संमिश्रता, सांकर्य्यं, क्रमभंगः, व्यतिकरः, अस्तव्यस्तता ।

संकल, सं. स्त्री. (सं.) शृंखला, दे. ।

संकलन, सं. पुं. (सं. न.) संग्रहणं, संचयनं २. संचयः, राशिः, ३. परिगणनं, परिसंख्या ३. संग्रहः, संग्रहग्रन्थः ।

—करना, क्रि. स., संकल् (चु.), संग्रह् (क्र. प. से.), समाह (भ्वा. प. अ.) ।

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

संकलित, वि. (सं.) संगृहीत, संचित २. परिसंख्यात, परिगणित ३. राशी-एकत्री,-कृत ।

संकल्प, सं. पुं. (सं.) चिकीर्षा, भावः, विचारः, इच्छा, कामः २. विशिष्टमन्त्रपूर्वक,-दानं वितरणं-उत्सर्जनं ३. मंत्रविशेषः ४. निश्चयः, अवधारणं, अध्यवसायः ।

—**करना**, क्रि. स., निश्चि (स्वा. प. अ.), दृढं अवधृ (चु.), संकल्पय् (प्रे.) २. संकल्पमंत्रपूर्वकं वितृ (भ्वा. प. से.), दा ।

संकाश, वि. (सं.) तुल्य, सदृश २. निकट-समीप, वर्तिन् । (सं. पुं.) सामीप्यं, नैकट्यम् ।

संकीर्ण, वि. (सं.) संबाध, संकट, संकुचित २. मिश्रित, संमिश्र, संसृष्ट ३. क्षुद्र, तुच्छ ४. संकुल, निचित, व्याप्त, समा-आ,-कीर्ण ।

संकीर्णता, सं. स्त्री. (सं.) संबाधता २. मिश्रितत्वं ३. संकुलता ४. क्षुद्रता, नीचता ।

संकीर्तन, सं. पुं. (सं. न.) (देवादीनां) गुणगानं, कीर्तिकथनम् ।

संकुचित, वि. (सं.) संकीर्ण, संबाध २. सलज्ज, सत्रप ३. कदर्य, किंपचान ४. संहृत, संपिंडित, आकुंचित ५. मुद्रित, मीलित, मुकुलित ।

संकुल, वि. (सं.) आ-सं,-कीर्ण, निचित, व्याप्त, कलिल, गहन, संभृत, सं-परि,-पूर्ण, पूरित । सं. पुं. (सं. न.) युद्धं २. जन,-ओघः-संमर्दः ३. पशुकुलं, गो,-वृंद-कुलं, यूथं, निवहः ४. असंगतवाक्यम् ।

संकेत, सं. पुं. (सं.) इङ्गितं, संज्ञा, संज्ञानं, अंगविक्षेपः, प्रज्ञप्तिः (स्त्री.), आकारः, अभिप्रायव्यंजकचेष्टा २. (प्रेमिणोः) संकेतनिकेतनं, संमिलनस्थानं ३. शृंगारचेष्टा, हावः, विभ्रमः, विलासः ४. चिह्नं ५. उपक्षेपः, आकूतं, उपन्यासः ।

—**करना**, क्रि. स., इंगितेन सूच् (चु.), उपक्षिप् (तु. प. अ.), साकूतं उपन्यस् (दि. प. से.) ।

संकोच, सं. पुं. (सं.) आकुंचनं, संकोचनं, समाकर्षः, संपीडनं २. लज्जा, त्रपा ३. निश्चयाभावः, विकल्पः, संशयः ४. संक्षेपः-पणम् ।

संकोचन, सं. पुं. (सं. न.) दे. 'संकोच' (१) ।

संकोचना, क्रि. स. (सं. संकोचनं) संकुच् (प्रे.), आकुंच् (प्रे.), अल्पीकृ, संहृ (भ्वा. प. अ.) । क्रि. अ., लज्ज् (तु. आ. से.) त्रप् (भ्वा. आ. से.) ।

संकोची, वि. (सं.-चिन्) लज्जालु, लज्जाशील, विनीत, शालीन ।

संक्रमण, सं. पुं. (सं. न.) गमनं, व्रजनं २. भ्रमणं, पर्यटनं ३. सूर्यस्य राश्यंतरप्रवेशः ।

संक्रांत, वि. (सं.) अतीत, गत २. प्रविष्ट, निविष्ट ३. प्राप्त, गृहीत ४. स्थानान्तरित ५. प्रति,-फलित-विम्बित ।

संक्रांति, सं. स्त्री. (सं.) दे. 'संक्रमण' (३) । २-३. सूर्यसंक्रमण,-समयः-दिवसः ।

संक्रामक, वि. (सं.) स्पर्श,-जन्य-संचारिन् (रोग) ।

संक्षिप्त, वि. (सं.) संहृत, समस्त, संकुचित, लघु, अल्पीभूत ।

—**करना**, क्रि. स., संक्षिप् (तु. प. अ.), समस् (दि. प. से.), समाहृ-संहृ (भ्वा. प. अ.) ।

—**लिपि**, सं. स्त्री. (सं.) दे. 'शार्टहैंड' ।

संक्षेप, सं. पुं. (सं.) सारः-रं, संग्रहः, समासः, समाहारः ।

संक्षेपण, सं. पुं. (सं. न.) संकोचनं, संहरणं २. संचयनं, संग्रहणम् ३. प्रासनं, क्षेपणम् ।

संक्षेपतः, अव्य. (सं.) संक्षेपेण, समासेन, साररूपेण ।

संख, सं. पुं., दे. 'शंख' (१-२) ।

संखिनी, सं. स्त्री., दे. 'शंखिनी' ।

संखिया, सं. पुं. (सं. शृङ्गिकं) फेनाश्मन, आखु-गौरी,-पाषाणः, शत-,मल्लः, करवीरा, कुनटी, नाग,-जिह्विका-मातृ (स्त्री.) ।

संख्या, सं. स्त्री. (सं.) गणना २. अंकः ३. बुद्धिः (स्त्री.) ४. विचारणा ।

—**करना**, क्रि. स., गण् (चु.) संख्या (अ. प. अ.) ।

संग[1], सं. पुं. (सं.) मेलः, संमिलनं, समागमः २. संगतं-तिः (स्त्री.), साहचर्यं, संसर्गः, संवासः, संपर्कः ३. विषय,-अनुरागः-आसक्तिः (स्त्री.) ४. सरित्संगमः । क्रि. वि., सह, सार्द्धं, साकं, समं (तृतीया के साथ) ।

—**करना**, क्रि. अ., संगम् (भ्वा. आ. अ.), सहचर् (भ्वा. प. से.), संवस् (भ्वा. प. अ.) ।

संग[2], सं. पुं. (फ़ा.) पाषाणः, प्रस्तरः, दे. 'पत्थर' । वि., कीकस, कर्कर, कर्कश, २. कठोर ।

—**ज़राअत**, सं. पुं. (फ़ा.+अ.) कर्षण-, पाषाण-प्रस्तरः ।

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

—तराश, सं. पुं. (फ़ा.) मूर्ति-प्रतिमा,-कारः, आश्मिकः, औपलिकः ।
—तराशी, सं. स्त्री., मूर्त्ति-प्रतिमा,-निर्माणम् ।
—दिल, वि. (सं.) पाषाण-कठोर,-हृदय, निर्दय ।
—दिली, सं. स्त्री., निर्दयता, निष्करुणता ।
—मर्मर, सं. पुं. (फ़ा.+अ.) राजाश्मन् (पुं.), मणिशिला, मर्मर,-उपलः-प्रस्तरः ।
—मूसा, सं. पुं. (फ़ा.) *मूषोपलः, *मूषाश्मन् (कृष्णश्लक्ष्णप्रस्तरभेदः) ।
संगठन, सं. पुं. (सं. सं+हिं. गठना) संघटनं-ना, संव्यवस्थानं, संविधानं, दे. 'संघटन' २. संस्था, संघः ३. ऐक्यं, संधिः, सं,-हतिः (स्त्री.) योगः-गमः ।
संगठित, वि. (हिं. संगठन) संघटित, संविहित, संव्यवस्थापित ।
संगत, सं. स्त्री. (सं. न.) दे. 'संग' (२) । २. सहचरः, संगिन् ३. मैथुनम् ।
—करना, क्रि. अ., दे. 'संग करना' ।
संगतरा, सं. पुं. (पुर्त.) (वृक्ष) नारंगः, नागरंगः, ऐरावतः । (फल) नारंगं इ., दे. 'नारंगी' ।
संगति, सं. स्त्री. (सं.) दे. 'संग' (१-२) । ३. मैथुनं ४. संबन्धः ५. संवादः, विरोधाभावः, आनुरूप्यं ६. ज्ञानं ७. युक्तिः (स्त्री.) ।
संगती, सं. पुं. (सं. संगतं>) सहचरः, मित्रं, सहायः ।
संगम, सं. पुं. (सं.) दे. 'संग' (१-२) । ३. वेणी-णिः (स्त्री.) सरित्,-संयोगः-समागमः-मेलकः ४. मैथुनं ५. ग्रहयोगः (ज्यो.) ।
संगर, सं. पुं. (सं.) युद्धं २. प्रतिज्ञा ३. नियमः ४. आपद् (स्त्री.) ५. अंगीकारः ६. विषम् ।
संगसार, सं. पुं. (फ़ा.) *उपलभारः, प्राणदंडभेदः । वि., नष्ट, ध्वस्त ।
संगिनी, सं. स्त्री. (हिं. संगी) सहचरी, सहगामिनी २. पत्नी ।
संगी, सं. पुं. (हिं. संग) सहचरः, सहायः २. मित्रं ३. बन्धुः ।
संगीत, सं. पुं. (सं. न.) प्रेक्षणार्थं नृत्यगीतवाद्यम् ।
—शास्त्र, सं. पुं. (सं. न.) गंधर्व,-विद्या-वेदः ।
संगीन, सं. स्त्री. (फ़ा.) *नाल्यस्त्रसंगिनी । वि., अश्मपाषाण,-मय-रचित २. स्थूल ३. स्थायिन्, दृढ ४. घोर, विकट ५. संकीर्ण ।
संगृहीत, वि. (सं.) संचित, समाहृत, एकत्रीकृत २. संकलित, परिसंख्यात ।
संग्रह, सं. पुं. (सं.) सञ्चयः-यनं, संग्रहणं, समा,-हारः-हृतिः (स्त्री.)-हरणं, संकलनं, राशी-एकत्री,-करणं २. संग्रहग्रंथः ३. संक्षेपः ४. मुष्टिः (पुं. स्त्री.) ५. निग्रहः, संयमः ६. रक्षा ७. बद्धकोष्ठः, दे. 'कबज़' ८. स्वीकृतिः (स्त्री.) ९. ग्रहणम् ।
संग्रहणी, सं. स्त्री. (सं.) ग्रहणी (अजीर्णभेदः) ।
संग्रहणीय, वि. (सं.) संचेतव्य, संचयनीय, निचेय ।
संग्रहालय, सं. पुं. (सं.) अद्भुतालयः ।
संग्रहीता, वि. (सं.-तृ) संग्राहक, संग्रहिन्, संचेतृ, संचयिन् ।
संग्राम, सं. पुं. (सं.) रणं, आहवः, युद्धं, दे. ।
—तुला, सं. स्त्री. (सं.) युद्धपरीक्षा ।
—भूमि, सं. स्त्री. (सं.) युद्धक्षेत्रम् ।
—मृत्यु, सं. स्त्री. (सं. पुं.) वीरगतिः (स्त्री.), रणमरणम् ।
संघ, सं. पुं. (सं.) सभा, समाजः, समितिः (स्त्री.), गोष्ठी, परिषद्-संसद् (स्त्री.) २. समूहः, गणः, वृंदं, दल ३. प्राचीनप्रजातंत्रभेदः ४. बौद्धश्रमणसमाजः ५. विहारः, मठः-ठम् ।
—चारी, वि. (सं.-रिन्) गण-यूथ,-गामिन् । सं. पुं., मीनः ।
—शासन, सं. पुं. (सं. न.) *संयुक्ततंत्रम् ।
संघटन, सं. पुं. (सं. न.) दे. 'संगठन' (१-३) ४. निर्माणं, रचनं ५. घटना, रचना ।
संघट्टन, सं. पुं. (सं. न.) संघर्षः-र्षणं २. संघट्टः, संमर्दः ३. रचना, घटना ४. संमिलनं, संयोगः ५. दे. 'संगठनम्' ।
संघर्ष, सं. पुं. (सं.) संघृष्टिः (स्त्री.), सं-अभि-आ,-घर्षः-र्षणं, आ-वि,-घट्टनं, परस्पर,-घर्षणं-मर्दनं २. प्रति-,स्पर्द्धा, विजिगीषा, प्रतियोगिता, अहमहमिका ३. सं,-घट्टः-मर्दः ४. युद्धम् ।
संघर्षण, सं. पुं. (सं. न.) दे. 'संघर्ष' ।
संघात, सं. पुं. (सं.) समूहः. वृंदं २. हननं, वधः ३.आघातः ४. निविडसंयोगः ५. आवासः ।
संघाती, सं. पुं. (सं. संघाः>) सहचरः, मित्रम् ।
संघाराम, सं. पुं. (सं.) आश्रमः, विहारः, मठः-ठम् ।

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

संचय, सं. पुं. (सं.) राशिः, निकरः, पुंजः-जिः (स्त्री.) २. आधिक्यं, बाहुल्यं ३. दे. 'संग्रह' (१)।

संचयी, वि. (सं.-यिन्) संचेतृ-संग्रहीतृ, संचय-संग्रह,-कारक २. कृपण।

संचार, सं. पुं. (सं.) सं-वि,-चरणं-चलनं, व्रजनं, गमनं, अटनं, भ्रमणं, २. प्रचारः, प्रसारः, प्रचरणं, प्रसरणं ३. पथप्रदर्शनं ४. प्र,-चालनं-चारणं-सारणं ५. ग्रहाणां राश्यंतर-प्रवेशः।

संचारिका, सं. स्त्री. (सं.) कुट्ट(ट्टि)नी, चुंदी, दूती-तिका।

संचारित, वि. (सं.) प्रचालित, प्रसारित।

संचारी, वि. (सं.-रिन्) संचरण-गमन-गति,-शील, चल २. परिवर्तनशील, परिवर्तिन्। सं. पुं. (सं.) पवनः २. व्यभिचारिभावः (सा.) ३. आगंतुकः ४. धूपः, दे.।

संचालक, सं. पुं. (सं.) परिचालकः, चालयितृ २. अधिष्ठातृ, अध्यक्षः ३. निर्वाहकः, व्यवस्थापकः।

संचालन, सं. पुं. (सं.) परि-,चालनं, प्रेरणं, प्रवर्तनं २. निर्वाहः, व्यवस्था ३. अध्यक्षता, निरीक्षणं ४. नियंत्रम्।

संचित, वि. (सं.) दे. 'संगृहीत' (१)।

संजय, सं. पुं. (सं.) धृतराष्ट्रसचिवः २. शिवः ३. ब्रह्मन् (पुं.)।

संजाफ़, सं. स्त्री. (फ़ा.) अंचलः, दशा, चीरी-रिः (स्त्री.)-वस्त्रप्रांतः।

संजीदगी, सं. स्त्री. (फ़ा.) गंभीरता, गांभीर्यम्।

संजीदा, वि. (फ़ा.) शांत, ग(गं)भीर २. बुद्धिमत्।

संजीवक, वि. (सं.) नव-पुनर्,-जीवनदायक, उज्जीवकः।

संजीवन, सं. पुं. (सं. न.) दे. 'संजीवक' २. सम्यक् प्राणधारणं ३. नरकविशेषः।

संजीवनी, वि. स्त्री. (सं.) उज्जीविका, नव-पुनर्,-जीवनदात्री। सं. स्त्री.(सं.) उज्जीवकौषधविशेषः (कल्पित) २. भेषजभेदः।

—विद्या, सं. स्त्री. (सं.) मृतकजीवनप्रद-कल्पितविद्याविशेषः।

संज्ञा, सं. स्त्री. (सं.) चेतना, चैतन्यं, वेदनं, बोधः २. अभिधा-धानं, आख्या, दे. 'नाम' ३. व्याकरणोक्तः शब्दः (व्या.) नामन् (न.), विशेष्यं ४. इंगितं, संज्ञानं, संकेतः।

—हीन, वि. (सं.) मूर्च्छित दे., अ-विगत,-चेतन, मूर्च्छापन्न।

संड-ड्डा, सं. पुं. [सं. शं(षं)डः] वृषभः २. पीनो मानवः।

—मुसंड-ड्डा, वि. (सं.+अनु.) मांसल, पीन, उपचित, दृढ़ांग (-गी स्त्री.)।

संडसा-सी, सं. पुं. स्त्री. (सं.) दे. 'संडासा-सी'

संडास, सं. पुं. (?) शौचकूपः, दे. 'पाखाना'।

संडासा सं. पुं. (सं. संदंशः) संदंशकः, कंक,-मुखः(-खं)-वदनम्।

संडासी, सं. स्त्री. (हिं. संडासा) संदंशिका, सुचु(चू)टी।

संत, सं. पुं. (सं. सत्) महात्मन्, धर्मात्मन्, हरिभक्तः २. विरक्तजनः। वि., भद्र, धार्मिक, श्रेष्ठ।

—समागम, सं.पुं. (सं.) सत्-साधु,-संगः-संगतिः।

संतत, अव्य. (सं.-तं) सदा, सर्वदा, सततं, निरंतरम्।

संतति, सं. स्त्री. (सं.) संतानः, दे.।

—निरोध, सं. पुं. (सं.) गर्भनिरोधः, परि-वारायोजनम्।

—होम, सं. पुं. (सं.) पुत्रेष्टियज्ञः।

संतप्त, वि. (स.) उत्-अति-सु,-तप्त, ज्वलित, दग्ध २.अति, दुःखित-पीडित-अर्दित ३.विषण्ण, विमनस्क ४. श्रांत, क्लांत, श्रमार्त्त।

संतरा, सं. पुं., दे. 'संगतरा'।

संतरी, सं. पुं. (अ. सैंट्री) दे. 'सिपाही' २. द्वारपालः।

संतान, सं. पुं. (सं.) संततिः-प्रसृतिः (स्त्री.), प्रजा, प्रसवः, अपत्यं, तोकं, बीजं २. अन्वयः, वंशः ३. कल्पवृक्षः ४. विस्तारः। (सं. न.) अखभेदः।

संताप, सं. पुं. (सं.) (अनलादिजः) तापः, संज्वरः, प्रोषः, उष्णः-र्णं, दाहः, ऊष्मन् घर्मः २. कष्टं, व्यथा ३. आधिः, मनोव्यथा ४. ज्वरः ५. शत्रुः ६. दाहनामको रोगः।

—देना, क्रि. स., परि-सं,-तप् (प्रे.), अर्द् (प्रे.), पीड् (चु.) २. दे. 'जलाना'।

संतापित, वि. (सं.) दे. 'संतप्त' (२)।

संतापी, वि. (सं.-पिन्) दुःखदायिन्।

संतुष्ट, वि. (सं.) सं-तृप्त, परि-, तुष्ट, वितृष्ण,

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

कृतार्थ २. अनुनीत, तोषित, प्रीत, सांत्वित, प्रसादित ।

संतोष, सं. पुं. (सं.) सं-परि,-तोषः-तुष्टिः (स्त्री.), वितृष्णा, शांतिः-तृप्तिः (स्त्री.), प्रीतिः, २. आनन्दः, हर्षः, सुखम् ।

—करना, क्रि. अ., संतुष्-संतृप् (दि. प. अ.), नंद् (भ्वा. प. से.) ।

संतोषी, वि. (सं.-षिन्) दे. 'संतुष्ट' (१) ।

संथा, सं. पुं. (सं. संहिता> ?) आह्निकं, दैनिक,-पाठः ।

संदर्भ, सं. पुं. (सं.) रचना, घटना, निर्मितिः (स्त्री.) २. प्रस्तावः, लेखः, प्र-नि,-बंधः ३. भाष्य-टीका,-आत्मकग्रन्थः ४. लघु,-ग्रन्थः-पुस्तकं ५. संग्रहः, संकलनं (ग्रंथ) ६. विस्तारः ।

संदल, सं. पुं. (फ़ा.) मलयजं, श्रीखंडं, चंदनं, दे. ।

संदली, वि. (फ़ा. संदल) चंदनवर्णं, ईषत्पीत २. चंदन,-मय-निर्मित ।

संदिग्ध, वि. (सं.) संदेह-संशय,-युक्त-पूर्ण, निश्चयशून्य, सविकल्प, विकल्प्य ।

—व्यक्ति, सं.पुं.(सं. स्त्री.) शंकित-शंक्य,-जनः ।

संदूक़, सं. पुं. (अ.) संपुटः, पेटा, मंजूषा, समुद्गः ।

संदूकचा, सं. पुं. **संदूकची**, सं.स्त्री. } (अ.+फ़ा.) पेटिका, समुद्गकः । करण्डकः, संपुट(टि)कः ।

संदेश, सं. पुं. (सं.) संवादः, वार्ता, वाचिकं, दिष्टं, आख्यायनी २. वंगप्रांतीयमिष्टान्नभेदः ।

—भेजना, क्रि. स., संदिश् (तु. प. अ.), वाचिकं-दिष्टं प्रेष् (प्रे.) ।

—हर, सं. पुं., वार्ताहरः, वार्तिकः, सांदेशिकः, दूतः, आख्यायकः ।

संदेसा, सं. पुं., दे. 'संदेश' (१) ।

संदेह, सं. पुं. (सं.) संशयः, विचिकित्सा, द्वापरः, विकल्पः, द्वैधं, आशंका, निश्चय-निर्णय-, अभावः २. प्रत्यय-विश्वास,-अभावः ५. अर्थालंकारभेदः (सा.) ।

संदोह, सं. पुं. (सं.) समूहः, निकरः ।

संधान, सं. पुं (सं. न.) अभिषवः, संधानी, मद्यसज्जीकरणं, संधिका २. चापे बाणयोजन ३. मदिराभेदः ४. संघट्टनं, संयोजनं ५. अन्वेषणं ६. सञ्जीवनं, दे. ७. संधिः ८. अवदंशः ९. कांजिकं १०. सौभाग्यं ।

संधि, सं. स्त्री. (सं. पुं.) संयोगः, संमिलनं, संगमः, संहतिः (स्त्री.) २. ग्रंथिः, पर्वन्(न.), संधिस्थानं ३. मित्रीकरणं, राज्यरक्षायाः गुणविशेषः (राजनीति) ४. मैत्री, सख्यं ५. वर्णद्वयमेलनं, संहिता (व्या.) ६. रूपकांगभेदः (सा.) ७. दे. 'सेंध' ८. युगसंधिः ९. वयःसन्धिः ।

—चौर, सं. पुं. (सं.) संधिहारकः ।

—च्छेद, सं. पुं. (सं.) संहितपदविश्लेषणम् ।

—जीवक, सं. पुं. (सं.) विटः, संचारकः ।

—बंधन, सं. पुं. (सं.) स्नसा, स्नायुबंधः ।

—वेला, सं. स्त्री. (सं.) अहोरात्रमिलनसमयः, संधिकालः २. सायम् ।

संध्या, सं. स्त्री. (सं.) संधिकालः, अहोरात्र-संयोगसमयः २. सायंकालः, दे. ३. उपासनाभेदः ४. युगसंधिः ।

—कालिक, वि. (सं.) संध्याकालीन, विकाल-संधिकाल,-सम्बन्धिन् ।

—बल, सं. पुं. (सं.) निशाचरः, राक्षसः ।

—राग, सं. पुं. (सं.) संध्या-विकाल-विकालक,-रक्तिमन्-शोणिमन्-रागः ।

—वंदन, सं. पुं. (सं. न.) संध्योपासनम् ।

संन्निकर्ष, सं. पुं. (सं.) सन्निधिः, सन्निधानं, सामीप्यं २. इन्द्रियार्थसम्बन्धः ।

संनिपात, सं. पुं. (सं.) वातपित्तकफानां युगपद् विकारः, विकारोत्पादकं मिलितदोषत्रयं २. समाहारः, समूहः ३. समवपातः ४. समुद्भवनं ५. संयोगः, मिश्रणम् ।

संनिवेश, सं. पुं. (सं.) समुपवेशः-शनं २. उपवेशः-शनं, आसितं, निषदनं ३. आ-नि,-धानं, स्थापनं ४. प्रतिबन्धनं, उत्खचनं, प्रणिधानं ५. गृहं ६. समूहः ७. रचना ८. संस्थानं ९. प्रतिमादीनां स्थापनम् ।

संनिहित, वि. (सं.) निकट-समीप,-स्थ-वर्तिन् २. (समीपे) स्थापित ।

संन्यास, सं. पुं. (सं.) आर्यजीवनस्य चतुर्थाश्रमः, प्रव्रज्या, वैराग्यं २. काम्यकर्मन्यासः (गीता) ३. जटामांसी ।

संन्यासी, सं. पुं. (सं.-सिन्) चतुर्थाश्रमिन्, परि,-व्राजकः-व्राज्, श्रमणः, भिक्षुः, मस्करिन्, कर्मन्दिन्, पाराशरिन् ।

संपत्ति, सं. स्त्री. (सं.) विभवः, वैभवं, ऐश्वर्यं, अर्थः, धनं, वित्तं, श्रीः-लक्ष्मीः-समृद्धिः (स्त्री.)

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

२. रिक्थं, दायः ३. सिद्धिः (स्त्री.), सफलता, पूर्णता ४. लाभः, प्राप्तिः (स्त्री.)।

संपद्-दा, सं. स्त्री. (सं. संपद्) दे. 'संपत्ति'।

संपन्न, वि. (सं.) धनाढ्य, धनिक, धनिन् दे. २. सिद्ध, निष्पन्न, पूर्ण ३. सहित, युक्त ४. संमृद्ध, धनधान्ययुत।

संपराय सं. पुं. (सं.) उत्तरकालः २. युद्धं ३. आपद (स्त्री.)।

संपर्क, सं. पुं. (सं.) संसर्गः, सम्बन्धः, साहचर्यं २. मिश्रणं दे. ३. संयोगः, मिलनं ४. स्पर्शः ५. योगः, संकलनं (गणित)।

संपात, सं. पुं. (सं.) सहपतनं २. समागमः ३. संगमस्थानं ४. संवृत्तिः-समापत्तिः (स्त्री.)।

संपादक, सं. पुं. (सं.), पत्र-पत्रिकादीनां-संपादयितृ, संपादनकरः २.साधकः, निष्पादकः ३. अनुष्ठातृ, कर्तृ, निर्वर्तयितृ।

संपादकता, सं. स्त्री. (सं.) सम्पादकत्वम्।

संपादकीय, वि. (सं.) १-२ सम्पादक,-लिखित-सम्बन्धिन्।

संपादन, सं. पुं. (सं. न.) मुद्रणार्थं सज्जीकरणं २. परिकल्पनं, प्रसाधनं, सज्जीकरणं ३.साधनं निष्पादनं, समापनं ४. करणं, निर्वर्तनं, अनुष्ठानम्।

संपादित, वि. (सं.) मुद्रणार्थं सज्जीकृत २. निष्पादित, पूर्त्ति गमित-नीत, संपूरित, साधित ३. प्रस्तुत, सज्ज।

संपुट, सं. पुं. (सं.) समुद्गकः, करंडकः, संपुट-(टि)का, मंजूषा, दे. 'डिब्बा' २. अञ्जलिः, कर-हस्त-पाणि,-पुटः ३.*द्रोणं, पत्रपुटः, दे.'दोना'।

सूखना, क्रि. अ. (सं. शोषणं) शुष् (दि. प. अ.), शोषं-शुष्कतां या (अ. प. अ.), शुष्क-निर्जल-नीरस (वि.) भू २. कान्ति-प्रभा,-हीन (वि.) भू ३. नश् (दि. प. वे.) ४. कृश-दुर्बल (वि.) जन् (दि. आ. से.) ५. भी (जु. प. अ.), सद (भ्वा. प. अ.) ६. विशृ (कर्म.), म्लै (भ्वा. प. अ.) । सं. पुं., शुषः, शोषः, शोषणं, शुषी-षिः (स्त्री.) ।

सूखा, वि. (सं. शुष्क) निर्जल, निरुदक, अरस, विरस, नीरस, वान २. निष्प्रभ, कान्तिहीन ३. नष्ट, ध्वस्त ४. कृशांग, दुर्बल ५. विशीर्ण, म्लान ६. परुष, कठोर, निर्दय ७. केवल, शुद्ध । सं. पुं., अनावृष्टिः (स्त्री.), अवर्षणं, अवग्रा(ग्र)हः २. नदी, तीरं-कूलं ३. निर्जलस्थानं ४. शुष्कतमाखुः ५. (बाल-कानां) कासभेदः, शोषः ६. दौर्बल्यं, कृशांगता ७. भंगा, दे. 'भाँग' ।
—पड़ना, क्रि. अ., वृष्टि-वर्ष,-विघातः-निरोधः वृत् (भ्वा. आ. से.) ।
—जवाब देना, मु., स्पष्टं निराकृ वा प्रत्याख्या (अ. प. अ.) ।

सूखा हुआ, वि., दे. 'सूखा' (१-५) ।

सूखकर काँटा होना, मु., अतिकृश-अतिक्षीण (वि.) जन्, अत्यंतं क्षि (भ्वा. प. अ.) ।

सूखे खेत लहलहाना, मु., सुदिवसा आगम् ।

सूचक, सं. पुं. (सं.) सूची-चिः (स्त्री.), दे. 'सूई' २. दे. 'सूआ' ३. सू(सौ)चिकः, सौचिः, तुन्नवायः, सूत्रभिद्, दे. 'दरजी' ४. सूत्रधारः ५. कथकः ६. कुक्कुरः ७. खलः, विश्वासघातकः ८. गुप्त-,चरः-चारः ९. पिशुनः, कर्णेजपः १०. शिक्षकः । वि. (सं.) ज्ञापक, बोधक, निर्देशक, निदर्शक ।

सूचना, सं. स्त्री. (सं.) विज्ञापना, आ-,ख्यापना, विज्ञप्तिः (स्त्री.) २. दे. 'सूचनापत्र' ३. वार्ता, संदेशः, ज्ञानं, बोधः ।
—पत्र, सं. पुं. (सं. न.) विज्ञापन-विज्ञप्ति-घोषणा-प्रसिद्धि,-पत्रम् ।

सूचनीय, वि. (सं.) बोधनीय, ज्ञापनीय, ज्ञापयितव्य, आवेदनीय ।

सूचि, सं. स्त्री. (सं.) दे. 'सूई' ।

सूचित, वि. (सं.) ज्ञापित, बोधित, आ-,ख्यापित, कथित, प्रकाशित ।

सूची, सं. स्त्री. (सं.) दे. 'सूई' २. अनुक्रमणी-णिका, नामावली-लिः (स्त्री.) परि,-गणना-संख्या ।
—कर्म, सं. पुं. [सं.-र्मन् (न.)] कलाभेदः ।
—पत्र, सं. पुं. (सं. न.), सूचि(ची) पुस्तकं-पत्रकम् ।
—भेद्य, वि. (सं.) सीवनीच्छेद्य २. घन, निविड (अन्धकार) ।

सूजन, सं. स्त्री. (हिं. सूजना) शोथः, शोफः, गंडः ।

सूजना, क्रि. अ. (फ़ा. सोज़िश) सशोथ-सशोफ (वि.) संजन् (दि. आ. से.), श्वि (भ्वा. प. से.), स्फाय् (भ्वा. आ. से.) । सं. पुं., दे. 'सूजन' ।

सूजनी, सं. स्त्री. (फ़ा. सोज़नी) कुथभेदः *सूचिनी ।

सूजा, सं. पुं. (सं. सूचा>) दे. 'सूआ' २. वेधनी, वेधनिका ।

सूज़ाक, सं. पुं. (फ़ा.) मूत्र-,उष्णवातः, रतिजरोगभेदः ।

सूजा हुआ, वि., शून, स्फीत, सशोफ, शोथयुत ।

सूजी, सं. स्त्री. (सं. शुचि>) कणिकः ।

सूझ, सं. स्त्री. (हिं. सूझना) कल्पना, उद्भावना २. बोधः, ज्ञानं ३. दृष्टिः (स्त्री.) ।
—बूझ, सं. स्त्री., बुद्धिः-मतिः (स्त्री.) ।

सूझना, क्रि. अ. (सं. सुध्यानम्) दृश्-लक्ष (कर्म.), अवभास् (भ्वा. आ. से.), प्रतिभा (अ. प. अ.) २. (मनसि विचारः) आविर्भू-अथवा उत्पद् (दि. आ. अ.) ।

सूट, सं. पुं. (अ.) आङ्गल-,वेशः(षः)-परिधानं २. *समवेशः-षः ।

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

—केस, सं. पुं. (अं.) वेश(प)कोपः ।
सूटा, सं. पुं. (अनु.) (तमाखुप्रभृतीनां) धूम्र,-कर्षः-कृष्टिः (स्त्री.) ।
सूत[1], सं. पुं. (सं. सूत्रं) तन्तुः, डोरः, शुल्वं २. सूत्रं, यज्ञोपवीतं ३. मेखला, कांची ।
—धार, सं. पुं., दे. 'बढ़ई' ।
सूत[2], सं. पुं. (सं.) वर्णसंकरजातिभेदः, क्षत्रियात् ब्राह्मणीसुतः २. सारथिः, यंतृ, क्षत्तृ, हयंकषः ३. चारणः, वंदिन्, वैतालिकः ४. पुराणवक्तृ, पौराणिकः । [सूती (स्त्री.)] वि. (सं.) प्रेरित २. उत्पन्न ।
—पुत्र, सं. पुं. (सं.) सारथिजः २. सारथिः ३. कर्णः ४. कीचकः ।
सूतक, सं. पुं. (सं.) जन्माशौचम् २. मरणाशौचम् ३. सूर्य-चन्द्र,-ग्रहणं, उपरागः ।
सुतली, सं. स्त्री. (हिं. सूत) सूत्रं, डोरः, गुणः, रज्जुः (स्त्री.), शुल्वं, शुल्लम् ।
सूति, सं. स्त्री. (सं.) प्रसूतिः (स्त्री.), प्रसवः, जननम् २. सन्ततिः (स्त्री.), सन्तानः ।
—गृह, सं. पुं. (सं. न.) दे. 'सूतिकागृह' ।
—मारुत, सं. पुं. (सं.) प्रसव-प्रसूति,-पीड़ा-वेदना, सूतिवातः ।
सूतिका, सं. स्त्री. (सं.) सद्यः-नव,-प्रसूता, दे. 'जच्चा' ।
—गृह, सं. पुं. (सं. न.) अरिष्टं, सूतिकागारं, प्रसव-सूति,-गृहं-भवनं-आवासः-गेहम् ।
सूती, वि. (हिं. सूत) कार्पास, कार्पासिक, तूल-तूलक-पिचु-पिचुल,-निर्मित-संबंधिन् ।
—कपड़ा, सं. पुं., कार्पासं, फालं, बादरं, तूलांबरम् ।
सूत्र, सं. पुं. (सं. न.) तंतुः, डोरः, शुल्वं, शुल्लं २. यज्ञ,-सूत्रं-उपवीतं ३. प्राचीनमानभेदः ४. रेखा-पा, लेखा ५. मेखला, कांची ६. नियमः, व्यवस्था ७. ससारं संक्षिप्तवचनं ८. कारणं, मूलं ९. संधानं. दे. 'सुराग' ।
—कंठ, सं. पुं. (सं.) ब्राह्मणः २. कपोतः ३. खंजनः, खंजरीटः ।
—कर्म, सं. पुं. [सं.-र्मन् (न.)] दारुकर्मन्, तक्षशिल्पं २. लेपकर्मन्, इष्टकान्यासः, वास्तुनिर्माणम् ।
—कार, सं. पुं. (सं.) सूत्र,-कर्तृ-प्रणेतृ-रचयितृ-कृत् ।
—ग्रंथ, सं. पुं. (सं.) सूत्ररूपेण रचितं पुस्तकम् ।
—धार, सं. पुं. (सं.) नाटकीयकथासूत्रसूचकः प्रधाननटः, नाट्यशालाव्यवस्थापकः, सूत्रभृत् २. तक्षन्, रथकारः ३. इन्द्रः [-धारी (स्त्री.) सूत्रधारपत्नी] ।
—पात, सं. पुं. (सं.) उपक्रमः, प्र-,आरंभः ।
सूथनी, सं. स्त्री., दे. 'सुत्थन' ।
सूद[1], सं. पुं. (फ़ा.) लाभः, प्राप्तिः (स्त्री.), आयः, फलं, अर्थः २. वृद्धिः (स्त्री.), वार्द्धुष्यं, कला, कायिका, कारिका, कालिका ।
—खाना, क्रि. स., वार्द्धुष्यं ग्रह् (क्र. प. से.) ।
—ख़ोर, सं. पुं. (फ़ा.) कुशी(शी-षी)दः-दकः, कुसीदिन्, वार्द्धुषिकः, वार्द्धुषिन्, वृद्ध्याजीवः ।
—ख़ोरी, सं. स्त्री., कुसीदं, कौसीद्य, वृद्धि,-जीवनं-जीविका ।
—दर सूद, सं. पुं. (फ़ा.) चक्रवृद्धिः (स्त्री.) ।
—पर देना, क्रि. स., कुसीदं कृ ।
—पर लेना, क्रि. स., वृद्ध्या ऋणं ग्रह् ।
—बट्टा, सं. पुं., हानिलाभौ, आयापायौ ।
बे—, वि., वृद्धि-कला,-रहित २. निष्फल, व्यर्थ ।
सूद[2], सं. पुं. (सं.) पाचकः, सूपकारः २. व्यंजनं, दे. 'भाजी' ३. सारथ्यं ४. अपराधः ५. पापम् ।
सूदन, वि. (सं.) नाशक, घातक ।
सूदी, वि. (फ़ा.) सवार्द्धुष्य, सकल (दत्तं आदत्तं वा) ।
सूना, वि. (सं. शून्य) निर्जन, विजन, विविक्त, जन,-हीन-शून्य २. रिक्त, -विरहित, -हीन, वशिक, तुच्छ, निर्-। सं. पुं. (सं. न.) एकांतः, विविक्तं, निर्जनस्थानम् ।
—पन, सं. पुं., शून्यता, विजनता, विविक्तता २. रिक्तता ३. एकांतः ।
सूनु, सं. पुं. (सं.) पुत्रः २. अनुजः ३. दौहित्रः ।
सूप[1], सं. पुं. (सं. शूर्प-र्पं) प्रस्फोटनं-नी, कुल्यः, सूर्पः ।
सूप[2], सं. पुं. (सं., मि. अं. सूप) पक्व-सिद्ध,-दाली-लिः (स्त्री.) २. दालीरसः ३. सरसं व्यंजनं ४. सूदः ।
—कार, सं. पुं. (सं.) सूदः, औदनिकः, आंधसिकः, पाच(क)कः, भक्ष्यंकारः ।

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

सूफ़, सं. पुं. (अ.) दे. 'ऊन' ।
सूफ़ी, सं. पुं. (अ.) यवनसंप्रदायविशेषः । वि., शुद्ध, पवित्र ।
सूबा, सं. पुं. (अ.) प्रांतः, प्रदेशः, देशभागः ।
सूबेदार, सं. पुं. (अ.+फ़ा.) प्रान्त,-अधिपतिः-शासकः-अध्यक्षः, भोगपतिः २. सेनाधिकारिभेदः ।
सूबेदारी, सं. स्त्री. (अ.+फ़ा.) भोगपतित्वं, प्रान्ताधिपतित्वं २-३. प्रान्ताधिपति-,पदं-कर्मन् (न.) ।
सूम[1], वि. (अ. शूम=अशुभ) कृपण, मितंपच, दे. 'कंजूस' ।
सूम[2], सं. पुं. (सं.) जलं, नीरम् २. दुग्धं, क्षीरम् ३. गगनं, आकाशः-शम् ।
सूय, सं. पुं. (सं. पुं. न.) सोम-सोमलता,-निष्पीडनं-संपीडनम् २. यज्ञः, यागः, मेधः, मखः ।
सूर[1], सं. पुं. (सं.) सूर्यः २. अर्कवृक्षः ३. पंडितः ।
सूर[2], सं. पुं., दे. 'शूर' ।
सूर[3], सं. पुं., दे. 'सूअर' ।
सूरज, सं. पुं. (सं. सूर्यः, दे.) ।
सूरत, सं. स्त्री. (फ़ा.) रूपं, आकारः, आकृतिः (स्त्री.) २. सौन्दर्यं, छविः (स्त्री.) ३. युक्तिः (स्त्री.), उपायः, विधिः ४. दशा, अवस्था ।
—**दिखाना**, मु., प्रकटति (ना. धा.), संमुखं-खे आया (अ. प. अ.) ।
—**बनाना**, मु., वेषं परिवृत (प्रे.) २. अन्यस्य रूपं ग्रह् (क्र्. प. से.)-धृ (चु.) ३. अरुचिं प्रकटयति (ना. धा.), विटंब् (चु.) ४. चित्रं लिख् (भ्वा. प. से.) ।
—**बिगड़ना**, मु., वदनं विवर्णं जन् (दि. आ. से.) ।
—**बिगाड़ना**, मु., मुखं विरूपयति (चु.),कुरूपं विधा (जु. उ. अ.) २. दंड् (चु.) ३. अप-अव-मन् (प्रे.), अवज्ञा (क्र्. प. अ.) ।
—**शक्ल**, सं. स्त्री. (फ़ा+अ.) आकृतिः (स्त्री.) ।
सूरदास, सं. पुं. (सं. सूर्यदासः) हिन्दीभाषायाः श्रीकृष्णभक्तो महाकविविशेषः २. अंधः, प्रज्ञाचक्षुष्कः ।
सूरन, सं.पुं. [सं. सू(शू)रणः] अर्शोघ्नः, ओलः-ल्लः, वातारिः, सुवृत्तः, वृहत्कन्दः, दे. 'जमींकंद' ।
सूरमा, सं. पुं. (सं. शूरमानिन्>) शूरः, वीरः, योधः, भटः, विक्रमशीलः ।
—**पन**, सं. पुं., शौर्यं, वीरत्वं,विक्रमः, साहसम् ।
सूरसागर, सं. पुं. (सं.) भक्त-सूरदासरचितः श्रीकृष्णलीलावर्णनात्मकः काव्यविशेषः ।
सूराख़, सं. पुं. (फ़ा.) छिद्रं, बिलं, विवरं, रंध्रं, नुषिः (स्त्री.) ।
—**करना**, क्रि. स., छिद्रयति (ना. धा.), समुत्कृ (तु. प. से.) ।
—**दार**, वि., सच्छिद्र, सरंध्र ।
सूर्य, सं. पुं. (सं.) सूरः, आदित्यः, भास्करः, दिन-प्रभा-विभा-दिवा,-करः, भास्वत्, विवस्वत्, उष्ण-तिग्म-चंड,-रश्मिः,-करः, अर्कः, मार्तण्डः, मिहिरः, तरणिः, मित्रः, सवितृ, अंशु-मरीचि,-मालिन्, सहस्रांशुः, रविः, दिन-अहः,-पतिः, तपनः, पद्मिनीवल्लभः, दिनमणिः, सप्त,-अश्वः-सप्तिः, तापनः, ख-दिवा,-मणिः, पतंगः,ग्रहराजः, तमोनुदः ।
—**कांत**, सं. पुं. (सं.) सूर्य-तपन,-मणिः, रविकांतः, सूर्याश्मन, अग्निगर्भः, अर्क-दीप्त,-उपलः ।
—**ग्रहण**, सं. पुं. (सं. न.) सूर्योपरागः, सूर्यग्रहः ।
—**घड़ी**, सं. स्त्री. (सं. सूर्यघटी) शंकुयंत्रम् ।
—**तनय**, सं. पुं. (सं.) सूर्य,-पुत्रः-सुतः-नंदनः, कर्णः २. शनिः, शनैश्चरः ३. यमः ४. सुग्रीवः ५. अश्विनौ (द्वि.) ।
—**तनया**, सं. स्त्री. (सं.) सूर्यपुत्री, सूर्यजा, यमुना, भानु,-जा-तनया ।
—**मंडल**, सं. पुं. (सं. न.) उपसूर्यकं, परिधिः, परिवेशः, मंडलं, सूर्यबिंबम् ।
—**मुखी**, सं. स्त्री. (सं.) सूर्यलता, आदित्य-भक्ता, वरदा,अर्ककान्ता, भास्करेष्टा, अर्कहिता ।
—**मुखी का फूल**, सं. पुं., सूर्यकमलं, वरदा-पुष्पम् ।
—**रश्मि**, सं. स्त्री. (सं. पुं.) रवि,-किरणः-पादः-करः ।
—**लोक**, सं. पुं. (सं.) सौरभुवनं, लोक-विशेषः ।
—**वंश**, सं. पुं. (सं.) रविकुलम् ।
—**वंशी**, वि. (सं.-शिन्) सूर्यवंश्य, रविकुलज ।
—**वार**, सं. पुं. (सं.) रवि-आदित्य,-वारः-वासरः ।

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

—संक्राति, सं. स्त्री. (सं.) रविसंक्रमणम् । प्रातः का—सं. पुं., बाल,-रविः-सूर्यः-अर्कः ।

सूर्यास्त, सं. पुं. (सं.) अस्तः, अस्तमनं, निम्लोचः, भानोरस्ताचलगमनं २. दिनांतः, सायंकालः ।

—होना, क्रि. अ., सूर्यः अस्तं इ-या (अ. प. अ.)-गम् ।

सूर्योदय, सं. पुं. (सं.) भानूद्गमः २. प्रातःकालः ।

—होना, क्रि. अ., सूर्यः उत्-इ (अ. प. अ.)-उद्गम् ।

सूल, सं. पुं., देखो 'शूल' ।

सूली, सं. स्त्री. (सं. शूलः-लं) शूला, तीक्ष्णाग्रस्थूणा २. शूलारोपणं, प्राणदंडप्रकारः ३. वधपाशस्थूणा, दे. 'फाँसी' ४. दंडपाशवधः, कंठं उद्बध्य घातः, उद्बंधनं ५. प्राण-मृत्यु,-दंडः ।

—चढ़ाना या—देना, क्रि. स., शूले आरुह्(प्रे. आरोपयति) २. उद्बध्य व्यापद् (प्रे.) या हन् (अ. प. अ.) ।

—चढ़ाने या—देनवाला, दंडपाशिकः, वधकः, *शूलारोपकः ।

सूस, सूसमार, सं. पुं. (सं. शिंशुमारः) दे. 'सूँस' ।

सूहा, वि. (हिं. सोहना) रक्त, शोण, लोहित ।

सृजन, सं. पुं. (सं. सर्जनं) उत्पादनं, निर्माणं, रचनं २. सृष्टिः-उत्पत्तिः (स्त्री.) ३. मोचनम् ।

—हार, सं. पुं., स्रष्टृ, उत्पादकः, विधातृ ।

सृजना, क्रि. स. (सं. सर्जनं) सृज् (तु. प. अ.), उत्पद् (प्रे.), विधा (जु. प. अ.) ।

सृष्टि, सं. स्त्री. (सं.) संसार-उत्पत्तिः (स्त्री.) —सर्गः-निर्माणं-रचना २. जगत् (न.), संसारः, चराचरं वस्तुजातं ३. प्रकृतिः (स्त्री.), दे. 'कुदरत' ।

—कर्ता, सं. पुं. (सं.-र्तृ) स्रष्टृ, वेधस्, विधातृ, विश्वसृज्, ब्रह्मन् (सब पुं.) २. ईश्वरः ।

सेंक, सं. पुं. (हिं. सेंकना) उ(ऊ)ष्मन्, त(ता)पः, उंष्णः-र्णं-र्णा, उष्णता २. तापनं, उष्णीकरणं, तापेन अंगारेषु वा भर्जनं ३. प्र-,स्वेदनं, घर्मसेकः, ऊष्मणा तापनं-उष्णीकरणम् ।

सेंकना, क्रि. स. (सं. श्रेषणं) ऊष्मणा अंगारैः वा भ्रस्ज् (तु. उ. अ.) २. तप् (प्रे.), उष्णी कृ ३. (उष्णजलादिभिः) सं-, सिच् (तु. प. अ.)-सेकं कृ, प्र-, स्विद् (प्रे.) ।

आँख—, मु., सौन्दर्यं अवलोक् (भ्वा. आ. से., चु. प. से.) ।

धूप—, मु., आतपं सेव् (भ्वा. आ. से.) ।

सेंटर, सं. पुं. (अं.) केन्द्रं, मध्यबिंदुः, मध्यः-ध्यं २. प्रधान-मुख्य,-स्थानम् ।

सेंट्रल, वि. (अं.) केन्द्रीय, मध्य, मध्यम, मध्यस्थ ।

सेंटिग्रेड, वि. (अं.) शतिक ।

सेंटिमीटर, सं. पुं. (अं.) शतिमानं, शतांशमानम् ।

सेंत, सं. स्त्री. (सं. संहतिः=किंक्रायत २. राशि>) व्ययाभावः-विनियोगाभावः ।

—मेंत, क्रि. वि. (हिं.+अनु.) मूल्यं विना २. निष्प्रयोजनं, व्यर्थम् ।

—का, मु., मूल्यं विना लब्ध, निर्मूल्य ।

—में, मु., व्ययं-मूल्यं,-विना २. व्यर्थम् ।

सेंद्रिय, वि. (सं.) सकरण, साक्ष, इन्द्रियवत्, सजीव । २. पुंस्त्वयुक्त, मैथुन-समर्थ, वीर्यवत् ।

सेंध, सं. स्त्री. [सं. संधिः(पुं.)] संधिला, सुरं-(रुं)गः-गा, खानिकन् ।

—लगाना या **सेंधना**, संधिलां कृ अथवा खन् (भ्वा. प. से.) ।

—लगाने वाला, सं. पुं., सुरं(रुं)गयुज्, संधिहारकः, संधिलाकारः ।

सेंधा, सं. पुं. (सं. सैंधवः-वं) शीतशिवं, माणिमंथं-वंथं, वशिरं, सिंधु(देश)जं, शिवं, सिद्धं, पथ्यम् ।

सेंधिया, सं. पुं. (हिं. सेंध) दे. 'सेंध लगाने वाला' ।

सेंवई, सं. स्त्री. (सं. सेविका) सूत्रिका ।

—पूरना या—बटना, मु., सेविकाः व्यावृत(प्रे.) ।

सेंहुड़, सं. पुं., दे. 'थूहर' ।

से[1], प्रत्य. (प्रा. सुंतो, पुं. हिं. सेंति) करण-कारकचिह्नं (प्रायः तृतीया से, 'स-' से या -पूर्वं,-पूर्वकं आदि से अनुवाद करते हैं । उ., आदर से=आदरेण, सादरं, आदरपूर्वकं इ.) २. अपादानचिह्नं (प्रायः पंचमी से 'आ-' से या '-प्रभृति' '-आरभ्य' आदि से अनुवाद करते हैं । उ., वृक्ष से गिरा=वृक्षात् अपतत्, जन्म से=आजन्म, आजन्मनः, कल से लेकर=श्वः प्रभृति, श्व आरभ्य इ.) ।

से[2], वि. (हिं. 'सा' का बहु.) सम, समान, सदृश ।

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

सेकंड, सं. पुं. (अं.) विकला, विपलं, क्षणः । वि. (अं.) द्वितीय ।
सेक, सं. पुं. (सं.) दे. 'सिंचाई' ।
सेक्रेटरी, सं. पुं.(अं.) मंत्रिन्, लेखनसचिवः ।
सेक्शन, सं. पुं. (अं.) वि-,भागः ।
सेचक, सं. पुं. (सं.) मेघः, वारिदः । वि. प्रोक्षक, सेक्तृ ।
सेचन, सं. पुं. (सं. न.) अव-आ-,सेकः-सेचनं, अभ्युक्षणं, प्रोक्षणम् ।
सेज, सं. स्त्री. (सं. शय्या, दे.) ।
—पाल, सं. पुं. (सं. शय्यापालः) शयनागाररक्षकः, शय्या,-अध्यक्षः-पालः ।
सेठ, सं, पुं. (सं. श्रेष्ठिन्) लक्षपतिः, कोटीश्वरः, धनाढ्यः । २. वणिग्वरः, सार्थवाहः ३. धनिमानिजनोपाधिः ४. क्षत्रियोपजातिभेदः [सेठानी (स्त्री.) धनाढ्या, धनाढ्यपत्नी] ।
सेतु, सं. पुं. (सं.) वारणः, संवरः, दे. 'पुल' ।
—बंध, सं. पुं. (सं.) वारण संवर,-बंधनं-निर्माणं. २. श्रीरामनिर्मितः सेतुविशेषः ।
सेना, क्रि. स. (सं. सेवनं) अंडान् उत्पद्(प्रे.), अंडेषु उपविश् (तु. प. अ.) २. सेव् (भ्वा. आ. से.) ३. उपास् (अ. आ. से.) ।
सेना, सं. स्त्री. (सं.) सैन्यं, बलं, वाहिनी, चमूः (स्त्री.), अनीकं-किनी, पृतना, ध्वजिनी, वरूथिनी, चक्रं, गुल्मिनी ।
—पति, सं. पुं. (सं.) सेनानीः, वाहिनीपतिः, सेना,—वाहः—नायकः—पालः-अध्यक्षः—अधीशः—नाथः ।
—व्यूह, सं. पुं. (सं.) सैन्यविन्यासः ।
सेनानी, सं. पुं. (सं.-नीः) दे. 'सेनापति' ।
सेनेट, सं. स्त्री. (अं.) प्रधानव्यवस्थापिका सभा, २. विश्वविद्यालयस्य प्रबन्धकर्त्री सभा ३. परिषद् (स्त्री.), सभा ।
सेफ़, सं. पुं. (अं.) लोहपेटिका, रक्षामंजूषा ।
सेब, सं. पुं. (फ़ा.) आता-सेवि-सिवितिका-सिंचितिका,,फलं, सेवं, मुष्टिप्रमाणवदरम् ।
सेम, सं. स्त्री. (सं. शिंबी) शिंबा, शिंबिका । वि. (स्त्री.) सिंवा, सिंविका, सिंवी-विः (स्त्री.) ।
सेमल, सं. पुं. [सं. शाल्मलिः (पुं. स्त्री.)] शाल्मलः-लिनी, तूलवृक्षः, दीर्घद्रुमः, रम्यपुष्पः दुरारोहा ।
सेर[1], सं. पुं. (सं.) सेटकम् ।
सेर[2], वि. (फ़ा.) तृप्त, संतुष्ट ।
सेराब, वि.(फ़ा.) जलाप्लुत, अतिक्लिन्न २.सिक्त, प्लावित ।
सेरी, सं. स्त्री. (फ़ा.) तृप्तिः (स्त्री.), संतोषः ।
सेरु, सं. पुं. (हिं. सिर)खट्वायाः शीर्षपादपट्टौ ।
सेल, सं. पुं. (अं.) जीवकोषः ।
सेलखड़ी, सं. स्त्री., दे. 'खड़िया' ।
सेरूलोज़, सं. पुं. (अं.) काष्ठौजम् ।
सेवक, सं. पुं. (सं.) परि-अनु,-चरः, किंकरः, भृत्यः, भृतकः, कर्मक(का)रः अनुजीविन्, दासः, नियोज्यः, चेटः, चेटकः, डिंगरः, परि,-कर्मिन्-चारकः-जनः-स्कंदः, प्रेष्यः, भुजिष्यः, लाडीकः, शुश्रूषकः २. भक्तः, उपासकः, आराधकः ३. शिष्यः, अन्तेवासिन् ।
सेवकाई, सं. स्त्री. (सं. सेवकः>) उप,-चारः-चर्या-स्थानं, परिचर्या, शुश्रूषा, सेवकत्वं,कैंकर्यं, सेवा, श्ववृत्तिः (स्त्री.) २. आराधनं, पूजा ।
सेवती, सं. स्त्री. (सं. शेवन्ती) शतपत्री, कर्णिका, चारुकेश(स)रा, महाकुमारी,गंधाढ्या, अतिमंजुला, तरुणी, भृङ्गेष्टा, शिवेवल्लभा, रामतरुणी ।
सेवन, सं. पुं. (सं. न.) दे. 'सेवा' २. उपासनं, आराधनं, पूजनं ३. उपयोगः, प्रयोजनं, उपभोगः ४. सततवासः ।
—करना, क्रि. स., उपभुज् (रु. आ. अ.),सेव् (भ्वा. आ. से.) ।
सेवनीय, वि. (सं.) सेव्य, सेवितव्य, सेवा-परिचर्या-उपचार,-अर्ह-योग्य २. पूज्य,आराध्य ३. उपयोगार्ह, प्रयोजनीय ।
सेवा, सं. स्त्री. (सं.) दे. 'सेवकाई' (१, २) ३. आश्रयः, शरणम् ।
—करना, क्रि. स., सेव् (भ्वा. आ. से.), अनु-उप-परि,-चर् (भ्वा. प. से.), उपास् (अ. आ. से.), उपस्था (भ्वा. आ. अ.), शु (सन्नन्त. शुश्रूषते) ।
—टहल, सं. स्त्री. (सं.+हिं.) परिचर्या ।
—शुश्रूषा, सं. स्त्री. (सं.) उप,-चारः-चर्या ।
सेविका, सं. स्त्री. (सं.) चेटी, दासी, भुजिष्या, प्रेष्या, कर्मकरी, नियोज्या, परिचारिका ।
सेवित, वि. (सं.) शुश्रूषित, उप-परि,-चरित

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

२. उपासित, पूजित, आराधित ३. व्यवहृत, प्रयुक्त ४. आश्रित ५. उपभुक्त, कृतोपभोग ।

सेवी, वि. (सं.-विन्) सेवक, सेवापरायण २. पूजक, आराधक ३. -भोजी। -भुज्, -भक्षिन्, -पायिन ।

सेशन, सं. पुं. (अं.) बहुदिवससमाप्यं अधिवेशनं-संमेलनं २. सत्रं (स्कूल आदि का) ।

—कोर्ट, सं. स्त्री. (अं.) दण्डसत्राधिकरणम् ।

—जज, सं. पुं. (अं.) दण्डसत्राधीशः ।

सेहत, सं. स्त्री. (अ.) सुखं, सौख्यं २. रोगमुक्तिः (स्त्री.), दे. 'स्वास्थ्य' ।

—खाना, सं. पुं. (अ.+फ़ा.) *शौचागारम् ।

सेहरा, सं. पुं. (सं. शेखरः) वरमुखावलंबिमालावली-स्रग्जालं २. वर-परिणेतृ,-मुकुटं ३. वरगुणवर्णनात्मकं गीतम् ।

—बँधाई, सं. स्त्री., शेखरबंधनशुल्कम् ।

सेही, सं. स्त्री., दे. 'साही' ।

सैंडफ़्लाई फ़ीवर, सं. पुं. (अं.) बालुकामक्षिकाज्वरः ।

सैंतालीस, वि. (सं. सप्तचत्वारिंशत्) सं. पुं., उक्ता संख्या, तद्बोधकांकौ(४७) च ।

सैंतालीसवाँ, वि. (हिं. सैंतालीस) सप्तचत्वारिंशत्तमः-मी-मं, सप्तचत्वारिंशः-शी-शं (पुं. स्त्री. न.) ।

सैंतीस, वि. (सं. सप्तत्रिंशत्) सं. पुं., उक्ता संख्या, तद्बोधकांकौ(३७) च ।

सैंतीसवाँ, वि. (हिं. सैंतीस) सप्तत्रिंशत्तमः-मी-मं, सप्तत्रिंशः-शी-शं (पुं. स्त्री. न.) ।

सैंधव, सं. पुं. (सं.) (सिंधोरदूरभवः) घोटकः, सिंधुदेशीयोऽश्वः २. दे. 'सेंधा' ३. जयद्रथः ४. सिंधुदेशवासिन् । वि. (सं.) सिंधुदेशीय २. समुद्रय, समुद्रीय, सामुद्रिक ।

सैकड़ा, सं. पुं. (सं. शतकांडः-ड्ं) शतं, शतकं २. शतवस्तु,-समुदायः-समूहः-समुच्चयः । क्रि. वि., प्रतिशतम् ।

सैकड़ों, वि., परःशत ।

सैकलगर, सं. पुं. (अ. सैकल+गर) शस्त्र,-मार्जः-मार्जकः-तेजकः ।

सैद्धांतिक, सं. पुं. (सं.) सिद्धांत,-विद्-ज्ञः, तत्त्वज्ञः, राद्धान्तिकः २. तांत्रिकः । वि. (सं.) सिद्धान्त-राद्धान्त-तत्त्व,-संबंधिन् ।

सैन, सं. स्त्री. (सं. संज्ञपनं>) संकेतः, संज्ञा, इङ्गितं २. लक्षणं, चिह्नम् ।

—करना, क्रि. स., (शीर्षहस्तादिभिः) संज्ञां संकेतं वा कृ-दा ।

—मारना, क्रि. स., सहावं अवलोक् (चु.) २. निमेषेण संकेतं कृ ।

सैना, सं. स्त्री., दे. 'सेना' ।

सैनाधत्य, सं. पुं. (सं. न.) सेनापति-सेनाध्यक्ष,-कार्य-पदम्, सेनापतित्वम् । वि. (सं.) सेनापति,-सम्बन्धिन्-विषयक ।

सैनिक, सं. पुं. (सं.) सेनाचरः, योधः, भटः, सैन्यः, आयुधिकः, योद्धृ २. रक्षापुरुषः, दे. 'संतरी' । वि. (सं.) सांग्रामिक, सामरिक, आयुधिक, क्षात्र[-त्री (स्त्री.)] ।

—वाद, सं. पुं. (सं.) समरसमर्थकसिद्धान्तः, युद्धानुमोदकवादः ।

सैनिटरी, वि. (अं.) स्वास्थ्य-आरोग्य,-कर-रक्षक-विषयक ।

सैनिटेशन, सं. पुं. (अं.) आरोग्य-स्वास्थ्य,-रक्षा-रक्षणम् ।

सैन्य, सं. पुं. (सं. न.) दे. 'सेना' ।

सैरंध्री, सं. स्त्री. (सं.) स्वतंत्रा शिल्पजीविनी २. अंतःपुर,-परिचारिका-दासी ३. द्रौपदी ।

सैर, सं. स्त्री. (फ़ा.) सुख,-पर्यटनं, परि-, भ्रमणं, विहारः, विहरणं, विचरणम् ।

—करना, क्रि. अ., सुखं पर्यट्-विचर् (भ्वा. प. से.), विहृ (भ्वा. प. अ.), भ्रम् (भ्वा. प. से.) ।

—गाह, सं. स्त्री. (फ़ा.) भ्रमण-पर्यटन,-स्थानं-स्थली ।

—सपाटा, सं. पुं., दे. 'सैर' ।

सैलानी, वि. (फ़ा. सैर) पर्यटन-भ्रमण,-विहरण,-शील, पर्यटक, यथेष्टविहारिन् २. आनंदिन्, विनोदिन्, प्रमोदिन्, उल्लासिन् ।

सैलाब, सं. पुं. (फ़ा.) जल,-प्लावनं-बृंहणं-विप्लवः-प्रलयः-आप्लावः २. महा,-प्रवाहः-ओघः ।

सों, प्रत्य., दे. 'से' ।

सोंचर नमक, सं. पुं. (सं. सौवर्चलं+फ़ा.) सौवर्चलं, रुचकं, रुच्यं, अक्षं, कृष्णलवणं, तिलकं, हृद्यगंधकम् ।

सोंटा, सं. पुं. (सं. शुंडः>) लकुटः-डः, स्थूल-, यष्टिः (स्त्री.)-दण्डः २. मुसलः-लम् ।

—बरदार, सं. पुं. (हिं.+फ़ा.) दंड,-धरः-भृत् ।

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

सोंठ, सं. स्त्री. [सं. शुंठी-ठिः (स्त्री.)] महाविश्व,-औषधं, विश्वभेषजं, कटुग्रन्थिः, कफारिः।
सोंधा, वि. (सं. सुगन्ध) सुगन्धित, दे.।
सोंपना, क्रि. स., दे. 'सौंपना'।
सोंह, सं. स्त्री., दे. 'सौगंद'।
सो, सर्व (सं. सः) देखो 'वह'। अव्य., अतः, अत-एव, अनेन कारणेन, अस्मात् कारणात्।
सोऽहं, वाक्यांश (सं. सः + अहं) अहं ब्रह्मास्मि (वे.)।
सोआ, सं. पुं. (सं. शताह्वा) सित-अति,-च्छत्रा, शत,-अक्षी-पुष्पिका, मधुरा, मधुरिका, माधवी, मिशी-शिः [(स्त्री.) शाकभेदः]।
सोई, सर्व., दे. 'वही'।
सोखना, क्रि. स., दे. 'सुखाना'।
सोख़्ता, सं. पुं., दे. 'स्याहीचूस'।
सोगंद, सं. स्त्री., दे. 'सौगंद'।
सोग, सं. पुं. (सं. शोकः) (मृत्युजनितः) परितापः, शुचा, दुःखम्।
—**मनाना**, मु., शोकचिह्नानि धृ (चु.), शुच् (भ्वा. प. से.)।
सोच, सं. पुं. (सं. शोचनं) शोकः, शुचा-च् (स्त्री.), विषादः २. विचारः, विमर्शः, विचारणं-णा ३. चिन्ता, रणरणकः, उत्कलिका, व्यग्रता ४. पश्चात्-अनु,-तापः।
—**विचार**, सं. पुं. (हिं. + सं.) विचारः-रणा, विमर्शः, आलोचना, समीक्षा, वितर्कः, विवेचनं-ना।
सोचना, क्रि. अ. (सं. शोचनं) विचर् (प्रे.), विमृश् (तु. प. अ.), आ-पर्या-समा-लोच् (चु.) २. चिन्तां कृ, चिन्त् (चु.) ३. शुच् (भ्वा. प. से.), दे. 'विचारना'।
सोच्छ्वास, वि. (सं.) प्रसन्न, प्रहृष्ट २. शिथिल, श्लथ ३. उच्छ्वासयुक्त ४. सत्वरप्राण। अव्य. (सं. न.) सदीर्घश्वासं, निःश्वासपूर्वकं, सनिःश्वासम्।
सोज, सं. स्त्री. (हिं. सूजना) शोथः, शोफः, दे. 'सूजन'।
सोज़िश, सं. स्त्री. (फ़ा.) पाकः, प्रदाहः २. शोथः।
सोटा, सं. पुं. दे. 'सोंटा'।
सोडा, सं. पुं. (अं.) विक्षारः।
—**वाटर**, सं. पुं. (अं.) विक्षारजलम्।
खाने का—, *भक्ष्यविक्षारः।
धोने का—, *धावनविक्षारः।
सोडियम, सं. पुं. (अं.) क्षारातु (न.), क्षारजम्।
सोत-ता[1], सं. पुं. (सं.)स्रोतस् (न.) उत्सः, वारिप्रवाहः, प्रस्रवणं, निर्-,झरः २. नदी-शाखा, कुल्या।
सोता[2], वि. (सं.) सुप्त, शयान, निद्रित।
सोते-जागते, मु., अहर्निशं, दिवानिशं, प्रतिक्षणं, सदा।
सोदर, सं. पुं. (सं.) सहोदरः, सोदर्यः, भ्रातृ।
सोदरा, सं. स्त्री. (सं.) सहोदरा, सोदर्या, स्वसृ (स्त्री.)।
सोन, सं. पुं. (सं. शोणः) हिरण्यवाहः-हुः, शोणभद्रः, शोणा (नदविशेषः)।
सोनजूही, सं. स्त्री. (सं. स्वर्णयूथी) हरिणी, पीतिका, हेमपुष्पिका, हैमा, स्वर्णयूथिका।
सोना[1], सं. पुं. (सं. सुवर्ण) स्वर्ण, कनकं, हिरण्यं, हेमन् (न.), हाटकं, तपनीयं, शातकुंभं, चामीकरं, जातरूपं, महारजतं, कांचनं, रुक्मं, कार्तस्वरं, जांबूनदं, अष्टापदं, भद्रं, कर्बु(पू)रं, द्रविणं, पिंजरं, कलधौतं, लोहवरं, कल्याणं, मनोहरं, भास्करं, दीप्तं, मंगल्यं, निष्कं, अग्निशिखं, २. महार्घ-बहुमूल्य,-वस्तु (न.)-द्रव्यम्।
—**(ने)का तार**, सं. पुं., कनकसूत्रम्।
—**(ने)का पानी**, सं. पुं., सुवर्णलेपः।
—**(ने)का वर्क़**, सं. पुं., सुवर्णपत्रम्।
गहनों का—, सं. पुं., शृंगिः, शृंगी, शृङ्गी-कनकम्।
सोना[2], क्रि. अ. (सं. शयनं) सं-,शी (अ. आ. से.), निद्रा (अ. प. अ.), संविश् (तु. प. अ.), स्वप् (अ. प. अ.) २. (अंगादि) निश्चेष्ट-निस्तब्ध-निश्चल (वि.) भू ३. दे. 'मरना'। सं. पुं., शयनं,-निद्रा, गुडाका, तंद्रा, तामसी, प्रमीला, संवेशः, सुप्तं-प्तिः (स्त्री.), स्वप्नः, स्वापः, शी।
सोनामाखी, सं. स्त्री. (सं. स्वर्णमाक्षिकं) माक्षिक,-मधु-धातुः, तार्पिजं (उपधातुभेदः)।
सोने का कमरा, सं. पुं., स्वप्न-गृहं-निकेतनं-शयन,-गृहं-मंदिरं-आगारम्।
सोने योग्य, वि., शयितव्य, शेय, शयनीय।
सोनेवाला, सं. पुं., सुषुप्सुः, शिशयिषुः, निद्रालुः, शयालुः, तंद्रालुः।

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

सोया हुआ, वि., निद्रित. निद्राण, शयित, सुप्त, शयान, निद्रामग्न ।
सोप, सं. पुं. (अं.) दे. 'साबुन' ।
सोपान, सं. पुं. (सं. न.) दे. 'सीढ़ी' ।
सोफ़ा, सं. पुं. (अं.) शय्या, पर्यंकः, शयनीयम्, *उपवेश्यः, *आस्यः ।
सोम, सं. पुं. (सं.) सुधांशुः, चंद्रः, दे. 'चाँद' २. सोमवारः ३. स्वर्गः ४. कर्पूरः ५. सोमलता ।
—कांत, सं पुं. (सं.) चंद्रकांतः ।
—ग्रह, सं. पुं. (सं.) चंद्रग्रहणम् ।
—देव, सं. पुं. (सं.) सोमदेवता २. चंद्रदेवता ३. कथासरित्सागरस्य रचयितृ ।
—नाथ, सं. पुं. (सं.) ज्योतिर्लिङ्गविशेषः २. प्राचीनगरविशेषः ।
—पान, सं. पुं. (सं. न.) सोमपीतं-तिः (स्त्री.) ।
—पायी, वि. (सं.-यिन्) सोम,-प-पा-पीतिन् ।
—पुत्र, सं. पुं. (सं.) सोमजः, बुधग्रहः ।
—यज्ञ, सं. पुं. (सं.) सोम,-याग:-मखः-क्रतुः ।
—रोग, सं. पुं. (सं.) स्त्रीरोगभेदः २. बहुमूत्रता, मूत्रातिसारः ।
—लता, सं. स्त्री. (सं.) सोमवल्ली, सोमा, क्षीरी, द्विजप्रिया, गुल्म-यज्ञ,-वल्ली, धनुर्लता, सोमक्षीरा, यज्ञश्रेष्ठा २. गुडूची ३. ब्राह्मी ।
—वंश, सं. पुं. (सं.) चंद्रवंशः २. युधिष्ठिरः ।
—वती, सं. स्त्री. (सं.) सोमवती अमावस्या ।
—वल्ली, सं. स्त्री. (सं.) सोमलता २. गुडूची ३. सोमराजी ४. पातालगरुड़ी ५. ब्राह्मी ६. सुदर्शना ।
—वार, सं. पुं. (सं.) सोम-चंद्र,-वारः-वासरः-दिनम् ।
सोरठ, सं. पुं. (सं. सौराष्ट्रः) प्रान्तविशेषः (गुजरात तथा दक्षिणी काठियावाड़) २. सौराष्ट्र-राजधानी (सूरत नगर) ३. रागभेदः ।
सोरठा, सं. पुं. (हिं. सोरठ) हिन्दीकवितायाः छंदोभेदः ।
सोल[1], वि. (?) शीत, शीतल, शिशिर २. तिक्ताम्लकषाय । सं. पुं. (?) शीतं, शैत्यं ३. तिक्ताम्लकषायः स्वादः ।
सोल[2], सं. स्त्री. (अं.) आत्मन्, जीवः, चेतनः ।
सोल[3], सं. पुं. (अं.) पाद-तलम् २. पादुकातलम् ।
सोलह, वि. (सं. षोडशन्) षडधिकदश । सं. पुं., उक्ता संख्या, तद्बोधकांकौ (१६) च ।
सोलहो आने, मु., साकल्येन, अशेषतः, पूर्वतया, साम्मस्त्येन ।
सोलहवाँ, वि. (हिं. सोलह) षोडशः-शी-शं (पुं. स्त्री. नः) ।
सोशल, वि. (अं.) सामाजिक, समाजविषयक ।
सोशलिज़्म, सं. पुं. (अं.) समाजवादः ।
सोशलिस्ट, सं. पुं. (अं.) समाजवादिन् ।
सोसनी, (वि. (फ़ा. सौसन) रक्तनील ।
सोसाइ(य)टी, सं. स्त्री. (अं.) समाजः, सभा, गोष्ठी २. संगतिः (स्त्री), संसर्गः ।
सोहं-सोहंगम, वेदान्त-वाक्य, दे. 'सोऽहं' ।
सोहन, वि. (सं.) शोभन, मनोहर, दे. 'सुंदर' । सं. पुं., नायकः, सुन्दरपुरुषः ।
—चिड़िया, सं. स्त्री., *शोभनचटकः (-का स्त्री.) ।
—पपड़ी, सं. स्त्री., *शोभनपर्पटी ।
—हलवा, सं. पुं., *शोभनसंयावः ।
सोहना[1], क्रि. अ. (सं. शोभनं) शुभ्-विराज् (भ्वा. आ. से.), ललित-सुंदर- शोभन (वि.) वृत् (भ्वा. आ. से), विभा (अ. प. अ.) । वि., शोभन, रम्य, सुंदर, मनोज्ञ ।
सोहना[2], क्रि. स. (सं. शोधनं) कृतृणानि उन्मूल् (चु.), क्षेत्रं कृतृणरहितं कृ ।
सोहबत, सं. स्त्री. (अ.) संगतिः (स्त्री.) संसर्गः २. मैथुनम् ।
सोह(हि)ला, सं. पुं. (हिं. सोहना) *पुत्रजन्मोत्सवगीतं २. मंगल्य-मांगलिक-शुभ,-गीतं ३. देवतास्तोत्रम् ।
सोहिनी, वि. स्त्री. (सं. शोभिनी) सुंदरी, मनोरमा, रम्या, सुरूपा । सं. स्त्री., रागिणी-भेदः ।
सौंदर्य, सं. पुं. (सं. न.) रमणीयता, दे. 'सुंदरता' ।
सौंपना, क्रि. स. (सं. समर्पणं) न्यस् (दि. प. से.), निक्षिप् (तु. प. अ.), सम्-ऋ (प्रे. समर्पयति), प्रतिपद्-निविश् (प्रे.) । सं. पुं., न्यासः, निक्षेपः, समर्पणं, प्रतिपादनम् ।
सौंपने योग्य, वि., निक्षेप्तव्य, समर्पणीय ।
सौंपने वाला, सं. पुं., निक्षेप्तृ, समर्पयितृ ।
सौंपा हुआ, वि., निक्षिप्त, न्यस्त, समर्पित ।
सौंफ, सं. स्त्री. (सं. शतपुष्पा) मधुरिका

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

माधवी, माधुरी, मधुरा, सुगंधा, शतपत्रिका, अति-सित,-छत्रा ।
—का अर्क, सं. पुं., शतपुष्पासवः ।
सौंह, सं. स्त्री., दे. 'सौगंद' ।
सौ, वि. (सं. शतं, नित्य न.) दशगुणितदश-संख्या । सं. पुं., उक्ता संख्या, तद्बोधकांकाः (१००) च ।
—बात की एक बात, मु., सारः, तात्पर्यं, सारांशः ।
—बिस्वे, मु., निश्चयेन, अवश्यं, निःसंशयम् ।
सौवाँ, वि., शततमः-मी-मम् ।
सौकन, सं. स्त्री., दे. 'सौत' ।
सौकर्य, सं. पुं. (सं. न.) सुकरता, सुसाध्यता २. दे. 'सुभीता' ।
सौकुमार्य, सं. पुं. (सं. न.) कोमलता, दे. 'सुकुमारता' २. यौवनं ३. काव्यगुणभेदः ।
सौखिक, वि. (सं.) सुखेच्छुक, सुखैषिन्, सुखकामिन् २. सुख-आनन्द-मोह,-दायक-प्रद ३. सुख-आनन्द,-विषयक-सम्बन्धक ।
सौख्य, सं. पुं. (सं. न.) आनंदः, सुखं, दे. ।
सौगंद, सं. स्त्री. (फ़ा.) शपथः, समयः, प्रतिज्ञा, वचनं, वाचा, संकल्पः ।
—खाना, क्रि. अ., शप् (भ्वा. दि. उ. अ.), सशपथं वद् (भ्वा. प. से.) ।
—देना, क्रि. स., शप (प्रे.), सशपथं वच् (प्रे.) ।
सौगंध, सं. पुं. (सं. न.) सुगंधः, दे. २. गांधिकः, दे. 'गंधी' ३. कत्तृणम् । सं. स्त्री., दे. 'सौगंद' । वि. (सं.) सुगंधित दे. ।
सौगंधिक, वि. (सं.) सुगंधि, सुगंधित, सुवास, सुरभि । सं. पुं. (सं.) गांधिकः, गंध,-विक्रयिन्-उपजीविन्-वणिज् । २. गंध(धि)कः, गंधाश्मन् । (सं. न.) नील,-कमलं-उत्पलं, कुवलयम् । २. पुण्डरीकं, सिताम्भोजं, श्वेत-कमलम् । ३. सुगन्धिघासभेदः ४. पद्मरागः ।
सौग़ात, सं. स्त्री. (तु.) उपहारः, उपायनं, प्राभृतं-तकं २. दुर्लभवस्तु (न.) ।
सौजन्य, सं. पुं. (सं. न.) सज्जनता, सुजनता, दे. ।
सौत, सौत(ति)न, सं. स्त्री. (सं. सपत्नी) समानपतिका ।
सौतिया डाह, सं. पुं., सापत्न्येर्ष्या २. सापत्न्यं, ईर्ष्या ।
सौतेला, वि. (हिं. सौत) सापत्न [–नी (स्त्री.)] सपत्नी,-ज-संबंधिन् ।
—पिता, सं. पुं., वि. मातृपतिः ।
—पुत्र, सं. पुं., सपत्नीपुत्रः, सापत्न्यः ।
—बच्चा, सं, पुं., पर,-जातं-अपत्यम् ।
—भाई, सं. पुं., वैमात्रः, वैमात्रेयः, विमातृजः ।
सौतेली पुत्री, सं. स्त्री., सपत्नी,-पुत्री-दुहितृ (स्त्री.) ।
सौतेली बहन, सं. स्त्री., वैमात्री, वैमात्रेयी, विमातृजा ।
सौतेली माता, सं. स्त्री., विमातृ (स्त्री.) ।
सौदा[1], सं. पुं. (अ.) भांडं, भांडानि (बहु.), पण्यं, क्रयविक्रयवस्तु (न.) २. आदान-प्रदानं, दानादानं, व्यवहारः ३. क्रयविक्रयौ (द्वि.), नियमः, वाणिज्यं, व्यापारः, वणिक्कर्मन् (न.) ४. क्रय-विक्रय,-प्रतिज्ञा ।
—करना, क्रि. अ., क्रयविक्रयं कृ, वाणिज्यं कृ, पण् (भ्वा. आ. अ.) ।
—सुलुफ़, सं. पुं., दे. 'सौदा' (१) ।
—सूत, सं. पुं., व्यवहारः ।
सौदा[2], सं. पुं. (अ.) उन्मादः, दे. 'पागलपन' ।
सौदाई, सं. पुं. (अ. सौदा) उन्मत्तः, दे. 'पागल' ।
सौदागर, सं. पुं. (फ़ा.) नैगमः, क्रयविक्रयिकः, पण्याजीवः, वणिज्, वाणिज्यकारिन्, सार्थ-वाहः, सार्थिकः ।
—बच्चा, सं. पुं. (फ़ा.+हिं.) वणिज् २. वणिक्पुत्रः ।
सौदागरी, सं. स्त्री. (फ़ा.) दे. 'सौदा'[1] (३) ।
सौदाम(मि)नी, सं. स्त्री. (सं.) सौदाम्नी, चपला, चंचला, तडित्-विद्युत् (स्त्री.), दे. 'बिजली' ।
सौध, सं. पुं. (सं. न.) हर्म्यं, प्रासादः, भवनं, अट्टालिका ।
सौप्तिक, सं. पुं. (सं. न.) निशायुद्धं, रात्रिरणं, रात्रि-निशा,-मारणं २. महाभारतीयपर्वविशेषः ।
सौभागिनी, सं. स्त्री., दे. 'सुहागिन' ।
सौभाग्य, सं. पुं. (सं. न.) सु,-भाग्यं-भागधेयं-दैवं-दिष्टं-दिष्टिः(स्त्री.)-नियतिः (स्त्री.) २. सुखं, आनंदः ३. कल्याणं, कुशलं ४. दे. 'सुहाग' (१) ५. ऐश्वर्यं, विभवः ६. सौन्दर्यं ७. शुभेच्छा ८. साकल्यं ९. सिंदूरम् ।

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

—शुंठी, सं. स्त्री. (सं.) सूतिकारोगनाशकः पाकभेदः (आयु.)।
सौभाग्यवती, वि. स्त्री. (सं.) सधवा, दे. 'सुहागिन' २. भाग्यशालिनी।
सौभाग्यवान्, वि. पुं. (सं.-वत्) महाभाग, सुभाग्य, सुभग, पुण्यवंत, धन्य २. सुखी संपन्नश्च।
सौमित्रि, सं. पुं. (सं.) सौमित्रः, लक्ष्मणः।
सौम्य, वि. (सं.) सोमसंबंधिन् २. सौमिक, चान्द्र ३. शीतस्निग्ध ४. नम्र, सुशील, शांत ५. शुभ, मंगल्य ६. प्रसन्न, प्रहृष्ट ७. प्रियदर्शन, सुन्दर ८. उज्ज्वल, भासुर।
—दर्शन, वि. (सं.) प्रियदर्शन, सुभगाकार।
—वार, सं. पुं. (सं.) बुधवासरः।
सौम्यता, सं. स्त्री. (सं.) शीतलता, शीतस्निग्धता २. सुशीलता, साधुत्वं ३. सौन्दर्यं ४. उदारता, परोपकारिता।
सौर[1], वि. (सं.) सौर्य, सूर्य-विषयक-संबंधिन् २. भानुज ३. सूर्यानुसारिन्।
—मास, सं. पुं. (सं.) सूर्यैकराशिभोगावच्छिन्नकालः।
—संवत्सर, सं. पुं. (सं.) सूर्यस्य द्वादशराशिभोगावच्छिन्नकालः।
सौर[2], सं. स्त्री. (देश० सौंड़) दे. 'चादर'।
सौरथ, सं. पुं. (सं.) वीरः, भटः, योधः, योद्धृ।
सौरभ, सं. पुं. (सं. न.) सुगंधः, दे. २. कुंकुमं, दे. 'केसर' ३. आम्रम्।
—वाह, सं. पुं. (सं.) वायुः, पवनः।
सौरभित, वि. (सं.) सुरभि, सुगंधित दे.।
सौराष्ट्र, सं. पुं. (सं.) प्रान्तविशेषः (गुजरात-काठियावाड़।
सौरी, सं. स्त्री. (सं. सूतिकागार) दे. 'सूतिकागृह'।
सौष्ठव, सं. पुं. (सं. न.) सौन्दर्यं, सुषमा, लावण्यं २. लाघवं, क्षिप्रता ३. गुण,-अतिशयः-उत्कर्षः, वैशिष्ट्यं ४. उपयुक्तता, उपयोगिता।
सौहँ, सं. स्त्री. (सं. शपथः) दे. 'सौगंद'।
सौहाँजना, सं. पुं. (सं. शोभाञ्जनः) तीक्ष्णगंधः, सु-,तीक्ष्णः, रुचिरांजनः।
सौहार्द, सं. पुं. (सं. न.) सख्यं, साप्तपदीनं, सौहार्द्यं, अजर्यं। दे. 'मित्रता'।
स्कंद, सं. पुं. (सं.) कार्तिकेयः, सेनानीः, शिखिवाहनः, षाण्मातुरः, कुमारः, शक्तिधरः, स्वामिन्, द्वादशलोचनः।
—पुराण, सं. पुं. (सं. न.) पुराणग्रंथविशेषः।
स्कंध, सं. पुं. (सं.) अंसः, भुज-शिरस् (न.)-मूलं, दोःशिखरं, कत्सवरं २. प्रकांडः-डं, दंडः, स्कंधस् (न.), प्रकांडकः, दे. 'तना' ३. शाखा ४. समूहः ५. सैन्यव्यूहः ६. ग्रन्थविभागः, खंड-डं, पर्वन् (न.)।
स्कंधावार, सं. पुं. (सं.) शिवि(बि) रं, कटकः, २, सेना,-आवासः-स्थानं ३. राजधानी ४. सेना ५. यात्रि-वणिङ्,-निवेशः।
स्कर्वी, सं. स्त्री. (अं.) शीतादः।
स्कारलेटिना, सं. पुं. (अं.) आरक्तज्वरः, उदर्षः, लोहितज्वरः।
स्कालर, सं. पुं. (अं.) छात्रः, विद्यार्थिन् २. सुविद्वस्, भट्टः, प्रकांडपंडितः।
—शिप, सं. पुं. (अं.) छात्रवृत्तिः (स्त्री.) २. पांडित्यं, विद्वत्ता।
स्कीम, सं. स्त्री. (अं.) योजना, आयोजनं, व्यवस्थितविचारः, प्रयोगः, युक्तिः (स्त्री.)।
स्कूल, सं. पुं. (अं.) विद्यालयः, पाठशाला।
—मास्टर, सं. पुं. (अं.) शिक्षकः, अध्यापकः।
स्खलन, सं. पुं. (सं. न.) पतनं, भ्रंशः, स्रंसः, स्रंसनं २. सन्मार्गात् च्युतिः (स्त्री.)-च्यवनं-विचलनं-भ्रंशः, उन्मार्गगमनम्।
स्खलित, वि. (सं.) पतित, च्युत, भ्रष्ट, २. स्रस्त, मृदु सुप्त ३. विचलित ४. भ्रांत ५. उन्मार्गगत।
स्टांप, सं. पुं. (अं. स्टैंप) (आधिकरणिकं) मुद्राङ्कितपत्रं २. पत्रशुल्कमुद्रा, दे. 'डाक का टिकट' ३. मुद्रा ४. मुद्रांकः।
स्टार्च, सं. पुं. (अं.) श्वेतसारः।
स्टीम, सं. स्त्री. (अं.) वाष्पः।
—इंजन, सं. पुं. (अं.) वाष्पयंत्रम्।
स्टीमर, सं. पुं. (अं.) वाष्पपोतः।
स्टूल, सं. पुं. (अं.) *उच्चपीठम्।
स्टेज, सं. पुं. (अं.) रंग,-मंचः-भूमिः (स्त्री.)-पीठं २. मंचः।
—मैनेजर, सं. पुं. (अं.) रंगमंचप्रबंधकः, सूत्रधारः।
स्टेथिसकोप, सं. स्त्री. (अं.) *उरःपरीक्षणी।
स्टेशन, सं. पुं. (अं.) (वाष्पशकट्याः) स्थानम्।

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

स्टेशनरी, सं. स्त्री. (अं.) लेखनसामग्री ।
स्टैंड, सं. पुं. (अं.) आधारः, स्थापकम् ।
स्तंभ, सं. पुं. (सं.) स्थूणा, स्थाणुः, यूपः, मेठिः-थिः २. तरुस्कंधः, प्रकांडः-डं ३. सात्त्विक-भावभेदः ४. प्रतिबंधः २. मूर्च्छा, जाडयम् ।
स्तंभक, वि. (सं.) स्तंभकर, रोधक २. जाडय,-कर-जनक ३. वीर्यरोधक ४. मलावष्टंभक ।
स्तंभन, सं. पुं. (सं. न.) अव-,रोधः-रोधनं, निवारणं २. शुक्रपातविलंबः ३. स्तंभकं (औषधं) ४. जडी-निश्चेष्टी,-करणं ५. (सं. पुं.) मदनबाणविशेषः ।
स्तंभित, वि. (सं.) अव-,रुद्ध, निवारित २. जडी,-भूत-कृत, निस्स्तब्ध ३. स्थित, विरत ।
स्तनंधय, सं. पुं. स्त्री. (सं.) उत्तानशयः-या, डिंभः-भा, स्तनपः-पा, स्तनंधयः-या-यी, स्तन,-पायकः (पायिका)-पायिन् (-पायिनी) ।
स्तन, सं. पुं. (सं.) कु(कू)चः, उरो-उरसि,-जः, वक्षो,-जः-रुहः ।
—चूचुक, सं. पुं. (सं. न.) स्तन,-मुखं-अग्रं-शिखा-वृंतं, मेचकम् ।
—पान, सं. पुं. (सं.) स्तन्य-धीतिः (स्त्री.) ।
—पायी, सं. पुं., दे. 'स्तनंधय' ।
स्तन्य, सं. पुं. (सं. न.) क्षीरं, दुग्धम् ।
स्तब्ध, वि. (सं.) निश्चली-जडी,-भूत, निश्चेष्ट, सुप्त, निस्स्पंद २. दृढ निरुद्ध ३. दृढ़ स्थिर ४. मंद, अलस ५. दुराग्रहिन् ६. दृप्त ।
—दृष्टि, वि. (सं.) स्तब्धनयन, निर्निमेष ।
—बाहु, वि. (सं.) जड-निस्तब्ध,-निश्चेष्ट,-हस्त-कर-बाहु-भुज ।
—मति, वि. (सं.) मंदबुद्धि, जड ।
स्तब्धता, सं. स्त्री. (सं.) जडता, स्पंदन-हीनता २. स्थिरता, दृढ़ता ३. बधिरता, श्रवणशून्यता ।
स्तर, सं. पुं. (सं.) दे. 'परत' २. शय्या, आस्तरः, तल्पः-ल्पम् ।
स्तव, सं. पुं. (सं.) स्तावः, स्तुतिः (स्त्री.) दे. । २. स्तोत्रं ३. ईश्वरप्रार्थना ।
स्तवक, सं. पुं. (सं.) पुष्प-कुसुम,-गुच्छः-स्तबकः २. राशिः अध्यायः, परिच्छेदः ४. स्तवः ५. स्तोतृ ।
स्तवन, सं. पुं. (सं. न.) गुणकीर्तनं, स्तुतिः (स्त्री.) ।
स्तुत, वि. (सं.) प्रशंसित, प्रशस्त, श्लाघित, ईडित, कीर्तित ।
स्तुति, सं. स्त्री. (सं.) स्त(स्ता)वः, गुण,-वर्णन-कीर्तनं-कथनं, श्लाघा, नुतिः (स्त्री.), ईडा, प्रशंसा दे. ।
—करना, क्रि. स., नु (अ. प. से.), स्तु (अ. प. अ.), ईड् (अ. आ. से.), श्लाघ् (भ्वा. आ. से.), प्रशंस् (भ्वा. प. से.) ।
—पाठक, सं. पुं. (सं.) मागधः, चारणः, वैतालिकः ।
स्तुत्य, वि. (सं.) नव्य, नाव्य, नवितव्य, प्रशस्य, प्रशंसनीय, स्तोतव्य, स्तवनीय, प्रशंसार्ह ।
स्तूप, सं. पुं. (सं.) मृदादि,-कूटः-राशिः २. बौद्धचैत्यः ।
स्तेन, सं. पुं. (सं.) चौरः, तस्करः ।
स्तेय, सं. पुं. (सं. न.) चौर्यं, परद्रव्यहरणं, स्तैन्यम् ।
स्तोतव्य, वि. (सं.) दे. 'स्तुत्य' ।
स्तोता, वि. (सं.-तृ) प्रशंसक, स्तावक, नवितृ, नावक, वर्णक, स्तुतिवादक ।
स्तोत्र, सं. पुं. (सं. न.) छन्दोबद्धं देवगुण-कीर्तनं, स्तवः, स्तुतिः (स्त्री.) ।
स्तोम, सं. पुं. (सं.) स्तुतिः (स्त्री.), स्तवः २. यज्ञः ३. राशिः ।
स्त्री, सं. स्त्री. (सं.) वनिता, महिला, रामा, नारी, दे. २. पत्नी, भार्या ३. स्त्रीलिंगी जीवः ।
—ग्रह, सं. पुं. (सं.) चंद्रबुधशुक्रग्रहाः (ज्यो.) ।
—जित, स्त्री,-वश-विजित-वश्य ।
—धन, सं. पुं. (सं. न.) स्त्रीस्वत्वास्पदीभूतं धनं (माता, पिता, भाई तथा पति से प्राप्त, विवाह-संस्कार के समय प्राप्त और जहेज) ।
—धर्म, सं.पुं. (सं.) ऋतुः, पुष्पं, रजस् (न.) २. मैथुनं ३. स्त्रीकर्तव्यं ४. स्त्रीसंबंधि विधानम् ।
—पुंसलक्षणा, सं. स्त्री. (सं) पोटा (स्तन-श्मश्रुवादियुक्ता) ।
—पुरुष, सं. पुं. (सं.) स्त्री,-पुरुषौ-पुंसौ, मिथुनं, द्वन्द्वं, युग्मम् ।
—राज्यं, सं. पुं. (सं. न.) प्राचीनप्रदेश-विशेषः (महाभारत) ।
—लंपट, वि. पुं. (सं.) स्त्री,-लोलः-शौंडः-वीरः, कामुकः ।

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

—लिंग, सं. पुं. (सं. न.) योनिः (स्त्री.), भगं, स्त्रीचिह्नं २. शब्दलिंगभेदः (व्या.)।
—व्रत, सं. पुं. (सं. न.) पत्नीव्रतं, एकपत्नी-परायणता।
—समागम, सं. पुं. (सं.) स्त्री,-संसर्गः-सम्भोगः।
—स्वभाव, सं. पुं. (सं.) महल्लकः, दे. 'खोजा' २. नारीशीलम्।
स्त्रीत्व, सं. पुं. (सं. न.) नारीत्वं, स्त्री-नारी,-धर्मः-भावः।
स्त्रैण, वि. (सं.) स्त्रीजित, रमणीरत ३. स्त्री,-संबंधि-योग्य।
स्थगित, वि. (सं.) विलंबित, व्याक्षिप्त, दे. 'मुलतवी' २. आच्छादित ३. गुप्त ४. अव-, रुद्ध।
स्थपति, सं. पुं. (सं.) वास्तुशिल्पिन् २. तक्षन्।
स्थल, सं. पुं. (सं. न.) भूमिः (स्त्री.), भूभागः, स्थली २. शुष्क-निर्जल,-भूमिः ३. स्थानं ४. अवसरः।
—कमल, सं. पुं. (सं. न.) पद्मा, पद्मचारिणी, अतिचरा, स्थलरुहा।
—चर, वि. (सं.) स्थल,-ग-गामिन्-चारिन्, भू,-चर-चारिन्।
स्थली, सं. स्त्री. (सं.) शुष्क,-भूमिः (स्त्री.)-भूभागः २. समोन्नतभूः (स्त्री.) ३. स्थानं, स्थलम्।
स्थविर, सं. पुं. (सं.) वृद्धः २. ब्रह्मन् (पुं.)।
स्थाणु, सं. पुं. (सं.) अशाखवृक्षः, ध्रुवः, शंकुः २. स्तंभः, स्थूणा ३. शिवः ४. स्थावरपदार्थः। वि. (सं.) अचल, स्थिर।
स्थाण्वीश्वर, सं. पुं. (सं. न.) कुरुक्षेत्रं, स्थानेश्वरनगरम्, स्थाणुतीर्थम्। २. स्थानेश्वरस्य लिंगविशेषः।
स्थान, सं. पुं. (सं. न.) स्थलं २. आ-नि,-वासः, गृहं ३. भूमिः (स्त्री.), स्थली, भूभागः ४. पदं, दे. 'पदवी' ५. वर्णोच्चारणस्थानं (व्या.) ६. राज्यं, देशः ७. देवालयः, मंदिरं ८. अवसरः ९. दशा १०. परिच्छेदः, अध्यायः।
—च्युत, वि. (सं.) स्थानभ्रष्ट २. पद,-च्युत-भ्रष्ट।
स्थानक, सं. पुं. (सं. न.) स्थानं, स्थलम् २. पदं, स्थितिः (स्त्री.) ३-४. शरक्षेप-नृत्य,-मुद्राभेदः ५. नाटकव्यापारस्थलविशेषः ६. आलवालं, आवालवालम् ७. सुराफेनः।
स्थानी, वि. (सं.-निन्) सस्थान, पदयुक्त २. स्थायिन् ३. उचित, उपयुक्त।
स्थानीय, वि. (सं.) स्थानिक, स्थानविशेष-संबंधिन्।
स्थापक, सं. पुं. (सं.) स्थापयितृ, संस्थापकः, प्रवर्तकः, प्रारंभकः, स्थापनकरः २. निधायकः ३.उत्थापकः, उन्नायकः ४.मूर्ति-प्रतिमा,-कारः।
स्थापत्य, सं. पुं. (सं. न.) वास्तु,-विद्या-शिल्प-कला २. सूत्रकर्मन् (न.), भवननिर्माणम्।
स्थापनं, सं. पुं. (सं. न.) निधानं, न्यसनं, निवेशनं २.उत्थापनं,उन्नयनं, उन्नमनं ३.संस्थापनं, प्रवर्तनं, प्रारंभणं ४.प्रतिपादनं, साधनम्।
स्थापना, सं. स्त्री. (सं.) (मंदिरे) मूर्ति,-प्रतिष्ठापनं-निवेशनं २-३. दे. 'स्थापनं (३-४) ४. विचारांगविशेषः (न्या०)।
स्थापित, वि. (सं.) संस्थापित, प्रवर्तित २. निहित, निवेशित, न्यस्त ३. उत्थापित, उन्नीत, उन्नमित ४. स्थिर, दृढ ५. निश्चित।
स्थायित्व, सं. पुं. (सं. न.) स्थायिता, स्थिरता, स्थैर्यं, ध्रुवता, नैत्यम्।
स्थायी, वि. (सं.-यिन्) ध्रुव, नित्य, शाश्वत, अक्षय २. चिरस्थायिन्, दृढ ३. स्थिर, स्थास्नु, स्थायुक, स्थितिशील ४. विश्वसनीय।
—भाव, सं. पुं. (सं.) रसस्य भावविशेषः (सा.) (९ स्थायिभाव = रति, हास्य, शोक, क्रोध, उत्साह, भय, जुगुप्सा, विस्मय और निर्वेद)।
स्थाली, सं. स्त्री. (सं.) उखा, पिठरः-री, दे. 'पतीला'।
—पुलाक न्याय, सं. पुं. (सं.) न्यायभेदः, अंशगुणज्ञानेन पूर्णगुणज्ञानानुमानम्।
स्थावर, वि. (सं.) अचल, निश्चल, स्थिर २. स्थविर, स्थातृ, स्थाणु, स्थायुक, स्थास्नु, स्थितिशील। (सं. न.) अजंगम-अचल,-संपत्तिः (स्त्री.)।
स्थित, वि. (सं.) विद्यमान, वर्तमान २. उप-विष्ट, आसीन ३. उत्थित ४. अवलंबित।
—प्रज्ञ, वि. (सं.) स्थिर-स्थित,-बुद्धि-धी-प्रज्ञ, ब्रह्मबुद्धिसंपन्न २. आत्मसंतोषिन्।
स्थिति, सं. स्त्री. (सं.) अवष्टंभः, आधारः, आलंबः २. निवासः, अवस्थानं ३. दशा,

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

अवस्था ४. पदं, दे. 'पदवी' ५. अस्तित्वं, सत्ता ६. मर्यादा।

—स्थापकता, सं. स्त्री. (सं.) कुंचनीयता, नम्यता, दे. 'लचक'।

स्थिर, वि. (सं.) अचल, निश्चल, अविचल २. निश्चित, स्थिरीकृत ३. शांत ४. दृढ़, बलवत् ५. स्थायिन्, शाश्वत, ध्रुव ६. नियत, ७. विश्वसनीय ८. स्थायुक, स्थास्नु।

—चित्त, वि. (सं.) दृढसंकल्प, स्थिर,-मति-धी-बुद्धि।

स्थिरता, सं. स्त्री. (सं.) निश्चलता, अचलता, स्थिरत्वं २. दृढता, बलवत्ता ३. स्थायित्वं, ध्रुवता ४. धैर्यं, धीरता ५. चिरस्थायिता, स्थास्नुता।

स्थूणा, सं. स्त्री. (सं.) गृहस्तंभः, दे. 'स्तंभ' (१. २.)।

स्थूल, वि. (सं.) पीन, पीवर (-रा-री स्त्री.) पुष्ट, मांसल, मेदुर, भिन्न, मेदस्विन, पीवस, पीवन् २.स्पष्ट, सुबोध ३. मूर्ख, जड ४. विषम, नतोन्नत।

—बुद्धि, वि. (सं.) मंदमति, जड।

स्थूलता, सं. स्त्री. (सं.) पीनता, पीवरता, मेदुरता, स्थूलत्वं २. गुरुता-त्वं, भारवत्ता ३. विषमता ४. महाकायता।

स्थैर्य, सं. पुं. (सं. न.) दे. 'स्थिरता'।

स्थौल्य, सं. पुं. (सं. न.) दे. 'स्थूलता'।

स्नात, वि. (सं.) कृतस्नान, दे. 'नहाया हुआ'।

स्नातक, सं. पुं. (सं.) आप्लुतव्रतिन्।

स्नान, सं. पुं. (सं. न.) आप्ल(प्ला)वः, अभिषेकः, उपस्पर्शः-र्शनं, अवगाहनम्।

—करना, क्रि. अ., स्ना (अ. प. अ.), अवगाह् (भ्वा. आ. से.), दे. 'नहाना'।

—गृह, सं. पुं. (सं. न.) स्नान,-शाला-आगारं।

स्नायु, सं. स्त्री. (सं. पुं.) वस्नसा, स्नसा, नसा, शानतंतुः, नाडी-डिका-डिः (स्त्री.), वायु-वाहिनी नाडी, वातरज्जुः (स्त्री.)।

स्निग्ध, वि. (सं.) चिक्कण, चिक्क, चक्कण, मसृण, श्लक्ष्ण, अमृष्ट २.सस्नेह, सतैल, तैलाक्त।

स्निग्धता, सं. स्त्री. (सं.) चिक्कणता, मसृणत्वं, श्लक्ष्णता २. तैलवत्ता, स्नेहवत्ता ३. प्रियता।

स्नीढ, वि. (सं.) मृदुल, कोमल, स्निग्ध २. अनुरक्त, आसक्त।

स्नुषा, सं. स्त्री. (सं.) पुत्र-,वधूः (स्त्री.)।

स्नेह, सं. पुं. (सं.) प्रेमन् (पुं. न.), अनु-, रागः, प्रीतिः (स्त्री.), प्रणयः २. चिक्कणपदार्थः (घृततैलादि)।

—करना, क्रि. स., दे. 'प्रेम करना'।

—संस्कृत, वि. (सं.) घृत-तैल,-पक्व-भ्राण।

—सार, सं. पुं. (सं.) मज्जा, दे.। वि., तैल,-प्रधान-बहुल।

स्नेहनीय, वि. (सं.) स्नेह्य, तैलार्ह २. प्रेम,-पात्र-भाजन, अनुराग,-अर्ह-योग्य।

स्नेही, सं. पुं. (सं. = हिन्) स्नेहशीलः, अनुरागिन्, प्रणयिन्, प्रेमिन्, मित्रम्। वि. (सं.) चिक्कण, मसृण।

स्पंज, सं. पुं. (अं.) छिद्रिष्ठं, *स्फण्टम्।

स्पंदन, सं. पुं. (सं. न.) स्पंदः, ईषत्कंपनं, प्रस्फुरणं, क्षिप्रकंपः।

स्पर्द्धा, सं. स्त्री. (सं.) विजिगीषा, संघर्षः, अहमहमिका, ईर्ष्या, सापत्न्यम्।

—करना, क्रि. अ., प्रति-,स्पर्धृ (भ्वा. आ. से.), संघृष् (भ्वा. प. से.), विजि(सन्नंत-विजिगीषते), अभिभवितुं यत् (भ्वा. आ. से.), ईर्ष्य् (भ्वा. प. से.)।

स्पर्श, सं. पुं. (सं.) सं-,स्पर्शः-र्शनं, संसर्गः, संपर्कः, परामर्शः २. त्वगिन्द्रिय-ग्राह्यगुणविशेषः ३. क'दिवर्गपंचकं (व्या.) ४. वायुः।

—करना, क्रि. स., सं-,स्पृश् (तु. प. अ.), दे. 'छूना'।

स्पष्ट, वि. (सं.) परि-,स्फुट, प्रकट, व्यक्त, प्रत्यक्ष, उल्वण, उद्रिक्त, विशद, सुबोध, स्पष्टार्थ। सं. पुं. (सं.) वर्णोच्चारणप्रयत्नप्रकारः (व्या.)।

—कथन, सं. पुं. (सं. न.) सरल-निष्कपट,-भाषणं २. कथनप्रकारभेदः परवचनानामवित-थोपन्यासः (व्या.)।

—वक्ता, सं. पुं. (सं.-क्तृ) स्पष्टवादिन्।

स्पष्टतया, क्रि. वि. (सं.) प्रकटं, स्पष्टं, व्यक्तं, स्फुटं, प्रत्यक्षम्।

स्पष्टता, सं. स्त्री. (सं.) वैशद्यं, विशदता, स्फुटता, उल्वणता, सुबोधता, सरलता, आर्जवं, सारल्यं, निर्व्याजता।

स्पिरिट, सं. स्त्री. (अं.) जीव,-आत्मन्, देहिन्, जीवः २. प्राण-जीवन-शक्तिः (स्त्री.), वीर्यं ३. तत्त्वं, सत्त्वं, सारः ४. मद्यसारः।

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

—लेप, सं. पुं., सारप्रदीपः ।
मेथिलेटिड—, मिथिलितमद्यसारः ।
रेक्टिफाइड—, शुद्धमद्यसारः ।
स्पीच, सं. स्त्री. (अं.) व्याख्यानं, कथनम् ।
स्पृहा, सं. स्त्री. (स.) कामना, इच्छा दे. ।
स्पेक्टरास्कोप, सं. स्त्री. (अं.) रश्मिवर्णदर्शकम् ।
स्पेशल, वि. (अं.) विशिष्ट, विलक्षण, असामान्य, असाधारण, सविशेष, विशेष ।
—गाड़ी, सं. स्त्री. (अं.+हिं.) विशिष्टशकटी ।
स्फटिक, सं. स्त्री. (सं.) स्फाट(टि)कं, भासुरः, स्फाटिकोपलः, धौतशिलं, सितोपलः, विमल,-स्वच्छ-मणिः, स्वच्छः, अमर-निस्तुष,-रत्नं, शिवप्रियः ।
स्फुट, वि. (सं.) व्यक्त, प्रकट, प्रकाशित, दे. स्पष्ट २. विकसित ३. शुक्ल ४. नाना-बहु-वि,-विध ।
स्फुरण, सं. पुं. (सं. न.) स्फुरणा, स्फुरित, स्फुलनं, स्फुरः-रणा, स्फ(स्फा)रणं, ईषत्-किंचिच्,-चलनम् ।
स्फुलिंग, सं. पुं. (सं.) अग्निकणः, दे. 'चिनगारी' ।
स्फूर्ति, सं. स्त्री. (सं.) क्षिप्रता, शीघ्रता, आशुकारिता-त्वं, त्वरा २. स्फुरणं ३. मानसी प्रेरणा ।
स्फोटक, सं. पुं. (सं.) पिडकः, गंडः । वि., स्फोटः ।
स्फोटन, सं. पुं. (सं. न.) सशब्द,-भेदनं-विदारणं २. प्रकाशनं, प्रख्यापनं ३. शब्दः, ध्वनिः ४. आकस्मिक,-भंजनं-विदलनं-स्फुटनम् ।
स्मय, सं. पुं. (सं.) अभिमानः, दर्पः ।
स्मर, सं. पुं. (सं.) कंदर्पः, मदनः, कामः २. स्मृतिः (स्त्री.), स्मरणम् ।
स्मरण, सं. पुं. (सं. न.) आध्यानं, अनुचिंतनं, २. स्मृतिः (स्त्री.) ।
—करना, क्रि. स., अनु-सं-, स्मृ (भ्वा. प. अ.), अनुचिंत् (चु.), अनुबुध् (भ्वा. प. से.), आध्यै (भ्वा. प. अ.) २. कंठस्थं-मुखस्थं कृ ।
—दिलाना या—कराना, क्रि. प्रे., व. 'स्मरण करना' के प्रे. रूप ।
—रखना, क्रि. स., चित्ते-चेतसि-मनसि निधा (जु. उ. अ.), मनसि धू (चु.) ।
—पत्र, सं. पुं. (सं. न.) स्मारण-स्मारक,-पत्रम् ।
—शक्ति, सं. स्त्री. (सं.) स्मृति (स्त्री.), स्मरणं, धारणा, चिन्ता, आ-,ध्यानं, आध्या, चर्चा, चिंतितिः (स्त्री.), चिन्तः, चिंतिया ।
स्मरणीय, वि. (सं.) आध्येय, अनुचिंतनीय, स्मर्तव्य, स्मरणार्ह, मनसि धारणीय ।
स्मशान, सं. पुं., दे. 'श्मशान' ।
स्मारक, वि. (सं.) अनुबोधक, स्मृतिकर । सं. पुं. (सं. न.) स्मृति-स्मरण,-चिह्नं ३. स्मारकदानं, स्नेहाभिज्ञानम् ।
स्मार्त्त, वि. (सं.) स्मृति,-विहित-संबंधिन् २. स्मरणसंबंधिन् ।
स्मित, सं. पुं. (सं. न.) ईषद्धास्यं, मंदहासः, दे. 'मुसकराहट' ।
स्मृति, सं. स्त्री. (सं.) दे. 'स्मरणशक्ति' २. स्मरणं, आध्यानं, अनु,-चिंतनं-बोधः ३. आर्यधर्मशास्त्राणि (मनुस्मृति आदि) ।
—कार, सं. पुं. (सं.) धर्मशास्त्रकारः ।
—वर्द्धिनी, सं. स्त्री. (सं.) ब्राह्मी ।
स्यंदन, सं. पुं. (सं.) रथः, दे. ।
स्यात्, अव्य. (सं.) दे. 'शायद' ।
स्यानपन, सं. पुं. (हिं. स्याना) नैपुण्यं, दाक्ष्यं, चातुर्यं २. कैतवं, शाठ्यं, व्याजः ।
स्याना, वि. (सं. सज्ञान) चतुर, बुद्धिमत् २. धूर्त्त, कापटिक ३. वयस्क, युवन् । सं. पुं., वृद्धः २. ग्रामणीः ३, चिकित्सकः ।
—पन, सं. पुं., दे. 'स्यानपन' ।
स्यानी, वि.(स्त्री.) (हिं. स्याना) चतुरा, दक्षा, बुद्धिमती । सं. स्त्री., युवती-तिः (स्त्री.), समकन्या, परिणेया, उद्वाह्या ।
स्यार, सं. पुं. (सं. शृगालः) जंबुकः, दे. 'गीदड़' ।
स्याह, वि. (फ़ा.) काल, कृष्ण, असित ।
—दिल, वि. (फ़ा.) दुष्ट, खल, पाप ।
स्याही, सं. स्त्री. (फ़ा.) मशी,-षी-सी, मशिः षिः-सिः (सब स्त्री.), मेला २. कालिमन् (पुं.), कृष्णता, श्यामता ३. कज्जलभेदः ४. कलंकः, लांछनम् ।
—चट, —चूस, सं. पुं., मसी,-शोषकं-चूसकं (पत्रम्) ।
—जाना, मु., यौवनं अति-इ (अ. प. अ.) ।
—लगाना, मु०. अपवद्-परिवद्-निन्द् (भ्वा. प. से,), कलंक (ना. धा., कलंकयति) ।
स्यूत, वि. (सं.) स्यून, निष्यूत २. व्यूत,-

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

व्यूत, प्रोत, पुटित, पुटित ३. विद्ध । सं. पुं. (सं.) स्योतः, प्रसेवः ।

स्रवण, सं. पुं. (सं. न.) स्र(स्रा)वः, प्रस्रावः, २. गर्भ,-पातः-स्रावः ३. मूत्रं ४. प्रस्वेदः ।

स्रष्टा, सं. पुं. (सं.-ष्टृ) विश्वस्रज्, ब्रह्मन्, चतुर्मुखः । वि. (सं.) रचयितृ, निर्मातृ ।

स्रुवा, सं. पुं. (सं. स्त्री.) स्रुवः, स्रुच् (स्त्री.), स्रूः (स्त्री.) (यज्ञपात्रभेदः) ।

स्रोत, सं. पुं. (सं. न.) स्रोतस् (न.), प्रवाहः, ओघः, धारा, मंदाकः २. नदी ३. देहछिद्राणि (न. बहु.) ४. वंशपरंपरा ।

स्लीपर, सं. पुं. (अं. स्लिप्पर) फर्फरीका ।

फुल—, सं. पुं. (अं.) पूर्णफर्फरीका ।

स्लेट, सं. स्त्री. (अं.) लेखन-,शिला, अश्म-पाषाण,-पट्टिका, *पाषाणी ।

स्व, सं. पुं. (सं.) आत्मन् २. बंधुः, ज्ञातिः (पुं.) २. धनम् । वि. (सं.) स्वीय, स्वकीय, आत्मीय, स्वक, निज, स्व-,निज-,आत्म- ।

—कार्य, सं. पुं. (सं. न.) निजकृत्यम् ।

—कुटुंब, सं. पुं. (सं. न.) निजपरिवारः ।

—जन, सं. पुं. (सं.) बंधुवर्गः, बांधवाः (बहु.) ।

—देश, सं. पुं. (सं.) जन्म-मातृ,-भूमिः (स्त्री.) ।

—देशी, वि. (सं.-शीय) निजदेश-,संबंधिन्-निर्मित ।

—धर्म, सं. पुं. (सं.) निजकर्तव्यं २. सहज-गुणः ।

—राज, सं. पुं. (सं. राज्यं) निजशासनम् ।

स्वकीय, वि. (सं.) स्व, निज, आत्मीय, स्वीय ।

स्वकीया, सं. स्त्री. (सं.) नायिकाभेदः (सा.), स्वीया, स्वामिन्येवानुरक्ता ।

स्वगत, सं. पुं. (सं. न.) आत्म-मनो,-गतं, अश्राव्यं, नाट्ययोक्तिभेदः (सा.) ।

स्वच्छंद, वि. (सं.) स्वतंत्र, स्वाधीन, स्वायत्त, २. नियंत्रण-शून्य, स्वैर-रिन्, निरंकुश, स्व-रुचिः । क्रि. वि. (सं.न.) स्वातंत्र्येण,स्वच्छंदतः ३. स्वैरं, निरंकुशं, यथेष्टम् ।

—चारिणी, सं. स्त्री. (सं.) वेश्या ।

—चारी, वि. (सं.-रिन्) स्वेच्छाचारिन्, स्वैर, स्वैरिन् ।

स्वच्छंदता, सं. स्त्री. (सं.) स्वातंत्र्यं, स्वाधीनता, स्वतंत्रता २. स्वैर(रि)त्व, निरंकुशता ।

स्वच्छ, वि. (सं.) अमल, निर्मल, विमल, मल,-हीन-रहित २. शुभ्र, श्वेत, उज्ज्वल ३. पवित्र, शुचि, वि-,शुद्ध ४. स्पष्ट, विशद ५. स्वस्थ, निरामय ६. निःकपट, ऋजु ७. पारदर्शक ।

स्वच्छता, सं. स्त्री. (सं.) निर्मलता, विमलता २. उज्ज्वलता ३. पवित्रता ४. पारदर्शकता ।

स्वतंत्र, वि. (सं.) ६. 'स्वच्छंद' वि. तथा क्रि. वि. ।

स्वतंत्रता, सं. स्त्री. (सं.) दे. 'स्वच्छंदता' ।

स्वतः, अव्य. (सं.) स्वेच्छया, स्वयमेव, स्वेच्छा-पूर्वं, कामतः (सब अव्य.) ।

—प्रमाण, वि. (सं.) स्वतःसिद्ध, स्वयंसिद्ध, प्रमाणान्तरनिरपेक्ष ।

स्वत्व, सं. पुं. (सं. न.) शक्तिः (स्त्री.), अधिकारः, वशः २. आधिपत्यं, स्वामित्वं, प्रभुत्वम् ।

स्वप्न, सं. पुं. (सं.) स्वापः, प्रसुप्तस्य ज्ञानं २. निद्रा २. असंभवकल्पना, वृथा-मिथ्या-वासना, आभासः, स्वप्नसृष्टिः (स्त्री.) ।

—देखना, स्वप्नं दृश् (भ्वा. प. अ.), स्व-प्नायते (ना. धा.)

—दोष, सं. पुं. (सं.) निद्रायां शुक्रपातः ।

—में बोलना, क्रि. अ. उत्स्वप्नायते (ना. धा.) ।

—लेना, मु., असंभवकल्पनां कृ, मनसा कल्पय् (प्रे.) ।

स्वभाव, सं. पुं. (सं.) धर्मः, गुणः, प्रकृतिः-संसिद्धिः (स्त्री.) स्वरूपं, नि-,सर्गः, भावः, २. प्रकृतिः-मनोवृत्तिः (स्त्री.), शीलं ३. अ-भ्यासः, नित्यव्यवहारः ।

—सिद्ध, वि. (सं.) सहज, प्राकृतिक, स्वाभाविक ।

स्वभावतः, अव्य. (सं.) प्रकृत्या, जन्मतः, निसर्गतः ।

स्वयं, अव्य. (सं.) आत्मना २. स्वत एव, विनाऽऽयासं, प्रयत्नं विना ।

—भू, सं. पुं. (सं.) ब्रह्मन् (पुं.) २. कालः ३. कामदेवः ४. विष्णुः ५. शिवः । वि. (सं.) स्वयं,-जात-भव, स्वज, स्वयोनि ।

—वर, सं. पुं. (सं.) स्वयंवरणं, स्वेच्छया पतिवरणम् ।

—वरा, सं. स्त्री. (सं.) पतिंवरा, वर्या ।

—सिद्ध, वि. (सं.) स्वतःसिद्ध २. स्वतः-सफल ।

—सेवक, सं. पुं. (सं.) स्वेच्छासेवकः ।

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

—सेविका, सं. पुं. (सं.) स्वेच्छासेविका ।
स्वर् , सं. पुं. (सं. अव्य.) स्वर्गः २. परलोकः ३. आकाशः-शम् ।
स्वर, सं. पुं. (सं.) ध्वनिः, शब्दः, नि-,स्व-(स्वा)नः, नि-,नादः, घोषः, क्ष्वेडः, विरुतं, वि-,र(रा)वः, ह्रादः २. षड्जादयः सप्त-स्वराः (संगीत) ३. उदात्तादिस्वरत्रिकं (व्या.) ४. अच् , मात्रा (व्या.) ५. उच्छ्वासः ।
—भंग, सं. पुं. (सं.) स्वर,-क्षयः-भेदः, गल-रोगभेदः ।
—संक्रम, सं. पुं. (सं.) स्वरारोहावरोही (संगीत) ।
स्वरूप, सं. पुं. (सं. न.) निजरूपं, आकारः, आकृतिः (स्त्री.) २. मूर्तिः (स्त्री.), चित्रं ३. ३. प्रकृतिः (स्त्री.), स्वभावः ४. देवादिभिः धृतं रूपं ५. देवादिरूपधारिन् । वि., (सं.) तुल्य, सम २. सुंदर, मनोज्ञ ३. पंडित, प्राज्ञ । क्रि. वि., रूपेण, रीत्या (उ. प्रमाण-स्वरूपः= प्रमाणरूपेण) ।
स्वर्ग, सं. पुं. (सं.) स्वर्-देव-अमर-सुर-ऊर्ध्व,-लोकः, स्वर् (अव्य.), नाकः, त्रिदिवः, त्रिदशालयः, मन्दरः, शुक्रभवनं, सुखाधारः २. ईश्वरः ३. सुखं ४. सुखदं स्थानं ५. आकाशः-शम् ।
—काम, वि. (सं.) स्वर्ग-,लिप्सु-इच्छुक ।
—गमन, सं. पुं. (सं. न.) स्वर्-स्वर्ग,-गतिः (स्त्री.)-लाभः, निधनं, मरणम् ।
—गामी, वि. (सं.-मिन्) स्वर्गमनकर्तृ २. स्व-र्गस्थ, स्वर्गत, मृत ।
—तरु, सं. पुं. (सं.) कल्पवृक्षः ।
—धेनु, सं. स्त्री. (सं.) कामधेनुः ।
—नदी, सं. स्त्री. (सं.) स्वर्गापगा, मंदाकिनी ।
—पति, सं. पुं. (सं.) इन्द्रः ।
—पुरी, सं. स्त्री. (सं.) अमरावती ।
—लोक, सं. पुं. (सं.) दे. 'स्वर्ग' (१) ।
—वधू , सं. स्त्री. (सं.) स्वर्गस्त्री, अप्सरस् (स्त्री.) ।
—वास, सं. पुं. (सं.) स्वर्गवासः २. मरणं, निधनम् ।
—वासी, वि. (सं.-सिन्) देवलोकवासिन् २. दिवंगत, प्रेत, मृत, स्वर्यात, स्वर्गस्थ ।
स्वर्गीय, वि. (सं.) स्वर्ग्य, दिव्य, दैव २. दे. 'स्वर्गवासी' (२) ।
स्वर्ग्य, वि. (सं.) दे. 'स्वर्गीय' (१, २) ।
स्वर्ण, सं. पुं. (सं. न.) दे. 'सोना' (१) ।
स्वर्लोक, सं. पुं. (सं.) दे. 'स्वर्ग' (१) ।
स्वल्प, वि. (सं.) अत्यल्प, अतिस्तोक ।
स्वशुर, सं. पुं. (सं. श्वशुरः) दे. 'ससुर' ।
स्वस्ति, अव्य. (सं.) कल्याणं-मंगलं-भद्रं भूयात् (असीत) । सं. स्त्री. (सं.) कल्याणं, मंगलं २. सुखम् ।
—वाचन, सं. पुं. (सं. न.) मंगल्यमंत्रपाठः २. धार्मिककृत्यभेदः (गणेशपूजनादि) ।
स्वस्तिक, सं. पुं. (सं.) मंगल्यचिह्नभेदः (卐) २. मंगलद्रव्यं ३. चतुष्पथः ।
स्वस्तिका, सं. स्त्री., दे. 'स्वस्तिक' (१) ।
स्वस्त्ययन, सं. पुं. (सं. न.) कार्यारम्भे मंगल्यमंत्रपाठः २. समृद्धिसाधनम् ३. दलाग्रे नीयमानो मंगल्यजलकलशः । ४. दानप्राप्त्य-नन्तरं विप्रस्याशीर्वादः ।
स्वस्थ, वि. (सं.) अनामय, निरामय, नीरोग, अरोग, कुशल, कुशलिन्, सुस्थ, आरोग्यवत, नीरुज-ज् , निर्व्याधि, व्याधि-रोग, रहित २. 'सावधान' दे. ।
—चित्त, वि., शान्तमनस्क ।
स्वांग, सं. पुं. (सं. स्वांगं>) (उपहासार्थे) अनु,-करणं-कारः-कृतिः (स्त्री.), विडंबनं २. वेषांतरं, छद्म-कृतक-कपट,-वेषः ।
—रचना, क्रि. स., वेषं परिवृत् (प्रे.), वेषान्तरं रच् (चु.) २. नट् (चु.), अभिनी (भ्वा. प. अ.) ।
स्वांगी, सं. पुं. (सं. स्वांगं>) नटः, अभिनेतृ, शैलूषः, रंगाजीवः २. भंडः ३. दे. 'बहुरूपिया' ।
स्वागत, सं. पुं. (सं. न.) उपचारः, संमानः, संभावना, सत्,-कारः-कृतिः (स्त्री.) क्रिया, प्रत्युद्गमन, प्रत्युद्व्रजनं, प्रत्युत्थानं, प्रत्युद्-गमः-गतिः (स्त्री.) ।
—करना, क्रि. स., प्रत्युद्गम् (भ्वा. प. अ.), प्रत्युद्व्रज् (भ्वा. प. से.) ।
—समिति, सं. स्त्री. (सं.) स्वागतकारिणी सभा ।
स्वातंत्र्य, सं. पुं. (सं. न.) दे. 'स्वतन्त्रता' ।
स्वाति, सं. स्त्री. (सं.) स्वाती, पञ्चदशं नक्षत्रम् ।
स्वाद, सं. पुं. (सं.) आस्वादः, रसः २. आनंदः, रसानुभूतिः (स्त्री.) ३. इच्छा ४. माधुर्यम् ।

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

—लेना, क्रि. स., आ-,स्वाद् (भ्वा. आ. से.), रस् (चु.) २. ईषत् खाद् (भ्वा. प. से.)। सं. पुं., आ-,स्वादनं, रसनम्।

स्वादिष्ट, वि. (सं. स्वादिष्ठ) सरस, सुरस, रुच्य, रुचिकर (–री स्त्री.) स्वादु २. मिष्ट।

स्वादीला, वि. (सं. स्वादः>) दे. 'स्वादिष्ट'।

स्वादु, वि. (सं.) 'स्वादिष्ठ' २. मधुर, मिष्ट, ३. मनोज्ञ।

स्वादुता, सं. स्त्री. (सं.) सुरसता, स्वादवत्ता २. मधुरता।

